श्री हर्षपुष्पामृत जैन ग्रन्थमाला-ग्रन्थाङ्क : २३७

श्री महावीरजिनेन्द्राय नमः

शुद्धजिनमार्गप्रदर्शकचैत्यवासिनिराकरणदक्षश्रीमज्जिनेश्वरसूरिविरचितं ॥

श्रीमज्जिनचन्द्रसूरिपदाम्भोजविकसनदिनकरश्रीसिद्धान्तसिन्धुश्रीमज्जिनपतिसूरिसंदर्भितबृहद्वृत्तिसहितम्

उपाध्यायश्रीजिनपालगणिकृतटीप्पनकसंकलितं ॥

# ॥ पञ्चलिङ्गीप्रकरणम् ॥

❖ संशोधकः संपादकश्च ❖

तपोमूर्ति-पूज्याचार्यदेवश्रीविजयकर्पूरसूरीश्वर-पट्टधर-हालारदेशोद्धारक-कविप्रभावक-पूज्याचार्यदेवश्रीविजयामृतसूरीश्वर-पट्टधरः

## पूज्याचार्यदेवश्रीविजयजिनेन्द्रसूरीश्वरः

❖ सहायक ❖

परम शासन प्रभावक पूज्याचार्यदेवश्री विजयरामचन्द्रसूरीश्वर शिष्यरत्नवर्धमानतपोनिधि पूज्य मुनिराजश्री जिनयशविजयजी सदुपदेशतः श्री कृष्णनगर जैन श्वेताम्बर मूर्तिपूजक संघः अमदावाद सैजपुर कृष्णनगरस्थः

प्रकाशिका : श्री हर्षपुष्पामृत जैन ग्रन्थमाला, लाखाबावल-शांतिपुरी (सौरा...

श्री हर्षपुष्पामृत जैन ग्रन्थमाला-ग्रन्थाङ्क : ३ ३ ७

श्री महावीरजिनेन्द्राय नमः

शुद्धजिनमार्गप्रदर्शकचैत्यवासिनिराकरणदक्षश्रीमज्जिनेश्वरसूरिविरचितं ॥

श्रीमज्जिनचन्द्रसूरिपदाम्भोजविकसनदिनकरश्रीसिद्धान्तसिन्धुश्रीमज्जिनपतिसूरिसंदर्भितबृहद्वृत्तिसहितम् ॥

उपाध्यायश्रीजिनपालगणिकृतटीप्पनकसंकलितं ॥

# ॥ पञ्चलिङ्गीप्रकरणम् ॥

❖ संशोधकः संपादकश्च ❖

तपोमूर्ति-पूज्याचार्यदेवश्रीविजयकर्पूरसूरीश्वर-पट्टधर-हालारदेशोद्धारक-कविप्रभावक-पूज्याचार्यदेवश्रीविजयामृतसूरीश्वर-पट्टधरः

पूज्याचार्यदेवश्रीविजयजिनेन्द्रसूरीश्वरः

❖ सहायक ❖

परम शासन प्रभावक पूज्याचार्यदेवश्री विजयरामचन्दसूरीश्वर शिष्यरत्नवर्धमानतपोनिधि पूज्य मुनिराजश्री जिनयशविजयजी सदुपदेशतः श्री कृष्णनगर जैन श्वेताम्बर मूर्तिपूजक संघः अमदावाद सैजपुर कृष्णनगरस्थः

प्रकाशिका : श्री हर्षपुष्पामृत जैन ग्रन्थमाला, लाखाबावल-शांतिपुरी (सौराष्ट्र)

प्रकाशिका - श्री हर्षपुष्पामृत जैन ग्रन्थमाला (लाखाबावल)
श्रुतज्ञान भवन, ४५, दिग्विजय प्लोट जामनगर (गुजरात)

वीर सं. २५२३ विक्रम सं. २०५३ :: सन् १९९७ :: प्रथमवृत्तिः :: प्रतयः ७५०

## ❖ आभार दर्शन ❖

अमारी ग्रन्थमाला तरफथी ग्रन्थमालाना ३३७ ग्रन्थांक तरीके आ पंचलिंगी प्रकरण बृहत् टीका तथा टीप्पनक साथे प्रगट करीए छीए । आ ग्रन्थनुं संशोधन तथा संपादन पूज्य आ. श्री विजय जिनेन्द्रसूरीश्वरजी महाराजे कर्युं छे.

आ ग्रन्थ-परम शासन प्रभावक पूज्याचार्यदेवश्री विजय रामचंद्रसूरीश्वरजी महाराजाना शिष्यरत्न वर्धमानतप १०० ओली उपरांत ५५ ओलीना आराधक पूज्य मुनिराज श्री जिनयशविजयजी महाराज तथा तेमना शिष्य पूज्य मुनिराजश्री मुक्तियश विजयजी महाराजना सदुपदेशथी श्री अमदावाद रोजपुर श्रीकृष्णनगरना श्री श्वेताम्बर मूर्तिपूजक जैन संघ तरफथी प्रगट थाय छे. आ माटे उपदेशक पूज्यमुनिराजो तथा श्री कृष्णनगर श्वेतांबरमूर्तिपूजक जैनसंघनो आभार मानीए छीए तथा फरी आ रीते प्रेरणा अने सहकार आपता रहे ए अभिलाषा राखीए छीए.

ता. १-१०-९७
जामनगर

महेता मगनलाल चत्रभुज
व्यवस्थापक - श्री हर्षपुष्पामृत जैन ग्रन्थमाला

## ❖ अल्पवक्तव्य ❖

समकितना ६७ बोल छे तेमां पांच–लिङ्ग छे. ए लिंग शम संवेग निर्वेद अनुकम्पा अने आस्तिक्य छे. तेनी प्राप्ति आस्तिक्य प्रथम ए क्रमथी थाय छे. जेनुं श्री विशद वर्णन श्री जिनेश्वरसूरीश्वर महाराजे पंचलिङ्गी प्रकरणनी १०१ गाथामां कर्युं छे. आ मूल गाथाओनी मोटी टीका श्री जिनचंद्र सूरीश्वर महाराजना पट्टधर श्री जिनपतिसूरीश्वर महाराजे कर्युं छे. टीकाकारे बृहद्वृत्ति रचीने पंचलिंगनी विशद छणावट करी छे. जे खूबज तात्त्विक समजण आपे छे अने अनेक विषयो मननीय छे.

उपाध्याय श्री जिनपाल गणिवरे टीप्पनीओ द्वारा ग्रन्थने समजावामां सारी सहाय करी छे. पञ्चलिङ्गी प्रकरणनी गाथाओ कण्ठस्थ करवा योग्य छे.

आ समकीतना पांच लिङ्ग खूब मनन करी सौ शिवसुखना भोक्ता बने एज अभिलाषां.

सं. २०५३ आसो सुद १
गुरुवार ता. २-१०-९७

जिनेन्द्रसूरि

# ❖ अनुक्रमणिका ❖


| क्रम | विषयः | पृष्ठं |
|---|---|---|
| १ | उपशम लिङ्गः | ५ |
| २ | संवेगलिङ्गः, | ८२ |
| ३ | निर्वेदलिङ्गः | १०० |
| ४ | अनुकंपालिङ्गः, | १११ |
| ५ | आस्तिक्यलिङ्गः, | १२० |

**गाथा क्रमः**

| गाथा | प्रथमपदः | पृष्ठं |
|---|---|---|
| | **प्रथमलिङ्गम्** | |
| १ | उवसम संवेगो | २ |
| २ | मिच्छागि निवेसस्स | ५ |
| ३ | चउवीस संतिकम्मी | ८ |
| ४ | ववहारहेउ लिङ्गं | १० |
| ५ | पक्खचउम्मास | १३ |
| ६ | जावज्जीव गणंता | १३ |
| ७ | अताचरुईरुव | १५ |
| ८ | तस्सुवसगो | १६ |
| ९ | रूत्तो जगालि | १६ |
| १० | ता सुत्तुचविउत्ता | ७७ |
| ११ | गिहि दिसिबन्धो | ७७ |
| १२ | सढयाए समाइज्ज | ७७ |
| १३ | सढयाए पक्ख | ८० |
| | **द्वितीय लिङ्गम्** | |
| १४ | सम्मदिदीठ्ठी | ८२ |
| १५ | आवायसुंदराविं | ८२ |
| १६ | हा द्दी विलीण | ८३ |
| १७ | ता ताण कए | ८३ |
| १८ | तो नारयवेयणाओ | ८४ |
| १९ | जइ हुज्जइ | ८४ |
| २० | विसयासंसा | ८५ |
| २१ | ता आलगिगेहिं | ९४ |
| २२ | अक्खयमलिकेस | ९४ |
| २३ | मुक्खस्स सुहं | ९४ |
| २४ | पिहियासवा | ९५ |
| २५ | कइया होही | ९६ |
| २६ | धी धी मज्झ | ९६ |
| २७ | इइ गावणासगेओ | ९७ |
| २८ | चारित्तपक्खवाया | ९७ |
| २९ | पाणच्चयेवि | ९८ |
| ३० | संसारियअब्भुदये | ९८ |
| ३१ | चेइयजइसु | ९८ |
| ३२ | इइ किरियाए | ९९ |
| | **तृतीय लिङ्गम्** | |
| ३३ | सम्म दिट्ठी जीवो | १०० |

| | | |
|---|---|---|
| ३४ | बहुसो अणाइ | १०० |
| ३५ | एवं अणंतोजीवो | १०१ |
| ३६ | अच्छिनिमीलीय | १०१ |
| ३७ | सागरगेमं | १०१ |
| ३८ | नरयाओ उवट्टो | १०२ |
| ३९ | दुक्खं नरयसमाणं | १०२ |
| ४० | वाहिसय विहुरियंगो | १०३ |
| ४१ | अप्पिय समागमु | १०३ |
| ४२ | चिंतासंतावेहिय | १०३ |
| ४२ | देवोवि पुढवीकाए | १०४ |
| ४४ | तं सुरविमाण | १०४ |
| ४५ | ता देवमणुव | १०५ |
| ४६ | इत्तो चिय—सततं | १०५ |
| ४७ | वालोह धूल्लि | १०६ |
| ४८ | इय सव्वत्थ | १०६ |
| ४९ | तो जत्थ जत्थ | १०६ |
| ५० | गम्मइ जयंमि | १०७ |
| ५१ | सो सव्वविरइ | १०७ |
| ५२ | इइ भावणा समेओ | १०७ |
| ५३ | सम्मदिट्ठी जीवो | १०८ |
| ५४ | नियय सहावेण | १०८ |
| ५५ | संसारदुक्ख | १०९ |
| ५६ | णायज्जीअविचेणं | १०९ |
| ५७ | कीरेमि बिंबमगल | ११० |
| ५८ | पुढवाइयाण | ११० |


## चतुर्थलिङ्गम्


| | | |
|---|---|---|
| ५९ | एयाहितो बुद्धा | १११ |
| ६० | रोगी सिरावेहो | १११ |
| ६१ | अन्नेसि पवत्तीए | ११२ |
| ६२ | जिणवयणामय | ११२ |
| ६३ | जिणवयणसाहंती | ११२ |
| ६४ | छद्द रिसण | ११३ |
| ६५ | पइमाइगुण | ११३ |
| ६६ | काऊण पुत्थयाइं | ११३ |
| ६७ | गुणरागिणो | ११३ |
| ६८ | वावीकुवतडागाइ | ११४ |
| ६९ | सव्वाणुकंप्पमग्गस्स | ११५ |
| ७० | इत्तो चिय सो | ११५ |
| ७१ | वाणवक पंचतांतय | ११६ |
| ७२ | तह जोइसत्थ कंडाइ | ११६ |
| ७३ | तो अणंकंपपरेण | ११७ |
| ७४ | दाणं न हो | ११७ |
| ७५ | गिहमागयाण | ११८ |
| ७६ | इह सत्तागाराई | ११९ |
| ७७ | एवंविह परिणामो | १२० |


## पंचमलिङ्गम्


| | | |
|---|---|---|
| ७८ | सम्मदिट्ठी जीवो | १२० |
| ७९ | आकयागमं | १२७ |
| ८० | संताणो उ अवत्थु | १२८ |
| ८१ | इह पुण्णपावपभवा | १३० |
| ८२ | पइजंतुगेय | १३२ |
| ८३ | सोवि य संकोय | १३६ |
| ८४ | तव्वइरित्तो | १३७ |

८५ जइपुग्गलाण १४१
८६ सुहणयडीओ १६१
८७ सुहदुहरूवो १७०
८८ पाणवहाईहिन्तो १७२
८९ इत्तो च्चिय अत्थि १८२
९० जइ हुज्जा न १८२
९१ पावट्ठाणोहितो २००
९२ तवसा उ निज्जरा २०१
९३ मिच्छत्ताइनिमित्तो २०७
९४ तदणाइसिद्धजोगो २१०
९५ बज्झाइपयाहीणेव २४४
९६ ता नियपक्खरव २६०
९७ नियमावही न २६१
९८ संताणस्स न २९८
९९ वत्थुसहावो एसो २७९
१०० जवदणंतणेयनाणी २८०
१०१ इय भावणासमेओ २८१


## कथा क्रमः

| क्रमः | कथानाम | पृष्ठं | प्रमाणः | गद्यंपद्यं |
|---|---|---|---|---|
| १ | महाबलकथा | १७ | ८०९ | पद्यं |
| २ | पीठमहापीठकथा | ३८ | २३० | पद्यं |
| ३ | जमालिकथा | ८९ | २८४ | पद्यं |
| ४ | गोष्ठामाहिलकथा | ६५ | ७८(पृष्ठ–१२) | पद्यं |
| ५ | कण्डरीककथा | ८५ | १७८ | पद्यं |

अर्हम् ।

॥ पू.आ. श्री विजयसिद्धिसूरिभ्यो नमः ॥

शुद्धजिनमार्गप्रदर्शकचैत्यवासिनिराकरणदक्षश्रीमद्दुर्लभराजप्रदत्तखरतरबिरुदधारक-
श्रीमज्जिनेश्वरसूरिविरचितम् ॥

# ॥ पञ्चलिङ्गीप्रकरणम् ॥

श्रीमज्जिनचन्द्रसूरिपदाम्भोजविकसनदिनकरश्रीसिद्धान्तसिन्धुश्रीमज्जिनपतिसूरिसंदर्भितबृहद्वृत्तिसहितम् ॥
उपाध्यायश्रीजिनपालगणिकृतटीप्पनकसंवलितम् ॥

अस्याशोकस्य मैत्र्या सततमधिगताशोकताऽहो मया, तद्यूयं तां शाश्वतीं चाभिलषथ तदा सर्वदोषाध्वमेनम् ॥
इत्युच्चैर्मञ्जुगुञ्जद्भसलकुलरवैराह्वयत्यञ्जसेवाशोको लोकान् यदूर्ध्वं प्रथयतु स नृणां मङ्गलं वर्धमानः ॥१॥
अन्तःसंस्थितवाणिपाणिकलितव्यालोललीलाम्बुजप्रश्च्योतन्मकरन्दबिन्दुपटलीसेकातिरेकादिव ॥
स्निग्धा धर्मकथा सुवक्त्रकुहरात् सौरभ्यगर्भा गिरः, स्वैरं यस्य विकस्वरा निरगमन् नन्द्यात् स शान्तिर्जिनः ॥२॥
यद्यपि गिरो गभीरा, जिनेश्वरव्रतिपतेस्तदपि रभसात् ॥ विमतिरपि पञ्चलिङ्ग्याः, कर्तुं प्रावृतमहं विवृतिम् ॥३॥

इह हि गुर्जरवसुंधराधिपश्रीदुर्ल्लभराजसदसि महावादिचैत्यवासिकल्पितजिनभवनवासपरासनासादिताऽसाधारणविसृत्वरकी–

र्त्तिकौमुदीधौतविश्वम्भराऽऽभोगेन, सकलस्वपरसमयपारावारपारदृश्वना, प्रामाणिकपरिषच्छिखामणिना,श्रीजिनेश्वरसूरिणा, कलि-कालदोषात् इदानींतनशरीरिणां बलायुर्मेधादीन् अपचीयमानान् विभाव्य संक्षिप्तरुचिसत्त्वानुग्रहाय षट्स्थानक-पञ्चलिङ्गयाख्यं प्रकरणद्वयं सूत्रितम् ॥

तत्र च षट्स्थानके द्वादशव्रतपरिकर्म्मादिरूपः श्राद्धधर्म्मः प्रत्यपादि, स च सम्यक्त्वमूलः, तच्च निःश्रेयसकल्पविटपिबीजं शक्रचक्रधरकमलासन्धानाऽवन्ध्यनिबन्धनं, दुर्गतिद्वाररोधाऽमोघपरिधायमाणः प्रशस्तसूत्रार्थश्रद्धानरूप आत्मपरिणामो, न चान्तरङ्गत्वाद् एष प्रत्यक्षेण अवसातुं शक्यते, न वा अनवसितोऽस्तित्वादिव्यवहाराय कल्पते, तथा च बहु विशीर्येत, इति, तदवसायाय लिङ्गम् अभिधित्सु-रागमे च उपशमादीनां पञ्चानामपि सम्यक्त्वलिङ्गतया अभिधानात्, तम् अनुसरन्नुप-शमादिलिङ्गपञ्चकसमाहाररूपं पञ्चलिङ्गयाख्यं प्रकरणं प्रारभमाणः सम्यक्त्वस्य च निखिलमङ्गलमौलिमाणिक्यतया तल्लिङ्गानामपि तथात्वं संभावयन् श्रीजिनेश्वरसूरिः प्रत्यूहापोहाय आदौ भावमङ्गलप्रख्य-लिङ्गपञ्चकाभिधायिकां गाथाम् आह-

**उवसम संवेगो वि य निव्वेओ तह य होइ अणुकंपा ॥ अत्थिक्कं चिय पंचवि हवंति सम्मत्तलिंगाइं ॥१॥**

**व्याख्या**-'उपशमादीनि' सम्यक्त्वलिङ्गानि भवन्ति इति सम्बन्धः, तत्र वक्ष्यमाणस्वरूपमिथ्याभिनिवेशव्यावृत्तिः उपशमः, अत्र प्राकृतत्वात् प्रथमाया लोपः ।१। स्वाराज्यषट्खण्डवसुधासाम्राज्यादिसुखम् अखिलमपि कृतकतया अनित्यं परिणामदारुणं च, ततो दुःखहेत्वनुषङ्गेण अस्य दुःखपक्षनिक्षेपात् दुःखमेव इदम् इति मन्वानस्य नित्यनिरतिशयानन्दाभिव्यक्तौ मुक्तौ आत्यन्तिकोऽभिलाषः संवेगः ।२। 'अपिचेति' समुच्चये, नारकतिर्यङ्नरामरदुःखानां श्रुतिस्मृत्यनुभवैस्तन्मयम् इवात्मानं मन्यमानस्य, कथम् अमूनि पुनर्मम न आविर्भविष्यन्ति, इतितेभ्यो मानसोद्वेगो निर्वेदः ३। 'तथाचेति' समुच्चये, 'भवति' जायते,अग्रतः सर्वापेक्षया भवन्तीति क्रियायोगेऽपि अत्र भवति, इत्येकवचनान्ततया तदुपादानम् एकैकशोऽपि इमानि साध्यं प्रत्याययितुम् अलमिति ज्ञापनार्थं, तेन इयं क्रिया मध्यवर्त्तिनी सर्वत्र योज्यते । उपशमो लिङ्गं भवति । एकक एव इत्यर्थः । एवमन्यत्रापि । लाभपूजाद्यलिप्सया कथम् अमी मिथ्यात्वादिदौःस्थ्यात् मोचयिष्यन्त इति, द्रव्यतो भावतश्च परदुःखप्रहाणेच्छा

अनुकम्पा ।४। भगवदुक्तागमोपपत्तिभ्याम् एव उपपन्नो जीवादिपदार्थोऽस्ति । न कुतीर्थ्याभिहिताभ्यां ताभ्यामिति मति–रास्तिक्यम् । अस्ति जीवोऽस्ति परलोकं इति मति–रस्य इत्यास्तिकः ।५। इतीकणन्तो निपातः, तस्य भाव आस्तिक्यम्, 'त्तियेति' एवकारार्थः. स च अयोगव्यवच्छेदे लिङ्गानि इत्यत्र सम्बध्यते, तेन सम्यक्त्वस्य लिङ्गान्येव एतानि, न तु अन्यथापि, यथाश्रुतिसम्बन्धे तु विशेष्यसम्बद्धस्य एवकारस्य अन्ययोगव्यवच्छेदकत्वेन आस्तिक्यस्यैव एकस्य लिङ्गता स्यात्, नान्येषां तथा च लिङ्गपञ्चकाभिधानप्रतिज्ञानं विरुध्येत, 'पञ्चेति' संख्याभिधानं परस्परानपेक्षाणि एतानि सम्यक्त्वगमकानि, न तु सापेक्षाणि । अपि एषामन्यतरद् इत्यपि शब्दार्थः, । उद्देशेनैव पञ्चसंख्यालाभे 'पञ्च' इत्यवधारणार्थं, पञ्चैव लिङ्गानि नत्वन्यानि ।। ननुअन्यानि अपि तानि श्रूयन्ते, तथाच पठ्यते–''सुराभ्यम्मरागो गुरुदेवाणं जहा समाहीए । वेयावच्चे सम्मद्दिट्ठिस्स लिङ्गाइं ? इति चेत् सत्याः, तेषामेषु एव अन्तर्भावेन पार्थक्याऽविवक्षणात्; तथाहि शुश्रूषायास्तावत् आस्तिक्ये अन्तर्भावः,सत्येव तस्मिन् 'यूनोवैदग्ध' इत्याद्युक्तलक्षणायास्तस्याः संभवात्, तथाच तत्कार्यत्वेन तस्यास्तत्रैव अन्तःप्रवेशः, धर्मरागदेवगुरुवैयावृत्त्य–नियमयोस्तु संवेगप्रभवतया तत्रान्तर्भावः,तथाच आचार्य एव संवेगलक्षणं व्याचक्षाणो वक्ष्यति । कइया होही सो वासरुत्ती, इत्यादि, तथा 'चेइय जइ सुवजुज्जईत्यादि, नचैवं रूपोद्यतविहारपरिणामं विना अन्यो धर्म्मरागो नाम, नापि प्रत्यहं स्वशरीरवित्तादेश्चैत्यसाधूपयोगतदध्यवसायौ अन्तरेण अपरो देवगुरुवैयावृत्त्यनियमः तस्माद् उपपन्नम् अवधारणार्थं पञ्चेति, 'भवन्ति' संपद्यन्ते, अत्र समुदितापेक्षया बहुवचनं, 'सम्यगिति' प्रशंसार्थो निपातः, तस्य भावः सम्यक्त्वं, मिथ्यात्वमोहनीयोपशमक्षायोपशमक्षयसमुत्थो देवादिषु तथेति प्रतीतिरूपो जीवपरिणाम इत्यर्थः ।। यथोक्तम्–''**खयउवसमाइएहिं दंसणमोहस्स जीवपरिणामो ।। जो होइ सुहसरुवो सो सम्मत्तं विणिद्दिट्ठो**'' ।।१।। ''**या देवे देवता बुद्धिर्गुरौ च गुरुभावना, । तत्त्वेषु तत्त्वबुद्धिश्च सम्यक्त्वमिदमुच्यते**'' ।।१।। तस्य लिङ्गानि, लिङ्ग्यते गम्यते साध्यम् अनेनेति लिङ्गम्, व्याप्त्युपयिकपक्षधर्मतादिपञ्चरूपोपेतं साधनम् । अनुमीयते हि अमीभिः कार्यैर्जीवपरिणामविशेषत्वाद् अतीन्द्रियमपि सम्यक्त्वं स्वकारणम्, ननु अप्रत्यक्षस्य लिङ्गिनः प्रत्यक्षेण लिङ्गेन अनुमितिर्भवति, धूमेन इव पर्वतनितम्बव्यवहितस्य वह्नेः, अत्र तु

लिङ्गिन इव सम्यक्त्वस्य, तल्लिङ्गानाम् उपशमादीनामपि आत्मपरिणामभेदत्वेन, अप्रत्यक्षत्वात् कथं तैरनुमितिः? सत्यम्, इह उपशमाद्यभिव्यञ्जिकाः कदाग्रहपरिहारेण विधिना वीतरागवन्दनार्चनाद्याः कायिक्यो वाचिक्यश्च चेष्टा उपशमादिशब्दैरभिधीयन्ते उपचारात्, यथा मिथ्यात्वस्य अतीन्द्रियत्वेऽपि तदभिव्यञ्जिका लौकिकदेवपूजननमस्काराद्याः कायवाग्व्यापारा, मिथ्यात्वं गीयन्ते, एतदेव च 'न करेइ सयं मिच्छमित्यादि' ग्रन्थेन दर्शनसप्ततिकायां दर्शितं, तथा इहापि, तथाच उपशमादीनां बाह्यशुभचेष्टात्वेन प्रत्यक्षतया लिङ्गत्वम् उपपन्नम् ।। तदुक्तम्,–''तं उवसमसंवेगाइएहिं लक्खिज्ज पउवाएहिं । आयपरिणामरूवं वज्झेहिं पसत्थजोगेहिं ?'' अन्यथा बाह्यत्वं तेषां न संगच्छेत, लिङ्गलिङ्गिनोरात्मधर्मत्वाविशेषात्, अथवा मा भूवन् अस्मदादिप्रत्यक्षाणि अमूनि,तथापि कुग्रहपरित्यागप्रज्ञापनीयत्वविधिबहुमानाविधित्यागादिभिः प्रत्यक्षाभिःप्रशस्तबाह्य–चेष्टाभिरनुमितैः एभिः सम्यक्त्वम् अनुमीयते, तादृग्नदीपूरदर्शनानुमितेन वर्षेण अङ्कुरप्ररोहवदिति ।। अत एव उपसंहारे 'भावो नज्जइ पच्छाणुभावओ' इत्यादिना, 'तव्विहचिट्ठा अवसियेत्यादिना' तिव्विहचिट्ठाइ पुणो' इत्यादिना च तादृग् बाह्यचेष्टानुमेयत्वं प्रायः प्रत्येकम् एषां सूत्रकार एव वक्ष्यति ।। एवं च यस्य साक्षात् तन्नोक्तं तदेतदनुसारेण स्वयम् अभ्यूह्यं, यथा आस्तिक्यस्य देवादितत्त्वेषु सम्यक् प्ररूपणादिको वाग्व्यापारः, ननु एकेनैव अनौपाधिकसम्बन्धवता लिङ्गेन साध्यसिद्धिश्चेत्, किं लिङ्गपञ्चकाभिधानेन, न चेत् लिङ्गसहस्रेणापि सा न स्यात् ? प्रतीतिदार्ढ्यार्थं चेत्; न, एकेनैव साध्याविना भाविना तेन तत्सिद्धेः, एवं च बहुलिङ्गाभिधानेऽधिकं निग्रहस्थाने प्रसज्येत ?, इति चेत्, न जल्पादिकथायामेव अस्य प्रसङ्गस्य अवतारात् । शास्त्रस्य तु शिष्यव्युत्पादनार्थत्वात्, तस्य च कस्यचित् केनचिल्लिङ्गेन तद् भावात् भूयो लिङ्गाभिधानेऽपि न दोषः; यद्वा शिष्याणां मेधावृद्धये तथा मन्दमेधसाम् एकेन अविनाभाविनापि प्रतीतिदार्ढ्याभावात् तदर्थमपि शास्त्रकाराणां बहुधापि लिङ्गाभिधानं न दोषाय । प्रमाणग्रन्थेषु एकस्मिन्नेव साध्ये अनेकानुमानप्रयोगोपलम्भात्, यदिवा भगवद्भिरागमे समुदितानाम् एषां प्रतिपादनात्, समुदिततद्व्युत्पादनप्रवृत्तस्य प्रकरणकारस्य न कश्चिद् दोषः, अत्र च एषाम् एवं क्रमोपन्यासः किमर्थम् ? इति चेत्, उच्यते मिथ्याभिनिवेशोपशमस्य सम्यक्त्वप्रथमकार्यत्वेन प्रधानत्वाद् आदौ उपन्यासः । न च मिथ्याभिनिवेशवतः संवेगः, तस्य कुतीर्थ्याद्यागमभावितान्तःकरणतया

तात्त्विकमोक्षस्वरूपानभिज्ञत्वेन तत्त्वतस्तदभिलाषाभावात् इति, तद् उपशमानन्तरं संवेगस्य। नचाऽसंविग्नस्य निर्वेदः, तस्य नरकादिदुःखैः आत्मनः तन्मयत्वभावनाऽयोगादिति, तदनन्तरं निर्वेदस्य। न च अनिर्विण्णस्य अनुकम्पा,आत्मौपम्येन सर्वं पश्यतो हि सा स्यात्,तस्य च ऐहिकसुखाभिलाषुकतया तदभावात्, इति तदनन्तरम् अनुकम्पायाः ॥ न च निरनुकम्पस्य वास्तवम् आस्तिक्यं, वस्तुतोऽनुकम्पावत एव तात्त्विकास्तिक्यनिश्चयात्, इति तदनन्तरम् आस्तिक्यस्य, इति। सम्यक्त्वकार्यत्वेऽपि एषाम् एवम् आनन्तर्यक्रमेण उत्पादात् इत्थम् उपन्यासः ॥ यद्वा आस्तिक्यस्य सर्वगतत्वेन बहुविषयतया पश्चादभिधानम्, अथवा पश्चानुपूर्व्या आस्तिक्यादिक्रमेण एषाम् उत्पादात् प्रथमं तथा पाठप्रसक्तौ अपि यथा प्रधानन्यायम् आश्रित्य उपशमादिक्रमेण पाठक्रमो दर्शित इति गाथार्थः ॥१॥

इहच 'पढमिल्लुयाण उदए नियमा संयोजणा कसायाणं ॥ सम्मद्दंसणलंभं भवसिद्धिया वि न लहंति १। इत्याद्यागमप्रामाण्येन केचिद् अनन्तानुबन्धिनाम् उपशमं सम्यक्त्वलिङ्गतया चक्षते, तन्निरसितुं संप्रति प्रथमलिङ्गं व्याचिख्यासु-र्यस्य उपशमः सम्यक्त्वलिङ्गं भवति, तद् दर्शयितुमाह-

**मिच्छाभिनिवेसस्स उ नायव्वो उवसमो इहं लिंगं ॥ चारित्तमोहणीयं जेण कसाया समाइट्ठा ॥२॥**

व्याख्या-'मिथ्या' विपरीतोऽभिनिवेशो'मानसो निश्चयः, सर्वज्ञवचनविपरीतार्थपक्षपात इत्यर्थः, तस्य 'तु'रवधारणे, तेन तस्यैव 'उपशमः' सर्वथापगमः, मिथ्यात्वक्षयोपशमजन्यं हि सम्यक्त्वं, तथाच तदुदयानन्तरमेव मिथ्यात्वकार्यो मिथ्याभिनिवेशः, तद्विरोधित्वात् दिवाकरोदयानन्तरं तम इव उपशाम्यत्येव, 'ज्ञातव्यो'विज्ञेयः,'इहेति' अत्र लिङ्गविचारप्रक्रमे, अनुस्वारश्चात्र प्राकृतत्वात्, 'लिङ्गं' सम्यक्त्वस्य अनुमापकं तत्कार्यत्वात्, यदनन्तरं नियमेन यद् उत्पद्यते, तत्तस्य कार्यम् इतिन्यायात्, तथा च वह्निरिव धूमेन, तेन सम्यक्त्वम् अनुमीयते, इतः स एव लिंगं, न तु अनन्तानुबन्धिनाम् उपशमः, कुत एतद् ? इति चेत्, तत्राह-मोहयति चारित्रं प्रतिविचित्रताम् आपादयति इति मोहनीयम्, 'कृत्यलुटोऽन्यत्रापि' इति कर्त्तर्यनीयरः। मुह्यति आव्रियते अनेनेति वा मोहनीयम्, चारित्रस्य देशसर्वविरतिरूपस्य मोहनीयं चारित्रमोहनीयम्। 'कष्यन्ते' प्राणिनोऽस्मिन्निति कषः,

संसारस्तस्य आयस्तल्लाभहेतुत्वात्, कषम् अयन्ते प्राणिन एभिरिति वा कषाया अनन्तानुबन्ध्यादयः षोडशः । नो कषाया अपि नव कषाया अपि नव कषायसहचरत्वात् कषायाः, एवं पञ्चविंशतिश्चारित्रमोहनीयं, चारित्रावारकमोहनीयकर्मतया 'येन' यस्मात् हेतोः 'समादिष्टाः' निरूपिता भगवद्भिरिति गम्यते, अयमर्थः द्विविधं हि मोहनीयम्. दर्शनमोहनीयं चारित्रमोहनीयं च । तत्र दर्शनमोहनीयं त्रिधा, सम्यक्त्वमिश्रमिथ्यात्वभेदात्, चारित्रमोहनीयमपि द्विधा, कषायनोकषायभेदात्, तदुक्तं "**मोहेइ मोहणीयं तं पि समासेण होइ दुविहं तु ॥ दंसणमोहं पढमं चरित्तमोहं भवे बीयं**" ॥१॥ "**दंसणमोहं तिविहं सम्मं मीसं च तह य मिच्छत्तमिति**" । "जं पि य चरित्तमोहं. तं पि य दुविहं समासओ होइ" "सोलस जाण कसाया नव भेया नोकसायाणं" तथाच चारित्रमोहनीयतया चारित्रम् आवृण्वते कषायाः, न सम्यक्त्वम् । नहि अन्यकार्यम् अन्यः करोति । तथा सति मृत्पिण्डोऽपि पटं कुर्यात् । करणे वा सर्वस्य सर्वकरणप्रसङ्गात् । एवंच चारित्रमोहनीयस्यैव सम्यक्त्वावारकत्वे दर्शनमोहनीयस्य अपार्थक्यं प्रसज्येत । तत्कार्यस्य चारित्रमोहनीयेनैव करणात्; तथा च मोहनीयस्य द्वैविध्यं भज्येत । एवं च यो यद्विरोधी तदभावस्तत्सत्त्वं गमयेत् । यथा तमोऽभावः प्रकाशत्वं, विरोधिनश्चारित्रस्य कषायाः तस्मात् तदुपशमश्चारित्रम् गमयति, न सम्यक्त्वं, चारित्रविरोधित्वेनैव तेषां प्रतिपादनात् । तथाच आगमः "**सव्वे वि हु अइयारा संजलणाणं उ उदयओ होंति । मूलच्छिज्जं पुण होइ बारसण्हं कसायाणं**" द्वादशानाम् अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणानां क्रोधादीनां कषायाणाम् उदयात् 'मूलच्छेद्यम्, इति मूलेन अष्टमप्रायश्चित्तेन छिद्यते, यद् अतिचारजातं तन्मूलच्छेद्यं भवति । एवं च एषाम् उदयश्चारित्रस्यैव अवारको भवति, तथाच कथम् अनन्तानुबन्ध्युपशमः सम्यक्त्वं गमयेत्, चारित्रमोहनीयोपशमत्वेन तस्य सम्यक्त्वेन सह स्वाभाविकसम्बन्धाभावात् । असम्बद्धस्यापि च गमकत्वे सर्वं सर्वस्य गमकं स्यात्, तस्मात् चारित्रमोहनीयत्वाद् अनन्तानुबन्धिनां न तदुपशमः सम्यक्त्वलिङ्गम् ॥ ननु–एवम् आगमविरोधः, तथाहि "**पढमिल्लुयाण उदये नियमा संजोयणा कसायाणं । सम्मद्दंसणलंभं भवसिद्धीया विनलहंति**" ॥१॥ अत्रहि संयोजना कषायाणाम् अनन्तानुबन्धिनाम् उदयस्य सम्यक्त्वलाभनिषेधकत्वेन अभिधानाद् । अवसीयते तदुपशमः सम्यक्त्वलाभकारणम् । तथाच स एव लिङ्गम् ॥ तथा श्रावकप्रज्ञप्त्यामपि

''तत्तत्थसद्दहाणं सम्मत्तं तम्मि पसममाईया ।। पढमकसाओवसमादविक्खया हुंति नायव्वा'' ।।१।। अत्रापि प्रथमकषायोपशमाद्यपेक्षया प्रशमादीनां लिङ्गत्वम् उदितम् ।। तथाच कथं मिथ्याभिनिवेशोपशमो लिङ्गम् ? इतिचेत्, तन्न मिथ्यात्वक्षयोपशमलक्षणस्वकारणभावाभावाभ्यां सम्यक्त्वस्य उत्पादानुत्पादयोः संभवेऽपि, यत् 'पढमिल्लुयाण उदए' इत्यादिगाथायां प्रथमकषायोदये तल्लाभाभावोपवर्णनं, तत्तल्लाभसमये प्रथमकषायाणां नियमेन क्षयोपशमो भवति, तथाच आहत्य तल्लाभनिषेधकस्य मिथ्यात्वस्य सहचारित्वात् सम्यक्त्वलाभपूर्वभावित्वाच्च तेषामपि उदयः तल्लाभं निहन्तीति, तेषां बलीयस्त्वज्ञापनार्थम् । तथाच वस्तुतो मिथ्यात्वोदयालभ्यत्वेऽपि सम्यक्त्वस्य 'पढिमिल्लुयाणमुदए' इत्यादिना प्रथमकषायोदयात् तद्भवसिद्धिकानामपि तल्लाभाभिधानं न विरुध्यते । न च एतावता तदुपशमस्य सम्यक्त्वलिङ्गत्वम् उपपद्यते, तथाहि–असौ वह्नेर्धूम इव कार्यरूपं वा तस्य लिङ्गं स्यात् । तादृग्जलदपटलम् इव भाविनो वर्षस्य कारणरूपं वा, उभयरूपं वा, अजहद् बलाकावृत्तित्वम् इव जलाशयस्य अनुभयरुपं वा ? न प्रथमः; सम्यक्त्वात् प्राग् उत्पादेन तस्य तत्कार्यत्वानुपपत्तेः । मिथ्यात्वक्षयोपशमावसरे एव प्रथमकषायोपशमस्यापि उत्पादात् । तस्य च सम्यक्त्वप्राग्कालभावित्वात् । न च कारणात् कार्यं प्राग् इति संभवति, येन एतदेवं स्यात् ।। न द्वितीयः, मिथ्यात्वक्षयोपशमस्यैव सम्यक्त्वलाभकारणत्वेन तस्य तत्सहचारिमात्रत्वेन तत्कारणत्वानुपपत्तेः । किमत्र नियामकम् ? इतिचेत् न, यथागमं पूर्वसूरिभिस्तथा अभिधानात् । यदाहुः पञ्चाशकवृत्तौ श्रीमदभयदेवसूरयः सम्यक्त्वहेतोर्मिथ्यात्वक्षयोपशमस्य अवसरे ज्ञानावरणानन्तानुबन्धिकषायलक्षणचारित्रमोहनीयादिकर्मणामपि क्षयोपशमोऽवश्यमेव भवति, इति, न च तथापि तदुपशमस्यापि सम्यक्त्वजनकत्वम् अस्तु इति वाच्यम्, मिथ्यात्वक्षयोपशमादेरेव तज्जनकत्वेन प्रतिपादनात् । तथाच आगमः, 'से य सम्मत्ते पसत्थसम्मत्तमोहणीय कम्माणुवेयणोवसमखयसमुत्थे पसमसंवेगाइलिङ्गे सुहे आयपरिणामे पन्नत्ते, इत्यागमेन सम्यक्त्वमोहनीयशुद्धमिथ्या–त्वदलिकसंवेदनोपशमक्षयसमुत्थत्वेनैव तस्याभिधानात् । एतदवष्टम्भेनैव च कषायोपशमस्य लिङ्गत्वेन सूत्रकृतापि उपपत्तिभिरग्रे निराकरिष्यमाणत्वात् ।। न तृतीयः, कार्यकारणत्वे हि तस्य क्रमेण वा स्यातां, यौगपद्येन वा ? नाद्यः, पूर्वदोषात्; नोत्तरोऽसंभवात्, न खलु तदेव तस्यैव युगपत् कार्यं कारणं च

भवितुम् अर्हति । न चतुर्थः, प्रतिबन्धासिद्धेः; तथाहि अनन्तानुबन्धिनां चारित्रमोहनीयत्वेन तदुपशमस्य चारित्रेणैव आहत्यसम्बन्धे, सम्यक्त्वं विना चारित्रं न संभवति, इति तद् द्वारैव सम्यक्त्वेन संबन्धात्, साक्षात् चारित्रमेव असौ गमयेत्, न सम्यक्त्वं, तथा च तेन सहस्वाभाविकसम्बन्धाभावात् कथमयम् अञ्जसा तल्लिङ्गं भवेत्, सम्यक्त्वमोहनीयत्वाभ्युपगमे वा, तेषां दर्शनमोहनीयत्वस्य चातुर्विध्यप्रसङ्गेन 'दंसणमोहं तिविहं' इत्यादि सूत्रोक्तसंख्यानियमस्तस्य भज्येत ॥ श्रावकप्रज्ञप्त्यामपि 'पढमकसाओवसमादविक्खए' इत्यत्र प्रथमकषायाणामभि मिथ्यात्वसहचरत्वेन अतितीव्रतया च सम्यक्त्वप्रतिधरोकत्वविवक्षया तदुत्कटत्वप्रकटनार्थमेव तदुपशमः प्रशमतया व्याख्यातो,न तु मिथ्याभिनिवेशोपशमस्य सम्यक्त्वलिङ्गतानिरासार्थम् । आगमोपपत्तिभ्यां तस्य तल्लिङ्गत्वोपपादनात् । अत एव केवलज्ञानावरणक्षयलभ्यत्वेऽपि केवलियज्ञानस्य कषायबलीयस्त्वप्रतिपत्त्यर्थम् ''केवलियनाणलंभो नन्नत्थ खए कसायाणं''इत्याद्यागमेन कषायक्षयलभ्यत्वं तस्य प्रत्यपादि । ''एवंच पयईए कम्माणं वियाणिउं वा विवागमसुहं ति । अवरद्धे वि न कुप्पइ उवसमओ सव्वकालंपि'' इति श्रावकप्रज्ञप्तौ अपि कोपोपशमः प्राग् अभिहिततात्पर्य्यपरतया नेतव्यः, । एषैव च कषायबलिष्टता आवश्यकेऽपि उपशमश्रेणिशिखरमध्यासीनस्यापि यथाख्यातचारित्रपात्रतया जिनसगोत्रस्यापि प्रतिपातं दर्शयता श्रीभद्रबाहुस्वामिना अभिव्यञ्जिता । यदाह—''उवसामं पुव्वणीया गुणमहया जिणचरित्तसरिसंपि ॥ पडिवाइंति कसाया किं पुण सेसे सरागत्थे'' । एवं च सति यदा परकार्येषु अपि केवलज्ञानोत्पत्तिप्रतिरोधादिषु अमीषामव्याहता शक्तिः, तदा तस्याःस्वकार्ये किं वर्णनीयम्, तस्मात् कषायाणां चारित्रावारकत्वात् न तदुपशमः सम्यक्त्वलिङ्गम् इति स्थितम् इति गाथार्थः ॥२॥ इदानीं कषायोपशमस्य लिङ्गत्वाभ्युपगमे अनिष्टप्रसङ्गद्वयमाह—

**चउवीससंतिकम्मी मिच्छाभावं न पाउणा इहरा ॥ अणउदये वा सम्मं सासादणरुवं कहं हुज्जा ॥३॥**

व्याख्या—'चतुर्विंशतिः' अष्टाविंशतेर्मोहनीयप्रकृतीनां मध्यात् अनन्तानुबन्धिनां विसंयोजनेन चतुर्विंशतिसंख्यानि

१ नमो जिनपतये ॥ युगवरजिनपतियतिपतिविरचितशुभपञ्चलिङ्गिकाविवृतेः । क्वचिदपि किञ्चिद्विषमं पदमहमज्ञोऽपि विवृणोमि ॥१॥ 'सदिति' सत्तासम्बन्धसंक्रमेति ॥ पगइ ठिइस्स पएसाण अन्नकम्मत्तणेण य ठियाणं । जं अन्नरुपकम्मलिठावणं संकमो एसो ? बंधणसंकमलद्धलाभकम्मस्स रुप अविणा,सो निज्जरण संकम्मेहिं सब्भावो जो य सा सत्ता २। निर्जरणसंक्रमाभ्याम् अविनाशे यः सद्भाव इति योगः ॥

सत्कर्माणि, 'सदिति'[1] कर्मपुद्गलानां बन्धसंक्रमाभ्यां लब्धात्मलाभानां निर्जरणसंक्रमनिष्पादितस्वरूपप्रच्यवाभावे, सद्भावः सत्ता तदवस्थितानि कर्म्माणि प्रकृतयश्चतुर्विंशतिसत्कर्म्माणि तेषां समाहारः चतुर्विंशतिसत्कर्म तद्विद्यते यस्य स चतुर्विंशतिसत्कर्मी, तावतैव स विश्रान्तो न मिथ्यात्वादिक्षयं प्रत्युद्युक्तवान्, ततः स कालान्तरं तथाविधसामग्र्यभावात् । अयमर्थः, इह केनचित् सम्यग्दृष्टिना सता अनन्तनुबन्धिनो विसंयोजिताः, ततस्तथारूपप्रवर्द्धमानप्रशस्ताध्यवसायाभावात् मिथ्यात्वम् अगमत् ।। ततो मिथ्यात्वप्रत्ययात् भूयोऽपि अनन्तानुबन्धिनो बन्धुम् आरब्धस्ततो यावत् अद्यापि संक्रमावलिकानुषक्तबन्धावलिकां[1] नातिक्रमति, तावत्तेषाम् उदयाभावात् चतुर्पिंशतिसत्कर्म्मा भवति, ततश्च स 'मिथ्याभावं''मिथ्यात्वं 'न प्राप्नुयात्' न लभेत 'इतरथेति' अन्यथा कषायोपषमस्य लिङ्गत्वाङ्गीकार इत्यर्थः । इदमुक्तं भवति, एवं किलात्र कषायोपशमलिङ्गवादिनोऽनुमानम् अवतरति, विवादाध्यासितः पुरुषः सम्यक्त्वसम्पन्नोऽनन्तानुबन्ध्युपशमवत्त्वात्, य एवं स एवं, यथा श्रेणिकादिरिति, । तन्न, चतुर्विंशतिसत्कर्मणा मिथ्यात्वं गतेन अनन्तानुबन्धिनां बन्धसमये तदनुदयवता व्यभिचारात्, तस्य तदुपशमवतोऽपि मिथ्यात्ववत्त्वात् ।। व्यभिचारे चावश्यम् उपाधिसंभवात्, अप्रयोजकत्वं हेतोः, तथाहि मिथ्यात्वक्षयोपशमादिमत्त्वम् अत्र उपाधिः, । न श्रेणिकादिरनन्तानुबन्ध्युपशमवत्त्वात् सम्यग्दृष्टिः किन्तु मिथ्यात्वक्षयादिमत्त्वात् विवादाध्यासितश्च अनन्तानुबन्ध्युपशमवान् अपि भविष्यति मिथ्यात्वक्षयाद्यभवात् सम्यग्दृष्टिरपि न भविष्यति को दोषः, तद्यदि कषायोपशमो लिङ्गम् । प्रसङ्गान्तरमाह,'अण इति' आर्पत्वात्पदैकदेशेपि पदसंवेतकरणात् अनन्तानुबन्धिनः, एवमन्यत्रापि, द्रष्टव्यम्, अनन्तं भवम् अनुबध्नन्ति इत्येवं शीला अनन्तानुबन्धिनः, तेषाम् उदयो यथा स्वस्थितिबद्धानां कर्मपुद्गलानाम् अपवर्त्तनादिकरणविशेषात्[2] स्वभावतो वा उदयसमयप्राप्तानां विपाकवेदनम्, अत्र 'वाशब्दः' पूर्वानिष्टपक्षात् पक्षान्तरद्योतकः । 'सम्मंति' सम्यक्त्वं, 'सासादनरूपं ?' सासादनलक्षणम् आयमौपशमिकलाभलक्षणं सादयति, हापयति, आसादनम् अनन्तानुबन्धिकषायवेदनं, तैरुक्तो यलोपः, अयमाशयः—कस्यचित् अनादिमिथ्यादृष्टेः कथंचित् अन्तर्मुहूर्त्तसमयस्थितिकमौपशमिकसम्यक्त्वं प्राप्तवतो जघन्यतः समयशेषायाम् उत्कृष्टतः षडावलिकाशेषायां तत्स्थितौ कुतोऽपि कदध्यवसायात् अनन्तानुबन्ध्युदयतो अद्यापि मिथ्यात्वम् अनासादयत



१ 'संक्रमावलिकेति,' यत्र कर्म्मप्रकृतेः प्रकृत्यन्तरे संक्रमो भवति सा संक्रमावलिका,ततश्च संक्रमावलिकया सह बन्धावलिका संक्रमानुषक्तबन्धावलिकां तां प्रत्येकं यावत आवलिकाद्वयं नातिक्रामतीत्यर्थः ।। २. 'अपवर्त्तनादीति,' य तत्र बहुरसस्थितिकमेव आयुष्ककर्म्मादिकं प्रहारादिना स्वल्परसस्थितिकं क्रियते,

औपषमिकसम्यक्त्वलाभोऽपसरति, ततः सह तेन वर्तते सासादनं, यदि वा सह आस्वादनेन स्तोकसमयं सम्यक्त्वसुधारसलेशरसज्ञेन वर्त्तते, सास्वादनं, यथा अभ्यवहृतपरमान्नः पवनक्षोभादिदोषात् तद्वमन् तद्रसम् आस्वादयति, तथा असौ अपि मिथ्यात्वाभिमुख्येन सम्यक्त्वम् उद्वमन् तद्रसं रसयतीति ॥ न च एतन्न सम्यक्त्वसंज्ञाम् अश्नुते; अनन्तानुबन्ध्युदयत्त्वेन अत्यन्तनिकटमिथ्यात्वो–वदयवत्त्वात् ? इतिवाच्यम्, सिद्धान्ते तस्यापि तत्तयाभिधानात्, तथाच अवाचि एकविध्यादिसंख्याभेदसम्यक्त्वव्याख्यानावसरे श्रीमदभयदेवसूरिभिः ''खइयाई सासायणसहियं चउविहं तु विन्नेयं ॥ तं सम्मत्तभंसे मिच्छत्त अपत्तिरुवं तु'' तथाच अनन्तानुबन्धिनाम् उदये 'तत्कथं' केन प्रकारेण 'भवेत्' जायेत, न कथंचिदित्यर्थः ॥ नहि यदभावो यस्य लिङ्गं स तद्भावेऽपि भवति, तदाहि वर्षाभावो भूतस्य वाय्वभ्रसंयोगस्य लिङ्गम्, इति वर्षभावेऽपि भवेत्; नचैवं, एवं कषायोपशमश्चेत् सम्यक्त्वलिङ्गम्, तदा कषायोदये तन्न भवेत्, भवति च कषायोदयेऽपि सास्वादनसम्यक्त्वं, ततो न तदुपशमस्तस्य लिङ्गम् इति गाथार्थः ॥३॥ अस्मिन्नेव अभ्युपगमे दूषणान्तरमाह–

**ववहारहेउ लिङ्गं बारस तुरिए गुणम्मि उ कसाया ॥ आइल्लाण विसेसो न टुट्टभासाइगम्मो उ ॥४॥**

व्याख्या–बाह्यासाधारणलक्षणैः सामान्यतो विपर्यस्ततया छद्मस्थानाम् अन्तस्तत्त्वावगमो व्यवहार इह विवक्षितः प्रत्यक्षज्ञानिभिरेवहि अशेषपर्य्यायवत्तया विशेषतोऽवैपरीत्येन तदाकलनात् । तस्य हेतुः साधकतमं प्रथमालोपः प्राकृतत्वात् 'लिङ्गं' गमकं भवतीति शेषः ननु लिङ्गं यदि व्यवहारहेतुस्ततः कषायोपशमेनैव सम्यक्त्वावगमलक्षणव्यवहारसिद्धेः, किम् अन्योपन्यासेन ? इतिचेत्, न, अभिप्रायानवगमात्, लिङ्गं हि अवैपरीत्येन ज्ञातं साध्यसिद्धेरङ्गं, न अज्ञातम्, नापि विपर्य्ययेण ज्ञातं, नहि धूमोऽज्ञातो बाष्पादिभावेन वा ज्ञायमानो वह्निम् अनुमाययितुम् अलम्; यद्येवं ज्ञात एव कषायोपशमो लिङ्गं भविष्यति ? इति चेत् न, ज्ञानोपायाभावात् कषायाणामनेकत्वेन केवलानन्तानुबध्युपशमस्य ज्ञातुमशक्यत्वात्; तथाचाह 'बारसेत्यादि' यतो द्वादश द्वादशसंख्याः कषायाः 'तुर्ये' चतुर्थे, अविरतसम्यग्दृष्टिनाम्नि 'गुणे' पदैकदेशे पदसमुदायोपचारात् गुणस्थाने, तुरवधारणे स च द्वादश इत्यत्र योज्यते, तेन द्वादशैव न न्यूनाधिकाः, उदयन्त इतिशेषः, अयमर्थः, सम्यक्त्वं हि चतुर्थे गुणस्थाने तत्त्वेह

अनुमातुमिष्टं कषायोपशमेन, तत्रच अप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनक्रोधादिचतुष्कभेदात् द्वादशैव कषाया उदयम् आसादयन्ति; ननु एवं तर्हि सिद्धं नः समीहितं, स्वरसेनैव अनन्तानुबन्ध्युपशमस्य सिद्धत्वात् लिङ्गत्वसिद्धेः ? इतिचेन्न, तज्ज्ञानस्य मृग्यमानत्वात्, तस्य च अद्यापि अनुपपत्तेः;कथमिति चेत् ? उच्यते आत्माधिकरणाः खलु एते कषायाः । स च अस्मदादीनाम् अतीन्द्रियस्तद् अतीन्द्रियत्वे तेषामपि अतीन्द्रियत्वं परमाण्वतीन्द्रियत्वे तद्गतरूपादिवत् । ततो यदि आत्मनि केवला एव अनन्तानुबन्धिनः प्रादुष्युस्ततः केनचित् लिङ्गेन तज्ज्ञानात्, ततः कयाचित् सुसामग्र्या तद्व्यावृत्त्या तदुपशमस्यापि कथंचिद् अवगमात् लिङ्गत्वं सिद्ध्येत् नतु एवं, यावता अन्येषामपि द्वादशानां कषायाणां तत्र विद्यमानत्वात् तेभ्यः पार्थक्यम् अनन्तानुबन्धिनां ज्ञातुमिष्टम् । तच्च ज्ञातुं न शक्यते । साजात्यात्; ननु सजातीयत्वेऽपि यथा वर्णावयवसंस्थानादिव्यावर्त्तकधर्मयोगात् शावलेयबाहुलेयादिगोपिण्डानां भेदोऽवधार्यते, तथा इहापि भविष्यति । नच व्यावर्त्तकधर्मयोगोऽत्र नास्तीति वाच्यं दुष्टानिष्टपरुषा–रुन्तुदभाषाप्राणिप्राणप्रहाणनिरपेक्षहिंस्रकर्म्मादीनां स्वकार्याणाम् इतरकषायेभ्यो व्यावर्त्तकानाम् अनन्तानुबन्धिष्वपि भावात् ? न, तेषां साद्दश्येन व्यावर्त्तकत्वानुपपत्तेः । अत एव यत्र वर्णसंस्थानानाम् अत्यन्तसाधर्म्यं तत्र गवादिपिण्डात् चिरं तन्मैत्रीजुषो गोपालादयोऽपि विवेक्तुम् अपारयन्तो विपर्यस्यन्ति, अत्यन्तसाजात्यं च कषायकार्याणां सूत्रव्याख्यायां भावयिष्यते । तस्माद् उपायाभावेन कषायोपशमज्ञानाभावात् न तल्लिङ्गत्वं प्रतीमः । एतदेवाह–''आइल्लाणेति'' आदिमानाम् अनन्तानुबन्धिनाम् इतरकषायेभ्यो विशेषो भेदो वैधर्म्यम् इति यावत्, न दुष्टभाषादिगम्यः, तुरवधारणे, स च भिन्नक्रमो नञा संबध्यते, तेन 'न' नैव दुष्टभाषा अत्यर्थासभ्यकर्कशधातुकमर्मस्पृग्वचनानि, आदिशब्दात् निःशंकतया जन्तुसन्ततिव्यपरोपनादयः कायव्यापाराः, जीववधसंकल्परूपाश्च मनोव्यापारा गृह्यन्ते, तदादिभिस्तत्प्रभृतिभिः । वाचिककायिकमानसचेष्टाभिः गम्यो बोध्यः । अनन्तानुबन्ध्यपगमेऽपि ताद्दग्दुर्भाषादिसंभवात् । तथाहि श्रीमन्महावीरजिनदेशनासमधिगतजीवाजीवादितत्त्वः सुरासुरैरपि प्रवचनं प्रति अक्षुभितसत्त्वः सन्निकृष्टसिद्धिवधूसंगमसुखसुधावृष्टिः क्षायिकसम्यग्दृष्टिरपि श्रेणिकक्षितिपतिः कदाचिच्छिशिरमास–निशीथिन्यां प्रावारबर्हिर्भूतकोमलभुजलताशीतस्पर्शसंवेदनविनिद्राणामह्वि तरङ्गिनीतटनिर्ध्यातध्यानव्यग्रासंवीततपःकृशितगा–

त्रचारित्रपात्रमहामुनिस्मृत्यारोहात् कथं स भवितेति गिरमुद्गृणन्तीं चेल्लनादेवीम् अधिकृत्य समुन्मिषदुपपतिरिरंसाशङ्काकलङ्कोल्ले-खसमुच्छलदुद्दहलकोपज्वलनज्वालापरितापात् दशनकोटिक्षतरदच्छदः शोणनयनो भ्रूभङ्गतरङ्गितवदनोऽविरलविमलस्वेदोदबिन्दु-संदोहस्तवकितवपुः प्राणेभ्योऽपि प्रेयस्तया प्रतिक्षणं प्रत्यवेक्ष्यमाणाया अस्या अपि यदा इयं गतिस्तदा का वार्त्ता अन्यासाम् इति विचिन्त्य सकलमन्तःपुरं प्रदीपय इत्यभयकुमारम् आज्ञापयामास । ततः किंचित् प्रत्यागतचेतनःसंदेहापनोदाय गत्वा भगवदन्तिकं प्रणिपत्य च भगवन् ! किम् एकपत्नी चेल्लना न वा ? इति अनुयुक्ते भगवता चैकपत्नी इति उत्तरिते, संजातानुत्तरानुतापः तूर्णं स्वमन्दिरं प्रत्यागन्तुम् आरेभे । आगच्छतश्च अभयोऽपि कुतोऽपि असद्विकल्पात् विपर्यस्तमतिः तातो मामेवम् आज्ञापयति, इति विभाव्य अवरोधसविधातृण्यां प्रदीप्य अन्तरा पितुः संघटितः । ततः पित्रा अवाचि, किमनुष्ठितम् । अभयोऽब्रवीत्, यदादिष्टं तातेन, ततः क्षपितानन्तानुबन्धिचतुष्टयदर्शनत्रिकोऽपि अन्तःपुरदाहश्रवणभूयःप्रज्वलितप्रबलकोपवह्निः निखिलसाराज्यधुरमा-वहनधौरेयम् अप्रतिमौत्पत्तिक्यादिबुद्धिचतुष्कनिष्कपितगीष्पतिमनीपावैभवं प्रतिपदं प्रभावनाप्रसाधितवीतरागशासनं निखिलनिजतनयावतंसमपि अभयकुमारं प्रत्युवाच; यद्येवं ततस्त्वमपि किमिति तत्र न प्रविष्टः, ततः प्रव्रजिष्याम्यहं किं ममाग्निप्रवेशेन आत्महत्यया इत्यभिधाय असौ भगवत्पार्श्वे प्राव्राजीदिति ॥

तथा आदिजिनप्रथमश्रावको भरतपतिरपि रणभुविभ्रातुर्बाहुबलिनो वधाय चक्रम् उच्चिक्षेप । ततो बाहुबली कवलीकृतानन्तानुबन्धिकषायोऽपि सचक्रमेनं, चूरयामि इति चिन्तयामास इति ॥ तदेवं श्रेणिकभरतबाहुबलिनां सम्यग्दृष्टितया अनन्तानुबन्धिनाम् उपशमेऽपि अस्ति यथाक्रमं दुष्टवाक्कायमनश्चेष्टानां संभव इति, न ताभिरनन्तानुबन्धिनाम् इतरकषायेभ्यो विशेषोपलम्भ इति कथं तदुपशमो लिङ्गं स्यात् ॥ ननु कथं मिथ्यादृष्टिवर्त्तिनाम् अनन्तानुबन्धिनां सम्यग्दृष्ट्यादिवर्त्तिभिरप्रत्याख्यानादीकषायैः भेदेऽपि दुर्भाषादिसाम्यम्? इतिचेत् सत्यं, कश्चित् मिथ्यादृष्टिश्चतुर्थस्थानरस-परिणतैस्तीव्रोदयैरनन्तानुबन्धिभिरप्रत्याख्यानादीन् कषायान् बद्धवान् स च कदाचित् सम्यक्त्वादिगुणस्थानम् अवाप्तवान् तस्य च कथंचित् कारणानुरूपचतुःस्थानरसपरिणताप्रत्याख्यानाद्युदयेऽनन्तानुबन्धिभिः सह दुर्भाषादि साम्यं, संभाव्यते इत्यदोषः,

न च एष विशेषो नोपलभ्यते इत्येकात्मापत्तिरितिवाच्यम् ? नहि अस्मदादिभिर्यन्नोपलभ्यते तन्नास्ति, तथा सति भूनिखातनिधानादीनाम् अनुपलम्भमात्रेण विद्यमानानामपि तेषां नाशः स्यात्, अतीन्द्रियदर्शिभिरेव तेषां तथाविधविशेषोपलम्भात्, अत एव अनन्तानुबन्ध्युपशमस्य अज्ञायमानत्वेन अलिङ्गत्वं ब्रूमः, यदिवा आदिमानां कषायाणां 'विसेसुत्ति' विश्लेषो विच्छेदः क्षपितत्वेन अपगम इति यावत् सन्नपि श्रेणिकादीनां दुष्टभाषया हेतुभूतया न गम्यः, तादृग् दुर्भाषया तेषाम् अस्मदादिभिराद्यकषायोदयस्यैव अवगतेरित्यर्थः, अतस्तदुपशमस्य कथं लिङ्गत्वमिति गाथार्थः ॥४॥ सांप्रतम् अनिष्टप्रसङ्गान्तरापादनेन कषायाणां विशेषान्तरप्रत्याचिख्यासया गाथायुगलमाह–

**पक्खचउम्मासवच्छरजावज्जीवाणुगामिरूवो उ ॥ न खलु विसेसो अविरय तिरियगई पसंगाओ ॥५॥**
**जावज्जीवमणंता मिच्छदिट्ठी कहं लभे सम्मत्तं ॥ देसजइणो न कहवा मणुयाउ य वद्धजोगा उ ॥६॥**

**व्याख्या**–'पक्षम्' अर्धमासं 'चतुर्मासं' चतुरो मासान् 'वत्सरं' वर्षं 'यावज्जीवम्' आजन्म, अनुगच्छन्ति उदयद्वारेण प्राणिनम् अनुसरन्ति, 'अनुगामिनः' भावप्रधानत्वाच्च निर्देशस्य अनुगामित्वमित्यर्थः, तेन तद् रूपस्तल्लक्षणः देवगत्यादिप्राप्तिपर्यन्तः, तुरप्यर्थे, नेति निषेधे, खलुरवधारणे, तेन नैव विशेष्यन्ते परस्परं भिद्यन्ते अनेनेति, विशेषो भेदको धर्मः, अस्तीति शेषः, तेनायमपि विशेषः कषायाणां नास्ति इत्यर्थः, अयं हि कषायोपशमलिङ्गवादिनोऽभिप्रायः यदुत ''पक्ख चउम्मासवच्छर जावज्जीवाणुगामिणो कमसो देवनरतिरिय नारगगइ साहणहेयवो भणिया'' इत्यागमात् पश्चानुपूर्व्या चतुर्णामपि संज्वलनादीनां भेदः सिध्यति, तथाहि अत्र पक्षादिकालमानेन अमी संज्वलनादय उदयमाना देवनरतिर्यङ्नरकगतिहेतवो भणिताः, एवं च सति दुष्टभाषादिना मा भूत् तद्भेदः तथापि यावज्जीवभावित्वेन नरकगतिहेतुत्वेन अनन्तानुबन्धिनाम् इतरेभ्यो भेदो भविष्यति, तथाच तज्ज्ञानात् तदुपशमस्य लिङ्गत्वं समीचीनमिति चेन्न, एवंहि भेदाभ्युपगमे दूषणान्तरप्रसङ्गात् तथाचाह 'अविरयेत्यादि' विरमति स्म' सावद्ययोगेभ्यो निवर्त्तते स्म विरतः, न विरतो अविरतः, एष हि सम्यग्दृष्टिरपि अविरतिहेतुकं दारुणनरकादि दुःखफलं कर्मबन्धं, विरतिफलं च निरर्गस्वर्गापवर्गसुखसंसर्गं जानानोऽपि अप्रत्याख्यानोदयाद्

विरतिं नाभ्युपेति, ततश्च तस्य अविरतस्य, अविरतसम्यग्दृष्टेः, षष्ट्याः प्राकृतत्वात् लोपः, तिर्यग्गतिप्रसङ्गात् तिर्यग्गति-गमनयोग्यायुर्बन्धप्राप्तेः, भवदभिहितागमेऽप्रत्याख्यानकपायोदयस्य तिर्यग्गतिहेतुत्वेन अभिधानात् तस्य च तदुदयभावात्, न चैवमस्ति सम्यग्दृशां नरकाद्यबद्धायुषां वैमानिकसुरेषु एव सिद्धान्ते आयुर्बन्धश्रवणात्, तदुक्तम् '**सम्मद्दिट्ठी जीवो विमाणवज्झं न बंधए आउं । जइ वि न सम्मत्तजढो अहवा बद्धाउओ पुव्विं ॥** तस्माद् अयमपि न विशेष इति भावः ॥५॥

तथा 'यावज्जीवं' जीवितं यावत् विवक्षितागमे उदयम् अधिकृत्य 'अनन्ताः' अनन्तानुबन्धिन उक्ता इति शेषः, ततः किम् इत्यत आह 'मिथ्या' विपरीता भक्षितहृत्पूरस्य सितादिषु प्रीतिमप्रतीतिवद् अर्हत्प्रणीतजीवाजीवादितत्त्वगोचरा दृष्टिः प्रतिपत्तिर्यस्य स तथा, 'कथं' केन प्रकारेण 'लभेत' प्राप्नुयात्, सम्यक्त्वं न कथंचिदपि इति भावः ॥ भवन्मतेऽनन्तानुबन्धिना यावज्जीवोदयवत्तया सम्यक्त्वप्राप्त्यवसरप्रतिघातकत्वात्, न चैवम् इष्यते तस्मिन्नेव जन्मनि भूयसां मिथ्यादृशां कयाचित् सुसामग्र्या सम्यक्त्वलाभश्रवणादिति, तथा सर्वसावद्ययोगस्य 'देशे' एक व्रतविषयस्थूलसावद्ययोगादौ सर्वव्रतविषयानुमतिवर्ज-सावद्ययोगान्ते यतिर्विरतिर्येषां ते तथा, देशेन एकदेशेन वा स्थूलप्राणातिपातविरमणादिना, यतयः साधवः, नतु सर्वतः प्रत्याख्यानावरणोदयेन तेषां सर्वविरतिपरिणामाभावात्, ततश्च देशयतयश्च पञ्चमगुणस्थानवर्त्तिनः, 'कथं वा' केन वा प्रकारेण, वा विकल्पे न च मनुजायुर्बन्धयोग्यास्तु तत्र मनुजायुषो नरायुपो बन्धः आयुष्कर्मदलिकानां जीवप्रदेशैः सह वह्नयस्पिण्डवत् अन्योन्यानुबन्धस्तस्य योग्या उचिताः, चः समुच्चये स च देशयतय इत्यत्र योजित एव, तुरवधारणे स च नञा संबध्यते तेन अयमर्थः, त्वदुक्तागमाभिप्रायेण देशयतयः कथं वा मनुजायुर्बन्धयोग्या नैव अपि तु तद् योग्या एव, प्राप्नुवन्ति प्रकृतागमे प्रत्याख्यानावरणोदयवतां मनुजगतिप्राप्तिश्रुतेः न चैवं देशविरतानां जघन्यतः सौधर्म्मे उत्कृष्टतोऽच्युते उपपातप्रतिपादनात् यदाह '**अविराहियसामन्नस्स साहुणो सावगस्स य जहन्नो सोहम्मे उववाओ भणिओ तेलोक्कदंसीहिं ॥१॥ उववाओ सावगाणं उक्कोसेणच्चुओ जाव, मणुयाउ बन्धजोगोउ इति** ॥ पाठान्तरेतु एवं व्याख्या-देशयतीनां च कथं वा मनुष्यायुर्बन्धयोगः, विवक्षितागमबलात् तेषां मनुजायुर्बन्धयोगः एव प्राप्नोति, स च न घटां प्राञ्चति इत्यर्थः, अत्र च अनानुपूर्वी अपि व्याख्याङ्गं

भवतीति ज्ञापनार्थम् अप्रत्याख्यानाद्युदयक्रमेण अनिष्टप्रसङ्गा उद्भाविता अन्यथा पश्चानुपूर्व्या प्रत्याख्यानावरणाद्युदयक्रमेण पूर्वानुपूर्व्या च अनन्तानुबन्ध्याद्युदयक्रमेण ते उद्भावयितुं युज्येरन्, संज्वलनोदयस्य च सम्यग्दृशां मिथ्यादृशां वा अविशेषेण देवगतिहेतुत्वाभिधानात् तत्त्वेन अनिष्टप्रसङ्ग उपन्यस्तः, ननु भवत्पक्षेऽपि 'पक्खचउम्मासेत्याद्यागमे वा नानन्तानुबन्ध्यादीनां यावज्जीवाद्युदयवत्ता प्रतिपादनात् सम्यक्त्वाभावो नरकगतिरविरतसम्यग्दृष्ट्यादीनां तिर्यग्गत्यादिप्रसङ्गश्च केन वारणीयः' ततश्चैतद् व्यवस्थितं 'यत्रोभयोः' समो दोषः परिहारश्च तत्समः' नैकः पर्य्यनुयोज्यः स्यात् तादृशार्थविचारणे ।।१।। एवं चायम् आगमो भवतापि कथं समाधेयः ? इति चेत् सत्यं मिथ्यात्वोदयसह कृतानां तीव्रानुभावानामेव च अनन्तानुबन्ध्यादीनां कांश्चिदेव जीवविशेषान् अधिकृत्य उत्कृष्टतो यावज्जीवाद्युदयवत्तया नरकादिहेतुत्वमिति तस्य तात्पर्यात्, यथा श्रुतार्थत्वे त्वस्य तत्र जन्मनि कस्यचित् सम्यक्त्वाद्यलाभात् **'सम्मत्तंमि उ लद्धे ठइयाइं नरयतिरियदाराइं'** इत्याद्यागमान्तरेण विरोधोऽनुसज्येत्, अत एव यदा भव्यो जीवोऽनादिमिथ्यादृष्टिश्चतुर्गतिकोऽपि गिरिसरिदुपलघर्षणनीत्या यथाप्रवृत्तिकरणेन भूयांसं कर्मराशिम् उत्सार्य भव्यत्वपरिपाकाल्लेश्याविशुद्धितोऽपूर्वकरणेन अभिन्नपूर्वं ग्रन्थिं भित्त्वा अनन्तानुबन्धिन उपशमय्य अनिवृत्तिकरणेन अन्तरकरणपूर्वं मिथ्यात्वोपशमेन तत्र प्रथमतया औपशमिकं सम्यक्त्वम् अन्तर्मुहूर्त्तकालमानम् अवाप्नोति, ततोऽपि विशुद्धाध्यवसायः क्षायोपशमिकं, ततोऽपि कश्चिन्मनुष्यः प्रवर्द्धमानपरिणामः क्षपकश्रेणिम् आरोहन् क्षायिकं लभते, तदा क्व अनन्तानुबन्धिनाम् उदयावकाशः, क्व च तेषां सम्यक्त्वादिघातुका शक्तिः, कुतस्त्या च नरकादिनिमित्तता, प्रागेव तेषां क्षयोपशमं नीतत्वात्, एवम् अप्रत्याख्यानप्रत्याख्यानावरणानाम् अपि कषायाणां यथाक्रमं तिर्यङ्मनुष्यगतिहेतुत्वप्रसङ्गो भवदुद्भावितो मत्पक्षे नावतरति, सम्यक्त्वानुगतानां तेषामपि तदानुभावादितया देवगतिहेतुत्वादिति, गाथाद्वयार्थः ।।६।। ननु मा भूत् अनन्तानुबन्ध्युपशमो लिङ्गम् अनन्तानुबन्धिकार्यासद्ग्रहोपशमो लिङ्गं भविष्यति इत्याशङ्क्य निराकरणचिकीर्षया आह–

**अत्तत्तरुईरूवं मिच्छत्तस्स उ न तं अणंताणं । असदग्गहो तओ खलु मिच्छाभिनिवेसओ होइ ।।७।।**



**व्याख्या**-'अतत्त्वेषु' रागद्वेषाभिव्यञ्जककामनीशस्त्रादिपरिग्रहकलङ्कितया देवेषु, परिग्रहारम्भदम्भस्तम्भाब्रह्मनिमग्नतया

गुरुषु, धर्म्यस्वर्ग्यहिंसादिप्रतिपादकतया वेदादिषु अपारमार्थिकेषु रुचिस्तत्त्वबुद्धिः, तकारस्य गुरुत्वं प्राकृतत्वात् 'रूपम्' इतरपदार्थविलक्षणं स्वभावो लक्षणं वा, 'मिथ्यात्वस्य' सम्यक्त्वप्रतिपक्षस्यकर्मणः, तुरवधारणे, मिथ्यात्वस्यैव एतद्रूपं, यदुक्तम् **'अदेवे देवता बुद्धिरगुरौ गुरुर्भावना । अतत्त्वे तत्त्वबुद्धिश्च एतन्मिथ्यात्वलक्षणम् ॥१॥** न तद् अतत्त्वरुचिलक्षणं 'रूपम्' 'अनन्तानाम्' अनन्तानुबन्धिनां प्रज्वलनाद्यात्मकतया सामान्यतश्चारित्रावारकत्वस्वरूपत्वेन तेषां प्रसिद्धेः, तथाच सति किमित्याह 'असत्' सर्वज्ञसिद्धान्ततिरस्कृतार्थगोचरत्वात्, अशोभनो, 'ग्रहः' अभिनिवेशपूर्वो व्यापारः, स च लोके मिथ्याभिनिवेशव्यञ्जिका कुदेवकुतीर्थ्यादिषु स्तवनवन्दनपूजनादिदृढप्रयत्नवती बाह्या वाक्कायादिचेष्टा, लोकोत्तरे चोच्छृंखलतया लोकलोको-त्तरविरुद्धकर्मकारिणाम् उत्सूत्रभाषिणां पार्श्वस्थादीनां गृहिदिग्बन्धाद्यासमयोत्तीर्णबाह्यचेष्टा असद्ग्रह इह विवक्षितोऽग्रे सूत्रकृता तथैव वक्ष्यमाणत्वात्, अत्र च असन् इतिवक्तव्ये दकारपाठः प्राकृतत्वात् 'तओत्ति' ततो मिथ्यात्वमूलकार्यत्वेन प्रसिद्धात्, खलुरवधारणे, तत एव मिथ्याभिनिवेशात् प्रवचनबाधितार्थविषयगाढमानसनिर्बन्धात्, भवति जायते नानन्तानुबन्धिभ्यः, अयमाशयः यदिहि अनन्तानुबन्धिनाम् अतत्त्वरुचिस्वरूपं स्यात्, तदा तेषां कार्योऽसद्ग्रहो भवेत् कारणानुरूपत्वात्, तथाच तस्योपशमः सम्यक्त्वकार्यत्वात् तल्लिङ्गंस्यात्, यथा अस्मत्पक्षेऽतत्त्वरुचिरूपमिथ्यात्वकार्यस्य मिथ्याभिनिवेशस्य उपशमः सम्यक्त्वलिङ्गं तत्कार्यत्वात्, नचैवमस्ति **उक्तयुक्तेरेव अनन्तानुबन्धिनाम्** अतत्त्वरुचिरूपत्वाभावात् असद्ग्रहस्य च मिथ्याभिनिवेशकार्यत्वात्, अत एव तत्कार्यत्वेन तदभिव्यञ्जकतया उपचारात् असद्ग्रह एव क्वचिन्मिथ्याभिनिवेश उच्यते, तस्मात्तस्यैव उपशमः सम्यक्त्वलिङ्गं नान्यस्येति गाथार्थः ॥७॥ तदेवम् अनन्तानुबन्ध्युपशमस्य लिङ्गत्वं निरस्य मिथ्याभिनिवेशोपशमस्य लिङ्गत्वं निगमयन् मिथ्याभिनिवेशफलं च निदर्शनैः दर्शयन् गाथाद्वयमाह-

**तस्सुवसमो उ लिंगं सम्मत्तं गमइ जंतुणो नियमो । त्थीबन्धगा तओ एव महाबलो पीढमहापीढा ॥८॥**

**इत्तो जमालिगुट्ठामाहिलमाई वि निण्हगा सव्वे । मिच्छाभिनिवेसाओ मिच्छदिट्ठी परांता वि ॥९॥**

**व्याख्या**-'तस्सुवसमो उ' तस्य पूर्वोपक्रान्तस्य मिथ्याभिनिवेशस्य उपशमः मिथ्यात्वक्षयोपशमात् सर्वथा विगमः,

तुरेवकारार्थः' तस्य इत्यनेन सम्बध्यते तेन तस्यैव उपशमः, 'लिङ्गं' गमकं तच्च 'सम्यक्त्वम्' उक्तरूपं 'गमयति' अस्तित्वेन ज्ञापयति अनुमापयतीति यावत्, जन्तोर्भव्यसत्त्वस्य आत्मनि वर्त्तमानं 'नियमात्' अवश्यंभावेन अव्यभिचारितया इतियावत्, साध्या व्यभिचारिण एव तस्य लिङ्गतया अभिमतत्वात् तथाच प्रयोगः विवादाध्यासितः प्राणी सम्यग्दृष्टिः मिथ्याभिनिवेशोपशमवत्त्वात्, य एवं स एवं यथा श्रेणिकश्रावकः तथाच अयं तस्मात् तथा, तस्मात् तदुपशमे यतितव्यं, तदनुपशमस्य दुरन्तत्वाद इत्याह स्त्रीबन्धकाः स्त्रीतिभावप्रधानो निर्देशः, तेन स्त्रीत्ववेद्यस्य स्त्रीवेदकर्मणो बन्धका आत्मनि अन्योन्यानुगमेन संयोजकाः, तत एव मिथ्याभिनिवेशादेव, के ते अत आह महाबलः प्राक्तनजन्मनि मल्लिस्वामिनो जीवो महाबलनामा राजर्षिस्तथा पीठमहापीठौ श्रीनाभेयपुत्र्योर्ब्राह्मीसुन्दर्योर्जीवौ प्राग्भवे पीठमहापीठाभिधानौ सोदरौ यती, यथा चैषां स्त्रीबन्धकत्वं तथा उदाहरणे व्यक्तीभविष्यति, तथा इतोऽस्मात् दारुणभवभ्रमणकारणात् इत्यर्थः ॥८॥

मिथ्याभिनिवेशात् लिङ्गात्, उत्तरार्धगतस्य तत्पदस्य इह सम्बन्धात् मिथ्यादृष्टयो ज्ञेया इति सम्बन्धः, जमालिः श्रीमन्महावीरजामाता भगवत्पार्श्वे एव प्रपन्नव्रतो राजपुत्रः, 'गोष्टामाहिलः' श्रीमदार्यरक्षितमातुलः तत्समीपे एवाभ्युपेतदीक्षो भिक्षुः, ततो द्वन्द्वः तौ आदि पूर्वौ येषां ते तथा आदिग्रहणात् तिष्यगुप्ताषाढाश्वमित्रगाङ्गत्रैराशिकप्रभृतयो ग्राह्याः, एतत्संविधानकानि च आवश्यकादिभ्योऽवसेयानि, अपिः महाबलाद्यपेक्षया समुच्चये, निह्नुवते मिथ्याज्ञानाद् अश्रद्दालुतया प्रमाणाबाधितमपि भगवद्वचनम् अपलपन्ति न रोचयन्त इतियावत्, निह्नवाः, एकद्व्यादिभगवद्वचनारोचकिनां श्रुते निह्नवसंज्ञा 'सर्वे' समस्ताः सप्तापि इत्यर्थः ॥ मिथ्याभिनिवेशेन सर्वज्ञवचनारोचनात् मिथ्यादृष्टयः' तदुक्तम्, सूत्रोक्तस्य एकस्याप्यरोचनाद् अक्षरस्य भवति नरः, मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम् ।१। तेन मिथ्यादृष्टितया अनुमेया इत्यर्थः, मिथ्याभिनिवेशस्य मिथ्यात्वकार्यतया तल्लिङ्गत्वात्, 'प्रशान्ता' अपि ? मिथ्यात्वोदयानन्तानुबन्ध्युदयवन्तोऽपि शाठ्यादेर्बाह्यवृत्त्या सौम्यमनोवाक्कायत्वेन अविभाव्यमानतदुदया आस्तामप्रशांता इत्यपेरर्थः, यथा चैषां मिथ्याभिनिवेशस्तथा उदाहरणे व्यञ्जयिष्यते इति गाथाद्वयाक्षरार्थः ॥८॥९॥ तत्र महाबलस्य तावत् तदभिधीयते तथाहि । 

जम्बूद्वीप इह द्वीपो विद्यते [१]वेदिसुन्दरः । गर्त्तपूरश्रियं धत्ते मेरोर्यः सुरवेश्मनः ॥१॥ स्त्रीसंगामुकका मुक–समुदंचद्वरविदेहमपि[२] वर्षम् ॥ तत्रास्त्यवरविदेहं गेहं [३]नीतेरनीतेश्च ॥२॥ सलिलावत्यभिधानो विजयस्तत्रास्त्यनन्यजय्यतया । साक्षात् चक्रधराणां विजयोऽनादिप्ररूढ इव ॥३॥ सदार्हद्विहितिप्रीता शोकलोकाधिवासतः । अस्त्यन्वर्था ध्रुवं तत्र वीतशोका महापुरी ॥४॥ बुभूजे तत्र साम्राज्यं [४]प्राज्यस्निग्धरसानुगम् । बलो बलीयान् भूपालः साम्राज्यमिव[५] भोजनम् ॥५॥ देवी च धारिणी तस्य पिबती विधुरंजनम्[६] । श्रीरिव त्यक्तजडधीरुचितस्मृतिभूरभूत् ॥६॥ तयोर्महाबलः सूनुर्बभूव [७]तिमिराजितः । अनिरुद्धरुचिर्बिभ्रद् वैकुण्ठापचितिं स्वभूः ॥७॥ केचित्तत्रान्यदा जग्मुः सूरयस्त्यक्तभूरयः । सवृत्तस्वच्छसच्छायगुणमुक्ता फलोज्ज्वलाः ॥८॥ इन्द्रस्तम्भे सदा न्यप्तनिस्तम्भे ते महावने । रम्भस्तम्भपरीरम्भवर्जितः समवासरन् ॥९॥ जगाम ग्रामणीः पुंसां भूपस्तेषामुपास्तये । पद्माकरान् किमप्राप्य राजहंसोऽवतिष्ठते ॥१०॥ शृण्वतस्तद्गिरं धर्म्यां तस्याभूत् व्रतलालसा । उत्कण्ठा कस्य नोदेति यूनः केकायितश्रुते ॥११॥ प्रजासौख्याय राज्येऽसावभ्यषिञ्चत् ततः सुतम् । प्रावृषेण्यः पयोवाहो वसुधामण्डलं यथा ॥१२॥ क्षितिपो दीक्षितं क्षिप्रं भवत्रस्तमनास्ततः । श्रेयसां विघ्नविघ्नत्वं विदन् कोऽनु विलम्बते ॥१३॥ ततो महाबलो जज्ञे बन्धुरस्कन्धकन्धरः । [८]पार्थिवः संहतोरस्को महाबाहुर्महारथः ॥१४॥ अधिज्यचापनिर्मुक्ता विष्वग् विसृमराः शराः । लग्ना न संगरे केषां हृदि यस्य गुणा इव ॥१५॥ वल्गन् खड्गः करे यस्य [९]द्विरेफसहभूरपि । द्विषामिव चरन् कीर्त्तिरुज्जगार सितं यशः ॥१६॥ अरिसीमन्तिनी सार्धं बाष्पधाराभिरुक्षितः । चित्रं यस्य प्रतापाग्निर्ववृधे वैद्युतो यथा ॥१७॥ मुक्ताहारैः स्तनोत्सङ्गा मुक्ता यस्यारिसुभ्रुवाम् । मन्येऽनुष्णतया[१०] तेषां मत्वा वैयर्थ्यमात्मनः ॥१८॥ शीतोदावारिणि क्षुभ्यन् यरु। निस्वाननिस्वनः।

---

१.वेदिसुन्दर इति, अष्टयोजनोच्छ्रयजगती परिक्षिप्तोऽत एव गर्त्तपूरश्रीधरः ॥१॥ २.वराः सुसंस्थानविशिष्टाः भूषणादिभिर्देहा येषाम्, अथवा वरो अत्युत्कटत्वात् श्रेष्ठो विर्देहोऽनङ्गो येषां ते समुदंचन्तः समुल्लसन्तो यत्र । ३. अनीतेश्चति, अतिवृष्टयाद्यभावस्यं चेति विरोधपरिहाराः । ४. रसाः शृङ्गारादयो माधुर्यादयश्च, ५. आम्रं चूतफलम् आज्यं घृतं ततः सह ताभ्यां वर्त्तते इति । ६.विधुरं, सकष्टं जनं लोकम्, उचितस्मृतेर्भूरुत्पत्तिस्थानम् देवी श्रीसुविधोर्विष्णौ रंजनं तोषणम् विधुर्विष्णो चन्द्रमसीति वचनात् ॥ जडधिः समुद्रः रुचितोऽभीष्टः पुत्रत्वात्, स्मृतिभूः कन्दर्पो यस्याः अनुरणनव्यापारेण चैवमिहार्थान्तरप्रतीतिरेवमन्यत्रापि । ७.तिमिरेण तमसा अज्ञानेनाजितोऽपरिभूतः, रुचिरभिलाषः, कुण्ठा मायाविनः शत्रवस्तेषामपचितिः क्षयः, स्वभूः पुत्रः पक्षान्तरे कामश्च तिमिना मत्स्यविशेषेण राजितः, मीनांकत्वात् ॥ अनिरुद्धेस्तु पुत्रे वैकुण्ठस्य विष्णोरपचितिं पूजां चयोपच्चयोरपचितिरिति वचनात् स्वपितृत्वांत्तस्य अलालसा सातिशयाभिलाषः । ८.पार्थिवो राजा वृक्षश्च, स्कन्धोऽशस्तम्बश्च, महारथः प्रधानयोधः। ९.द्विरेफसहभूरिति कृष्णत्वेन भ्रमरसमानः ॥१०.अनुष्णतयेति, वैधव्येन यौवनमदोष्माभावात्॥

पंचलिंगी ॥१९॥

सस्नाविव प्रयाणेषु दीर्घाध्वातिक्रमक्लमात् ॥१९॥ [1]सहजामप्यसत्तेजःपतङ्गव्रतपाठिनीम् । वीरलक्ष्मीं ध्रुवं रोद्धुं यं नीतिश्रीरशिश्रियत्
॥२०॥ मिथोऽपि परिपन्थिन्यौ यो [2]दक्षिणतयानयः । सपत्न्याविव वीरश्रीनीती सममवर्त्तयत् ॥२१॥ चित्रं [3]परमहेले बृहद्वृत्तिः १ लि.
यज्ज्यांसमपि न प्रियम् । स्वैरिण्यावपि वीरश्रीनीती क्षणममुञ्चताम् ॥२२॥ प्रसृत्वरः प्रभापूरो यत् खड्गस्य मलीमसः ।
जयलक्ष्म्या विभाति स्म स्नान्त्या इव पयःप्लवः ॥२३॥ यं प्रतापाधिकं स्वस्माद् वीक्ष्य भानुर्ध्रुवं ह्रिया । यद्बलोद्धूतभूरेणुच्छन्नं
स्वं बह्वमन्यत ॥२४॥ योऽभूद् द्विषां सुदुर्धर्षो बलभद्रेण सुनुना । अजयो हरिरेकोऽपि सिन्धुरैः किमु तावुभौ ॥२५॥ राज्यं
प्रशासतस्तस्य शश्वत्सहचरा इमे । वयस्याः षडजायन्त गुणाः सन्ध्यादयो यथा ॥२६॥ तथाहि, अचलो धरणश्चैव पूरणश्च
वसुस्तथा । वैश्रवणोऽभिचन्द्रश्च स्निग्धा माहिषदुग्धवत् ॥२७॥ अचलो भूभुजं हित्वा नान्यत्राप्रीयत क्वचित् ॥ शल्लकीविटपाबन्धे
विन्ध्ये हि रमते द्विपः ॥२८॥ धरणस्य न तं हातुम् उत्सेहे जातु मानसम् । कस्तूरिकामृगः क्वास्तां ग्रन्थिपर्णवनं विना
॥२९॥ पूरणोऽपि महीपेन कदाचिन्न व्ययुज्यत । मानसं राजहंसेन विप्रलम्भं किमश्नुते ॥३०॥ वसुर्वसुमतीनाथं न मुमोच
गुणान् विदन् । किं प्रवालरसं विद्वान् माकन्दं कोकिलस्त्यजेत् ॥३१॥ मुक्त्वा वैश्रवणो भूपं नान्यत्र क्वाप्यरज्यत । किं
पश्यन्मालतीजालं भृङ्गः पुष्पान्तरं स्पृशेत् ॥३२॥ अभिचन्द्रो ध्रुवं राज्ञि परीक्ष्य गुणमस्निहत् । विविच्य रज्यते चन्द्रे
चकोरश्चन्द्रिकारसम् ॥३३॥ प्राच्यसत्कृतसंवादिसंपादुकमनोरथाः । प्रान्तः प्रणयिनामाशास्ते दिनान्यत्यवाहयन् ॥३४॥
अतिसौहार्द्रसान्द्रोऽथ तानुवाच महाबलः । इत आरभ्य संभूय कर्माणि विदधीमहि ॥३५॥ पश्यताऽचेतनाः सूक्ष्माः संहत्य
परमाणवः । आरभन्तेऽवयविनो विश्वविश्वक्रियाक्षमान् ॥३६॥ तेऽपि तस्य समश्रौषुर्वचः संभ्रमनिर्भराः सख्यमाकल्पनिर्वाहसुभगं
भावुकं सताम् ॥३७॥ अनवद्येऽन्यदोद्याने तस्यां पुरि वृषोद्यताः । सद्यः समवसस्रुस्ते स्थविराः स्थेमसुस्थिताः ॥३८॥
तदभ्यर्णं ततस्तूर्णं सवयस्यो ययौ नृपः । कः शयालुर्भवेदर्थी श्रुत्वा रत्ननिधिं क्वचित् ॥३९॥ तद्देशनावचः श्रुत्वा घनस्तनितवन्नृपः
। नीलकण्ठ इवाकुण्ठो दीक्षायामुदकण्ठयत् ॥४०॥ पुरो गुरोः स संश्रुत्य तानपृच्छत् सखीनथ । दाक्षिण्याद् हन्त सापेक्षाः ॥१९॥
सन्तो गृह्येऽपि[4] कर्मणि ॥४१॥ बहुमत्वा वचस्तस्य व्रतोत्काास्तेऽपि जज्ञिरे । उदयाभिमुखे पुष्णि नाऽवाचः पुष्कराकराः ॥४२॥
सूनुं राज्ये व्यवस्थाप्य कोशं कुशलधामनि । दीनादीनामनिन्द्येन दानेनापाद्य नन्द्यताम् ॥४३॥ स व्रतं तैः सहादत्त भवभीरुर्महादरात्

१.असत्तेजसोऽशोभनपौरुषाः शत्रवस्तेषु, अथवा असन्तः शत्रवस्तेषां तेजः सुप्रतापाग्निषु पतङ्गव्रतंपतङ्गवद्अशुभवद्भिषु पातुकत्वं पाठयतीत्येवंशीला ताम्॥ २. दक्षणतयेति, दक्षिणनायकत्वेन सहि अन्यया रंजितोऽपि पूर्वां प्रतिसहृदय इव भवतीति ॥ ३. परमहेले, अन्यरमण्यौ जायां संवृद्धम्, अथच प्रकृष्टलीलावत्यौ

। निमज्यन् को न गृह्णाति गाढं फलकमम्बुधौ ॥४४॥ युग्मम् ॥ द्विधाशिक्षामशिक्षन्त क्षन्तारः स्थविरान्तिके । सर्वेऽपि ते किमस्त्यन्यत् करणीयं तपस्विनाम् ॥४५॥ अभूवन् सर्वनिर्वर्ण्यामष्टाङ्गीमपि[1] बिभ्रतः । एकादशाङ्गभाजस्ते श्रुते चित्रमधीतिनः ॥४६॥ तुल्यं तपश्चरेमेति संलापोऽजायताऽन्यदा । तेषां मैत्री ह्यवस्थासु सर्वासु सदृशी सताम् ॥४७॥ अस्त्वेवमिति सर्वेऽपि [2]प्रश्रिताः प्रतिशुश्रुवुः । नहि विप्रतिपद्यन्ते धर्मकर्मसु तादृशाः ॥४८॥ ततस्तपस्यन्तां तेषां गीतार्थोऽपि महाबलः । कर्मशक्तेरचिन्त्यत्वादेवं जातु व्यचिन्तयत् ॥४९॥ गृहेऽहं नायकोऽभूवमेते मदनुनायकाः । एतानतिशये नो चेद् उभयेषां किमन्तरम् ॥५०॥ चतुर्थमुररीकृत्याऽपरेषां पुरतस्ततः । उत्कर्षयितुमात्मानं षष्ठं स निरवीवहत् ॥५१॥ ततो यदेतरे षष्ठमन्वतिष्ठंस्तदा परः । कष्टमष्टममाधत्त लाभाद्यनभिलाषुकः ॥५२॥ अहो अभिनिवेशोऽत्र नृणां हृदि विजृंभते । येनापकर्ण्य देहं स्वमुपयन्ति सुदुष्करम् ॥५३॥ आनुपूर्व्याऽनया कुर्वंस्तपस्यां दुष्करामपि । स मिथ्याभिनिवेशेन मिथ्यात्वावन्ध्यहेतुना ॥५४॥ स्त्रैणनिर्वर्त्तकं कर्म बबन्ध निरुपक्रमम् अन्यथानुपपत्त्येव स्त्रीतीर्थाश्चर्यनिर्मितेः ॥५५॥ युग्मम् ॥ तदानीं च स मिथ्यात्वं सास्वादनमथापि वा । प्राप स्त्रीवेदबन्धस्य नूनं तत्प्रत्ययत्वतः ॥५६॥ व्यावर्तिष्ट ततस्तेन सम्यक्त्वं प्रतिपन्थिना । [3]ओकोरोधादिवानादिसंस्तुतेन बलीयसा ॥५७॥ अहो मिथ्याभिमानस्य महिमा यदमूमुहत् । असौ तमपि हृत्पूरो भ्रमयत्यथवा न कम् ॥५८॥ श्रेयो हन्त्यसखाप्येष सन्नद्धः किमु मायया । केवलोऽप्यनलः प्लोषेत् स्यूतः किमुत वायुना ॥५९॥ मिथ्याभिमानसंस्पर्शात् सत्क्रियाप्यसती भवेत् । हलाहललवश्लेषात् किमभोज्यं न पायसम् ॥६०॥ तपसोपगृहीतोऽपि ज्ञानादीन्न करोत्यसौ । निम्बःक्षीरेण सिक्तोऽपि किं सूते चूतपल्लवान् ॥६१॥ मिथ्याभिमानिनो न स्यात् धर्मः कर्मप्रहाणये । अपथ्यभोजिनो जायुरिव[4] रोगापनुत्तये ॥६२॥ भवविध्वस्तये ध्यानं न मिथ्याभिनिवेशिनः । मन्त्रो न कालदष्टस्य विषं निष्कृषितुं क्षमः ॥६३॥ विविच्य स्वमुखेनेह केचिन्मिथ्याभिमानतः ॥ विस्तारयन्ति शास्त्राणि पुरीषाणि द्विका इव ॥६४॥ सम्यक्श्रुतीः परीक्ष्यापि नोपगच्छन्त्यसदृशः । साक्षात्कृत्यापि न द्राक्षा भक्षयन्ति क्रमेलकाः ॥६५॥ व्रज्यावद् विजिगीषूणां प्रव्रज्यानुगुणा नृणाम् । मिथ्यादृशां त्वनर्थाय विद्येवाविधिसाधिता ॥६६॥ उच्चावचवचःस्पन्दाऽवशंवदगिरामहो[5] । ग्रहिलानां



१. अष्टाङ्गीं शीर्षोर उदर पृष्ठ बाहुद्वयोरुद्वयलक्षणामिति विरोधपरिहारः ॥ २. प्रश्रिताः सप्रणयाः ॥ ३.ओकोरोधादिवेति, शत्रुभूताभिनिवेशेनाऽऽवासस्य व्यापनादिव ॥ ४. जायुर्जीवितौषधम् ॥ ५. अवशंवदगिरामुच्छृंखलवाचाम् ॥

यथा तेषां विद्वत्ताऽपि विडम्बनम् ॥६७॥ संश्लिष्यत्यत एवैतान् नान्त्यापूर्वचतुष्टयी । पुंसः कुलपुरंध्रीव स्वपतिव्यतिरेकिणः ॥६८॥ गरीयांसो गुणाः सर्वे चित्रमेतेन फल्गुना[1] । विकीर्यन्ते प्रचण्डेन वायुनेव दृषत्कणाः ॥६९॥ इत्थं मिथ्याभिमानोऽयमात्मभूरपि दारुणः । त्याज्यो निवृत्तसद्वृत्तो यथा सूनुर्विवेकिना ॥७०॥ स तत्त्वज्ञानसंस्कारात् तस्यापावर्त्तत क्षणात् । उपरागोऽवतिष्ठेत तेजोधाम्नः कियच्चिरम् ॥७१॥ द्विड्नाशादिव सम्यक्त्वं प्रत्यावृत्य महाबलम् । पुनर्भेजे ततः स्वस्थं दिदीपे तत्प्रतिक्षणम् ॥७२॥ विपक्षं नाशयामास तत्र संस्थास्तु तत्तथा । यथा तत्संमुखं भूयो नैक्षतासौ भयादिव ॥७३॥ अर्हत्सिद्धादिवात्सल्यप्रमुखैः कारणैरथ । सम्यग्निषेवितैरेष विंशत्यापि यथायथम् ॥७४॥ आर्हन्त्यकार्मणं कर्म कदाचिन्निरवीवृतत् । चिन्तामण्यसहायाऽपि कामदा किमु विंशतिः ॥७५॥ युग्मम् ॥ अप्येकतपसां तेषां स एवार्हत्त्वमार्जयत् । राज्यं सह भुवामेको लभते राजबीजिनाम् ॥७६॥ अनन्तभवनिर्वृत्तकर्मनिर्मूलनोद्यताः । तप्यमानास्तपोभूयः सिंहनिष्क्रीडितादि[2] ते ॥७७॥ विषेहिरे महाकष्टं सात्विकास्तत्त्वबिन्दवः । न प्रार्णे ह्यधमर्णानामवितीर्णे सुखासिका ॥७८॥ युग्मम् ॥ हित्वाऽथ जर्जरं देहपञ्जरं विधिनाऽविदन् । जयन्ते देवभूयं[3] ते तादृशां काऽपरा गतिः ॥७९॥ देशोनामतिवाह्यायुर्द्वात्रिंशत्सागरीं ततः । वयस्याः प्रागवारोहंस्तत्पुरोगामुका इव ॥८०॥ ततश्च ॥ विद्यते भारते वर्षे कोसलाविषये पुरम् । साकेतनाम सङ्केतनिकेतनमिव श्रियः ॥८१॥ तेषामादिम इक्ष्वाकुवंशकेतुर्विशांपतिः । भीतेरभूरभूत् तत्र प्रतिबुद्धिर्विशुद्धिमान् ॥८२॥ अरिस्त्रीनेत्रनिःशेषकज्जलाऽऽस्वादनादिव । ललन् यस्य करे खड्गः कालिमानं समासदत् ॥८३॥ अङ्गेषु चम्पकारामाऽभिरामा संपदः पदम् ॥ अस्ति संपादितारातिकम्पा चम्पा महापुरी ॥८४॥ तस्या मध्यामधामश्रीश्चन्द्रच्छायोऽभवन्नृपः ॥ द्वितीयश्चन्द्रिकासान्द्रकीर्त्तिलिप्तककुम्मुखः ॥८५॥ प्राग् दस्यूरोनिपीताऽस्रा[4] व्यपजंस्तद् भ्रमादिव ॥ यच्छरा अंशुमन्मौलिमाणिक्येष्वरिभूभुजाम् ॥८६॥ काशीजनपदे दासीकृतनिःशेषमण्डले ॥ पारेगङ्गं लसल्लक्ष्मीरस्ति वाराणसी पुरी ॥८७॥ तस्याममम्लानमानश्रीः शंखः शंख इवोज्ज्वलः ॥ गुणैः संख्यातिगैर्जज्ञे तृतीयः पृथिवीपतिः



१. फल्गुनेति, मोक्षाऽननुगुणत्वान्निरर्थकेन ॥ २. सिंहनिष्क्रीडितादीति, एकादिषोडशोपवासपर्यन्तं, पुनः षोडशोपवासादि एकपर्यन्तं तपो महासिंहनिष्क्रीडितं, दिनानां चतुःशत्या सप्तनवत्यधिकया इति, आदिशब्दात् क्षुद्रसिंहनिष्क्रीडितं, तदपि तपोदिनानां चतुःपञ्चाशदधिकेन शतेनेति ॥ ३. देवानां भावो देवभूयं देवत्वं, भावे भुव इति क्यप्, अविदन् लेभिरे ॥ ४. दस्यूनाम्, शत्रूणाम् उरासि तेभ्यो निपीतं रुधिरम् अस्रं यैः ॥

पंचलिंगी ॥२२॥ ॥८८॥ मुखेष्वरिमृगाक्षीणां स्निग्धान् पत्राङ्कुरानिव ॥ नीलान् शश्वच्चरन्नाप कृपाणो यस्य [1]पीनताम् ॥८९॥ अस्ति देशे
कुणालाख्ये श्रावती [2]स्वस्तिहेतवे । समस्तपस्त्यविन्यस्तस्वस्तिकस्तवका पुरी ॥९०॥ बभूव [3]रुक्मसौन्दर्यसमानोदर्यकायरुक् बृहद्वृत्तिः
॥ रुक्मी तस्यां महीनाथ–स्तुर्यश्चातुर्यधुर्यधीः ॥९१॥ आकर्षद् गाहनाऽभिज्ञो नूनं [4]कुवलयं द्विषाम् ॥ राज्यश्रियोऽवतंसाय १ लि.
यः सख्यकमलाकरात् ॥९२॥ कुरुषु स्वर्नदीकूले फुल्लकाशालिशालिनि ॥ अस्त्यत्र स्वजनागारं नगरं हस्तिनापुरम् ॥९३॥
पञ्चमः समभूत् तत्र निरादीनवमानसः[5] ॥ अदीनशात्रुरुर्वीपः सत्त्वराशिर्नदीनवत् ॥९४॥ यस्योद्योगेऽभ्यमित्रस्य[6] निषेधन्त
इवोन्मदाः ॥ बभुः पुरः करक्षेपैः प्रत्यनीकमनेकपाः ॥९५॥ अक्षामकामकौशल्यकल्पस्त्रीपुंसपेशलम् ॥ पाञ्चालेष्वस्ति कांपिल्यं
पुरं शल्यं हृदि द्विपाम् ॥९६॥ अमन्दवीर्यनिस्पन्दवन्दीकृतपरेन्दिरः ॥ षष्ठः प्रष्ठो गुणैस्तत्र जितशात्रुर्नृपोऽजनि ॥९७॥
युयुत्सयेव वल्गन्तो यस्य वैरिवरूथिनीम् । आह्वयन्तेव यात्रासु हैषाध्वानैस्तुरङ्गमाः ॥९८॥ एवं प्रातिस्विकी रेजे राज्यलक्ष्मीर्यशस्विनः
॥ समभुञ्जत विक्रान्ताः प्रियाः प्रणयिनीरिव ॥९९॥ पथा संचरते नाथः साधितेन पुरोगमैः ॥ इति नीतिश्रुतेर्मार्गं प्रति
जाग्रदिवाग्रधीः ॥१००॥ महाबलात्मदेवोऽपि द्वात्रिंशत्सागरीमथ ॥ अनुभूय ततः पश्चादवातारीन्महीतलम् ॥ युग्मम् ॥१०१॥
नानारूपैः पुरैर्ग्रामैराकरैश्च निरन्तरैः ॥ पूर्णं दाडिमवद् बीजैर्विदेहा अस्ति मण्डलम् ॥१०२॥ आस्तेऽलकासखी तेषु पुरी
विभववैभवैः ॥ मिथिला धर्मकामार्थाऽशिथिलाऽखिलमानवा ॥१०३॥ द्रुमेषु प्रसवा यस्यां मुखसक्तालिनोऽशुभन् । बाणा
मनोभुवो लग्नकालायसफला इव ॥१०४॥ अङ्गनाङ्गपरिष्वङ्गसंजातस्तम्भसंभ्रमाः ॥ मन्ये शनैर्ववुर्यस्यां मधौ मलयवायवः
॥१०५॥ मानिनीमानहानाय कूजितछद्मना रहः । अन्तश्चूतं पिका यस्यामुच्चैर्मन्त्रान् इवाजपन् ॥१०६॥ यस्यां स्वर्भानुभीत्येव
चन्द्रः प्रतिकृतिच्छलात् ॥ अन्तर्बभूव गौरेषु कपोलेषु नतभ्रुवाम् ॥१०७॥ यच्छालकपिशीर्षाणि स्फाटिकानि सहस्रशः ।
शेषस्याधुः शिरोलक्ष्मीं निर्यतो यद्दिदृक्षया ॥१०८॥ प्रासादोर्ध्वं घटान् हैमान् यत्रोद्घाटयितुं करैः । जलाऽऽशयाऽस्पृशद्
भानुः सतृग् अध्वश्रमादिव ॥१०९॥ वातान्दोलितनीरान्तर्दोलच्छायाच्छलान्मुदा । सरस्सु पादपा यस्यां जलक्रीडामिवादधुः ॥२२॥
॥११०॥ नूनमुत्कयितुं यूनः स्त्रीणां यत्र पयोधरौ । व्यानञ्जाऽऽकृष्य[7] पुष्पेषु कलशौ रतिशेवधेः ॥१११॥ यत्र

---

१. पीनतां मृगादिवत् पुष्टत्वं प्रतापातिशयाभिव्यञ्जनोपचित्वात् ॥ २. स्तस्ति क्षेमम् ॥ ३. समानोदर्यति तुल्याः ॥ ४. कुवलयं भूमण्डलं तदेव कुवलयमिन्दीवरम् ॥ ५. निरादीनवमानसोऽक्लिष्टचित्तः ॥ ६. अभ्यमित्रस्य शात्रुसन्मुखंप्रस्थितस्य ॥ ७. आकृष्येति वक्षः स्थलान्तप्रदेशाद् व्यानञ्ज प्रकटीचकार ॥

[1]स्वस्त्रैणसंभोगवैयात्यहृतचेतसः । यूनो नाप्रीणत प्रायो गणिका दुर्भगा इव ॥११२॥ सदा [2]गोत्रभिदा दृप्ता यस्या गोत्रभिदाद्रुहः। अमरावत्यपि छायां नाधिरोढुं प्रगल्भते ॥११३॥ तस्यां बभूव भूपालः कुम्भो गम्भीरिमाम्भसः । कुम्भो निर्दम्भदोःस्तम्भविक्रमस्तंभिताऽहितः ॥११४॥ यस्य [3]धाराधराऽऽलोकाद् राजहंसाः पलायिताः । आसेदुर्मानसोल्लासा अपि मोहान्न मानसम् ॥११५॥ अदन्तपवनत्वेन रदानां सुहृदामिव । मालिन्यालोकनान्नूनं हासः प्रोथासयन्निव ॥११६॥ यथा बालस्तथावृद्ध इति न्यायं स्मरन्निव । धाम्ना वृद्धोप्यपात् स्तन्यं[4] यत् खड्गो वैरियोषिताम् ॥११७॥ यस्यातपपरीतापात् कालीनामरिसुभ्रुवाम् । अपार्थक्यादिवास्येषु कुङ्कुमश्रीरुपारमत् ॥११८॥ कठोरवैरिकण्ठास्थिच्छेदखेदात् पिपासितः । [5]कुण्ठोऽसिस्तेजनव्याजाद्यस्य[6] मन्ये जलं पपौ ॥११९॥ गुप्ता एतद्द्विषोऽस्माभिर्गुहास्विति भयादिव । यन्निस्वानस्वानाघातैरकम्पन्त शिलोच्चयाः ॥१२०॥ मनोरथातिवर्त्तिष्णुवस्तुदे यत्र निर्मिते । किमु कल्पद्रवः सृष्टा अर्थिनाम् इष्टमात्रदाः ॥१२१॥ वीरश्रियं करे धत्ते वृद्धामपि न मां भवान् । नव्यामपीति रुष्टेव यत्कीर्तिर्दूरेऽतो ययौ ॥१२२॥ प्राप्तकालैरुपायैर्यश्चतुर्भिरविनश्वरैः ॥ व्यजेष्ट भ्रातृभिर्जैत्रैरजाताऽऽरातिवद् दिशः ॥१२३॥ त्याज्यं त्रिवर्गमव्यग्रमना माहाकुलीनवत् । यथावद् यः प्रयुञ्जानः [7]परलोकम् [8]असादयत् ॥१२४॥ यः शक्तित्रयम् आसाद्य प्रभविष्णुबलानुगः[9] । क्रमत्रयं यथाविष्णुर्बलिदर्प्पमखण्डयत् ॥१२५॥ प्रभावतीव[10] भक्ताऽभूत् तस्य देवी प्रभावती । पिनद्धभूषणव्रातोद्यन्माणिक्यप्रभावती ॥१२६॥ लावण्यस्रोतसोऽमुष्या दृग्दोषो मा स्म भूदिति ॥ यां ह्रीः [11]सर्वाङ्गसंव्यान भेजे कारयितुं ध्रुवम् ॥१२७॥ अन्योन्यविटसंभोगाद् बन्धकीभिः कदर्थितौ । शंके [12]शीलाऽन्वयौ भीत्या यां शरण्याम् उपेयतुः ॥१२८॥ भूजङ्गरञ्जनायोच्चैर्व्यञ्जनीभिः प्रगल्भताम् ।[13]पण्यस्त्रीभिरिवोत्प्राप्तं [14]शालीन्यं पर्युपास्त याम् ॥१२९॥ शश्वत् क्लृप्तालिसंलापानप्रत्यासीदतोऽपि या । आललापान्यपुंसस्तत्संस्कारानुद्भवादिव[15]

---

१. स्वस्त्रैणेति, अत्यन्तविदग्धस्वकीयाङ्गनासंभोगेनैव अवर्जितमानसान् ॥ २. गोत्रभिदा, शक्रेण गोत्रभिदायै नामभेदाय यद् द्रुह्यति तन्निवासिनो नामान्यथात्वं कस्यापि न क्षाम्यतीति ॥ ३. धाराधरः, खड्गो मेघश्च मानेन सोल्लासा उद्धुराः, मानसं चित्तं नासेदुस्तत्स्वास्थ्यं न प्रायुः ॥ ४. अपात् स्तन्यं, वैधव्येन पुत्राद्युत्पत्तेरभावात् क्षीरं निःशेषितवान् ॥ ५. कुण्ठोऽतीक्ष्णो मायावी च व्याजकारित्वात् ॥ ६. तेजने हि जलसम्बन्ध आवश्यकः ॥ ७. परलोकं शत्रुजनम्, जन्मान्तरं च ॥ ८. असाधयद्, वशीचकार निरवर्त्तयत् ॥ ९. बलं सामर्थ्यं, बलभद्रश्च बलिनां समर्थानां बलेर्दानवस्य च विशेषस्य ॥ १०. प्रभावती च, उदयनृपपत्नीच, अथवा प्रभौ स्वामिनि अतीव अत्यन्तम् ॥ ११. संव्यानम् अच्छादनम् ॥ १२. अन्वयोऽत्र गोत्राचारो द्रष्टव्यः ॥ १३. उत्प्राप्तम् उपहसितमिव ॥ १४. शालीन्यंत सलज्जता ॥ १५. तत्संस्कारः, पुरुषान्तरालापभावना, तदनुद्भवो जन्मान्तरेऽपि तदननुभवात् ॥

॥१३०॥ यथा चन्द्रिकया चन्द्रो मुक्तया शुक्तिसंपुटः ॥ तडागः पुण्डरीकिण्या तथा रेजे तया नृपः ॥१३१॥ शक्तः पानायितुं कस्तां भवित्री या जिनप्रसूः । कः कल्पद्रुसवित्र्या हि मेरुभूमेः क्षमः स्तुतौ ॥१३२॥ या न स्वं दर्शयामास ब्रह्मचर्यभृतामपि रिरंसाजननेनैषां व्रतभङ्गभयादिव ॥१३३॥ ततस्तां भूभुजस्तस्य कान्तां विश्वंभरामिव । अवतो [1]विषयस्निग्धां दिवसा अतिचक्रमुः ॥१३४॥ अश्विनीम् उपभुञ्जाने कुमुदाकरबान्धवे ॥ तत्करैः परिपूतायां चतुर्थ्यां मासि फाल्गुने ॥१३५॥ बद्धतीर्थकरत्वोऽपि ततस्तस्या असौ सुरः ॥ स्त्रीत्वेन गर्भम् अध्यास्त दुर्वारा कर्मणां गतिः ॥१३६॥ युग्मम् ॥ अविद्राणांगसौभाग्या निद्राणा सा धिया निशि चतुर्दशजगत्स्वाम्यम्[2] अपत्यस्य जनिष्यतः ॥१३७॥ अञ्जसा व्यञ्जतो मञ्जून् महास्वप्नांश्चतुर्दश ॥ प्रतिबिम्बवदादर्शोऽदर्शन्मधुरदर्शना ॥ युग्मम् ॥१३८॥ शङ्केऽभ्युदयलाभेऽपि [3]नोत्तानाः स्युर्महत्तमाः । इति मातुरुदरे गर्भो गौरवं नोदपीपदत् ॥१३९॥ सङ्कटस्थोऽपि यद् गर्भो नाबाधिष्ट स्वम् आश्रयम् । सर्वावस्थासु कस्यापि नोपतापाय सत्तमाः ॥१४०॥ जज्ञे कुसुमशय्यायाम् अस्या आरोहदोहदम् । व्यञ्जत्सर्वाङ्गसौरभ्यं गर्भगस्य प्रसूनवत् ॥१४१॥ गर्भो यथा यथैधिष्ट सौन्दर्यश्रीस्तथातथा ॥ नूनं तद्रूपसंक्रान्त्या मातुरङ्गेष्ववर्द्धत ॥१४२॥ अथाश्विन्यां सहः शुक्लैकादश्यां पूर्णदोहदा ॥ असूत जिनम् आश्चर्यं कन्यात्वेन प्रभावती ॥१४३॥ शङ्केऽधिकं तनुर्ज्योतिर्द्योतिते सूतिकागृहे । ह्रिया जन्मक्षणे यस्या नाद्युतन्मणिदीपकाः ॥१४४॥ या तदाऽजीजनत् सौख्यं नारकाणामपि क्षणम् । तेषामिवाऽसितुं दुःखाद्द्वैतवादं दुरुत्तरम् ॥१४५॥ क्व सख्यं मे पुनर्भावि स्त्रीतीर्थकरकर्मणा । इति ज्ञानत्रयी गर्भाद् आरभ्यौज्झद् ध्रुवं न याम् ॥१४६॥ मालिन्याद् दृक्प्रसादं नो न नेत्रीयं विधास्यति । इतीव यज्जनावाशा अभूवन्न [4]रजःस्वलाः ॥१४७॥ सौगंध्यं नोऽपि यच्छेति याचनायेव कोमलाः ॥ यां जनौज्झितनिःश्वासद्वाराऽसेवन्त वायवः ॥१४८॥ निर्ममुः सूतिकर्माऽस्या दिक्कुमार्योऽतिगौरवात् । स्त्रैणेन सगोत्राया आर्हन्त्याप्त्याऽऽहृता इव ॥१४९॥ अहो जातु वयं न स्त्रीजिनं स्नपितपूर्विणः । इतीवाऽत्यादराद् इन्द्रैर्या मेरावभ्यषिच्यत ॥१५०॥ मल्लीति मल्लिकामोदसोदरोच्छ्वसितश्रियः ॥ दोहदानुगुणं तस्याः पितरौ नाम चक्रतुः ॥१५१॥ मन्ये यत्सेवया विद्या लेभिरे कोटिमात्मनः ॥ अन्यथैक्ष्यं न मालिन्यं कथम् आसाम् इयच्चिरम् ॥१५२॥ अध्यैष्ट प्रचलज्जिह्वाच्छलाद् यस्या



१.विषयाः शब्दादयो देशाश्च २. सप्त जगन्ति ऊर्ध्वं सप्त चाधः इतिप्रसिद्धया चतुर्दश ॥ ३. उत्तानाः, दर्शितस्वोत्सेकाः ॥ ४. रजस्वला हि योषितो न राजादिभिवीक्ष्यन्ते इति स्थितिः ॥

मुखे स्थिता । [१]नव्यसंस्कारसौरभ्यलोभाद् इव सरस्वती ॥१५३॥ न केवलं शिशुत्वेऽपि मल्लिर्मल्लिरिवाऽद्भुता । तल्लावण्यमहो यावत् तल्लावण्यम् इवारुचत् ॥१५४॥ अथ सा यौवनं प्राप समं पृितमनोरथैः । कादम्बिनीव वर्षासु सार्धं कर्षकसर्प्पणैः ॥१५५॥ तस्मिंश्च सुतरां तस्याः सौभाग्यश्रीर्व्यजृम्भत । उन्मीलत्यन्यदाऽपीन्दोर्ज्योत्स्ना शरदि किं पुनः ॥१५६॥ जज्ञुरपि रागजागरसदसि वयस्यङ्गविभ्रमास्तस्याः । [२]चित्रमनवमरसभुजो विशङ्कम् अङ्कुरितनवमरसाः ॥१५७॥ तथाहि ॥ रेजुः पादनखास्तस्या नव्यत्वेन बलीयसा । वैराग्येन प्रणुन्नस्य रागस्य स्तबका इव ॥१५८॥ भ्रेजे तस्या नखश्रेणिर्वण्या [३]मणिललन्तिका । स्यात् त्रुटित्वा पदोः स्रस्ता प्रोयितुं प्रकृतीद्रुमाः ॥१५९॥ चकाशे नखलेखाऽस्याः पादयोः पाटला ध्रुवम् । पाटला कलिकामाला नमच्छक्रशिरश्च्युता ॥१६०॥ नूनम् आकर्षमन्त्रोऽस्याः क्रमाभ्यां शिक्षितो यतः आजह्रे राजहंसानां मानसेऽप्यूषुषां गतिः ॥१६१॥ [४]अप्यमोषणधुर्याभ्यां तत्पद्भ्याम् जाग्रतामपि । करीन्द्राणां जनाध्यक्षम् आश्चर्यं मुषिता गतिः ॥१६२॥ शङ्के मम वृथा जन्म [५]तवास्येन्दोर्विनेक्षणात् ॥ तत् त्वं दर्शय देवीति पद्मश्रीस्तत्क्रमौ श्रिता ॥१६३॥ कथं तावुपमिन्वन्ति नीरजस्कौ रजस्विभिः । पद्मैरिति क्रुधा ताम्रावभूतां तत् क्रमौ ध्रुवम् ॥१६४॥ तस्याः पादौ ध्रुवं पद्मौ सुस्राव कथमन्यथा । ताभ्यां दीप्तनखश्रेणिशोणद्युतिमिषान्मवधु ॥१६५॥ मञ्जीरौ शिञ्जितव्याजाद् अस्या जंघोन्तचुम्बिनौ ॥ आश्रयोत्कर्षदर्प्पेण स्वमवर्णयतामिव ॥१६६॥ एतस्या बिभरांचक्रे जंघाजुगलमुज्ज्वलम् । अधोमुखीकृताम्भोजनालद्वितयविभ्रमम् ॥१६७॥ सच्छिद्रत्वाद् गजकरा वृत्ताः पीना अपि क्रमात् ॥ नीरन्ध्राभ्यां तदूरुभ्यां जिताः कात्स्न्यम् इवागमन् ॥१६८॥ त्वङ्मात्रत्वेन निःसाराः सृष्टाभ्यां सत्तमाणुभिः । रम्भास्तम्भास्तदूरुभ्यां स्पर्द्धेरन् कथमुद्धताः ॥१६९॥ भाविनस्तीर्थसौधस्य प्रारम्भकदलाग्रिमौ । साक्षात् स्तम्भाविवाऽदम्भावूरू तस्या विरेजतुः ॥१७०॥ [६]गङ्गापुलिनसध्रीची रेजेऽस्या जघनस्थली । ब्रह्मचर्यश्रियो नूनं शय्या जय्या न केनचित् ॥१७१॥ व्यराजद् [७]उपसंवीता तन्नितम्बतटी ध्रुवम् ॥ तरुणिम्नो गुणनिकाशाला जवनिकावृता

१. संस्कारस्य सौरभ्यम् अतिशयः ॥ २. अनवमरसभुजः, प्रधानशृङ्गारमाधुर्यादिभ्यो जिनोऽपि नवमो रसः शान्तरसः यौवने हि प्रायः सर्वस्यापि शृङ्गारानुगता एव अवयवाः स्युस्तस्यास्तु शमाभिव्यञ्जका अपीति चित्रम् ॥ ३. ललन्तिका प्रलम्बमानग्रैवेयकविशेषः ॥ ४. अमोषणेति अचौराभ्याम् अवयवावयविनोः कथंचित् अभेदाद् इयमुक्तिः ५. तम् आस्येन्दुं, पद्मश्रियश्चन्द्रावलोकनाऽक्षमत्वात् तत् वक्रम् आश्रयणम् ॥ ६. पुलिनसध्रीची तत्सदृशी ॥ ब्रह्मचर्येति एतन्मतेनापि शान्तरसस्यानुगतत्वेन प्रायो वर्णितम् ॥ ७. उपसंवीता आस्तृता ॥

॥१७२॥ नितम्बबिम्बम् एतस्या बभार गरिमास्पदम् । कन्दर्प्पविजयव्यञ्जिप्रशस्तिफलकश्रियम् ॥१७३॥ दिद्युते रसनादाम तस्याः श्रोणितटे ध्रुवम् ॥ [1]रक्षावलयमुद्दामस्तोम्नं लवणिमश्रियः ॥१७४॥ रोमराजी रराजास्याः स्निग्धाममधुकरीसखी । नाभिनिर्झरनिःस्पन्दा प्ररूढेवाऽङ्कुरावली ॥१७५॥ रोमालिरशुभत् तस्याः सज्ञानेनान्तरुद्युता । शङ्के रुचिमता सान्द्रा तमोलेखा प्रवासिता ॥१७६॥ अगाधा नाभिरेतस्या भ्रेजे क्वचन दैवतः ॥ [2]त्रुट्यल्लावण्यसन्धायै मन्ये तद्रसकूपिका ॥१७७॥ तन्नाभिम् अभितः शक्त्ता मुक्ताली भास्वराऽरुचत् ॥ शिखेव शुक्लेश्याग्नेर्नाभिरन्ध्रेण निर्गता ॥१७८॥ लौल्याभावाद् ध्रुवं तृप्तेरेषा दुःखाकरिष्यति ॥ न माम् अत्यशनेनेति तन्मध्यं [3]कार्श्यमाशृणोत् ॥१७९॥ मम पीनतया नूनं सर्वाङ्गीणा वियोक्ष्यते ॥ सौन्दर्यश्रीरितीवास्या मध्यं क्षामम् अजायत ॥१८०॥ सर्वाङ्गेष्वधिरोहन्त्त्यास्तदीयेषु पदक्रमात् ॥ आरोढुम् अनलंभूणोः [4]स्तनयोर्बन्धुरत्वतः ॥१८१॥ सुखारोहाय लावण्यश्रियो नेत्रसुधाकिरः । त्रिवलिच्छद्मनाक्लुप्ता निश्रेणिरिव वेधसा ॥१८२॥ युग्मम् ॥ प्रभविष्णौ न मय्यस्याः सौभाग्यधुग् जराभवा ॥ भवित्री [5]वलिराजीति व्याञ्जीत् तत्त्रिवलिर्ध्रुवम् ॥१८३॥ तस्या बभतुरुन्नम्रावुरोजौ चारुचूचुकौ । मुक्तिराज्याभिषेकाय [6]मुद्रितौ कलशाविव ॥१८४॥ स्तनौ मेदस्विनावस्याः कठिनौ विरेजतुः । रागद्वेषाभिघाताय सूत्रितौ गोलिकाविव ॥१८५॥ मार्दवेन ध्रुवं कोटिमीयुषा गलहस्तितम् हृदः स्तनच्छलेनाऽस्या काठिन्यं निरगाद् बहिः ॥१८६॥ ज्ञानादित्रितयं कण्ठेनैषा सदसि वक्ष्यति ॥ इत्यस्या व्यञ्जयामास कण्ठे रेखा त्रयं ध्रुवम् ॥१८७॥ ध्वनिर्माधुर्यधुरया पाञ्चजन्यस्य निर्जयात् ॥ गृहीतं कण्ठकाण्डेऽस्या रेखा त्रितयमद्युतत् ॥१८८॥ ऋज्वायतास्तदङ्गुल्यो रेजुः शातोन्मिषन्नखाः[7] । छिदायै स्मरबाणानां प्रतीषव इवोन्मुखाः ॥१८९॥ तदङ्गुल्यो बभुः शोणमणिमुद्राकरम्बिताः ॥ दोःस्कन्धपाणिकल्पद्रोः शाखाः पल्लविता इव ॥१९०॥ शक्त्या कृष्यबहीरागो महारजनवत् ध्रुवम् । कराभ्यां ममृदे तेन शोणिमाऽस्यास्तयोरभूत् ॥१९१॥ बन्धुनाऽप्यहमर्केण तिग्मैरुद्वेजिता करैः । इतीव यत्करे लग्ना पद्मश्रीः कोमले सदा

१. उद्दाम उद्भटनियन्त्रणम् ॥ २. त्रुटयत् क्षीयमाणम् ॥ ३. आशृणोत् अङ्गीचकार ॥ ४. बन्धुरत्वत उन्नतत्वेन ॥ ५. वलिराजी त्वक्संकोचविशेषश्रेणिः ॥ ६. मुद्रितौ अशुद्धद्रव्यपातभिया दत्तलाक्षादिमुद्राविव चूचुकयोर्मुद्राकल्पत्वात् ॥ ७. शांतास्तीक्ष्णाः, गृहस्थभावेहि तदद्दशत्वेऽपि नखानां न विरोधः, ॥

।।१९२।। वलयाः कलहायन्ते यद् दोष्णोर्घट्टनान्मिथः ।। मां गृहाण मां गृहाण स्मरं बन्धुम् इति ध्रुवम् ।।१९३।। भेजे यद्भुजयो रत्नस्यूता वलयमालिका ।। निबिडा निगडालीवं बंद्धुं पुष्पेषुसिन्दुरम् ।।१९४।। सरले यद्भुजे भातो धर्मद्वैतमबाधितम् । देक्ष्यत्येवेति [1]निर्व्यक्तुं पताके इव सज्जिते ।।१९५।। बिम्बोष्ठोऽशुभत् एतस्या अधस्ताद् दन्तसन्ततेः । वाण्या मुक्तावलेरन्तः शङ्के माणिक्यनायकः ।।१९६।। शोणं यद् दन्तवासोऽभात् अधो दशनमण्डलात् । गीः पद्मकोशतः स्रावं स्रावं मध्विव पिण्डितम् ।।१९७।। [2]अधरोऽरुण एतस्या नूनं दन्तचयस्य यत् ।। भास्वतः प्रागसौ द्योतादऽरुणत् सुदृशाम् तमः ।।१९८।। हृता [3]मत्कान्तिरेताभ्यामित्यर्च्चाच्छद्मना निशि । सिषेवे यत्कपोले [4]तां मन्ये मार्गयितुं शशी ।।१९९।। स्वच्छयोर्मणिताडङ्कप्रतिमा यत् कपोलयोः । वक्रान्तःस्थास्नुवाग्देवी कर्णिकार्च्चाध्रुवं बभौ ।।२००।। नासावंशो ध्रुवं वंशकाण्डोऽस्या निरयन्त्रितः ।। अलके [5]तिलकव्याजान्मुक्तागुच्छो यदैक्ष्यत ।।२००।। नासादण्डोऽरुचत् तस्यास्तीक्ष्णाग्रः सरला यतः ।। मोहमल्लविदाराय नाराच इव सज्जितः ।।२०१।। [6]आवाभ्यां धर्मिणाम् अर्थो महांस्तत् प्रगुणौ युवाम् । स्तम् इत्याख्यातुम् आयातां कर्णान्तमिव तद्दृशौ ।।२०२।। तन्नेत्राभ्याम् अनर्घाभ्यां जितत्वेन पराभवात् । इन्दीवराणिनधादितीर्थाऽम्भस्यऽविशन् ध्रुवम् ।।२०३।। कर्णपाशौ स्म भातोऽस्याः श्रव्येतरनिनादयोः ।। श्रोत्रं रज्यद् विरज्यच्च बन्धुं पाशाविवैकदा ।।२०४।। अमुष्याः कर्णिकान्तःस्थदोलायां बालिकामिषात् । प्रेंखतां [7]श्रुतवाग्देव्यौ कर्णपाल्योरिवोन्मुदौ ।।२०५।। भ्रूयुगं भङ्गुरं तस्या नासालिङ्गितमद्युतत् ।। संहिताशुगमाकृष्टं नूनं कामभिदो धनुः ।।२०६।। तस्या भ्रूयुगली भ्रेजेऽङ्ग्योः सव्यापसयाव्ययोः । रूपदृदोषमोपाय नीलीपुण्ड्रद्वया ध्रुवम् ।।२०७।। तस्याश्चन्द्रार्धलुण्टाकी दीप्ता भालस्थली बभौ ।। विधिनेवार्द्धचन्द्रेषुः सृष्टा स्मरवपुश्छिदे ।।२०८।। रेजे ललाटपट्टेऽस्या दीर्घा मुक्ता ललाटिका ।। ऊर्ध्वीकृता पताकेव यौवनेऽप्यात्मभूजयात् ।।२०९।। चकाशे मस्तके तस्याः स्निग्धा कुन्तलसन्ततिः । अन्तर्निदग्धपञ्चेषुधूम्येवोर्ध्वं विनिर्गता ।।२१०।। रराज कबरी तस्या मसृणश्यामलच्छविः ।। भृङ्गाली घ्रातुम्



---

१. निर्व्यक्तुं, प्रकाशयितुं, पताकयाहि राजादिः प्रकाश्यते ।। २. अरुणो रक्तः सूर्यसारथिश्च,भास्वतो दीप्तस्य रवेश्च ।। ३. अर्च्चा,प्रतिबिम्बम् ।। ४. तां कान्तिम् ।। ५. मुक्तागुच्छो,मौक्तिकस्तबकः वंशस्यापि मौक्तिकोत्पत्तिस्थानत्वात् ।। ६. चक्षुःश्रोत्रयोरेकैकत्वेन विवक्षितत्वात् आभ्यामिति द्विवचनम्, स्तम् इति क्रिया पञ्चमीद्विवचनम्, धार्मिकाणां हि कर्मश्रवणाय ईर्यापथशोधनायच चक्षुःश्रवसी विशेषेणोपयुज्यते ।। ७. श्रुतवाग्देव्योरागमभगवद्वाक्याधिष्ठातृत्वेन विशेषो बोद्धव्यः ।।

[1]आलीनेवाऽद्भुतमूर्द्धसौरभम् ।।२११।। बभूः केशालयो [2]भुग्नास्तस्याः प्राच्यभवार्जिताः । फलानुभवतश्छित्त्वाऽऽकृष्टा मायालता इव ।।२१२।। उष्णीपं मस्तके तस्याः सृजन्नारोपयद् विधिः । शङ्के कलशमुत्तुङ्गं सौन्दर्यस्य स्वनिर्मितेः ।।२१३।। कामास्त्रस्त्रैणसौभाग्यगर्वपर्वतखर्वणी । [3]जगन्नेत्रसुधावर्त्तिरेषा लावण्यसंपदा ।।२१४।। सिद्धाप्यनुमया नूनं प्रतिविप्रतिपादुकान् । स्वं साधयितुम् अध्यक्षात् साक्षान्मुक्तिरवातरत् ।।२१५।। युग्मम् ।। असौ मरकतक्षोदसहोदरतनुद्युतिः । लोकोत्तरैरतिशयैः प्रीणती जगतीत्रयम् ।।२१६।। पौरस्त्यजन्मसुहृदां षण्णामप्यवधिनाऽथ निरवधिना ।। अवबुध्य बोधसमयं व्यदीधपन् मोहननिशान्तम् ।।२१७।। युग्मम् ।। माणिक्यभित्तिसंक्रान्तकान्तसीमन्तिनीक्षणात् ।। जातस्तम्भा इव स्तम्भा यत्र निश्चलतामगुः ।।२१८।। उच्छलत्कान्तिलहरीपरीते यस्य चाङ्गणे । छायाच्छलाद् विलासिन्यो जलस्केलिमिवादधुः ।।२१९।। मणिकुट्टिमे विशन्त्या यत्रांशुसलसलाप्लुते मुग्धाः । सलिलभ्रान्त्या वासः संवृण्वन्त्यो विटैर्हसिताः ।।२२०।। शिल्पिना यत्र पाञ्चाल्यः सजीवा इव निर्मिताः ।। स्वःसुभ्रुव इवाराजन् यच्छोभां द्रष्टुमागताः ।।२२१।। इन्दुकान्ताः पयोबिन्दुयुजो ज्योत्स्नीषु रेजिरे । यत्र मल्लिनवास्येन्दुदृष्टया पुलकिता इव ।।२२२।। प्रतिबिम्बापदेशेन क्रीडावापीनवाऽम्भसि ।। सस्नाविव सहस्रांशुस्तापर्निर्वापणाय यत् ।।२२३।। सुधाकरकरस्पर्शा- ज्जातस्वेदरया इव ।। चन्द्रकान्तशिलाः कान्ता यत्र सस्पन्दिरे जलम् ।।२२४।। शङ्केविशन्नृपच्छायाच्छद्मना यत्र भित्तिषु ।। गोपयन्तः स्वमस्वप्नाः कौतुकादागता बभुः ।।२२५।। यत्र सर्वर्तुपुष्पर्द्धिवर्द्धितोद्यानवर्म्मिते ।। प्रतिस्वमृतुदेवीनां युगपत् साध्यसिद्धये ।।२२६।। बहिर्वासगृहा नूनं निर्मिताः प्रतिकर्म्मिताः । षडन्तर्गर्भनिलयाः स्वर्णेष्टकचिता बभुः ।।२२७।। युग्मम् ।। खेलन्मणिप्रभाजालं तदन्तर्जालमन्दिरम् । कामुकानां दृशो बन्धुं यत्र जालमिवाऽऽदधे ।।२२८।। कथँम् अस्मद्गृहम् अमी विशन्ति विवरैरिति ।। क्रुधाक्षिप्ता उपपतय इवार्ककरा जालमणिकरैर्ध्रुवं यत्र ।।२२९।। मध्ये जालगृहम् असावचीकरत् स्वां हिरण्मयीं प्रतिमाम् । सच्छिद्रमस्तकच्छिद्रनिहितहेमाम्बुजपिधानाम् ।।२३०।। जीवन्तीमिव यां वीक्ष्य निर्मितां विश्वकर्मणा । जानुस्थास्तु वपुर्वल्लिमल्लिनेदीयसी पुरः ।।२३१।। मल्लेरेषा प्रतिकृतिः किमस्या मल्लिरेव किम् ।। इति संदिह्यवत्कृत्वा व्यत्ययान्निरचिन्वत ।।२३२।। युग्मम् ।। यां पीयूषमूर्तिव्याजात् खेदस्यन्दिभिरस्पृशत् ।। रिरंसयेव



१. मूर्द्धसौरभं, सर्वाङ्गाङ्गानां सौगन्ध्यात् ।। २. भुग्नाः वक्राः मायाया अपि तादृशत्वात् फलं स्त्रीत्वोदयः ।। २. एषा मल्लिः ।।

यामिन्याः कामुकः कोमलैः करैः ॥२३३॥ स्वभोज्यात् साक्षिपत् तस्यामेकं कवलम् अन्वहम् ॥ रन्ध्रेण शिरसः स्नेहादिव [1]यापयितुं [2]तनुम् ॥२३४॥ क्षिप्तं [3]कुक्षावपद्वारा स्वादीयोऽपि किमित्यहम् ॥ इतीव तद्गतं भोज्यं पूतिगन्धानुबन्ध्यऽभूत् ॥२३५॥ गन्धकन्धः प्रसर्प्पंश्च तस्य दिक्षु निरङ्कुशः ॥ [4]आश्रयोत्कर्षणायेव स्वस्याद्वैतम् अदर्शयत् ॥२३६॥ इतश्च ॥ लोलन् [5]मांसलसौरभ्यतरङ्गितदिगन्तरैः ॥ प्रसूनैः स्यूतमन्यूनैः स्वरसेन विकस्वरैः ॥२३७॥ नवीनरचनाभङ्गिशुभगं भावुकश्रियम् ॥ उद्दण्डपद्मखण्डस्थलक्ष्मीताण्डवमण्डपम् ॥२३८॥ चित्रं [6]श्रीदामकाण्डं स मालाकारैरकारयत् ॥ प्रतिबुद्धिर्ललद्बुद्धिर्महादेव्या प्रयोजितः ॥२३९॥ त्रिभिर्विशेषकम् ॥ तमसा कश्मलश्चन्द्रः पद्मः कण्टकसंकटः ॥ इतीव तद्द्वयं हित्वा लक्ष्मीस्तं समशिश्रियत् ॥२४०॥ पुलकछद्मनिर्गच्छन्मोदपल्लवितत्वचा ॥ राज्ञाऽथ वीक्ष्य तं मन्त्री स्वच्छबुद्धिरपृच्छ्यत ॥२४१॥ श्रीदामकाण्डमेतस्य तुलाम् अन्यत् किम् अश्नुते ॥ संधत्ते कुसुमं किंचित्सौगन्ध्यं केतकस्य किम् ॥२४२॥ द्वितीयो जात्यमाणिक्यैर्नानावर्णैर्विनिर्म्मितम् ॥ [7]अदर्शत्कुण्डलद्वन्द्वं नैगमोपायनीकृतम् ॥२४३॥ प्रतिमल्लप्रहाराय नूनमूर्द्ध्वविसृत्वरैः ॥ मयूखैरन्तरिक्षे यत् समधत्त सुरायुधम् ॥२४४॥ रमणीयतया रेजे विद्याधर्या विहायसि ॥ संभ्रमात् संचरिष्ण्योर्यच्छ्रवणाभ्यामिवच्युतम् ॥२४५॥ उपमानप्रतिद्वन्द्वि लोकलोचनमोहनम् ॥ सांयात्रिकांस्तदीक्षित्वा सोऽन्वयुक्तं विविक्तधीः ॥२४६॥ त्रिभिर्विशेषकम् ॥ विलोकितं किमेतेनं समं क्वचन कुण्डलम् ॥ नहि कोऽपि मणिः कक्षां कौस्तुभस्य विगाहते ॥२४७॥ विघटितमल्लीकुण्डलसन्ध्यऽविधेः [8]पार्थिवेन कुम्भेन ॥ निर्वासिताः कलादाये [9]गुणभाजा स्वसाम्राज्यात् ॥२४८॥ [10]उदपानाद् उदवाहा[11] इव तान् वाराणसीम् अधिशयालून् ॥ पप्रच्छाऽथ तृतीयः कौतूहलकवलितस्वान्तः ॥२४९॥ युग्मम् ॥ किं यूयमागता इह ते प्रोचुः पूर्वमभिहितं हेतुम् ॥ राजाह कीदृशी सा मल्लीति बभाषिरे तेऽपि ॥२५०॥ एतस्या उपमां देव वयं नोपलभेमहि ॥ कयाचिदुपमीयेत द्वारकानगरीषु किम्

---

१. यापयितुं सुखेन वर्त्तयितुमिव ॥ २. तनुं स्वसादृश्यादात्मशरीरम् ॥ ३. अपदारा द्वारान्तरेण तथा प्रवेशोहि गृहादावपि महतेऽपमानाय इति वैवर्ण्यमिव विकृतिं दौर्गन्ध्यं भेजे ॥ ४. आश्रयो भोज्यं गुणोत्कर्षेण हिं गुणिन उत्कर्षव्यक्तिः ॥ ५. तरङ्गितानि व्याप्तानि ॥ ६. श्रियो लक्ष्म्याः, दाम माला, तदेकान्तनिवासहेतुत्वात् श्रीदामकाण्डम् यस्य, टोडर इति प्रसिद्धिः ॥ ७. अदर्शदिति अद्यतन्यानिरनुबन्धाद् वा वक्तव्यमिति अण् ॥ ८. पार्थिवेन मृन्मयेन, कुम्भेन घटेन ॥ ९. गुणभाजा, रज्जुसंवृत्तकण्ठेन ॥ १०. उदपानात्, कूपात् ॥ ११. उदवाहाःसलिलप्रवाहाः ॥

॥२५१॥ वेदिकासुमनः सद्मसुवर्णकलशादिका ॥ सज्जा मज्जनसामग्री मत्कन्याया इवाक्षता ॥२५२॥ कस्याक्वचित् काप्यदर्शीति तुर्यः पर्यनुयुक्तवान् ॥ दूतान्[1] सूतानिवाऽ–नेकदेशदर्शनपेशलान् ॥२५३॥ युग्मम् ॥ रङ्गविन्यासवैचित्री चित्रीयितजगज्जनम् ॥ इषीकतूलक्लुप्तेन[2] रेखोन्मेषेण [3]निस्तुषम् ॥२५४॥ आलेख्योल्लिखितं रूपं मल्लेदृष्ट्वा स पञ्चमः ॥ कस्यारुच्येयमर्च्यैत्यप्राक्षीच्चित्रकरं मुदा ॥२५५॥ युग्मम् ॥ शोचम् आतिष्ठमानाया [4]चोक्षामस्वरिणीक्षणात् मल्ल्या जिग्ये क्रुधाध्माता कांपिल्यं साऽगमत् ततः ॥२५६॥ कम्रान् जयेयम् एतद् वदिति यस्य भ्रुवोर्युगम् ॥ अध्यैष्ट स्मरचापस्य समीपे वक्रतां ध्रुवम् ॥२५७॥ [5]सर्वेऽपि मुकुलायन्ते मां विना करपीडिताः ॥ इति गर्वादिवोन्नम्रा यस्याऽजनि कुचस्थली ॥२५८॥ नूनं दासो यदास्यस्य शुधांशुः कथमन्यथा ॥ एष छायाच्छलाच्छश्वन्निभृतस्तन्निषेवते ॥२५९॥ मन्ये यदङ्कपर्य्यङ्कम् अधिशय्य झषध्वजः ॥ जगच्छरव्यमव्यग्रः शरैः विध्यति कौसुमैः ॥२६०॥ बलयौवनमीदृक्षं दृष्टं भगवति क्वचित् ॥ इति पप्रच्छ तां तत्र षष्ठस्तन्नायको नृपः ॥२६१॥ पञ्चभिः कुलकम् ॥ एवं पर्य्यनुयुक्तास्तैः सचिवाद्यास्त ऊचिरे ॥ यथावत् स्वस्वनेतॄणामग्रतस्तत्त्वदर्शिनः ॥२६२॥ मल्ल्याः श्रीदामकाण्डादेः पुरतः सर्वमप्यदः ॥ विध्याताङ्गारसंभारचातुरीम् अवगाहते ॥२६३॥ अस्या नेत्रसुधासारसाररूपश्रियः पुरः ॥ सर्वा जीर्णघुणोत्कीर्णदारुपाञ्चालिकायते ॥२६४॥ ततो मल्लिकथां श्रुत्वा जातरागा नराधिपाः ॥ दूतान् प्रातिष्ठिपन् कुम्भमभि ते मानसैः समम् ॥२६५॥ उच्चावचैर्वचोभिस्ते तमयाचन्त तां बलात् ॥ अर्थिनो हि पराचीना वाच्यावाच्यविवेचने ॥२६६॥ श्रवःकटुवचः शल्यप्रवेशनमिषाद् ध्रुवम् ॥ विद्धावपि पुनः कर्ण्णौ [1]विध्यतः परिषत्सदाम् ॥२६७॥ स तान् निष्कासयामास न्याय्यः कर्णेजपानिव ॥ मनस्वी ह्यनुमन्येत कः प्रतीपाभिधायिनः ॥२६८॥ युग्मम् ॥ गत्वा तेऽथ स्वनेतृभ्यः सर्वमेतन्न्यवेदयन् ॥ मानापमानविज्ञप्तेर्भूः स्वाम्येवानुजीविनाम् ॥२६९॥ दूतप्रस्थापनद्वारा प्रेम्ला संहत्य रंहसा ॥ कुम्भराज्ञा समं योद्धुं ते प्रचक्रमिरे ततः ॥२७०॥ स्त्रिया एकौपम्यायाः कृते संभूयकारिता ॥ [6]चित्रं

१. दूतान् मागधान् ॥ २. इषीकतूलं, चित्रकरकूर्चिकाविशेषः ॥ ३. निस्तुषं रङ्गचित्रकृदादि सामग्र्यान्निर्देशं, चोक्षेति नामा ॥ ४. सर्वेऽपि पुष्पादयः ॥ ५. विध्यत इति सच्छिदौ कुर्वतः ॥ अथवा पीडयत ॥ ६. चित्रमिति नह्येकपदार्थाभिलाषित्वे परमवैरकारणे कदा संभूयकारिता संभवतीति ॥

प्रणयतस्तेषां सर्वेषाम् अभिलाषिणाम् ॥२७१॥ यद्वा पुंसां मदान्धानां सुरापाणाम् इवान्वहम् ॥ परीक्षानिरपेक्षैव प्रवृत्तिः सर्वकर्मसु ॥२७२॥ यथास्वम् अथ सर्वेषां भूभुजां तरसाऽन्विताः ॥ वाहिन्यः सत्त्वदुर्द्धर्षाश्चेलुः पत्ररथाकुलाः ॥२७३॥ येषां दानाम्बुना तृप्ता गण्डभित्तिषु रंजिताः ॥ पुञ्जिता गुञ्जितव्याजान्मन्ये भृङ्गा जगुर्गुणान् ॥२७४॥ जयलक्ष्म्याः समेष्यन्त्याः कर्णतालैजनच्छलात् ॥ वीजनाय तदभ्यासं ये कुर्वाणा इवारुचन् ॥२७५॥ येषां कपोलपालीषु नूनं लग्ना विरेजिरेऽलिन्यः ॥ कार्ष्ण्यस्य [1]विधेर्विगमे तदर्थमत्ता मषीगुलिकाः ॥२७६॥ स्वमेषु गोपयिष्यन्ति नश्यन्तो युधि विद्विषः ॥ इतीव पुद्मिनीखण्डान्यभञ्जन् सरसीषु ये ॥२७७॥ अस्मद्गण्डस्थलीं हित्वा द्विरेफाः किं भजन्त्यमून् ॥ इति क्रुधेव मत्ता ये ममृदुः पुष्पितांस्तरून् ॥२७८॥ वयं दवीयसोऽप्येभिराकर्षेम रिपूनिति ॥ द्राघीयसः कराग्नूनं रुषा प्रासीसरन्त ये ॥२७९॥ योधैरध्यासिता यत्र ते संवर्म्मितमूर्त्तयः ॥ स्तम्बेरमा व्यरोचन्त सपक्षा इव भूधराः ॥२८०॥ सप्तभिः कुलकम् ॥ [2]वालहस्तानविस्रस्तान् दुधुर्वुर्ये मुहुर्मुहुः प्रस्थास्तून् स्वामिनो नूनं [3]नीराजयितुमुद्यताः ॥२८१॥ ये शंखमणिमालाः स्वकण्ठे दधुरधीश्वरैः । काले जिघृक्षया न्यस्ता यशोबीजावलीरिव ॥२८२॥ आननोद्गच्छदत्यच्छफेनपिण्डच्छलेन ये ॥ उद्वेमुश्चिरगुप्तानि यशांसि स्वामिनामिव ॥२८३॥ इयच्चमूभराक्रान्तः शेषः स्थाता कथं न्विति ॥ तं वीक्षितुं खुरैस्तीक्ष्णैरुच्चखुर्ये भुवं ध्रुवम् ॥२८४॥ अध्वक्लमगलत्सोष्मास्वेदबिन्दूत्करच्छलात् ॥ प्रतापं स्वप्रभूणां ये व्यकिरन्निव सर्वतः ॥२८५॥ अप्यारूढाश्ववारा[4] स्तागश्ववारास्त आसत ॥ जात्या अपि द्दढं यत्राकुलीना इव रंहसः ॥२८६॥ षड्भिः कुलकम् ॥ वातोद्धूतैर्मिथः श्लिष्टा येषां कदलिका बभुः । सखीवच्चिरकालेन मेलादालिङ्गनोद्यताः ॥२८७॥ यच्चोंकारस्वनव्याजात् भूरिभारभराऽर्त्तितः ॥ चक्रन्दुरिव चक्राणि [5]प्रचक्राणि रयात् पथि ॥२८८॥ शिखरेषु सिता येषां मन्दानिलविलोलिताः ॥ पताकाः स्वामिनां नूनं नृत्यन्त्यः कीर्त्तयोऽरुचन् ॥२८९॥ छन्ने नभसि यच्चक्रोत्खाताभिः क्षोणिरेणुभिः । भानुः समवृणोत् पादानुद्धूलनभयादिव ॥२९०॥ रेजुराश्वा[6] रथा यत्र ते विमाना इवावनीम् ॥ मर्त्त्याश्ववाहचातुर्यम् अवतीर्णाः परीक्षितुम् ॥२९१॥ पञ्चभिःकुलकम् ॥ दीप्रानेकनिशातास्त्रबिम्बितङ्गाश्चकासिरे ॥ युगपद् ये जिगीषन्तो नानारूपैरिव द्विषः ॥२९२॥ दधौ व्रणकिणश्रेणी यदङ्गेष्वस्त्रघातभूः ॥ जयश्रीपरिम्भोद्यत्कस्तूरीस्तवकश्रियम् ॥२९३॥ येषां पाणिष्वलक्ष्यन्त



१. विधेर्दैवात् ॥ २. अविस्रस्तान् संहतकेशान् ॥ ३. नीराजनम् आरत्रिकावतारणविधिस्तत्रहि चामरोत्क्षेपः क्रियते ॥ ४. आरूढाश्ववारा अप्यश्ववारा नहि अश्ववारेषु अश्ववारारोहः संभवति, नापि जात्या अकुलीनाः, अथवा अश्ववारा अश्वसमूहाः जात्या प्रधानाः, रंहसो वेगात्सकाशादकुलीनाः, पृथिव्यनाश्लिष्टाः ॥ ५. प्रचक्राणि चलितुं प्रवृत्तानि ॥ ६. अश्वैरुह्यन्ते इत्याश्वा रमणीयत्वेन विमाना इव ॥

लोलन्त्योऽसिलताः शिताः ॥ क्षुधितेन यमेनेव रसनाः प्रगुणीकृताः ॥२९४॥ गभीराऽभाद् यदङ्गेषु व्रणरन्ध्रपरम्परा ॥ क्रष्टुं वीररसं देहसेकायेवायनावली[1] ॥२९५॥ भूयांसोऽपि कनीयांसः[2] कण्डूलभुजमण्डलाः ॥ सुयोधा अपि [3]दुर्योधाः समतिष्ठिन्त यत्र ते ॥२९६॥ पञ्चभिः कुलकम् ॥[4]येषां निस्वाननिस्वानाः प्रतिस्वानमिषाद् द्विषः ॥ अवतारयितुं नूनम् आरोहन् म्लेच्छवद् गिरीन् ॥२९७॥ प्राप्ता वयं न चाद्याऽपि त्वमिति स्पर्द्धयोद्धताः । येषां द्विषमिवाह्वातुं भेर्यो दध्वनुरध्वनि ॥२९८॥ तेऽथ सर्वे समागत्य तस्थुर्विषयसीमनि ॥ न [5]सन्धामतिप्वर्त्तन्ते महान्तोऽत्यर्थिनोऽपि हि ॥२९९॥ त्रिभिर्विशेषकम् ॥ तान् आगतानथाकर्ण्य वर्ण्यः कुम्भोऽपि भूपतिः ॥ प्राप स्वदेशसीमानं सन्नद्धानीकिनीवृतः ॥३००॥ ववृषुर्दानवारीणि कपोलैर्यस्य वारणाः ॥ प्रतापं वैरिणां नूनं विध्यापयितुमुधताः ॥३०१॥ शितैः खुरपुटैर्यस्य वाजिभिर्भूमिधूलयः ॥ उदखायन्त निक्षेप्तुं मूर्द्धसु द्विपतामिव ॥३०२॥ अश्वाकृष्टा रथा वेगाद् यस्याऽऽरूढमहारथाः ॥ [6]पन्थानमत्यवर्त्तन्त लुब्धस्येव मनोरथाः ॥३०३॥ वर्मश्लेषोन्मिषत् स्वेदबिन्दुस्पन्दच्छलाद् भटाः ॥ यस्य वीररसं देहेष्वमान्तम् इव सुस्रुवुः ॥३०४॥ संजग्माते ततोऽनीके महाभूमृत्समुत्थिते ॥ जवात् प्राच्यप्रतीचीने स्रवन्ती स्रोतसी इव ॥३०५॥ बलद्वयभटैर्युद्धसिन्धुर्जयसुधाशया ॥ ततो मन्थितुम् आरेभे सुमनोदानवैरिव ॥३०६॥ वयं स्वाम्यर्थसिद्ध्यर्थं म्रियेमहि जयेम वा । इति चेतसि सन्धाय व्यापृता युद्धमूर्धनि ॥३०७॥ कातरग्रथितत्रासान् प्रासानप्यवमेनिरे ॥ योद्धारः प्रतियोद्धृदणां सजतो मशकानिव ॥३०८॥ युग्मम् ॥ उत्तमाङ्गैः सुयोधानामुच्छलद्भिरसिक्षतैः ॥ [7]कालरात्रिरपव्रीडम् अक्रीडत् कन्दुकैरिव ॥३०९॥ दत्त्वा प्रतिद्विषां योद्धैः प्रहारान् अस्त्रसंहतेः ॥ सखीव संयुगे क्रीता जयश्रीः स्वबलश्रियः ॥३१०॥ विलूना दन्तिनां शुण्डाः कृतान्तेन कुतूहलात् ॥ शोणितासवपानाय नलिका इव कल्पिताः ॥३११॥ [8]पतितेभतनुव्रातस्थपुटारणभूर्युधः भटानामुत्सहिष्णूनामपि प्रत्यूहमावहत् ॥३१२॥ मूर्च्छितानां पलाकृष्टा उपरिष्टान्निपानुकाः ॥ कृपायेवाऽधुवन् पक्षान् मुहुर्वीजयितुं खगाः ॥३१३॥ सरसं [9]तरसं पक्तुं रवापूर्णदिगन्तराः ॥ करालाम् अमुचन् ज्वालामालाम् आस्यैर्ध्रुवं शिवाः ॥३१४॥ प्रहारजर्जरः कश्चिल्लुठन् स्वामिजयश्रुतेः ॥ तुतोष दोष्मतामास्था कीर्त्तौ पिण्डेन् भौतिके ॥३१५॥ जन्यतीर्थे क्षुरप्रेषु लूतश्मश्रुशिरःकचः ॥ अस्रत्क्ताम्बरः कश्चिद् बौद्धदीक्षामिवाग्रहीत् ॥३१६॥ ॥३२॥

१. अयनावली मार्गसन्ततिः ॥ २. कनीयांसः स्वल्पा युवानश्चः, कनीयांस्तु युवाऽल्पयोरिति वचनात् ॥ ३. दुःखयोधनीयाः ॥ ४. येषां राज्ञाम् ॥ ५. सन्धां मर्यादाम् ॥ ६. मनोरथानां पन्थानं सुप्राप्तवस्तुविषयत्वम् ॥ ७. संहारप्रवृत्तचामुण्डैव कालरात्रिः ॥ ८. युधःप्रत्यूहमिति योगः ॥ ९. तरस भूभृतो राजानो गिरयश्च मांसं ॥

सायका भूनिमग्नाग्रा अभितः शोणितापगाम् ॥ [1]स्पन्दात्सान्द्राः प्ररोहन्तः काशा इव चकाशिरे ॥३१७॥ किमस्मान् पीडयन्त्येते मिथो घट्टनया भटाः ॥ इतीवाग्निकणान् खड्गा [2]रुषाऽमुञ्चन् दिधक्षया ॥३१८॥ शितैः शिलीमुखैः स्यूता भटानां कंकटा बभुः ॥ कीलिता इव दार्ढ्याय मुदुर्दवरकैरिव ॥३१९॥ दीर्णेभ्यो गजकुम्भेभ्यो भटानां मस्तके पतन् ॥ मुक्ता जयश्रियो मुक्ता माङ्गल्या अक्षता इव ॥३२०॥ भूमिमग्नेन कुन्तेन वाजिना सह कीलितः ॥ [3]सादी जीवन्निवातिष्ठत् परासुरपि कश्चन ॥३२१॥ पक्षे स्थेमानमेकस्मिन्नपश्यन्त्यो जयश्रियः ॥ साहचर्यादमूं शश्वदनुवर्त्तिष्णवो ध्रुवम् ॥३२२॥ दोलायमानमनसः कीर्त्तयो मूर्त्तिसंस्पृशः ॥ मरुतान्दोलिता उच्चैर्वैजयन्त्यो बभासिरे ॥३२३॥ युग्मम् ॥ उदरैः कटैः कपालैः पानामत्रैर्भृता प्रवीराणाम् ॥ असृजः प्रपाऽस्रपाम् इव रणभूमिर्मृत्युना क्लृप्ता ॥३२४॥ छत्राणि भूमिखातानि मध्ये शोणितनिम्नगाम् ॥ शोणितान्यस्रधाराभिर्दधुः कोकनदश्रियम् ॥३२५॥ एवं समरसंरम्भे प्रवृते तत्र सैन्ययोः ॥ दीर्णौ कुम्भौ प्रतिक्ष्मापैः कुम्भराजस्य कुम्भिनः ॥३२६॥ ततस्ताभ्यां स्थवीयांसः सान्द्रा मुक्ताकणाः क्षणात् ॥ यशः—पूरा इवाक्रूरा[4] निपेतुर्जयदन्तिनः ॥३२७॥ पराकृष्याथवा कुम्भं विजहत्याः स्ववल्लभम् ॥ जयश्रियोऽप्रियप्राप्तेरमी बाष्पप्लुवा इव ॥३२८॥ ततोऽपसृत्य भूपोऽसंवाजिभुमेः पुरीमगात् ॥ शक्याहि जीवता जातु वैरशुद्धिर्मनस्विना ॥३२९॥ मिथ्यादर्शनशल्यस्य महिमाऽणीयसोऽप्यहो ॥ मल्लेरपि पितुर्येनाऽभूद् एषाऽपयशा दशा ॥३३०॥ अन्यथा चरणौ यस्या वासवाः प्रणिपातुकाः ॥ अहं पूर्विकया सर्वे भूभुजश्च महाभुजाः ॥३३१॥ स्वभालफलके व्यक्तां किणरेखां मलीमसाम् ॥ हर्षोत्कर्षप्रसन्नास्या दास्याङ्कमिव बभ्रिरे ॥३३२॥ स्तुत्यञ्जलिपुटीपीतयद्गीः पीयूषसेवनात् ॥ विध्यात इव न क्रोधो वैरं नृणाम् अजीजनत् ॥३३३॥ महाक्षत्रभुवोऽप्यस्याः स्वप्नेऽपि प्रशमः प्रियः ॥ वयं नेति रुषेव प्राग् यद्देशान्नेशुराहवः ॥३३४॥ तस्या अपि कथं तातो लेभेऽरिभ्यः पराजयम् । सुस्वामिस्वीकृतः श्वाऽपि न परैः परिभूयते ॥३३५॥ यत्त्वसौ[5] तस्य तन्मल्लेर्मायाशल्यं पुराकृतम् ॥ विपाकिमं व्यजृम्भिष्ट किंपाकस्य यथाफलम् ॥३३६॥ उपारुन्धत[6]
ते भूपाः पुरीं कुम्भनृपं ततः ॥ सादिव्याधा अरण्यानां शार्दूलमिव सर्वतः ॥३२७॥ कुम्भस्तेषां निकाराय जागरूकतया छलम् ॥३३॥
॥ दाम्भिकानां यथा साधुर्नाससाद सुधीरपि ॥३३८॥ ततः सोऽनाटयच्चिन्तां किं कर्त्तव्यतयाऽऽतुरः ॥ मानिनां मानभङ्गो

---

१. स्पन्दात् शोणितजलसेकात् ॥ २. रुषा, व्यापारकेषु कोपेन ॥ ३. सादी, आरोहंकोऽश्ववारः ॥ ४.अक्रूराः, स्वच्छाः ॥ ५.असौ पराजयस्तस्य कुम्भस्य ॥ ६.उपारुन्धतेति, द्विकर्मकः सादिनोऽश्वारूढा व्याधाः ॥

हि मृत्योरप्यतिरिच्यते ॥३२९॥ ततो विमनसं वीक्ष्य तं मल्लिरवदत् पितः ? ॥ किं चिन्तयसि विद्राणो वारीगत इव द्विपः
॥३४०॥ स प्राह [1]त्वत्कृते पुत्रि संरम्भोऽयं मया कृतः यावद् विफलताम् आप यथा निस्वमनोरथः ॥३४१॥ साऽऽह मा स्म
विषीदस्त्वम्–उपायमिह चिन्तय ॥ तस्मिन्नुद्यच्छतां यस्मात् सिद्धिरुत्सङ्गम् अङ्गति ॥३४२॥ स प्राह पुत्रि विदुषी त्वमेवोपायम्
आदिश ॥ जगन्ति भासयत्यर्क्के प्रदीपः क्वोपयुज्यते ॥३४३॥ साऽवोचत् तात यद्येवं तदा कन्यां ददामि वः ॥ एतेऽतिच्छद्मना
प्रेष्य दूतानेकैकशो रहम् ॥३४४॥ विश्वासं श्वासवद् विश्वहृद्यम् आपाद्य वेशय ॥ मिथो वार्त्ताऽनभिज्ञांस्तान् सायं मोहनमन्दिरम्
॥३४५॥ युग्मम् ॥ प्राप्तानामत्रैषां न पुनर्भव इति गतीरिव चतस्रः ॥ अपिधापय प्रतोलीस्तात त्वं रोधकप्रगुणः ॥३४६॥
प्रयुक्तं धर्मबोधाय भवेच्छद्माऽपि नागसे ॥ देहोपकृतये न स्यात् किं विषं मन्त्रसंस्कृतम् ॥३४७॥ ततस्तेन यथाऽऽदेशं
सर्वमेतदनुष्ठितम् ॥ आप्तवचसि साधूनां धियो विपरियन्ति न ॥३४८॥ प्रविश्य तेऽथ संभ्रान्ता मल्लेरर्च्चां हिरण्मयीम् ॥
निर्वर्ण्यैषैव मल्लीति निस्संशयमंसत ॥३४९॥ अहो रागस्य माहात्म्यं यदत्यासीदतामपि ॥ अर्च्चायां तद्भ्रमस्तेषां निमेषादिवियुज्यपि
॥३५०॥ यद्वा [2]कमलम् अनम्भसि कमले चेत्यादिनीतितो रक्ताः ॥ असदपि कमलादित्वं स्त्र्यङ्गेषु यदाऽध्यवस्यन्ति
॥३५१॥ अतिसाधर्म्यभ्रान्ता ऐकात्म्यं रागसागरनिमग्नाः ॥ निरवधिषु प्रतिनिधिषु प्रतियन्ति तदा किम् आश्चर्यम् ॥३५२॥
युग्मम् ॥ तस्थुरेकायनास्ते तां निध्यायन्तोऽखिलां निशाम् ॥ न तृप्यन्ति चकोरा हि पिबन्तश्चन्द्रिकासुधाम् ॥३५३॥ ततः
प्रातः सखीव्रातवृता मल्लिस्तमालयम् ॥ विद्यादेवीवलयिता भारतीव समाययौ ॥३५४॥ अस्यापि[3] नोत्तमत्वं सच्छिद्रतयेति
दर्शयितुमिव सा ॥ अपिधानमुत्तमाऽङ्गात् समपासीसरदथार्च्चायाः ॥३५५॥ मृताहिवृषदंशश्ववपुर्गन्धधुरन्धरः ॥ अथोल्ललास
दुर्धन्धश्छिद्राद् वर्च्चोगृहादिव ॥३५६॥ विषयाश्वान्तराणां यः स्वेनापीपददेकताम् ॥ नानात्वं न क्षमेऽमीषामिति दर्प्पभरादिव
॥३५७॥ नूनं गन्धान्तरव्यक्तिशक्तेः कवलनाद् बलात् ॥ येन स्व व्यञ्जकस्यापि घ्राणस्याऽनायि बन्धता ॥३५८॥ मूर्च्छन्यो
मूर्च्छयामास [4]सर्वदिक्कूलमुद्वहः ॥ चित्रं विषद्रुमोत्फुल्लः फुलगन्ध इवाङ्गिनः ॥३५९॥ तमाघ्राय ध्रुवं भूषा अघ्रेयघ्रापणादपि ॥ ॥३४॥
सागसः [5]स्वतया गोप्या इत नासाः पटैः प्यधुः ॥३६०॥ तानुवाच ततो मल्लिः किं तिरोऽधत्त नासिकाः ॥ चेलाञ्चलैरिलापाला

---

१.त्वत्कृते भवद्विषया समंजसनिवर्त्तनाय ॥ २. स्वरुपस्त्रीदर्शनात् कश्चित्कामी प्राह कमलमनम्भसि कमलेच कुवलयमेतानि कनकलतिकायां । सा च सुकुमारसुभगेत्युत्पातपरंपरा केयम् ॥ ३.अस्यापि उत्तमाङ्गस्य सच्छिद्रोहि नोत्तमः ॥ ४. दिक्कूलद्वह इति दिग्व्यापकश्चित्रमद्भुतं घ्राणशक्तिप्रतिपाघातकस्यापि मूर्च्छाहेतुत्वम् । ५. स्वतयेति आत्मीया अपि सापराधा गोपनीयाः ॥

देवार्च्चाव्यापृता इव ॥३६१॥ तेऽभ्यधुः क्षोणिभृत्पुत्रि ? परासोरिव गोरयम् ॥ कस्यापि दुःसहो गन्धस्तेन नासाः पिदधमहि ॥३६२॥ साऽऽह भूषा ? यदाऽमुष्या हेमाच्चार्या अपि क्षणात् ॥ प्रतिवासरम् एकैकस्वादुग्रासप्रवेशनात् ॥३६३॥ ईदृक् पुद्गलनिर्वाहस्तदा [1]नानाऽमसंस्पृशः ॥ का कथौदारिकाङ्गस्य लोपमायेरिवेष्यतः ॥३६४॥ युग्मम्, तथाहि—रुदितो यत्र भूरेणुपातोत्थास्रच्छलाद् दृशो ॥ मुच्येत हि न जात्वस्माद् बाधादित्यरतेरिव ॥३६५॥ अस्थिरं सर्वमप्यत्र नावामेवेति सम्मदात् ॥ निमेषोन्मेषभङ्ग्येव लोचने यत्र नृत्यतः ॥३६६॥ [2]मुखेऽस्माभिःस्थितिर्लब्धाऽस्थित्वेनापि घृणास्पदैः ॥ इति दन्ता हसन्तीव विलक्षाः शुक्लिमच्छलात् ॥३६७॥ प्रवहत्यऽविरामेण श्लेष्मपूरं जुगुप्सित ॥ यत्र वैतरणी कुल्या संहर्षेणेव नासिका ॥३६८॥ अपूर्वःकुक्षिरवटो वर्त्तते यन्त्रदुर्भरः ॥ सायं पूर्णोऽपि पानान्नैरिक्तः प्रतिदिनं प्रगे ॥३६९॥ न मत्समोऽस्ति दुष्पूरो जगत्यन्य इति ध्रुवम् ॥ अनिलक्षोभजैः स्वानैः कुक्षिर्यत्र प्रजल्पति ॥३७०॥ जीव उच्छ्वासनिःश्वासव्याजात् प्रकृतिदुर्भगे ॥ वसाम्यत्र नवेतीव यत्राऽऽधत्ते गतागतम् ॥३७१॥ नूनं मृगमदादीनां काय एष स्वसङ्गमात् ॥ आपादयति दौर्गन्ध्यं सौगन्धस्मयहानये ॥३७२॥ अष्टभिः कुलकम् ॥ क्षामे प्रवयसामङ्गे कटाक्षान् कठिनास्थनि ॥ न क्षिपन्ति चकोराक्ष्यः शङ्के कुण्ठत्वशङ्कया ॥३७३॥ नास्मान् कवरयिष्यन्ति[3] सुभ्रुवां मृदवः कराः । संप्रतीतीव वृद्धानां प्रयान्ति शिरसः कचाः ॥३७४॥ नास्ति लालयितेदानीं ममेतीव विषादतः ॥ केशहस्तः परिस्रस्तः पाण्डुताम् एति वार्द्धके ॥३७५॥ वैयात्येन वितन्वन्यास्तन्वाङ्ग्याः पुरुषायितम् ॥ कामुकस्योरसि स्थूलस्तनपीठविलोठनात् ॥३७६॥ पीडनेन ध्रुवं धातोश्चरमस्य निरर्गलात् ॥ विसर्गात् क्षेत्रियव्याधिर्यौवनेऽपि[4] प्रसर्प्पति ॥३७७॥ युग्मम् ॥ खण्डयन्त्यधरं मूढा युवानः सुभ्रुवाम् ध्रुवम् ॥ सुधानिविशतेऽत्रेति श्रुत्वा तां क्रष्टुम् उत्सुकाः ॥३७८॥ लालामास्यस्य [5]बालाया जुगुप्सामपि धीमताम् ॥ हालामेवाभिमन्वाना हा युवानः पिबन्त्यहो ॥३७९॥ कथं स्त्रीणां स्तनौ शस्यौ कम्रान् मोहयितुं ध्रुवम् ॥ यावैन्द्रजालिकेनेव सृष्टौ मोहनगोलकौ ॥३८०॥ चारिमा कुचयोः कः स्याद् यौ बालास्यनिपीडितौ । कुम्भौ भिन्नाविवाजस्रं स्रवतः [6]पिच्छिलं पयः ॥३८१॥ पुण्यैरेवानयोर्मन्येऽभूद् बालानामदन्तता ॥ वीक्ष्येताप्यन्यथा कस्तौ विकृतौ तद्रदक्षतैः ॥३८२॥ गर्भादारभ्य रजसा निर्मिता या बलीयसा ॥ शश्वद्



१. नाना अनेकान् अमान् रोगान् संस्पृशति तस्य, लोपं ध्वंसम् आयेराधि, प्रत्ययस्य न नाम स्पृशतीत्यनामस्पृक्, तस्य निषेधात् नामसंस्पृश इत्यर्थः लोपमदर्शनम् ॥ २. अस्थित्वेनादि काकस्वरूपत्वेनापि ॥ ३. कवरयिष्यन्ति कबरीरूपतयाऽऽपादयिष्यन्ति ॥ ४. क्षेत्रियव्याधिः क्षयरोगः ॥ ५. बालायाः षोडशवर्षादेश्याया योषितः ॥ ६. पिच्छिलं मनाक् सान्द्रम् ॥

रजस्वलां तां स्त्रीं सन्तः संभुञ्जते कथम् ॥३८३॥ अमी अस्मत्सनामानः सदाख्यातविभक्तिकाः ॥ साधयन्ति गुणापोढाः साधुरूपाणि केचन ॥३८४॥ प्रतीपं तद्वयं कुर्म्म इति स्पर्द्धेन धातवः ॥ असाधीयांसि रूपाणि नूनं वपुषि तन्वते ॥३८५॥ युग्मम् ॥ तन्मा स्म रजत स्त्रैणे देहे तत्त्वविदोऽपि भोः ॥ पुरीषे कर्हिचिल्लीढपायसा वायसा इव ॥३८६॥ तत्त्वोन्मेषजुषामीषत्तेषां सम्यक् प्रतीतये ॥ प्राच्यजन्मकथां साऽथ प्रथयामास तथ्यवाक् ॥३८७॥ कर्मक्षयोपशान्त्याऽथ भव्यत्वपरिपाकतः । तेऽपि जातिस्मरत्वेन वीतस्मरतया बत ॥३८८॥ विविक्ता वपुषः स्त्रीणां सतत्त्वं निरचिन्वत ॥ कामलानाविलाक्षाणां न शंखे पीतिमभ्रमः ॥३८९॥ युग्मम् ॥ किं कुर्म्महेऽधुना देवीत्याज्ञां ते तां ययाचिरे ॥ मनस्विनोऽपि दास्यं हि पुण्यैरिच्छन्ति तादृशाम् ॥३९०॥ मल्लिर्जजल्प यद्येवं तदा प्राक्तनजन्मनः । त्रैलोक्यप्रथितान्वीक्षां [1]दीक्षामादध्वमुत्तमाः ॥३९१॥ एषैव यन्नृणां भिन्द्याद् दुर्भदानपि पातकान् । कल्पभानुं विना कुर्यात्कः शैलान् परमाणुसात् ॥३९२॥ पिपर्त्त्येषैव जन्तूनामनश्वरसुखासिकाम् ॥ मनोराज्यस्थितिं प्रायात् कोऽन्यः कल्पलतामृते ॥३९३॥ त एवं कुर्म्म इत्यूचुर्गुरोरायाति सुन्दरीम् ॥ तत्त्वतो ह्यभ्युपेतस्य गिरं कः प्रतिकूलयेत् ॥३९४॥ सा प्राह तत् प्रतिष्टध्वं स्वेषु देशेषु संप्रति ॥ पुत्रांस्तत्र प्रतिष्ठाप्य राज्येष्वत्रोपसर्प्पत ॥३९५॥ एतदुपगम्य सम्यक् प्रणम्य पादौ नृपस्य कुम्भस्य ॥ तेन बहुमानितास्ते प्रतस्थिरेऽथ स्वनगरेषु ॥३९६॥ लौकान्तिकैः प्रयुक्ताऽथ समितौ सुभटैरिव ॥ मल्लिर्भल्लिरिवोच्छेत्तुं कर्म्मारातीन् प्रचक्रमे ॥३९७॥ स्वर्णस्तोमैरथोन्मीलद् वारावलिभिरुन्मदाम् ॥ अकृषत् तृष्णजां तर्पम् आवर्षं [2]कालिकेव सा ॥३९८॥ एकादश्यां वलक्षायां सहसः साहसोज्झिता ॥ [3]साहसांका समं राज्ञां प्रवव्राज त्रिभिः शतैः ॥३९९॥ छद्मस्थैकाकिनी स्त्रीत्वान्माऽर्थ्या भूत्कामुकैरियम् ॥ इत्यस्या अजनि ज्ञानं तस्मिन्नेवाहनि ध्रुवम् ॥४००॥ आनन्त्यस्पर्द्धयाऽर्थानां लोकालोकभुवां ध्रुवम् ॥ अमुष्याः केवलज्ञानम् आनन्त्यं समशिश्रियत् ॥४०१॥ अथ तस्या मघवन्तः श्रीशरणं[4] विदधिरे समवसरणम् । प्रत्याययितुं जगतीं साक्षादवनौ यदवतीर्णम् ॥४०२॥ ज्ञानादित्रितयस्यैष मल्लाभः प्राणिनां फलम् ॥ इति व्यञ्जत् त्रिभिः शालैः [5]श्रेयः पुरमिवारुचत् ॥४०३॥



१. प्रथितान्वीक्षां प्रसिद्धगवेषणाम् ॥ २. कालिका, मेघमालाविशेषस्तत्र धारावलिभिरिति दृश्यम् ॥ ३. याहि साहसोज्झिता सा कथं साहसाङ्केति अथवा सा मल्लिः, हसेन हास्येन उज्झिता तथा साहसाङ्कादमलाञ्छना, जितेन्द्रियत्वात्, साहसं तु दमे दुष्करकर्मणीति वचनात् ॥ ४. श्रियो लक्ष्म्याः, शरणं गृहं पुण्यवति रमणीये च पात्रे सर्वत्र श्रीर्वसति, न तु किंचिन्नियतं, गृहं इदं तु समवसरणं साक्षादिव ॥ ५. श्रेयः पुरं, निर्वाणनगरम् ॥

तत्र भद्रासनासीना देशनाछद्मनाऽथ सा ॥ भव्याङ्गिनः स्वसङ्गाय साक्षान्मुक्तिरिवाह्वयत् ॥४०४॥ राज्यसौस्थ्यमथापाद्य ते व्रतायाऽऽययुर्नृपाः ॥ दृढसन्धानुबन्धा हि प्राणध्वंसेऽपि सात्त्विकाः ॥४०५॥ भवादुद्विजमानास्ते व्रतं जगृहिरे ततः ॥ दास्यदग्धस्य कस्य स्यान्न काम्यं स्वाम्यमञ्जसा ॥४०६॥ [1]आगः कथंचिद् उद्वीक्ष्य सख्यमाकालभाव्यऽपि ॥ उत्सृज्य कर्मभिस्तेऽथ मोक्षमैत्रीमुपागमन् ॥४०७॥ स्त्रैणं तीर्थमजय्यमद्भुततमं निर्माय निर्मायधीर्विष्वक् [2]प्रोषितसन्धमन्धतमसं[3] प्रध्वस्य भव्याङ्गिनाम् ॥ श्रीमल्लिर्भवपल्लिभञ्जनपटुर्मासे तपस्ये सितद्वादश्यामथ तीर्थपो निरवृणोज्ज्ञान्यागतिस्ताद्दृशाम् ॥४०८॥ इत्थं साधुमहाबलस्य चरतः शस्यास्तपस्याश्चिरं मल्लिः प्राच्यभवाङ्गिनः श्रुतसुधाधारावसिक्तात्मनः ॥ भो मिथ्याभिनिवेशनिर्मितिफलं स्त्रीत्वानुभाव्यं बुधाः, बुध्वा बोधिविशुद्धये विधुवत श्रद्धालवस्तद्ग्रहम् ॥४०९॥ इति महाबलकथानकं समाप्तम् ॥

१. कर्मणाम् आगोऽपराधः कथंचिदसातादिफलादर्शनेन ॥ २. प्रोपितसन्धं नाशितसत्प्रतिज्ञम् ॥ ३. अन्धतमसं तीव्राऽज्ञानम् ॥

## अथ पीठमहापीठयोरुदाहरणमुच्यते—

जंबूद्वीपे विदेहेषु वत्सावत्यां प्रथीयसि । विजये चक्रिभिर्जेये पूर्वभूतप्रभङ्करा ॥१॥ धनजन्मनि सत्पात्रदानसम्भूतपुण्यतः । स मानुष्यादिपर्यायैर्जायमानः क्वचिद्भवे ॥२॥ जीवो युगादिदेवस्य भिषजः सुविधेः सुतः । अभयघोषनामाऽभूद्वैद्यविद्याविशारदः ॥३॥ युग्मम् ॥ लुप्तवर्णादिपाठेन [1]व्याहृत्याम्लिष्टया च यम् । व्यत्यस्तव्याख्यया चैभिर्वैद्याभासैः कदर्थिताः ॥४॥ इतीव वैद्यकग्रन्थैर्वक्तृस्पष्टोद्गताक्षरम्[2] ॥ सम्यग् व्याख्यानसुभगमध्यूषे यन्मुखं मुदा ॥५॥ युग्मम् ॥ [3]धातूनामवसायेन प्रकृतिप्रत्ययक्रमात् । क्रियामसाधयच्छुद्दां यो वैयाकरणो यथा ॥६॥ जीवन्ति च म्रियन्ते च व्याधयो यस्य शक्तिभिः । तत्तदौषधयोगेन यथा पारदबिन्दवः ॥७॥ कटुजायुरसास्वादवैरस्योद्वेजिता इव । प्रायश्चिकित्सिता येन प्रारोहन्नामनामयाः ॥८॥ मृत्योरप्यास्यकुहरादाच्छिद्य स्पर्द्धया ध्रुवम् । प्रत्युज्जीवयतो मन्दानगमंस्तस्य वासराः ॥९॥ क्रियार्थिकयदस्तोकलोककोलाह–लच्छलात् । अभयं घोषयन्नृणां रुम्भ्यो योऽभूत्स्फुटाभिधः ॥१०॥ मुहूर्तमपि तस्याथ वियोगमसहिष्णवः । महीपसचिवश्रेष्ठिसार्थवाह–सुताः क्रमात् ॥११॥ कोविदारहिताः[4] शश्वत् सुमनोभिरनुज्झिताः । चत्वारस्ते सवयसो देवारामा इवाभवन् ॥१२॥ युग्मम् ॥ अन्येद्युरुपविष्टेषु तेषु वैद्यस्य सद्मनि । कृमिकुष्ठापदिष्टाङ्गो भिक्षायै प्राविशन्मुनिः ॥१३॥ तं वीक्ष्य सार्द्रचित्तास्ते सहासं मित्रमूचिरे । वैद्यकछद्मना मोष्यास्त्वया श्रीमन्त एव किम् ॥१४॥ यत्क्रिया क्रियते नैषां हीनदीनतपस्विनाम् । लोभेनाधीयमाना हि सा पुण्याय न कल्पते ॥१५॥ निष्णातबुद्धयस्तृष्णां न च पुष्णन्ति येन सा । संमार्जनीव संमार्ष्टि गुणान् पांशुकणानिव ॥१६॥ तदर्जय सखे ? पुण्यमस्य साधोश्चिकित्सया । वीक्षाऽपि प्राप्यते पुण्यैरीदृशां किमु तत्क्रिया ॥१७॥ स बभाण करोमीति किन्तु मे सन्ति नागदाः । तेऽवोचन्त वयं मूल्यं दद्महे स ततोऽब्रवीत् ॥१८॥ कंबलरत्नं गोशीर्षचन्दनं लक्षपाकतैलं च । अत्रोपयुज्यते तत्र तैलमास्ते मदीयगृहे ॥१९॥ शेषार्थं मूल्यमादाय वणिजो विपणिं गताः । केनार्थेनागता यूयमिति तेन

१. म्लिष्टयाऽस्पष्टया ॥ २. वक्तृवचनचतुरम् ॥ ३. धातूनां वातपित्तादीनां, प्रकृतेः, तादात्म्यस्य प्रत्ययात् प्रतीतेः ॥ ४. कोविदैर्विचक्षणैररहिता अवर्जिताः, कोविदाराणां काञ्चनाराणां हिताः ॥

त ऊचिरे ।।२०।। तेऽथ प्रयोजनं प्रोचुस्तेनोक्तं नाददे [1]भृतिम् । भूयाद्भूयान्ममाप्यस्य क्रियया यतिनो वृषः ।।२१।। औषधानि गृहीत्वाऽथ जग्मुस्ते मुनिसन्निधौ । कः सचेता उदासीत सामग्र्याप्तौ [2]क्रियां प्रति ।।२२।। उद्याने प्रतिमावर्त्ती निष्कम्पोऽदर्शि तैर्मुनिः । ध्याननिर्ध्यातमुक्तिश्रीरागजस्तम्भवानिव ।।२३।। वन्दित्वा ध्यानविघ्नं ते विधास्यामो मुने ! वयम् । इत्यनुज्ञाप्य तज्ज्ञास्ते ततः प्रारेभिरे क्रियाम् ।।२४।। अन्तस्तन्वतिगच्छत्सु रोमभिस्तैलबिन्दुषु । तेषामौष्ण्येन सङ्क्षोभात्कृमयः संचरिष्णवः ।।२५।। पीडयन्तो मुनेर्देहं त्याज्यमानाः स्वमाश्रयम् । जङ्गमा इव निर्जग्मुर्बहिर्दुष्कर्म्मराशयः ।।२६।। युग्मम् ।। मा पलाय्य [3]क्वचित्काचिदमीषां प्रकृतिर्गमत् । सर्वेऽप्यमी हि निक्षेप्याः कारायां तस्करादिवत् ।।२७।। इति ग्रावारिषुर्नूनं ततस्तं कम्बलेन ते । [4]हिमे संजयितुं तस्मिन्नौष्ण्यधूपायितान् कृमीन् ।।२८।। युग्मम् ।। व्यलिम्पन्त ततो गात्रं चन्दनेन सुगन्धिना । ते मुनेः सङ्गमायेव मुक्त्या गलितकर्म्मणः ।।२९।। एवमभ्यङ्गसंव्यानलेपनान्यानुपूर्व्यतः । त्रिःकुर्वाणा [5]अनर्वाणाः सज्जयन्ति स्म ते मुनिम् ।।३०।। तत्रानुपूर्व्यामाद्यायां त्वग्लीनाः कृमयश्च्युताः । पललस्था द्वितीयस्यामन्यस्यामस्थिसंस्थिताः ।।३१।। स्पृष्टबद्धनिधत्ताख्या मुमुक्षोः कर्म्मसञ्चयाः । यथोत्तरपरीणामपरिपाट्येव दारुणाः ।।३२।। युग्मम् ।। संरोहिण्या ततः कायो हेमच्छायोऽभवन्मुनेः । औषधीनामचिन्त्यो हि महिमा कर्म्मणामिव ।।३३।। क्षमयित्वा ततः साधुं तुष्टास्तेऽयुर्गृहान्निजान् । पात्रे विद्योपयोगे हि प्रेक्षावान् प्रीयते न कः ? ।।३४।। लक्षमूल्यं परीभोगान्निष्प्रभावतया भिषक् । पञ्चाशता सहस्रैस्तं स व्यक्रीणीत कम्बलम् ।।३५।। अथ वित्तेन तेनासावर्हद्वेश्म विनिर्ममौ । वैद्या अपि न मुह्यन्ति बाह्यवस्तुषु तादृशाः ।।३६।। अर्हतश्च विनाऽस्त्यन्यत्पात्रं वित्तव्ययस्य नान सस्यप्रभवभूप्राप्तौ बीजं को ह्यूषरे वपेत् ।।३७।। मार्गानुसृत्वरी बुद्धिरहो वैद्यस्य तस्य यत् । यत्नस्तत्त्वमविन्दोरप्यर्हत्सद्मविधावियात् ।।३८।। ऊचिरे तेन सुहृदः प्रतिमास्थापनक्षणे । समं सख्यमिव [6]श्रेयोधाम नो जिनमन्दिरम् ।।३९।। तेन कम्बलमूल्येन निर्मापितमदो मया । तदत्र भक्तिमाजन्म वयं सर्वे हि कुर्महे ।।४०।। केषाञ्चिन्मज्जतां सिन्धौ जीविताशामुचां यथा । सहसा ढौकते यानमारोहार्थं कुतश्चन ।।४१।। तथा संसृत्वराणां [7]नो भवे शुभमविन्दताम् । ।।३९।।
अदः [8]साधुक्रियाभङ्ग्या शुभाय समुपस्थितम् ।।४२।। युग्मम् ।। सर्वे तेऽथार्हतो बिम्बे लम्बमाना विकस्वराः । उन्मज्जन्मेदुरामोदरोदः

---

१. भृतिं मूल्यम् ।। २. क्रियां चिकित्सां देवपूजारिकां वा ।। ३. काचित् कृमिः प्रकृतिर्वा, तस्करापि दृष्टान्तेन तयोः सापराधत्वं व्यज्यते ।। ४. हिमे शीतले ।। ५. अनर्वाणा अनिन्द्याः प्रशस्याः ।। ६. श्रेयोधाम कल्याणस्थानम् । ७. नोऽस्माकम् ।। ८. साधुक्रियेति शोभनचैत्यवन्दनपूजनादिव्यापारव्याजेन ।।

कन्दरसंस्पृशः ॥४३॥ उत्तमस्थानसम्प्राप्तेरमन्दान्दोलनच्छलात् । आनन्दादिव नृत्यन्तीः पुष्पमाला न्यवीविशन् ॥४४॥ युग्मम् ॥ मलापनयनव्याजादर्चायाश्च मलानि ते । नूनं प्रक्षालयामासुः क्षणेन स्नपनक्षणे ॥४५॥ पूजकानां चिरश्लिष्टाः कृष्णा लेश्या इवाङ्गिनीः । उन्मीलत्कालिमोल्लेखा धूमलेखा विमुञ्चतीः ॥४६॥ कस्तूरीघनसारादिसुगन्धिद्रव्यनिर्मिताः । प्रतिमायाः पुरोधूपवर्त्तीस्ते उदजिग्रहन् ॥४७॥ युग्मम् ॥ [1]जाग्रता सौरभेणोच्चैर्दिग्मूखेपु प्रसर्प्पता । सपर्यादर्शनायेव ह्वयद्भिर्निःस्वनं जनान् ॥४८॥ कुङ्कुमागुरुकर्पूरैर्व्यलिम्पन्त समन्ततः । भक्तयावध्यं त्रिसन्ध्यं तेऽर्हद्बिम्बमविलम्बितम् ॥४९॥ युग्मम् ॥ उल्लसल्लसिकालास्यं ते गुञ्जन्मुरजव्रजम् । गायदुद्दर्वगन्धर्वं सङ्गीतकमचीकरन् ॥५०॥ एवमभ्यर्चयन्तस्ते विधिना प्रतिमां मुदाल्लामुनिसंसर्गतः सम्यक् श्राद्धधर्मं प्रपेदिरे ॥५१॥ तेऽथ द्वादशधा धर्मं पालयामासुरादरात् । मन्दायते निधिं प्राप्य किं कश्चित्तस्य गुप्तये ॥५२॥ तया चक्रिश्रियं वैद्यः सञ्चिकाय चिकित्सया । न हि कल्पलता जातु सूते कोशातकी फलम् ॥५३॥ तेऽथ सर्वेऽपि निर्वेदाच्छ्रामण्यमुपशुश्रुवुः, । रमन्ते चूतमप्राप्य क्वापि पुंस्कोकिलाः किमु ॥५४॥ आराध्य चारुचारित्रमच्युते ते च्युतागसः । शक्रसामानिकत्वेन सर्वेऽजायन्त निर्जराः ॥५५॥ इतश्च–

जम्बूद्वीपेऽस्ति पौरस्त्यविदेहे सरस्तरे श्रियाम् । विजये पुष्कलावत्यां नगरी पुण्डरीकिणी ॥५६॥ मधावपाच्यवातेन वल्लभानुनयं विना । उद्धूयेव क्वचिज्झिन्ये यस्यां मानो नतभ्रुवाम् ॥५७॥ अमज्जद्यत्र नित्योष्णः सरस्सु प्रतिमानिभात् । शिशिरस्पर्शसंवित्तिकौतुकादिव भानुमान् ॥५८॥ परितो या वृता रेजे हरिद्भिर्वनराजिभिः । नीलांशुकोपसंव्याना दृग्दोषहतयेध्रुवम् ॥५९॥ भूसरसी ततस्निग्धकर्तृकीर्त्त्यब्जिनी भुवाम् । सिताम्भोजन्मनां नूनं शश्वन्मुकुलितात्मनाम् ॥६०॥ सुवर्णकलशा यस्यां मूर्द्धस्वमरसद्मनाम् । भूयो भूमोच्छलरस्त्यानमधुपिण्डश्रियं दधुः ॥६१॥ युग्मम् ॥ पुरी किं मर्त्त्यलोकेऽस्ति मत्समेति कुतूहलात् । निर्गता भुवमुद्भिद्य बभौ शेषपुरीव या ॥६२॥ तत्र साम्राज्यमव्याजं वज्रसेनोऽतनोन्नृपः । पवित्रमतीर्थकृन्नाम–सम्पादुकसमीहितः ॥६३॥ निरागसोऽधुनाऽभूमोभयथाऽपीति भूभुजः । पुण्यैरासाद्य [2]यद्यात्रां तीर्थयात्रामिवातुषन् ॥६४॥ ॥४०॥ शेषामिव शिरस्याज्ञां यस्याधुः पुण्यसञ्चयात् । भूपालाः [3]प्रक्रियापात्रं तस्य नासीरडंबरः ॥६५॥ योधेमहि ध्रुवमेत्य नो योग्यत्वात्

१. जाग्रता अभ्युत्कटेन ॥ २. यात्रां प्रयाणकम् उभयथा निरागसो निरपराधा निष्पापाश्च, पापापराधयोराग इति वचनात् पुण्यवत्त्वात्तस्य भूभुजां निष्पापता स्यादिति द्रष्टव्यम् ॥ ३. प्रक्रियापात्रं राज्यस्थित्या परिकरमात्रं तदधिकार इति यावत् ॥

प्रतिद्विपैः । इतीव यद्द्विपाः स्नायं स्नायं स्वमुद्धूलयन् ।।६६।। स्फूर्त्तिर्न नो रणे दृष्टा विभुनेति शुचोऽलुठन् । यदश्वाः स्वेदिनः शश्वद्वल्गादिवियुजो भुवि ।।६७।। सुयोधारोहणाभावात्स्वं मत्वाऽनुपयोगिनम् । यद्रथाश्चलचक्रार्त्तस्वरभङ्ग्याऽरुदन्निव ।।६८।। प्राच्यक्ष्माभृदविश्रान्तकरक्षेपश्रमादिव । अव्यापृतेर्यदस्त्राणि शस्त्रशालास्वशेरत ।।६९।। व्यर्थामपि चमूमेवमुपयुक्ताधिकं नृपः । बहुमेने महान्तो हि शश्वत्प्रणयिवत्सलाः ।।७०।। समजायत स्थवीयोमुक्ताफलमालभारिणी तस्य । सुभगं भविष्णुरूपा प्रियंवदा धारिणी देवी ।।७१।। नदीनमुपसर्प्पन्ती नालीकस्योपगत्वरी । जनयन्ती जने काममधुतत्कमलेव या ।।७२।। च्युत्वाऽच्युतात्ततः पूर्वं तयोः सूनुतयाऽजनि वज्रनाभो भिषक् जीवो धाम्ना वज्र इवापरः ।।७३।। क्रमेण तेऽथ सुहृदो जज्ञिरे तत्सहोदराः । [1]बाहुः [2]सुबाहुः पीठश्च महापीठश्च नामतः ।।७४।। तेऽथ सर्वेऽपि वयसा कलानां कौशलेन च । ऐधन्त पुण्यपीयूषसिक्ताः कल्पाङ्कुरा इव ।।७५।। ऊर्ज्जस्वलैः श्रियः पात्रैश्चतुर्भिर्भ्रातृभिर्वृतः । लोकपालैर्व्यराजिष्ट वज्रीवाद्यो विजित्वरैः ।।७६।। अथ नम्राखिलस्वाराण्मौलिखेलत्पदाम्बुजः । दानाम्भःप्लावितोदग्रदर्थिसार्थमनोरथः ।।७७।। अभिषिच्य सुतं ज्येष्ठं सौराज्ये प्राव्रजन्नृपः । न स्वादुभोज्यलाभेऽपि पञ्जरे रमते हरिः ।।७८।। युग्मम् ।। मौनवानप्यसौ भव्यान् बोधयन् व्यहरन् महीम् । कस्य नीरधये स्फीतिमाश्रृणोति [3]सुधाकरः ।।७९।। ततो भगवतो यत्र दिनेऽजायत केवलम् । तत्रैव वज्रनाभस्य चक्रमायुधसद्मनि ।।८०।। दिदेश भगवान् धर्मं देवमानवपर्षदि । जगतां वत्सलाः सन्तः स्वोदरम्भरयो न हि ।।८१।। वज्रनाभोऽपि चक्राप्त्या दिशो जेतुं प्रचक्रमे । न भूतोयादिसत्त्वेपि रोहेद्बीजाद्दतेऽङ्कुरः ।।८२।। पन्थानं क्लान्तिमन्थानं नूनं यस्य प्रदर्शयत् । चक्रं द्वाःस्थं पदं भेजे जिगीषोः प्रयियासतः ।।८३।। योधनायेव शैलानामुच्चैस्त्वमसहिष्णवः । दन्ताघातैस्तटीर्जघ्नुर्यस्य मत्तमतङ्गजाः ।।८४।। अमुञ्चन् सुमनोवर्षं दन्तैर्गिरितटीर्घ्नताम् । मूर्ध्नि यत्करिणां कम्प्राः स्वत्राणायेव पादपाः ।।८५।। मातङ्गाभिधयाऽस्पृश्या मा भूमेति करोद्धृतैः । शौचाय शीकरासारैः सस्नुर्यस्य गजा ध्रुवम् ।।८६।। मदाम्बुपिबतां नूनं मधुपानां कपोलयोः । विशकण्डाविदंशार्थं बभुर्यद्दन्तिनां रदाः ।।८७।। यन्नागालिककर्णेषु ताराश्रेणिर्व्यराजत । क्लृप्ता वन्दनमालेव प्रवेक्ष्यन्त्या जयश्रियः ।।८८।। यदीयमत्तमातङ्गदन्तघट्टनपीडिताः । निर्झराम्बुरयव्याजादरुदन्निव भूधराः ।।८९।। [4]प्रष्ठं सर्वमहिष्ठानां मत्पृष्ठमधितस्थुषः ।



---

१. यात्रां प्रयाणकम् उभयथा निरागसो निरपराधा निष्पापाश्च, पापापराधयोराग इति वचनात् पुण्यवत्त्वात्तस्य भूभुजां निष्पापता स्यादिति नियमादवश्यंभावेन ष्टव्यम् ।। २. प्रक्रियापात्रं राज्यस्थित्या परिकरमात्रं तदधिकार इति यावत् ।। ३. मया समुद्रो वर्द्धनीय इति कस्याग्रे प्रति जानीते ।। ४. प्रष्ठं प्रधानम् ।।

भङ्गः सङ्गररङ्गे चेत्कीदृशी मम रत्नता ॥९०॥ इतीव नियमाद्यस्य हस्तिरत्नं रणाङ्गणे । विजयश्रीपरिष्वङ्गं स्वाधिरोढुरचीकरत् ॥९१॥ युग्मम् ॥ दानाम्बुदुर्दिनासारो येषां जलमुंचामिव । उद्ग्रीवैरिव सारङ्गैर्भृङ्गैरुत्कैरपीयत ॥९२॥ ते यस्य [1]पद्मकथिताः पद्मसर्वङ्कषा अपि । बभुर्वारणराजोऽपि [2]नवारणधुरन्धराः ॥९३॥ युग्मम् ॥ यत्तुरङ्गाः खमुत्पेतुर्दिदर्शयिषया ध्रुवम् । स्ववेगस्यार्करथ्यानां स्वयूथानां गरीयसः ॥९४॥ यदश्वाः सर्वतोऽभ्राम्यन्नव्या अव्याहतस्पदाः । कियत्यस्मत्पतेर्भूमिरिति जिज्ञासया ध्रुवम् ॥९५॥ स्वगोत्रवियुजस्तेऽत्र कथं रतिरिति ध्रुवम् । यस्योच्चैः– श्रवसं ह्वातुं द्यामुत्पुप्लुविरे हयाः ॥९६॥ अस्मद्विना जयन्ति क्ष्मां न दोष्मन्तोऽपि पार्थिवाः । इतीव यस्य दर्पिष्ठा ववल्गुर्वल्गु वाजिनः ॥९७॥ रत्नभूषणसङ्क्रान्तिच्छद्मना तिग्मदीधितिः नूनं यस्य हरीन् हर्त्तुमाजगाम मुहुर्मुहुः ॥९८॥ इन्द्रियैरस्मदादीनां बाह्यैर्ग्राह्येषु वस्तुषु । नान्यो वायोस्तरस्वीति प्रवादप्रतिषिद्धये ॥९९॥ उद्घाट्यमानवैताढ्यगुहानिर्यन्नभस्वतः । पुरोऽधावत् परावृत्त्य यत्तुरङ्गमणिर्ध्रुवम् ॥१००॥ युग्मम् ॥ शङ्के न नोऽस्वतन्त्रत्वात्पूर्णाधारा[3] मनोरथाः । इति श्रमशमव्याजाद्ये खेदा दलुठन् भुवि ॥१०१॥ अपि वाजिवरा यस्य धुरीणास्ते नवाजिषु[4] । [5]खलिनं बिभ्रतो द्वेधा लक्षशो जवना बभुः ॥१०२॥ चिरं वयं घुणैर्जग्धा मुक्ता गुप्तैरिवाधुना । इति तोषाद् ध्रुवं यस्य रथादध्वनुरध्वनि ॥१०३॥ निक्वणत्किङ्किणीनादैर्ध्वजान्तैर्वियदुन्मुखैः । यत्स्यन्दना रथं पूष्णः स्पर्द्धयाऽऽकारयन्निव ॥१०४॥ यत्पत्तीनां रणोत्साहप्रोच्छलत्पुलकच्छलात् । स्वामिप्रसादसंसिक्तोऽमुचद्वीरसोयङ्कुरान् ॥१०५॥ हेतिशक्तिच्छलाद्यस्य दुर्निवारामरातिभिः । साक्षादिव करे शक्तिं नर्त्तयन्तोऽशुभन् भटाः ॥१०६॥ यद्यो प्रतियोद्धृणां प्रहाराग्निशितायुधैः । वितीर्याक्रीणतामीभ्यस्तुषारांशुसखं यशः ॥१०७॥ कण्ठेऽकुण्ठं निधायास्त्रमायुधप्रतिमामिषात्[6] । यानविक्षन् सुरक्षायै सङ्ख्येऽसङ्ख्या द्विषां भटाः ॥१०८॥ मण्डलीकृतकोदण्डदण्डमण्डितपाणयः । यं [7]प्राप्तकोटयोऽन्वीयुः कोटिशस्ते महाभटाः ॥१०९॥ युग्मम् ॥ आगत्य खेचरद्वारा

---

१. यौवनेहि हस्तिनां शरीरे रक्तबिन्दव इवातिष्ठन्ते ते च पद्मकशब्दवाच्याः॥ २. नवा युवान इति विरोधपरिहारः। ३. धारास्तुरगगतय आस्कन्दितधौरितकरेचितवल्गितप्लुतलक्षणाः ४. नवाजिषु अपूर्वसंग्रामेषु ॥ ५. खलीनं कविका आकाशलयनं च निरन्तरमतिशयोत्प्लवनेन प्रायो व्योम्नः संश्लेषात् ॥ ६. अस्त्रं कुठारलक्षणं, रक्षणार्थिनोहि कुठारं कण्ठे निधाय शत्रुष्वपि प्रणताः प्रविशन्तीति स्थितिः ॥ ७. प्राप्तकोटयो लब्धसमस्तकलाप्रकर्षाः । ८. एष चक्री ॥

दैवतास्त्रबलेन वा । चमूसमूहनिर्व्यूढो [5]मैष जैषीन्निरीक्ष्य माम् ।।११०।। इतीव यद्बलोद्धूतधूम्रनीरन्ध्रधूलिभिः । आत्मानं गुण्डयामास गोपनायेव चण्डरुक् ।।१११।। युग्मम् ।। [1]संख्याप्रस्तैन्यनिर्दैन्ययसैन्यभरपीडिता । नापप्तत्तप्ति शून्याऽपि यदधस्ताद्वसुन्धरा ।।११२।। तदियत्या अनीकिन्याः सहपातभविष्णुनः । पातकाच्चकिता नूनं पातालगतिवेधसः ।।११३।। युग्मम् ।। यद्भेरीभूरिभाङ्कारा अन्वेष्टुमिव वैरिणः । सङ्क्रान्तिच्छद्मना धृष्टाः प्राविशन् कन्दरास्वपि ।।११४।। पत्या सत्या अपि मे दत्तो नान्तःपुरेऽवकाश इति । कुपितेव निरवरोधा भ्राम्यद्यत्कीर्त्तिराशासु ।।११५।। अश्नन् हास्यप्रभाः शुभ्रा अदभ्रा वैरिसुभ्रुवाम् । असूत कम्बुसंवादि यत्कृपाणो ध्रुवं यशः ।।११६।। कर्पूरतालपत्राणि चित्रं कवलयन्नपि । अरातिसुदृशां यस्य प्रतापः प्रापदुष्णताम् ।।११७।। विरहज्वरहूतारिस्त्रीस्तनोत्सङ्गसङ्गमात् । नूनं विसृत्वरो यस्य प्रतापस्तापवानभूत् ।।११८।। स्वयं [2]कलयतो नेतुर्बाधा माऽभून्मनागपि । इति यस्य प्रतापेन बाढं प्रौढिमुपेयुषा ।।११९।। हरेरिव मतङ्गेषु नाशितेष्वरिपु ध्रुवम् । प्रेप्सिता अप्यपूर्यन्त नाङ्गसङ्गरकेलयः ।।१२०।। युग्मम् ।। यं वीक्ष्याधिज्यधन्वानं धुन्वानं द्विषतां मनः चित्रमप्यरयो [3]धन्वमण्डलज्यास्पृशोऽभवन् ।।१२१।। नित्यं शीतातपैस्तप्ता वानेयाः पशवः कथम् । वत्स्यन्ते च सुखेनेति येन यात्रामिषाद् द्विषाम् ।।१२२।। राजधान्योऽर्पितास्तेषां तद्भुवो वैरिणामिव । शीतादिबाधिताः सेवां स्वीकरिष्यन्त्यमी इति ।।१२३।। युग्मम् ।। स्नान्तीनां यच्चमूस्त्रीणामङ्गरागेण भूयसा । सुगन्धिना विलिप्ताङ्गी सर्वस्मात्प्रियथौवनात् ।।१२४।। भवित्री सुभगा भर्त्तुरद्याहमिति वीचिभिः । शीता समुच्छलन्तीभिर्नृत्यन्तीवाम्बुधिं ययौ ।।१२५।। युग्मम् ।। यद्भेरीध्वानमाकर्ण्य नष्टेयरिषु भर्त्तृषु । शून्यास्तेषां पुरो नूनमरुदन् विरुतैः शुनाम् ।।१२६।। सक्तः परमहेलायां न वासयति मामसौ । साध्वीमितीव यत्कीर्त्तिरवमानाद्दिशोऽग्रहीत् ।।१२७।। अपूर्वो यत्प्रतापाग्निर्यन्निसर्गविरोध्यपि । नेत्रेषु रिपुबन्दीनां कोष्णं जलमजीजनत् ।।१२८।। द्वात्रिंशत्कटकोदग्राः सहस्रा पृथिवीभृताम् । [4]सकूटा उन्नमद्वंशा हस्तास्कन्दितशृङ्खलाः ।।१२९।। येन कल्पानिलेनेव प्रणुन्ना युगपदद्रुतम् । दन्तभङ्गभृतो गर्त्ते विनिपेतुरवाङ्मुखाः ।।१३०।। युग्मम् ।। इत्यष्टाचत्वारिंशदादिकुलकम् ।। तस्य चक्रपतेः शौर्यवर्णनं प्रक्रमेत यः । पङ्गुस्तुङ्गं गिरेः शृङ्गमिवारोहन् स हस्यते ।।१३१।। षट्खण्डं विजयं जित्वा तद्भुवां मुकुटच्छलात् । ललाटफलके राज्ञामाज्ञा येन न्यधीयत



१.संख्याप्रस्तैन्यम् असंख्याम् ।२. कलयतः कलिं संग्रामं गृह्णतः ।।३. धन्वमण्डलज्या तद्देशपर्य्यन्तभूमिः ।।४. सकूटाः शिखरोपेताः ।। ५. मानसं सरो गतेन अत एवं नवेन नैव शोभनराजीवयुक्ता अत एव नवा ।।

।।१३२।। न [1]मानसं गतेनोच्चैर्न सुराजीवयुग् नवा । नवेन राजहंसेन येनाभात् पुण्डरीकिणी ।।१३३।। नेत्रयोः [2]पुष्यदायुष्यं
श्रोत्रयोरमृतद्रवम् । जीवितं स्पर्शनस्यासून् पुष्येषोः सन्दधन् मुहुः ।।१३४।। [3]अन्तर्नवनवोन्मीलद्वीरप्रथनमन्थरात् । राजकादद्विगुणं
स्त्रैणं बिभ्राणो विभ्रमास्पदम् ।।१३५।। शृङ्गारं द्विगुणं वीरान्नूनं स्थूलदृशात्मनः । अञ्जसा व्यञ्जयन्नेष बुभुजे चक्रभृच्छ्रियम्
।।१३६।। त्रिभीर्विशेषकम् ।। भ्रातरस्तेऽस्य चत्वारो बभूवुर्वण्डलेश्वराः । धाम्नाऽतेन्द्रेऽपि चन्द्रे नो नीरुचः सर्वथा ग्रहाः
।।१३७।। वज्रसेनो जिनः प्रापत्तत्पुरीं विहरन्नथ । न स्याद्विश्वजनीनानां निजवासे जगद्धितम् ।।१३८।।[4]प्रातिहार्यं समं शालैः
यस्य शक्राः स्वतोऽव्यधुः नापेक्षन्ते महापुण्यक्रीता भृत्या हि नोदनम् ।।१३९।। सत्स्वप्यन्येषु वृक्षेषु मयाऽऽप्ता [5]चैत्यवृक्षता ।
इतीवोत्पुलको यस्याशोकोऽभूत् पल्लवच्छलात् ।।१४०।। न कोऽप्यचिन्त्यपुण्यानां [6]पराचीन इति ध्रुवम् । व्यञ्जन् पुञ्जः प्रसूनानामुन्मुखो
यत्पुरोऽभवत् ।।१४१।। भारती यस्य माधुर्यादाचकर्ष पशूनपि । निस्तुषाऽऽकर्षविद्येव पदार्थान् विप्रकर्षिणः ।।१४२।। अभितोयं
सितोद्दामच्चामरोद्धूननच्छलात् । विधुन्वानौ रजः स्वस्य नूनं शक्रौ रराजतुः ।।१४३।। मयूखैः सृत्वरैरूद्र्ध्वं [7]सन्मेचकशिखासखैः
। शक्रायुधेन पस्पर्द्धे नूनं यत्सिंहविष्टरम् ।।१४४।। [8]पृथक् पुद्गलरूपाभाः स्वाश्रयादिति दर्शयत् । मन्ये यस्य तनोः पश्चाद्भामण्डल–
मदीप्यत ।।१४५।। मा भूत्सदसि नायातः कश्चिदज्ञ इति ध्रुवम् । आजुहाव प्रतिध्वानच्छलाद्यद्दुन्दुभिर्जनान् ।।१४६।। ऊद्र्ध्वं भ्रेजे
सितच्छत्रं यस्यासने निषेदुषः । पूर्णपीयूषरुग्बिम्बमुदयाद्रेरिवोपरि ।।१४७।। न सुरक्ष्येदृशी लक्ष्मीः परिक्षेपत्रयं विना । इति
शालत्रयी नूनं ससृजे यस्य संसदि ।।१४८।। इत्येकादशभिरादिकुलकम् ।। सद्योऽथ वन्दनायागाद्वज्रनाभः ससोदरः ।
अकस्माच्छेवधिं लब्ध्वा को विलम्बेत तद्ग्रहे ।।१४९।। हिताय भगवान् धर्म्मं ततोऽदिक्षत्सभासदाम् । आत्मनो नोपकाराय
प्ररोहः कल्पभूरुहः ।।१५०।। प्रत्यग्रं प्राभृतं सिद्धेः सम्यक्त्वं कुरुतोज्ज्वलम् । उत्कृष्टमपि नो रत्नममृष्टं स्यात्तथेष्टदम्
।।१५१।। विधत्त सर्वजीवेषु नवोदञ्चदयां दयाम् । कामान् पूरयते काचित् किं गौः कामदुधां विना ।।१५२।। सुधिया सूनृतं
वाच्यं नानृतं रुच्यमप्यहो ? । प्रियात् कुप्यन्त्यपथ्याद्धि सुतरां दुस्तरा रुजः ।।१५३।। परकीयमणीयोऽपि मा ग्रहीध्वमयाचितम्
। हालाहललवो जग्धोऽसंस्कृतो हि हरत्यसून् ।।१५४।। आपातमधुरस्त्याज्यः स्त्रीसम्भोगोऽन्ततदारुणः । को भोज्यमुपयुञ्जीत



१. आयुष्यम् आयुषे हितं रसायनम् ।। २. मन्थरात्, मन्दात् अनेन तस्य सदोषत्वमाविष्कृतम् ।।३. अतन्द्रेऽप्युत्कटेऽपि ।। ४. अष्टाभिः श्लो० कैरष्टौ प्रातिहार्याणि ।। ५. चैत्यवृक्षः पूज्यतरुः ।। ६. पराचीनः पराङ्मुखः ।। ७. मेचकः पञ्चवर्णामणिः ।। ८. पृथक् कथंचिद् भिन्ना न पुनरत्यन्तभिन्ना ।।

विद्वान् मधुविषानुगम् ।।१५५।। मूर्च्छा मूर्च्छेव चैतन्यहारिणीति पधूयताम् । दुर्निवारा हि मूर्च्छन्ती प्रावृषेण्या नदीव सा ।।१५६।। तदेतद्दर्शनस्यूतं सिद्ध्यै व्रतमुपायत । पंग्वन्धयोर्विना मेलं पुराप्तिर्न भवेद्वनात् ।।१५७।। पितुः पार्श्वे ततश्चक्री प्राव्राजीत् सह सोदरैः । तृप्यन्त्यप्राप्य किं कल्पपादपं भोगभूभुवः ।।१५८।। ततोऽध्यगीष्ट पूर्वाणि वज्रनाभश्चतुर्दश । हेलया निर्निमेषो हि प्रज्ञोन्मेषो महात्मनाम् ।।१५९।। सर्वेऽप्येकादशाङ्गानि भ्रातरस्त्वध्यगीषत । प्रभा यादृग्विधोस्तादृक्कुतस्त्या ज्योतिषामपि ।।१६०।। भगवान् वज्रनाभस्य ततः सूरिपदं न्यधात् । अव्याहतं सदा स्वाम्यमग्राम्यं पुण्यशालिनाम् ।।१६१।। तत्र बाहुर्निराशंस उत्सहिष्णुरदाम्भिकः । साधूनां भक्तपानादिदानाभिग्रहमग्रहीत् ।।१६२।। श्रमणानामविश्रान्तस्वाध्यायाध्यापनादिभिः । श्रान्तिभाजां सुबाहुः स्राग् विश्रमणमुपाश्रृणोत् ।।१६३।। साम्राज्यश्रीपरीरम्भलालितौ तौ च तादृशम् । दुस्तरं प्रतिजज्ञाते वैयावृत्त्यं सुभृत्यवत् ।।१६४।। यद्वा पद्माः श्रियः पात्रं नित्यं किं विकचाननाः । नाचरन्त्युष्णरुग्भानुसन्तापसहनव्रतम् ।।१६५।। यथास्वं कर्म्मणोर्दृष्ट्वा सूरिस्तावप्रमद्वरौ । जन्मजीवितसाफल्यमनयोरेव धन्ययोः ।।१६६।। फलेग्रहिस्तपोवृक्ष एतयोर्निरवग्रहः । नर्त्तकीव नरीनर्त्ति कीर्त्तिस्त्रिभुवनाङ्गणे ।।१६७।। दोर्बलस्यानयोर्भद्रं वशिनां यन्निरंहसाम् । रंहसा यतिनां कार्येऽनाहार्यमुपयुज्यते ।।१६७।। इत्यादिभिरुपाबृंहद्गिरां श्रुतिसुधाकिरम् । सन्दर्भैरौचिती गर्भैर्गुणा हि गरिमास्पदम् ।।१६९।। [2]विनीतं स्तुवते लोकाः क्रमवत्त्वान्मुकुन्दवत् । अविनीतं तु निन्दन्ति दाहकत्वाकृशानुवत् ।।१७०।। तत्प्रशंसां निशम्याहो ! पक्षपातोऽनयोर्गुरोः । प्रतिक्षणमिमावेष यत्संस्तौति प्रसेदिवान् ।।१७१।। सुगुरून् वरिवस्यन्तौ तपस्यन्तौ चिरादपि । नावां शश्वदधीयानावपि कश्चित्प्रशंसति ।।१७२।। सुखाकरोति यो धूर्त्तो देहशुश्रूषया जनम् । स एव श्लाघ्यतामेति स्वार्थः सर्वस्य वल्लभः ।।१७३।। साम्राज्यनीतिरद्यापि नन्वेषामनुवर्त्तते । इति पीठमहापीठौ लुठन्तावपि [3]वाग्हृदोः ।।१७४।। बिभ्राणौ दौर्मनस्यंतौ गुणवरुगोचरम् । सत्यं स्वस्य लघीयस्त्वं व्याञ्जिष्टामसमञ्जसम् ।।१७५।। पञ्चभिः कुलकम् ।। अहो ! मिथ्याभिमानस्य महिमा यत्तयोरपि । क्षीरोदनीरसौन्दर्यसोदर्यहृदये गुरौ ।।१७६।। [4]गणपूज्योऽप्यसावीश आवयोर्विषमेक्षणः । इति बुद्धिर्विपर्यस्ता दुस्तरा समपत ।।१७७।। युग्मम् ।। यद्वा सुवृत्तं सरलं वंशं पर्वानुगामुकम् । [5]सालूरवसयात्ताक्षा अध्यवस्यन्ति पन्नगम् ।।१७८।। न च द्वेषो

१. स सम्यक्त्वं पञ्चाणुव्रतिकं धर्ममाह प्रत्यग्रमित्यादि ।। २. विना गरुडेन नीतं देशान्तरं प्रापितम् एवमविना मेषेण मेषवाहनत्वादग्नेः क्रमवत्त्वात् त्रिविक्रमरूपत्वात् ।। ३. वागहृदोर्गुरोर्वचनमानसयोर्लि[illegible] ।। ४. ईशः शम्भुः ।। ५. सालूरवसा मण्डूकधातुविशेषः ।।

भवावर्त्तस्य मुमुक्षोर्युज्यते गुरौ । पीयूषं कोऽनुविद्विष्याज्जीवितार्थी विषार्दितः ।।१७९।। दर्शनं नाशयेन्मूढो यो गुरौ दुर्म्मनायते । पूष्णे वैरायमाणः किं कौशिको वीक्षते दिवा ।।१८०।। धर्म्माचार्यं विना धर्म्मो न स्वसाध्यं प्रसाधयेत् । कर्णधाराद्दते पोतोऽधिरोढारं न तारयेत् ।।१८१।। प्रद्वेषः साधुमात्रेऽपि भवगर्त्तनिबन्धनम् । गुरौ तु का कथा तस्य कूलवालमुनेरिव ।।१८२।। क्रियां मुक्तिकृते कुर्याद् यो गुरौ विमनीभवन् । स बुभुक्षुर्विषोन्मिश्रं भोज्यं भुञ्जीत तृप्तये ।।१८३।। दुर्म्मेधा दूष्यते शिष्यः किं पुनर्विनयोज्झितः । कुत्सनीयोऽन्यथाऽपि श्वा व्रणचन्द्राङ्कितः किमु ? ।।१८४।। विन्दन्ति वन्ध्यतां शिक्षा दुःशैक्षे सुगुरोरपि । व्यापारिता खराभीशावन्ध्यमध्यासते द्दशः ।।१८५।। दुष्पात्रातिशयाधाने गुरोरप्यफलः श्रमः । आरोहद्दुस्तटीमन्यद्दन्तभ–ङ्गात्किमश्नुते ।।१८६।। गुरौ प्रश्रयवान् शिष्यो जायते गौरवास्पदम् । हारोऽन्यथाऽपि सुभगो नायकानुगतः किमु ? ।।१८७।। प्रतिष्ठामश्नुते शिष्यो गुणवान् भक्तिमान् गुरौ । अन्यथाऽपि मणिः श्रेयान् परीक्षितगुणः किमु ? ।।१८८।। बाह्या अपि विधेयत्वादर्च्यन्ते राजभिर्गजाः । त्यज्यन्ते तद्विपर्यासाद्भुजगा गृहजा अपि ।।१८९।। अलसं दुर्विनीतं च न संगृह्णाति बुद्धिमान् । मूल्यं विनाऽप्यनड्वाहमादत्ते गडिनं हि कः ।।१९०।। अवेक्ष्य तदिदं सम्यग् [1]नाकवासं यदीच्छथ । [2]विबुधा गुरुमुद्दिश्य वैमनस्यं तदस्यत ।।१९१।। ततः पीठमहापीठौ ततो दोषादविच्युतौ । मिथ्यात्वं जग्मतुः सद्यो भीष्मो हि गुरुमत्सरः ।।१९२।। प्रायश्चित्ताद्दते कर्म्म नाभुक्तमुपशाम्यति । ज्वरः केन विलङ्घ्येत लङ्घनादिक्रियां विना ।।१९३।। अनुतापान्धभावेन न ताभ्यां तदनुष्ठितम् । इति शाठ्येन तौ कर्म्म स्त्रीत्वहेतुं बबन्धतुः ।।१९४।। भगवान् वज्रनाभोऽपि परिणामाद्विशुध्यतः । विंशत्याऽर्हन्नमस्यादिकारणैः कर्म्मदारणैः ।।१९५।। आराद्धैस्तीर्थकृन्नाम बबन्ध धुतबन्धनः । अनिर्माय स्वकर्मान्त्या सामग्री विरमेन्नहि ।।१९६।। युग्मम् ।। अथ पीठमहापीठौ वैचित्र्यात् कर्म्मणः पुनः । ईर्ष्यानुबन्धविरहात्सद्दर्शनमवापतुः ।।१९७।। ततः सर्वेऽप्यविश्रामं श्रामण्यमनुपाल्य ते । कथं सर्वार्थता मे स्याच्चेदिमान्न तपस्विनः ।।१९८।। भोजयेयं निजां लक्ष्मीमितीव शिवमियुतः सर्वार्थेनायनं रुद्धा स्वपार्श्वे दध्रिरे बलात् ।।१९९।। युग्मम् ।। इतश्च–



अस्त्ययोध्या पुरी भूमिर्जम्बूद्वीपस्य भारते । अद्वन्द्वद्वन्द्वसुभूयः स्त्रीपुंसकुलसङ्कुला ।।२००।। मद्वासिनो नरा [3]रूप्याः

१. न अकवासं दुःखनिधानं संसारमित्यर्थः ।। २. भो विबुधाः सुराः गुरुं वावस्यति ।। ३. रूप्याः प्रशस्तरूपाः ।।

सुभगाः कोमला इमे । वाणिज्यकृषिसेवादिकृच्छ्रजीविकया कथम् ? ॥२०१॥ वत्स्यन्तीति प्रिया कर्त्तुमेतान्नूनमसूत या ।
मनीषितार्थसम्पूर्त्तिदीक्षितान् कल्पशाखिनः ॥२०२॥ युग्मम् ॥ अस्मानुत्तरकुर्वादौ सिद्धान्तोदाहृतानपि । प्रत्येष्यन्ति कथङ्कारममी
कर्म्म महीभुवः ॥२०३॥ स्त्रीपुंसा जगदुत्तंसा इति यस्यां सदा ध्रुवम् । संवर्मिताः फलैः पुष्पैः प्रारोहन् कल्पभूरुहाः ॥२०४॥
युग्मम् ॥ जाता विदेहभूमिषु कल्पद्रुफलान्यमी न भोक्ष्यन्ते । पतद्भुज एव सदा हैमवतादिषु तु सर्वत्र ॥२०५॥ [1]नर इति
विपरीयुरितीव कर्म्मभिस्तदुचितैस्तदा यस्याम् । द्वैविध्यं दर्शयितुं मिथुननराः समुदपाद्यन्त ॥२०६॥ युग्मम् ॥
तस्यामनन्यलावण्यरूपायां सलिलेश्वरः । माधुर्यधुर्यगीर्लक्ष्मीकृतपीयूषदुर्दिनः ॥२०७॥ स नाभिः शशिनः कीर्त्त्या नाभीः
कुलकरोऽजनि । मृगनाभिरिवाकर्षद्गुणा मोदेन यः प्रजाः ॥२०८॥ युग्मम् ॥ विडम्बितेन्दुबिम्बास्या तस्य जज्ञे कुटुम्बिनी ।
[2]मरुद्देवी मरुदेवी सौभाग्योत्कर्षधर्षिणी ॥२०९॥ स्थावरत्वमियत्कालमनुभूय कथञ्चन । मानुष्यकमपि प्राच्यं [3]पाश्चात्यं
समुपेयुषी ॥२१०॥ महार्हपदमप्राप्य निर्वास्यति कथं त्वसौ । इतीव जिनमातृत्वं यस्या धाताऽध्यरोपयत् ॥२११॥ युग्मम्
॥ शुद्धा जात्यन्तरास्पर्शादेतावतमनेहसम् । अर्हन्मातृपदस्यासौ कुमारमृदिवोचिता ॥२१२॥ इति यस्यां जगल्लोकनेत्रसंवननौषधौ ।
नूनं समीक्ष्य कारित्वाद्विधाता तन्व्यवीविशत् ॥२१३॥ युग्मम् ॥ पन्थाः सुगोऽनुगानां महत्तरैः क्षुण्ण इति नयं व्यङ्क्तुम् ।
च्युत्वा प्रागथ गर्भं ध्रुवमविशद्वज्रनाभजन्तोः ॥२१४॥ चतुर्दशमहास्वप्नव्यञ्जिताहृत्पदोऽथ सः । जज्ञे तरङ्गयन्नङ्गमयूखैर्जगदङ्गणम्
॥२१५॥ अद्योत्यन्त जनौः येन तामसा नरका अपि । नारकाणां ध्रुवं ध्वान्ताऽद्वैतभ्रान्तिजिहीर्षया ॥२१६॥ द्रुमाः पल्लविताः
[4]सद्यस्तदानीं जिनसद्मनः । द्वारिवन्दनमालार्थमहं पूर्विकया ध्रुवम् ॥२१७॥ मुक्तिमर्थयिता नोऽसौ न च तां दातुमीश्महे ।
इत्याशङ्क्य ध्रुवं प्रोषुर्यज्जनौः कल्पशाखिनः ॥२१८॥ लोकधर्मधुराधुर्यबन्धुरस्कन्धवीक्षणात् । ऋषभेति ध्रुवं नाम पितृभ्यां
यस्य निर्ममे ॥२१९॥ मुष्णन् दरिद्रतामुद्रां पुष्णन्नर्थिमनोरथान् । भगवांश्चारुतारुण्यं कल्पवृक्ष इवासदत् ॥२२०॥

---

१. नरः पुरुषाः सर्वदा कल्पद्रुभोजिन एव तदभोजिन एव वेति विपर्ययः, तदेति सुषमदुःषमायाम् उभयरूपा भवन्तीति दर्शयितुम् ॥ २. मरुदेवी देवाङ्गना ॥
३. पाश्चात्यं तद् भव एव मोक्ष्यमाणत्वात् ॥ ४. तदानीं जन्मनि वसंतभवात् ॥

[1]सहजासहजन्मभ्यां भाविनीभ्यामिवाभवम् । केवलश्रीविमुक्तिभ्यां सूचयन् सङ्गमोत्सवम् ॥२२१॥ सुमङ्गलासुनन्दाभ्यां कन्याभ्यां पाणिपीडनम् । व्यधत्तानङ्गमाङ्गल्यं स्वयं भगवतो हरिः ॥२२२॥ युग्मम् ॥ च्युत्वा कालेन सर्वार्थादात्मानौ बाहुपीठयोः । आद्यायां भरतब्राह्म्यौ मिथुनत्वेन जज्ञतुः ॥२२३॥ सुबाहुमहापीठौ तु द्वितीयस्यां महौजसौ । श्रीबाहुबलिसुन्दर्यौ द्वन्द्वत्वेनोद्बभूवतुः ॥२२४॥ [2]क्रमान्नवालिके अर्हन्नथ ते बालिके अपि । स्वयं वर्णसमाम्नायं गणितं वाऽध्यजीगपत् ॥२२५॥ एवं च—आत्तदीक्षं जिनं जातु केवलालोकशालिनम् । व्रतार्थमुपतस्थाते स्थेम्ने सौख्यस्य ते ततः ॥२२६॥ अथ ते तत्समासाद्य सद्य उत्पाद्यकेवलम् । उत्कण्ठया बहोः कालान्मुक्त्याः सख्यमवापतुः ॥२२७॥ दीक्षाक्षणे [3]ययोरर्हद्वासक्षेपच्छलाद्ध्रुवम् । मुक्तिवशक्रियाचूर्णं तूर्णं चिक्षेप मस्तके ॥२२८॥ यत्तयोरप्युदैत्स्त्रीत्वं श्रुतीनां पारदृश्वनोः । तन्मिथ्याऽभिनिवेशोऽत्र निर्दम्भमुदजृम्भत ॥२२९॥ युग्मम् ॥ न्यस्ताध्वगव्यथजयद्रथमण्डलस्थकूपोदबिन्दुमिव दूरसमेवमुच्चैः । मिथ्याऽभिमानकणिकाफलमाकलय्य सद्दर्शनं शुभदृशो विरजीकुरुध्वम् ॥२३०॥

**॥ पीठमहापीठकथा समाप्ता ॥**

*******



१. सहजाया अपि भावित्वं व्यक्तरूपेण दृश्यम् ॥ २. नवालिके प्रत्यग्रललाटपट्टे ॥ ब्राह्मीलिपिरूपसमाम्नायम् ॥ ३. वासक्षेपेत्यनेन स्वहस्तेन भवांस्ते अदीक्षत इति दर्शितम् ॥

## अथ जमालेः कथानकमुच्यते—

एतस्मिन् भारते क्षत्रकुण्डग्रामः पुराग्रणीः । अभूदभूर्द्विषद्दर्गबल्गत्खड्गभुवां भियाम् ।।१।। यत्र त्रियामासु विसृत्वरैः करैर्नितम्बिनीनामधरोष्ठपल्लवात् । निपीय पीयूषरसं भराद्ध्रुवं निशापतिः प्राप सुधाकराभिधाम् ।।२।। दोलाधिरूढेष्विव वीचिभङ्गैर्जलाशयेषु प्रतिबिम्बभङ्ग्या । प्रचण्डमार्त्तण्डमयूखतापात्तटद्रुमाः सस्नुरिवाह्नि यत्र ।।३।। स्मितादिहीनेन वधूमुखानां मयाऽप्यमीषामुपमास्पदत्वम्[1] । इतीव मूर्च्छद्द्युतिपुञ्जभङ्ग्या यत्रेन्दुरुद्यत्पुलको मुदाऽभात् ।।४।। निहन्तु नो वैरितया दिवार्कः स्निग्धाः क्षपायां मणिहर्म्यभासः । निघ्नन्ति यत्तन्नितरां दुनोतीतीव ह्रिया यत्र तमांस्यनेशन् ।।५।। पास्यन्ति पाथांसि कथं नभोऽध्वगा इतीव देवालयमूर्द्धवर्त्तिषु । [3]सुवर्णकुम्भेष्वसंजन् पयोधरा वर्षासु यस्मिन् भरणाय वारिणा ।।६।। उद्वेजिता नैरयिकार्त्तनादैर्वयं सदाऽत्रेति विनिर्गताः क्ष्माम् । विभिद्य रेजुर्भवनाधिपानां यस्मिन्निकेता इव रत्नसौधाः ।।७।। [4]यस्मिन्महद्दूषणमेकमासीद्यच्चन्द्रकान्तप्रतिमास्वमीषु । करैर्निजैर्लोकसमक्षमिन्दुः सुरालयेष्वन्वहमभ्यषिञ्चत् ।।८।। जलाशया वीचिभिरच्छशीतलैस्तीरद्रुमप्रच्युतपुष्पगुच्छकैः । यत्र स्फुटाम्भोरुहगर्भवासिनीमस्नापयन्नूनमपूपुजन् श्रियम् ।।९।। [5]तमोऽरिरप्येष तमो न नैशं हन्तुं विसोढेति तदीर्ष्ययेव । रत्नानि यस्मिन् वणिगापणेषु क्षपासु जघ्नुः परितस्तमांसि ।।१०।। नाऽस्मद्वदत्रैष विशां मनांसि प्रीणाति भोगेन हिरण्मयोऽपि । इतीव यस्मिन्नहसन् सुमेरुं [6]भाभिर्निषद्यासु सुवर्णपुञ्जाः ।।११।। अस्मद्विना कः क्षम आवरीतुं भूमिस्पृशां गुह्यमितीवगर्वात् । यस्मिन्नखर्वा व्यरुचन् समन्ताद्वणिक्पथेषूज्ज्वलचेलकूटाः ।।१२।। विद्या विदेशेऽश्नुवतेऽर्थमुच्चैरिति स्वलास्योत्सवदर्शनाय । स्वर्ल्लासिका भूमिमिवावतीर्णा वेश्या बभुर्यत्र च नृत्यमानाः ।।१३।। शश्वज्ज्वलज्ञारकहव्यवाहनज्वालाकलापद्रुतिशङ्कया ध्रुवम् । रराज पातालपुरं विनिर्गतं यद्वप्रमुद्दीप्रसुवर्णनिर्मितम् ।।१४।। छायासु नो विश्रममाश्रयध्वमितीव पान्थान् पथि मन्थिताङ्गान् । यत्राह्वयन्ति स्म घना वनान्ता विहङ्गमानां मधुरैर्विरावैः ।।१५।।भुजङ्गलालाविलगन्धसारद्रुमानुषङ्गादिव [1]जागरूकाः । अमूर्च्छयन् 

---

१. मयाऽपि लेभे ।। २. स्निग्धाः सानुरागाः सान्द्राश्च स्निग्धाऽभिभवस्य दुस्सहत्वात् ।। ३. [illegible]संजन्, संयुयुजुः ।। ४. प्रतिमाभिषेको हि तमीषु विरुद्धः सिद्धान्ते [illegible]

यत्र मनस्विनीनां प्रेमप्रकोपं मलयानिलाः स्राक् ।।१६।। यत्र स्फुटस्फटिकसङ्घटना बभासे मूर्द्धस्थरत्नकलशा सुरसद्मराजिः । श्रीवीरनाथमिव नन्तुमधो जगत्या निर्गत्वरी धृतमणिः फणिमस्तकाली ।।१७।। यत्राम्बुकेलौ मृगलोचनानामुदञ्चदुच्चा वचवीचिभङ्ग्या । [२]सुधारसस्वादुजडास्तडागा रागादुदग्रात्पुलकानिवोहुः ।।१८।। सुधाकिरां यत्र गिरां गुरूणां श्रुतेरविश्रान्तम–तान्तचित्ताः। निःशङ्कमंकूरितरोमरन्ध्रव्याजेन मर्त्त्या मुदमुद्वमन्ति ।।१९।। मद्वन्न किञ्चिज्जिनजन्मधामपुरं समस्ति क्वचनाधुनेति । दर्पेण यस्तद्गुरुभूरिभेरीभाङ्कारपूरैरिव [३]संततक्ष ।।२०।। [४]सङ्ख्यातिगैर्वैश्रवणैः समाश्रितस्यैकेन सा वैश्रवणेन संगता । पुंभोग्यनानाविधपुष्प काशिनो न भोगभाक्केवलपुष्पकाशिनी ।।२१।। [५]बहुकैलासमापन्नस्यैकं कैलासमापुषी । मुग्धास्याप्यस्य वैदग्धीं नालकाऽऽप्तु प्रगल्भते ।।२२।। तत्राजनि क्षत्रसुतो जमाली शालीन्यकौलीन्यविनीतिशाली । सगोत्रनालीकमयूखमाली पितृक्रमाम्भोरुहसेवनाली ।।२३।। गुणा वसन्त्याकृतिशालिनीति प्रवादसंवादमिवोपनेतुम् । संस्थानसंस्थासुभगो यदात्मा गुणैः समाश्रीयत धीरिमाद्यैः ।।२४।। न स्थेमजं शर्म विटस्य गेहे स्वातन्त्र्यजं नो कृपणस्य मेऽभूत् । इतीव तस्य द्वितयीं परीप्सुर्निवेशनं यस्य विवेश लक्ष्मीः ।।२५।। अहं निरुच्छ्वासतया कदर्यैर्गुप्ताविव न्यस्य वसुन्धरायाम् । कदर्थिताऽतीव ततोऽपसृत्य भेजे गृहं यस्य विलासिनः श्रीः ।।२६।। न्ययुञ्जतान्ये बत मां रणादौ नियोक्ष्यतेऽसौ विरतौ मुमुक्षुः । इति प्रमोदादिव सर्वमङ्गं समाश्लिषद्यस्य पराक्रमश्रीः ।।२७।। नाद्यं भविष्णोरहमस्य रुच्यः कदाचनापीति विमाननातः । पराभवोऽयं सहसा विहाय नूनं दरिद्रेषु पदं बबन्ध ।।२८।। यः सूत्रधारेण परीक्ष्य सूत्रितं बद्धं प्रगल्भैः कुशलैः कुशीलवैः । [६]चतुर्विधेनाभिनयेन भूषितं नाद्यं सदा प्रैक्ष्यत रम्यहर्म्यगः ।।२९।। प्राप्तप्रमोदैरथ तस्य [७]रूढक्षोदैर्विनोदैर्ललतः सहेलम् । द्राग् लालनायेव हसद्दिगन्तस्तस्मिन्नजृम्भिष्ट पुरे वसन्तः ।।३०।। श्रीखण्डसंस्पर्शतुषाशीकरैः पुराऽर्दिताः सङ्कुचिता य आसत । ते यत्र शीतक्षतयेऽरुणातपं भक्तुं प्रसस्रुर्मलयानिला ध्रुवम् ।।३१।। तुषारपातेन हिमर्त्तुजन्मना विद्रावितस्य स्मरजातवेदसः । सञ्जीवनायेव

१. जागरूका अत्युदग्राः ।। २. स्वादुजडा मधुरसलिलाः ।। ३. तत्पुरः संततक्षेति रभत्सयत ।। ४. वैस्फुटं श्रवणैस्तु साधुभिः पुष्पकाशिनः कुसुमशोभिनः, न भोगभाग् नैव भोगभाजनम्, अथच नभोगा विद्याधरास्तान् भजते, पुरी केवलपुष्पकाशिनी एकविमानविशेषव्यापिनी ।। ५. बहुकैलाः प्रभूतसुगन्धिद्रव्यविशेषाः ।। ६. चतुर्विधेन आङ्गिकवाचिकसात्त्विकाहार्यलक्षणेन ।। ७. रूढक्षोदैः प्रवृद्धपरिशीलनैः ।।

बलाद्विलासिनां श्रीखण्डशैलस्य ववुः समीरणाः ।।३ २।। अभ्रंलिहा यत्र बभुर्महीरुहाः समुल्लसत्पीननवीन पल्लवाः । [1]समुन्मिषत्कण्टक-सङ्कटत्वचः समागमेनेव मधुश्रियश्चिरात् ।।३ ३।। चुकूजुरन्तस्सहकारमण्डपं यदुत्कयन्त्यः पथिकान् पिकाङ्गनाः । रहस्यशिक्षन्त परानपेक्षया तत्पञ्चमस्येव [2]निगर्वचातुरीम् ।।३ ४।। पौरस्त्यसंस्कारवशादुपेयुषः पञ्चानवाप्त्येव कृतार्त्तनिस्वनान् । वीक्ष्य द्विरेफान् क्वणतो भवत्कृपाः पद्मान्नलिन्यः सुषुवुर्मधुस्तुतः ।।३ ५।। कथञ्चिदुच्चैःखचरीर्निरीक्ष्य तत्स्पर्द्धयाऽऽलम्ब्य गुणान् मनन्त्यः । द्युयानविद्यामिव वेगलोला दोलाधिरूढाः सुदृशो व्यराजन् ।।३ ६।। तरुप्रसूनस्तबकस्रवद्द्रवप्लवेन लिप्ता व्यरुचन्मधुव्रताः । मधुश्रियेव स्नपिता विमुग्धया वैवर्ण्यहानाय यथास्तनन्धयाः ।।३ ७।। कस्तूरिकामोदविलासचौरसौरभ्यगर्भैः शुचिपञ्चवर्णैः । प्रसूनगुच्छैर्विकचैरतुच्छैर्वन्याः [3]परीताव्यरुचन्नवन्याः ।।३ ८।। साम्राज्यमाप्तस्य झषध्वजस्य स्वेच्छानिवासाय निजस्य सख्युः । [4]चित्रोज्ज्वला धूपकृताधिवासाश्चैत्रेण त्कृप्ता इव सौधमालाः ।।३ ९।। युग्मम् ।। अक्रीडदाक्रीडकृताधिवासो विलासिनीभिः सममेष तस्मिन् । विन्ध्याचले केलिवनाधिशायी यथा करेणुः सह वासिताभिः ।।४ ०।। विशोषयन्नैयतसारसीरपः [5]कृशानुवच्चण्डसमीरणस्तपः । [6]विधूनयन् भूरितपस्विनान्तपः समुच्चरद्दारुणभास्वदातपः ।।४ १।। कालात् तपत्युष्णकरेऽतिमात्रं क्लमेन तीव्रातपतापजेन । शङ्के रथाश्वेषु चलत्सु मन्दं दीर्घत्वमासेदुरहानि यस्मिन् ।।४ २।। सुधां प्रियो मे जगतः किरन्नपि क्षुद्रैः खरैर्गन्धवहैः सशर्क्करैः । विगुण्डितः पांशुभिरित्यमर्षतो निशीथिनी नूनमवाप तानवम् ।।४ ३।। कथं वयःस्वादुजलेन लालिता वत्स्यन्त्यमी उष्णकदर्थितात्मनः । अस्मान् विहायेति विषादतो ध्रुवं [7]महासरस्यः कृशिमानमासदन् ।।४ ४।। नानेन पत्याऽपि पयोधिना नो रक्षाकृतोल्लाघनिदाघतप्तेः । इतीव [8]सम्पादुकमानभङ्गास्तरङ्गवंत्यस्तनि मानमापुः ।।४ ५।। तापेन पुष्पादिषु नाशितेष्वहो ! भूयस्तदाप्त्यर्थमिवातिदुस्सहम् । अवारिषुः [9]पञ्चशिखिव्रतं ध्रुवं दावानलप्लोषमिषेण शाखिनः ।।४ ६।।

१. कण्टका रोमाञ्चाः ।। २. निगर्वस्तात्पर्यम् ।। ३.अवन्याः पृथिव्याः सम्बन्धिन्यो वन्या वनसमूहा इति विरोधपरिहारः ।। ४. चित्रोज्ज्वला आलेख्यमनोहरा अथ च चित्रा नानारूपत्वमनोज्ञाः ।। ५. तपो निदाघः ।। ६. विधूनयन् चलयन् सातिशयोष्मत्वेऽपि स्नानाद्यभावात् ।। ७. महासरस्यः पूजितगुरुसरांसि ।। ८. मानो गर्वः परिमाणं वा ।। ९. दिक् चतुष्टये दावानलः कूर्योश्चोर्द्धमिति पञ्चाम्नयः ।।

व्यक्ते प्रपापालिकया कयाचन स्तनद्वये कुम्भधिया विकुम्भया । स्वमर्प्पयन्तो वदनं पिपासया मुग्धान्नहस्यन्त विदग्धयाऽध्वगाः ।।४७।। श्रीखण्डकर्प्पूररसानुगामुकैःसेक्काऽम्बुधारानिकरैरुदीरितैः । शीतर्त्तुबीजैरिव [1]नैशताहता धारागृहाणां तरणित्विषः खराः ।।४८।। अपङ्किलस्वादुजलासु वीचिलोलासु केलिवनदीर्घिकासु । ऊष्मागमः क्रीडते कामिलोके निमज्जनत्रस्त इवोत्ससार ।।४९।। वेश्याकराष्टापदशृङ्गमुक्ता निपातुका वीक्ष्य हिमाम्बुधाराः । यूनां शरीरेषु तपेन नेशे दूरेण शीतज्वरशङ्कयेव ।।५०।। श्रीखण्डलेपैर्घनसारभोगैः प्रत्यग्रपुष्पद्रवमज्जनैश्च । घर्म्मं तुदन्नेष नरेन्द्रसूनुर्विपक्षतामाप तपस्य नूनम् ।।५१।। कृषीवलस्वान्तवितीर्णहर्षास्तृष्णग्जनव्रातविदीर्णतर्षाः । [2]जिगीषुभूमीश्वरत्कृप्तमर्षा अवातरन्नाशु ततोऽत्र वर्षाः ।।५२।। कृशानुमय्यामिव धूपितायां तपेन यास्यन्ति कथं नरोऽस्याम् । इतीव मह्यां सधराधरायां छायां व्यधाद्यत्र घना घनाली ।।५३।। उष्णेन तप्ता प्रसविष्यते कथं सस्यानि लोकस्य हितानि भूरियम् । इतीव तस्योपचिकीर्षयाभितस्तस्याममुञ्चन् सलिलं पयोमुचः ।।५४।। उष्णोपतापाद्भृत मूर्च्छिता भूर्नवाभ्रपाथःपृषतां प्रवेशात् । कवोष्णबाष्पोद्गमनापदेशादुज्जीवितेवोच्छ्वसितं[3] मुमोच ।।५५।। तपः क्व सन्ताप्य जगज्जगामेत्युच्चैर्वदन् गर्जितडम्बरेण । क्षणप्रभाभिर्निशि दीपिकाभिस्तमन्वियेष ध्रुवमम्बुवाहः ।।५६।। शङ्केऽभितो लंबनितम्बचुम्बिलोलाम्बुदाः क्षोणिधरा व्यराजन् । भूयः कथञ्चित्किल पक्षलाभात् कृतोद्यमा उड्डयनाय चण्डाः ।।५७।। ग्रीष्मात् पिशाचादिव मोचिता घनैरेतैरहं बन्धुरबान्धवैरिव । इत्यम्बुसेकोद्भिदुराङ्कुरच्छलाद्रोमाञ्चिता नूनमभादिलाऽखिला ।।५८।। जगन्ति सन्तापयतस्तपस्य साहाय्यमेतेन करैः प्रक्लृप्तम् । इति न्यरुन्धन्निव [4]तान् विलुप्य भास्वन्तमस्पन्दतया पयोदाः ।।५९।। महीधश्रृङ्गादवतीर्य शङ्के तरङ्गवंत्यस्तरसा समुद्रम् । निदाघशोषाच्चिरविप्रलम्भप्रादुःषधुत्कणुतयाऽभिसस्रुः ।।६०।। सखा तपस्येति घनागमेन बद्धः प्रियो मे [5]घनबन्धनेन । भास्वानतः किं तनुधारणेनेतीव न्यमज्जन्नलिनी जलेषु ।।६१।। मन्येऽभ्रनीरप्रवहैर्निमग्ना सरस्सु भोग्या विशिनी ततो नः । स्थित्या किमत्रेति सरोवतंसा हंसाययुर्मानसमाहताशाः ।।६२।। मया समस्ता क्षितिरुक्षिता किं नवेति निश्चेतुमिवाम्बुवाहः । व्यापारयामास तडित्प्रदीपान्मुहुर्मुहुः सन्तमसे समन्तात् ।।६३।। तपेन [6]नग्नीकृतयापि नीलकौशेयवासः सखशाष्पलक्ष्मीः । अस्मान्मयेतीव कलापिनादैस्तुष्टाव तुष्टा वसुधाऽम्बुवाहम् ।।६४।।



---

१. नैशत न तत्र तापाय समर्था बभूवुः ।। २. त्क्लुत्पमर्षाः संपादितयात्राविधिसहनाः ।। ३. मूर्च्छितो हि मुखादो जलप्रवेशादुच्छ्वसति ।। ४. तान् करान् ।।
५. घनेन निविडेन मेघेन च ।। ५. आपि लेभे ।।

वर्षासु धाराधरनीरधाराधौतार्कभित्तीर्वलभीरभीकः । शातं कुमारोऽनुभवन्नसीमं सीमन्तिनीभिः सममध्युवास ।।६५।। कियच्चिरं स्थास्यति लोक एष मग्नोऽन्वहं वारिधरान्धकारे । इतीव तस्य क्षतयेऽर्कचन्द्रौ प्रसादयन्ती शरदाजगाम ।।६६।। क्षीरोदवीचीसुहृदः पयोदा यस्यां महानीलसखेऽन्तरिक्षे । प्रसेदुषामत्र जलाशयानामधारयन्त प्रतिबिम्बलक्ष्मीम् ।।६७।। सतापि तेजःक्षतिकारकत्वान्मया विपक्षस्य घनागमस्य । अदृश्यत ध्वंस इतीव भानुर्धाम्नः प्रकर्षं बिभरांबभूव ।।६८।। यत्पद्मिनीं वारिभरे वुडन्तीमुपेक्ष्य वर्षासु तथागमा मम । तद् युज्यते नेत्यनुतापतस्तदवेक्षयाऽगुः[1] पुनरत्र हंसाः ।।६९।। कीदृक् प्रियोऽभूद्धनबन्धनान्मे निर्मुक्त इत्युत्कलिकातिरेकात् । भानुं प्रफुल्लाम्बुरुहाननश्रीरम्भोजिनी द्रष्टुमिवोन्ममज्ज ।।७०।। प्रातिस्विकस्थानगमादिदानीं सापत्न्यभूष्णोः कलहस्य हान्या । नूनं विनिद्राम्बुरुहा[2] दरिद्राः प्रसन्नतामीयुरिवाब्धिकान्ताः ।।७१।। विनाऽपि चण्डाद्यभिघातमनुमापातुकान् शालिवनं कुरङ्गान् । न्यवारयन् गेयरवैः प्रगल्भा [3]गुणैर्विकृष्टानिव शालिगोप्यः ।।७२।। पुण्ड्रेक्षुखण्डस्य विपत्क्रिमस्य पीयूषमाधुर्यमुषो निपीय । रसोदवाहानिव शीतरोचिः करांस्तुषारान्मधुरानमुञ्चत् ।।७३।। दिवातपेन द्विषतेव भानोः क्लान्तं नितान्तं भुवनं निरीक्ष्य । अस्नापयच्छीतरुचिर्निशासु सुधामयैरंशुभिरीर्ष्ययेव ।।७४।। वैषम्यतोऽचेष्ट्यत कष्टमेभिर्भारार्दितानां पथिगच्छतां नः । इतीव साम्याय वृषा विषाणैराजघ्नुरुच्चानि सरित्तटानि ।।७५।। सौधे सुधाधाममरीचिसिक्ते स्निग्धैः सुधाधुग्वचनप्रपञ्चैः । वैदग्ध्यदिग्धैः सह कामकेलिं कुर्वन् कुमारः शरदं निनाय ।।७६।। हिमागमः प्राप ततो [5]रसालजालद्रवास्वादनमत्तगोपः । माद्यन् बलात्क्रौञ्चवधूविदब्धा कोलाहला वान्तवनान्तरालः ।।७७।। आपन्नवीर्येषु हिमप्रकर्षान्नूनं पतङ्गस्य तुरङ्गमेषु । व्योमाङ्गणं मंक्षु विलङ्घयत्सु दिनानि यस्मिंस्तनिमानमीयुः ।।७८।। हिमर्त्तुना सङ्घटितेन सख्या सार्द्धं कथामादधतश्चिरेण । कालातिपातोऽजनि शीतरश्मेरितीव दीर्घाः क्षणदा बभूवुः ।।७९।। प्रविश्य लीनाः शरदातपस्य तीव्राभितापादिव कन्दरासु । वेगेन तस्यापगमादिदानीं विष्वग् हिमाद्रेः पवनाः प्रसस्रुः ।।८०।। प्रालेयनिस्यूतसमीरसध्र्यङ्हिमर्त्तुरर्तिं जगतः पिपर्त्ति । वह्निर्दहेत् केवल एव दाह्यं किमु प्रचण्डानिललोदर्चिः ।।८१।। उष्णेषु यत्कुङ्कुमपत्रवल्लीर्व्यधुः स्त्रियःस्वन्नकुचेषु चारु । तपन्नभस्वल्लहरीपरीतं कस्तापयेत्सप्तशिखेन गात्रम् ।।८२।। वैमुख्यमेषा नयनोत्सवस्य धत्ते सुधांशोरपिमत्सखस्य । इतीव दुर्द्धर्षतुषारवर्षैः शीतागमः पङ्कजिनीं ममन्थ ।।८३।। ।।५३।।

१. शत्रुध्वंसदर्शनं हि महते तेजसे भवतीति ।। १. तदवेक्षयां पद्मनी प्रतिजागरणाय ।। ३. अम्बुरुहा दरिद्राः कमलबहलाः ।। ४. गुणैर्विकृष्टान् रज्जुभिराकृष्टान् ।। ५. रसाला इक्षवः ।।

स्वारातिघर्मद्युतिबन्धुपद्मभ्रान्त्या [1]हिमर्त्तुर्विकरिष्यतेऽदः । इति ध्रुवं कुङ्कुमपङ्कसान्द्रलेपेन वक्त्रं पिदधुस्तरुण्यः ।।८४।। सौगन्ध्यबन्धूकृतदि क्तटेन विलिप्य गात्रं घुसृणद्रवेण । स्नान्तो विनिष्पातुकवारिभङ्ग्या ध्रुवं युवानो हिममुद्वमन्ति ।।८५।। सुस्निग्धकालागुरुधूम–भूमकाम्यालयः कुङ्कुमपिञ्जराङ्गः । हेमन्तमन्तः–पुरमध्यसंस्थोऽतिवाहयामास महीपसूनुः ।।८६।। प्रदीपवच्चञ्चलदेहभासस्तारासमूहा नभसि व्यराजन् । शङ्के नवस्फारतुषारबाधाच्छीतज्वरार्त्ता इव जातकम्पाः ।।८७।। अथ प्रियंभावुकभानुमण्डलश्चन्द्रप्रभासोदरकुन्दसुन्दरः । पुष्णन्नसौ भाग्यमनुष्णगीधितेरुन्निद्रशीतः शिशिरः समाययौ ।।८८।। व्याप्ते तुषारेण जगत्यशेषे स्वबीजगुप्त्यै ध्रुवम्भ्युपागात् । वधूरवध्येति जनप्रसिद्धेरूष्मानतभ्रूकुचमण्डलानि ।।८९।। विलासिनां केलिषु सर्वरात्रं संश्लेषनिष्पेषविबाधयेव । निशासु दीर्घास्वपि शैशिरीषु शीतं विदुद्राव हताशमारात् ।।९०।। विलासिनां वासगृहेषु नूनं प्रभास्वरैरागुरवैरुदारैः । हसन्ति दुर्वारतुषारचौरैरङ्गारपूरैः शिशिरं [2]हसन्त्यः ।।९१।। विलासवासेषु न कामुकानां जातु प्रवेष्टुं शिशिरः शशाक । कृष्णागुरूद्दत्वरवह्निनिर्यद्धूमान्धकारान्धइवोद्ध तोऽपि ।।९२।। इयं वराकी विसिनीव बन्धुना मयाऽपि गुप्ता हिमडम्बडम्बरात् । इत्युद्यदुद्वेगभरात्त्विषांपतिस्तेजः श्रियो नूनमवाप मन्दताम् ।।९३।। प्रीणन्ति यूनः प्रथितोष्णिमानो निद्रप्रियाणां स्तनमण्डलेषु । वियोगिनीनां वदनेषु दग्ध्वा स्वेदोदवाहा हिमगन्धवाहाः ।।९४।। प्रावारकृष्णागुरुकुङ्कुमादावपि प्रतीपे शिशिरस्य रज्यन् । तस्य प्रकर्षं स्फुटयन् कुमारः स तेन सौहार्दमिवाचचार ।।९५।। गुप्तात्पुरासंभृतपुण्यराशेः कोशादिवाकृष्य निषेवमाणः । सर्वर्त्तुवर्त्तीनि सुखानि शश्वद्विलङ्घयामास समाः स बह्वीः ।।९६।। आक्रीडक्लृप्तरासवोच्चयादिभिर्विला–सिनीभिः[3] सममन्यदाऽस्य । प्रक्रीडतः केलिजलाशयेषु स्मराग्रदूतीव पराप सन्ध्या ।।९७।। रजस्वलानामथ पद्मिनीनां विसृत्वराणां रजसामनुष्णाः । [4]स्पर्शादिवाऽनूनमहः खरांशोर्मरीचयः पाटलिमान मापुः ।।९८।। संगामुकः पश्चिमदिक्तरुण्या मन्ये विलिप्तो हरिचन्दनेन । पतिस्त्विषां तेजितपद्मरागविडम्बिबिम्बं बिभराम्बभूव ।।९९।। चक्राऽऽह्वयस्त्रोटिपुटीगृहीतमृणालिका–सूत्रलताच्छलेन । एष्यद्वियोगज्वरजर्जराङ्ग्याश्चकर्ष चक्र्या इव जीविताशाम् ।।१००।। अस्मद्वदेतेऽपि कुतोऽपि केचिदेत्याङ्गिनः सङ्घटिताः कुटुम्बे । तन्नैषु मुह्योऽज्ञ इति द्रुमेषु रुतच्छलेनेव जगुर्विहङ्गाः ।।१०१।। निर्गत्वरी सत्वरमब्जकोशाद्धनायताऽराजत



१. विकरिष्यते विक्षिप्स्यति ।। २. हसन्त्याऽङ्गारशकटिका । ३. आक्रीड उद्यानम् ।। ४. अनूनं पूर्णमहः दिनं यावत् ।।

भृङ्गराजी । पत्यौ प्रवासाभिमुखे द्युरन्ते बद्धाप्रवेणीव सरोरुहिण्याः ।।१०२।। दिवाकरो मत्त इवास्ततेजास्त्यक्ताम्बरो [1]मण्डलरागभूमिः
। द्राग्वारुणीसङ्गरसातिरेकात् पपात विन्यस्तविहस्तपादः ।।१०३।। तिग्मद्युतौ जग्मुषि कालयोगादस्तं जगाम द्रुतमातपोऽपि
। निर्वाति धूमो हि किमाश्रयाशे तन्नान्तरीयः क्वचिदाविरस्ति ।।१०४।। कोशेषु संरोधभिया प्रदोषे सरोरुहेभ्यो बत निस्सरन्तः
। शिलीमुखाः स्निग्धनवीनपीनतमिस्रबीजश्रियमुद्वहन्ति ।।१०५।। नीलोत्पलेभ्यः किमपि स्फुटेभ्यो निःसषुरश्रान्तमलिप्रतानाः
। सङ्कुच्य गुप्ता दिनभर्तृभीत्या शङ्केऽन्धकारा जगदञ्जनाय ।।१०६।। अर्चिःप्रपञ्चैश्चतुरोऽपि यामान् [2]गरिष्ठकाष्ठास्य विरोचनेन
। प्लुष्टस्य धूम्येव त्रिविष्टपस्य श्यामा तमःसंहतिरुल्ललास ।।१०७।। अस्माकमालोकनिकारमुच्चैः[4] प्रकाशयन्ति त्रिजगत्यमूनि
। इति प्रकोपादिव लोचनानां गतिं न्यरुन्धन्नभितस्तमांसि ।।१०८।। तेजोवधाच्छाश्वतमेष वैरी स्वैरी रविर्नोऽस्तमितो न वेति
। ज्ञातुं भिया व्योमनि कम्पमानास्तारा निरीयुर्विरला विलोलाः ।।१०९।। स्वतेजसा सङ्घटिता अनेन वयं खरांशुव्यथितौजसोऽपि
। इत्यन्धकारस्य [5]सभाजनाय नभस्यजृम्भन्त मुदेव तारा: ।।११०।। ध्वान्तेन नित्योदयभूर्ध्रुवं मे प्राप्य प्रसङ्गं मलिनीकृतेति
। सिक्त्वेन्दुरुद्यन्सुधया करैः प्राक् प्राचीमथ प्रोज्ज्वलयाञ्चकार ।।१११।। स्वर्भानुवन्मान्त इत्यभिख्या भ्रान्ता इमे तु किमु
कामयन्ते । इत्यन्धकारानिव निग्रहीतुमुदैत्क्रुधेवारुणबिम्ब इन्दुः ।।११२।। क्षमिष्यते क्रष्टुमयं न एभ्यश्चण्डांशुवन्नो करमार्दवेन
। एवं विविच्येव तमीतमांसि शिलोच्चयानां विविशुर्निकुञ्जान् ।।११३।। म्रदीयसामृश्य करोच्चयेन रजःस्पृशं गाढरिरंसयेव ।
रसप्लुतां कैरविणीं सुषुप्तां विबोधयामास निशीथिनीशः ।।११४।। तालप्रवालच्छविचुम्बिबिम्बं जहौ क्रमेणारुणिमानमिन्दोः ।
ऊर्द्ध्वोच्छ्वसन्नीरधिवीचिपूरैः समुच्छलद्भिः स्नपनादिवोच्चैः ।।११५।। अहोनुसुर्यं प्रति कोऽपि रागोऽब्जिन्या यतः कर्कशपादघातैः
। अप्रियतास्येयमभूत्पराची करावमर्शैर्मृदुभिर्विधोरस्तु ।।११६।। वर्य्या इमे मद्रुचिनो ररेरिति प्रियाविभ्रममर्च्चया ध्रुवम् ।
उत्पाद्य तीरे सरसां निशापतिस्तताप चक्रान् भ्रमयत्समां निशाम् ।।११७।। निस्तन्द्रया चन्द्रिकयाऽतिसान्द्रं रोदः कुटीरे
शशिना विलिप्ते । स्त्रैणेन तारुण्यतरोः फलानि स निर्विशन्यामवनीमनैषीत् ।।११८।। व्यग्रा विलासेषु न जाग्रतोऽपि ।।५५।।
ज्ञास्यन्ति कम्राः क्षणदा विरामम् । इति ध्रुवं ज्ञापयितुं तमेषामकूजदुच्चैरथ ताम्रचूडः ।।११९।।आदध्म सख्यं तमसा द्विषास्येत्यागो

१.अथवा मण्डलानां शुनां रागभूमिस्तत्प्रियत्वात् मण्डलं बिम्बं पानगोष्ठी च ।। २. प्रताना इति बहुवचनं प्रतिपन्नं प्रतानविवक्षया ।। ३. गरिष्टकाष्ठस्य गुरुतरदिग्वलयस्य विरोचनावह्निरादित्यश्च ।। ४.आलोकनिकारम् आहलोककृतं पराभवं, पराभवप्रकाशकोहि प्रायो द्वैष्यो भवति ।।५. सभाजनं प्रत्युत्पादनम् ।।

ध्रुवं स्वं प्रति सन्दधानाः । प्रागेव भीतेरुदयात्खरांशोस्तारा अपेयुर्विरुचः प्रतीच्याम् ।।१२०।। शृङ्गारिणां सद्मसु सर्वरात्रं सम्भोगवैदग्ध्यदृशानुरागात् । वैवर्ण्यकम्पाविव सन्दधानाः शुभ्रा बभूर्लोलशिखाः प्रदीपाः ।।१२१।। चलच्चकोरीवदनैर्निपीय ज्योत्स्नारसं मुक्त इवौषधीशः । उच्छिष्टनीरुक्कलधौतपात्रच्छायां बभाराऽम्बरसद्मकोणे ।।१२२।। श्रीखण्डपङ्कैरिव निर्विशङ्कं लिम्पन्त्यविश्रान्ति जगन्ति भूम्ना । श्रान्तेव सुष्वाप निशावसाने ज्योत्स्नाङ्कपर्यङ्क इवामृतांशोः ।।१२३।। विकस्वराच्छोणसरोजपुञ्जाद्विनिर्यतो वायुधुतस्य रेणोः । स्निग्धस्य सङ्गादिव रक्तबिम्बः प्राच्याद्रिशृङ्गं रविरध्युवास ।।१२४।। नूनं प्रिये सङ्कटितेऽथ सूर्ये फुल्लाब्जनिर्गच्छदलिच्छलेन । राजीविनी कज्जलमिश्रमश्रुपूरं चिरात्सम्भृतमुत्ससर्ज ।।१२५।। भित्त्वा शितैर्हेतिभिरभ्यमित्रान् द्राग् नश्यतो न्यक्षिपदन्धकारान् । कारास्विव क्ष्माधरकन्दरासु तिग्मद्युतिः कर्कटसङ्कटासु ।।१२६।। ददत् प्रियाया विसखण्डमास्ये शङ्के पटुश्चाटुषु चक्रवाकः । रराज संयोजनयन्त्रगोलं वियोगशीतज्वरकम्प्रगात्र्याः ।।१२७।। मुक्ताफलच्छविमुषो घनघर्म्मबिन्दुंश्चुम्बन्ति गण्डफलकेषु नितम्बिनीनाम् । हर्तुं रतिक्लममिवोषसि गन्धवाहा राजीवसौरभलिहो मृदवस्तुषाराः ।।१२८।। उत्तालजिह्वा स्फुटचाटुकारवाचालवैतालिकगीतकीर्त्तिः । सान्यद्विलासायुधदद्ब्धलास्या झगित्युदस्थाच्छयनादथासौ ।।१२९।। अथान्यदाऽध्यास्तविशालजालः स्नातानुलिप्तान् धृतदिव्यभूषान् । प्रतिष्ठमानाभिमार्गमेकं निर्वर्ण्य वर्ण्यश्चतुरोऽपि वर्णान् ।।१३०।। मनोज्ञवेषः क्व जनो मनोभुवो वसन्तयात्रास्विव यात्यसाविति । पप्रच्छ निर्मच्छरलोकवत्सलः सोऽचञ्चलः कञ्चुकिनं प्रपञ्चतः ।।१३१।। युग्मम् ।। स व्याहरज्जङ्गमकल्पशाखी श्रीमान् महावीर इहाजगाम । तत्सेवया सम्प्रतिनाथमानः श्रेयःफलं नाथ जनः प्रयाति ।।१३२।। ततस्तदाकर्ण्य नमस्यितुं स श्रीवर्द्धमानप्रभुमुत्सुकोऽभूत् । हस्तेन कल्पद्रुफले हि लभ्ये जायेत कस्तद्ग्रहणे शयालुः ।।१३३।। घण्टा चतुष्कस्वनितच्छलेन सौन्दर्यदर्प्पाद्ध्रुवमाक्षिपद्यः । रथान् चतुर्दिक्परिवर्त्तिनोऽसावारुह्य तं पुष्परथं प्रतस्थे ।।१३४।। प्रदक्षिणीकृत्य ततो ववन्दे श्रीवर्द्धमानं जिनमेष भक्त्या । सुभोज्यमासाद्य मुदा क्षुदार्तो भुक्तावुदासीत किमस्य कश्चित् ।।१३५।। तस्मै [1]ततस्तत्रभवानदिक्षत् सपर्षदे घर्म्ममनर्म सद्यः । परोपकारे दृढदीक्षितानां नालस्यमुद्रामुकुलः प्रयत्नः ।।१३६।। फुल्लारविन्दोपगतास्यदास्यः स दर्शनं प्राप ततः सुदर्शः । वन्ध्यार्हतां



१. तत्र भवान् पूज्यः ।।

गीर्नहि जातु पात्रे जायेत बीजोप्तिरिवोर्वरायाम् ।।१३७।। सोऽवोचदर्थानधिपत्ययोक्तान् प्रत्येमि संप्रत्यधिगम्य सम्यक् । व्यक्ते घटादौ विधुतान्धकारैर्भानोः करैर्विप्रतिपद्यते कः ? ।।१३८।। भवाद्विपाकादिव कर्मणोऽशूभाद्व्यरज्यत त्वद्वचसा मनो मम । को वाऽभितोऽम्भःप्लवपूरितोदराग्निकेतनादुद्विजते न चेतनः ।।१३९।। ततश्च पित्रोर्दुरनुग्रहत्वात्ताभ्यामहं नाथ विमोचयेस्त्वम् । आपृच्छयि सद्यः प्रणयेन यावद्दीक्षेय तावत्तव पादमूले ।।१४०।। यावद्दधाते पितरौ ममासूनुपाददे तावदहं न दीक्षाम् । इति प्रतिज्ञां दधता त्वयैव प्रादुष्कृतोऽयं जिननाथ पन्था ।।१४१।। अर्हन्नथोवाच भवप्रबन्धे मा सत्यसन्धप्रतिबन्धमाधाः । अजस्रविश्रब्धवधप्रसिद्धे रज्येत को विद्विषि जीवितार्थी ।।१४२।। एत्याऽथ हर्म्यं निजमाशयं स्वं व्यजिज्ञपद्यः पितरौ स भक्त्या । सेव्याय नाज्ञापितमर्थनीयं यदर्थिनं हन्त ? सुखाकरोति ।।१४३।। पीयूषसिक्ताऽप्यथ तस्य वाणी कर्णौ कृपाणीव तयोर्बिभेद । जिह्वां हि पित्तामयबाधितानां दोदूयते पुण्ड्रकशर्कराऽपि ।।१४४।। निपेततुस्तौ मणिकुट्टिमे [1]क्षणान्मोहादनालम्बतयाऽरुजावपि । कौचिन्महाजाङ्गुलिकप्रयोजिताहिमन्त्रमूर्च्छद्विषसङ्क्रमाविव ।।१४५।। तौ तालवृन्तानिलबीजनानां व्याजात्स नूनं सपरिच्छदोऽथ । सस्फूर्तिमृत्युञ्जयमन्त्रपूतं प्रमार्जनीवायुभिरुन्ममार्ज ।।१४६।। सुगन्धिभिश्चन्दननीरबिन्दुस्यदैरमन्दैः शिशिरैस्तथाऽसौ । [2]सान्द्रैर्जलार्द्राम्बुकणैस्तदङ्गं साक्षादिवायुःपृषतैः सिषेच ।।१४७।। पुनः स्मृतेरुत्थितयोस्तयोः सागाक्रन्दतोर्वागथ गद्गदाऽभूत् । पुत्रेप्सिताऽवादि तया कवोष्णैः कण्ठस्य कुण्ठीकरणादिवास्रैः ।।१४८।। अथोचतुः स्नेहपुरस्सरं तौ पुत्राद्वितीयः सुत आवयोस्त्वम् । प्रियंभविष्णुर्गुणशेवधिर्यत्तच्छक्नुमस्त्वद्विरहं सोढुम् ।।१४९।। तद्वत्स ! सद्वत्सल ! यावदावां जीवेव तावत्सदने त्वमास्स्व । चकोरवद्येन तवास्यचन्द्रज्योत्स्नां पिबन्तौ सुखमाजनिस्व ।।१५०।। ततः स ऊचे पितरौ यथा युवामुदाहृषाथामुपपद्यते तथा । किं नाम नुन्नामरचापचापलः सर्वोऽपि संसारिकवस्तुसञ्चयम् ।।१५१।। मोहाङ्गना नः प्रतिरामणीयकान् मा कार्षुरेते मनसः प्रसञ्जनम् । इतीव कामाः प्रतिवेलमात्मनः प्रदर्शयन्ति क्षणभङ्गसङ्गमम् ।।१५२।। इत्थं यदात्मानमिवोज्झयन्तः कामाः स्वकम्रात्प्रतिबोधयन्ति । कथं तदानीमुपभोक्तुमेताग्निकेतनेऽहं जनकौ वसामि ।।१५३।। भुजङ्गभोगा इव [3]भुज्यमाना विषोपदिग्धा ।।५७।।
इव मोदका वा । भोक्तृन् हि भोगा निधनं नयन्ति यत्तेन ते बुद्धिमता विहेयाः ।।१५४।। यदर्थमेतानपि कामयन्ते मतङ्गकर्णाञ्चलचञ्चलां

१. अरुजावपि पित्ताद्यनुपहतावपि ।। २. जलार्द्रं जलक्लिन्नं वस्त्रम् ।। ३. भुज्यमानाः सेव्यमाना अभ्यवह्रियमाणाश्च ।। ४. स्वमूत्रविष्ठासु भूमिष्विति विशेष्यं

तत् । त्रुट्यत्तदित्यङ्गभृतां शरीरं करीरदारुप्रतिमां बिभर्त्ति ।।१५५।। एतद्विचित्राणि मुहुः फलानि नो योनिष्वशेषासु कथं सहिष्यते । इतीव कर्म्माणि नृणां विनिर्ममुर्मत्ताङ्गनाभ्रूयुगभङ्गुरं वपुः ।।१५६।। स्वमूत्रविष्ठासु लुठत्यकुण्ठो यच्छैशवे कोल इवैष लोलः । तच्चिक्कणैः कर्म्ममलैर्विलेपं व्यनक्ति नक्तं दिनमात्मनोऽङ्गी ।।१५७।। एतामवष्टभ्य यथैव वार्द्धके परिभ्रमिष्यामि [1]गतिस्थलिष्वहम् । दीर्घास्वितीवोपयमक्षणे दृढं गृह्णाति वध्वाः करमेष यौवने ।।१५८।। द्यानावपि स्फारजराविकारव्याजेन सर्वोपघनेषु कम्प्रः । नेदिष्ट चैव स्वतचण्डदण्डप्रहारभीत्येव विभाव्यतेऽसौ ।।१५९।। उद्भावुकानेकरुजानिकायात्कायादपायादिव क्लृप्तदुःखात् । धर्मार्जनं मार्जनमर्त्ति पांसोर्मुक्त्वा । न पुंसामितरोऽस्ति लाभः ।।१६०।। ततो जनन्याह तनूज कायच्छाया–इवामूः सह गामुकास्त्वम् । अष्टौ नवोढा वरराजकन्या भुक्त्वा व्रतं तीव्रमुपाददीथाः ।।१६१।। स प्राह भूयो जननि स्वदेहच्छाया वदेता अधुना न भोग्याः । स्वादूनि हृद्यान्यपि ढौकितानि भोज्यानि नारोचकिनः स्वदन्ते ।।१६२।। अष्टौ ततोऽहं जिनशासनस्य मातृरपि स्निग्धमना बुभुक्षुः । भोक्ष्ये न साध्वीर्जननि स्वपत्नीः संसृत्पदाद्यघटनाभयेन ।।१६३।। पुनर्बभाषे जननी स्ववंश्यैः प्राच्यैर्नृसिंहैश्चिरमर्जितां त्वम् । अध्यूषिवान् वत्स विलासवासं यच्छन् यथेच्छं परिभुङ्क्ष्व लक्ष्मीम् ।।१६४।। स प्राह मातः ! स्वविलाससद्मनोरपीयमम्भोजसुधामयूखयोः । पर्यायतः श्रीरवतिष्ठते क्षणं स्यात्पुंस्यमुष्याः स्थिरतेति का कथा ।।१६५।। जगत्तृणायापि न मन्यते पुमान् गर्वादखर्वाददधिवासितो मया । इति ध्रुवं तस्य नृणां प्रहाणयेऽभ्युपागमच्छ्रीः शरदभ्रविभ्रमम् ।।१६६।। युज्येत यच्चापलमाप लक्ष्मीः कुलव्रतत्वात्सुदृशाममुष्या । हरिप्रिया यत्त्वपरापरान् सेत्वरीव संश्लिष्यति तन्न सम्यक् ।।१६७।। क्षीरोदवासात्सहभूः [2]परिस्रुतो लक्ष्मीस्तदाश्लेषमृतेऽन्यथा कथम् ? । वश्या अमुष्याः स्फुटयन्ति मानवाः क्षीवाइवाङ्गानि विशंस्थुलान्यमी ।।१६८।। गाढं परिष्वङ्गपरायणाया लक्ष्म्याः पिशाच्या इव बाहुपाशैः । कण्ठस्य रोधाद् ध्रुवमीश्वराणामस्पष्टवर्णा गिर उच्चरन्ति ।।१६९।। व्यालुप्तचैतन्यतया मदेन विलोकमाना अपि मूर्च्छिताक्षाः । नूनं न पश्यति यथावदाढ्याः शौण्डा इवाकाण्डवचःप्रचण्डाः ।।१७०।। प्राह प्रसूः सत्यमपत्यमुक्तेर्दीक्षाऽर्हती पद्धतिरद्वितीया । आस्ते भवस्येव विराधनाऽस्याः किं नाम ते दुर्गम एष पन्थाः ।।१७१।। यथाम्बुराशेस्तरणं भुजाभ्यां विहायसोऽतिक्रमणं क्रमाभ्याम् । अयोमयानामशनं यवानामालिङ्गनं

१. गतिस्थल्य एव गतिस्थल्यस्तत्र तेन गतिस्थलीषु गमनप्रधानभूमिषु नरकादिगतिषु च ।। २. परिस्रुतो मदिरायाः तदाश्लेषं मदिरासङ्गः ।।

प्रज्वलतः कृशानोः ॥१७२॥ पत्युर्मृगाणामिव तुण्डमुण्डनं कण्डूयनं मूर्द्धनि कुण्डलीशितुः । विश्वम्भरायास्तुलया विधारणं
पलायनं कण्टकसङ्कटे पथि ॥१७३॥ माद्यन्नवानङ्कुशयौवनस्य परीषहाणां सहनं तथा ते । सुदुष्करं दुःखदुहां तनूज
कूजत्पिकोद्यानविलासयोग्याः ॥१७४॥ त्रिभिर्विशेषकम् ॥ यदीषदप्यङ्ग शिरीषपुष्पं तापं न वह्नेः क्षमते मृदीयः । नापि द्विपो
हस्तविलोलहस्तप्रेंखोललीलामपि पद्मखण्डम् ॥१७५॥ तदङ्गजास्माद्विरमाभियोगाद्योगादिवाभ्यासविशेषशून्यात् । कर्म्मण्यसाध्येन
निशातशास्त्राङ्कुशाः कुशाग्रीयधियः जन्ति ॥१७६॥ स प्राह शक्येत न कातरैर्नरैर्भोगाद्यभिष्वङ्गवशंवदैरदः[1] । नत्वम्बुनाथैरिव
सत्त्वराशिभिर्गाम्भीर्यलीलासदनैर्नदीनकैः ॥१७७॥ मदोत्कटा हस्तिघटा विभिद्य किं सिंहार्भको विन्दति नो जयध्वजम् ।
तेजस्विनोप्यग्निनिशाकरादिमान् विजित्य किं नोदयते पतिस्त्विषाम् ॥१७८॥ तदम्बिके ? संवरचुम्बितात्मनां तेजस्विनां
किञ्चन नास्ति दुःशकम् । अतोऽनुजानीहि समीहितं मम त्वमर्थनां तात ! वृथा च मा कृथाः ॥१७९॥ दीक्षां ततस्तौ
जगदीशपार्श्वेऽनुजज्ञतुस्तज्ज्ञतयाऽऽत्मजस्य । कः शर्करासंस्कृतदुग्धपानं सत्यर्थलाभे स्वसुतस्य नेच्छेत् ॥१८०॥ नूनं ततः
काञ्चनरत्नरूप्यकुम्भेरितैर्वारिभिरभ्यषिञ्चन् । अह्नाय लोकोत्तरजैनदीक्षाराज्याधिरोहाय त्वरा जमालीः ॥१८१॥ ततः
[2]पदप्रोञ्छनमुत्थितांह आनाय यत्कुत्रिकहट्टतोऽसौ । लक्षेण मूल्येन चरित्रलिङ्गं पतद्ग्रहं चाप्रतिमानरूपम् ॥१८२॥ बहिर्भुवोगाः
सहजा अपीमे छेदेऽप्यतः पातकमस्ति नैषाम् । इति ध्रुवं व्यङ्क्तुमकल्पयत्स वालानवालानपि नापितेन ॥१८३॥
आमुक्तरत्नाङ्कितहेमभूपा ततो निवीता प्रतिमांशुकास्य । तनुःपिनद्धा [3]प्रपदीनमाला सञ्चारिणी कल्पलतेव रेजे ॥१८४॥
उत्कण्ठितः सिद्धिपुरीमिवाप्तुं प्रीत्याधिरूढः शिबिकां जमाली । श्रीखण्डचर्चापरिपाण्डुदेहो दिक्षा जिघृक्षन्नथ संप्रतस्थे ॥१८५॥
श्रीवीरनेतुः पुरतः स्वभर्त्तुरायानवार्त्तामिव सर्वतः प्राक् । वक्तुं जवेन प्रतिषिद्धवात्या जात्या ययुर्यस्य पुरस्तुरङ्गाः ॥१८६॥
सन्तापितायां खरभानुनाऽवनावियाञ्जनो यास्यति साम्प्रतं कथम् । इतीव चेलुर्जठराहतैस्ततः सिञ्चन्त एनां करशीकरैरिभाः
॥१८७॥ उत्सृज्य नो दृष्टचरानदृष्टं गृह्णाति [4]शीलाङ्गरथं किमेषः । इति क्वणत्किङ्किणिकाच्छलेन मिथोवदन्तः प्रययुः शताङ्गाः
॥१८८॥ अध्यासितस्यन्दनदन्तिवाहा राजाङ्गजार्थेश्वरसार्थवाहाः । सुदुर्गमां मुक्तिपुरीं प्रयातुस्ततः सहाया इव यस्य जग्मुः ॥५९॥

१. वशंवदैस्तत्परतन्त्रैः ॥ २. उत्थितांह उन्मूलितपापं याचितजगद्विवर्त्तिवस्तुप्रदं, देवताधिष्ठितं कुत्रिकहट्टम् ॥ ३. यन्मुक्ताकलापादिकं पादाग्रं प्राप्नोति तत्प्रपदीनम् ॥ ४. योगकरणसंज्ञेन्द्रियपृथिव्यादिश्रमणधर्मक्रमेण लिखितानि शीलाङ्गानि रथाकारं निभ्रतीति शीलाङ्गरथः ॥

।।१८९।। स्तुत्येभ्य ऋक्प्रचयान् ग्रहीतुं नूनं तदाकर्षणमन्त्रवर्णान् ।। श्लोकान् पठन्तः स्तुतिनर्मगर्भान् वैतालिका यस्य पुरः प्रचेलुः ।।१९०।। कुग्राहभङ्गैर्गहने भवेऽस्मिन् पतन्नसौ सत्त्वरमुत्पतिष्णुः । श्रीवर्द्धमानस्य समीपमाप द्वीपं यथा नीरनिधौ निमज्जन् ।।१९१।। सद्योऽवतीर्याथ स याप्ययानात्श्रीवीरनाथं प्रयतोऽभिवन्द्य । उवाच वाचंयममौलिरत्न ! दत्स्व व्रतं वासवमह्य ! मह्यम् ।।१९२।। अभाषिषातां पितरौ ततोऽस्य जगत्त्रयी चित्तसचित्तभिक्षाम् । गृहाण देवानुगृहाण नः स्राक् त्वत्तोऽपि पात्रं हि न विद्यतेऽन्यत् ।।१९३।। आख्यज्जिनः प्रव्रजतु प्रकामं भवादयं भीरुरसातदिग्धात् । रिङ्खद्भिरन्तः सततं भुजङ्गैस्तरङ्गिते सद्मनि कः शयीत ।।१९४।। ततः प्रणम्य प्रमना जिनेन्द्रं विमुच्य वस्त्राभरणादिभूषाम् । स पञ्चशत्या सह राजपुंसां जग्राह दीक्षां विधिनां मुमुक्षुः ।।१९५।। जायाऽथ तस्य प्रियदर्शनाऽपि श्रीवीरनेतुर्दुहिता हिताय । समं सहस्रेण वराङ्गनानामङ्गीचकार व्रतमक्षतश्रीः ।।१९६।। ततोऽङ्गजन्मन् ! भवताऽतिचारो न रोपणीयः कथमप्यमुष्मिन् । व्रते मनागित्यनुशिष्य नत्वा तं जग्मतुः स्वं पितरौ निकेतम् ।।१९७।। एकादशाङ्गीं वरधीरधीयन् चारित्रमैत्र्याः प्रतिजागरूकः । तपांसि भूयांसि च तप्यमानः स स्वामिना साकमथ व्यहार्षीत् ।।१९८।। विहारयात्रां पृथगन्यदाऽथ सोऽन्वजिज्ञपच्छ्रीजिनमेष तु व्यधात् । तूष्णीं प्रसर्प्पन्ति यतो न निष्फला न वा विपर्यस्तफला जिनोक्तयः ।।१९९।। विनाऽप्यनुज्ञामगमत् पुरीमसौ श्रावस्त्यभिख्यामथ सूचयन्निव । [1]व्युत्थानमागामि सहार्हतात्मनः समावसत्तत्र च तिन्दुकञ्चनम् ।।२००।। आज्ञां विलुप्यायमिहागतोऽतः प्रदर्शयामः फलमस्य नूनम् । इत्यन्यदाऽन्नैर्विरसारसाद्यैः पित्तज्वरोऽजन्यत दुःसहोऽस्य ।।२०१।। स दूयमानः सुतरामनेन साधूंस्ततः सत्वरमादिदेश । संस्तारकं भो मम संस्तृणीध्वं व्यापारिषुस्तेऽप्यथ संस्तुरीतुम् ।।२०२।। पप्रच्छ भूयो बत संस्तृतोऽसौ नवेति ते संस्तृत इत्यजल्पन् । अन्ये तु संस्तीर्यत इत्यमीषां शृण्वन् स वाचं समदिग्ध मुग्धः ।।२०३।। उदीर्यमाणं नियमादुदीर्णं यत्क्षिप्यमाणं क्षपितं च कर्म्म । चलन्तमर्थं चलितं दिदेश सभासु वीरस्तदवैमि मिथ्या ।।२०४।। प्रत्यक्षतः सम्प्रति दृश्यते यत्संस्तीर्यमाणोऽपि न संस्तृतोऽयम् । संस्तारकः संस्तृतवत्प्रसङ्गात् संस्तीर्यमाणेऽपरथा शयादेः ।।२०५।। एवं चलत्प्रचलितं क्रियमाणं कृतं तथा । इत्यादावप्ययं न्यायो भेद एव तयोस्ततः ।।२०६।। एवं विनिश्चित्य यतीन् स आदिशत् भो ! वीरपक्षो



---

१. व्युत्थानं विरोधाचरणम् ।।

न घटामटाट्यते । उक्तक्रमेण क्रियमाणक्लृप्तयोर्भेदोपलम्भान्मम तन्मतं प्रभा ।।२०७।। केचिद्वचस्तस्य ततः प्रतीत्य तथेति तच्छ्रद्दधिरे विनेयाः । केचित्तु वीरक्रमपद्मभक्ता अश्रद्दधानास्तदवादिषुस्तम् ।।२०८।। भेदः केन प्रमाणेन स्यात्कृतक्रियमाणयोः । स प्राहाध्यक्षतो दृष्टेरनुमाऽपि प्रदर्श्यते ।।२०९।। न स्तो विवादाध्युषिते अभिन्ने प्रत्यक्षतो निश्चितभेदभावात् । यदेवमेवं तदनेकपार्श्वौ यथा तथा चात्र विवादधाम्नी ।।२१०।। भिन्ने ततस्ते इति सत्प्रयोगाद्भेदस्तयोः सिध्यति निर्विवादः । हेतोरसिद्धिर्न च शङ्कनीया तन्निश्चितेः सर्वजनप्रसिद्धेः ।।२११।। अत्रोच्यते समाधिर्भाषितमध्यक्षदर्शनादिति यत् । तन्न प्रत्यक्षस्य भ्रान्तेर्भृशभेदमुल्लिखतः ।।२१२।। तयोरत्यन्तभेदे हि क्रियमाणाद् ध्रुवं कृतम् । पार्थक्येनोपलभ्येत किंशुकादंशुकं यथा ।।२१३।। यच्च निश्चितभेदत्वात्तयोर्भेदप्रसाधनम् । तत्रापि तत्किमेकान्तात्कथञ्चिद्वेति कल्पना ।।२१४।। यद्येकान्तेन ते भिन्ने अभेदे दोष उच्यताम् । क्रियापत्तेः सतः किं किमच्छेदप्राप्तितः कृतेः ।।२१५।। उत प्राच्यादिसमये कार्योत्पादप्रसङ्गतः । किं वा कारकचक्रस्य नैरर्थक्यप्रसक्तितः ।।२१६।। अहो ! दीर्घक्रियाकालोपलम्भानुपपत्तितः । तत्र नाद्यः कथञ्चिद्धि सत एव क्रियाक्षमा ।।२१७।। सर्वथाऽप्यसतः क्लृप्तौ खपुष्पादेरपि क्रिया । प्रसज्येत न बाधायोपगमः कल्पते ततः ।।२१८।। न द्वितीयोऽनुपरमः स्यात्क्रियायास्तदा यदि । कृतस्य क्रियमाणत्वमिष्येत न च तत्तथा ।।२१९।। क्रियपाणस्य क्लृप्तत्वोपगमे तु न दूषणम् । यतः कृतत्वोपगमात्क्रियाऽऽवेशक्षणेष्वपि ।।२२०।। चेदन्त्यन्तुसंयोगादेव वस्त्रस्य निर्मितिः । तदा प्राच्यादितन्तूनां वैयर्थ्यमनुषज्यते ।।२२१।। अथ तेषामभावेन पाश्चात्यो नोपपद्यते । न च कार्यं पटस्यातो नैषां वैयर्थ्यमस्ति चेत् ।।२२२।। अन्त्यवत्तर्हि पूर्वेषामप्यंशुकविधायिता । सिद्धान्तः-क्रियमाणेऽपि कृतत्वं विद्यतेऽर्थतः ।।२२३।। उक्तञ्च-आद्यतन्तुप्रवेशे हि नोतं किञ्चिद्यदा पटे । अन्त्यतन्तुप्रवेशेऽपि नोतं स्यान्न पटोदयः ।।२२४।। तस्मादाद्याद्द्वितीयादितन्तुयोगात्प्रतिक्षणम् । किञ्चित्किञ्चिदुतं तस्य यदुतं तदुतं नन्विति ।।२२५।। यत्तु पटः क्रियमाणो व्यवह्रियते लौकिकैर्न क्लृप्त इति । तदखिलकारकचक्रव्यापारानुपरमान्नूनम् ।।२२६।। क्रियमाणे क्रियावेशान्नैषा स्यात्कृतधीस्ततः । विवक्षणात्तु तत्रापि तद्बुद्धिरुपजायते ।।२२७।। एवं चेन्नाभ्युपेयेत तदा पाश्चात्यतन्तुना । संयुक्तेऽपि पटे सर्वसिद्धाऽऽविःष्यान्न[1] क्लृप्तधीः ।।२२८।। क्रियमाणाद्भृशं भेदे कृतस्य तदनन्वयात् ।



१ [illegible]

नित्यासत्त्वप्रसङ्गेन प्रादुःष्यात् कुत्र क्लृप्तधीः ।।२२९।। तस्मादभेद एष्टव्यः स्यात्कृत्क्रियमाणयोः । उक्तन्यायेन तत्सिद्धेर्मृत्पिडघटयोरिव
।।२३०।। अभिदायामपि तयोः क्रियाऽनुपरमस्ततः । क्रियमाणस्य क्लृप्तस्वीकृतौ न प्रसज्यते ।।२३१।। नापि तृतीयः प्रकृतं
कार्यं चेद्भवति हन्त ! निरवयवम् । प्रथमसमयेऽपि नूनं जायेत तदा न च तदस्ति ।।२३२।। किं नाम सहावयवैः कारकचक्राच्च
निर्मितिस्तेषाम् । इति तेषु तदुपयोगात् प्रागेव न कार्यनिष्पत्तिः ।।२३३।। न कपालादिनिर्माणं विना हि घटनिर्मितिः ।
द्वितन्तुकादिसंसिद्धिमृते सिध्येत्पटो न च ।।२३४।। तदवान्तरकार्येषु क़ारकाणां प्रयोगतः । न प्राच्यादिसमयेऽपि कार्योत्पादः
प्रसज्यते ।।२३५।। न तुर्यः क्रियमाणत्वे कृतस्य व्यर्थता भवेत् । क्रियमाणकृतत्वे तु कारकाणां कथं नु सा ।।२३६।। तद्वैयर्थ्ये
हि न स्यातां कृतत्वक्रियमाणते । तत्साध्यत्वात्तदर्थस्यापरथाऽनुपपत्तितः ।।२३७।। न पञ्चमं कारकाणां क्रमेण व्यापृतेर्यदि ।
घटावयवनिष्पत्तिगोचरः काल आयतः ।।२३८।। अभूत्तत्र किमायातं घटस्येति तयोस्ततः । भेदाय कल्पितो हेतुरसिद्धिमवगाहते
।।२३९।। युग्मम् ।। अथो कथञ्चिदिष्येत तयोर्निश्चितभेदता । तदानीं नोऽपि सिद्धत्वादेतस्याः सिद्धसाधनम् ।।२४०।।
निश्चयव्यवहाराभ्यामर्हत्सिद्धान्तसंस्थितेः । ऐक्यं निश्चयतस्तत्र क्रियमाणकृतत्वयोः ।।२४१।। यदुक्तम्—क्रियमाणं कृतं दग्धं
दह्यमानं स्थितं गतम् । तिष्ठच्च गम्यमानं च निष्ठितत्वात्प्रतिक्षणम् ।।२४२।। इति ।। क्रियमाणं क्रियावेशात् क्रिया
व्युपरमात्कृतम् । भेदोऽप्येवं तयोरस्ति व्यवहारमताश्रयात् ।।२४३।। तथा हि—क्रियमाणं कृतमेव हि कृतं तु किञ्चिद्विधीयमानमपि
। क्रियया वेशात्तद्व्युपरमाच्च न स्याद्विधेयमपि ।।२४४।। व्यवहारमतेनैवं भेदोऽप्यस्ति तयोः परम् । उपेयं निश्चयादैक्यं
वृक्षशिंशपयोरिव ।।२४५।। येन यदविनाभावि तत्तस्मान्न विभिद्यते । एकान्ततो यथा लोके शिंशपा धरणीरुहात् ।।२४६।।
क्रियमाणाविनाभूतं कृतं चेति प्रयोगतः । अभेदो लभते सिद्धिं क्रियमाणकृतत्वयोः ।।२४७।। न च भेदेन धूमस्य दृष्टेर्वह्न्यविना
भुवः । तेनानेकान्त उद्भाव्यस्तत्रापि तदसम्भवात् ।।२४८।। धूमभावपरिणामात्कारणस्याशुशुक्षणेः । नानैकान्तिकतात्यन्त—
भेदाभावात्तयोस्ततः ।।२४९।। समानयोगक्षेमत्वाद् घटादाविव तत्तयोः । अभेदसाधनन्यायो योज्यः संस्तारकेऽप्यसौ ।।२५०।। 
तदार्य युक्तिसंनद्धं श्रद्धत्स्व जिनभाषितम् । चलच्चलितमित्यादीत्यूचुस्तं ते सुसंयताः ।।२५१।। स एव मुक्तः स्वमतं

नयावज्जहाति तावज्जिनमाश्रितास्ते । आसेदिवांश्चक्रधरस्य सेवां को रङ्कमङ्कस्थकपालमञ्चेत् ।।२५२।। आसाद्य पीयूषमचिन्त्यवीर्यं कः कालकूटं भजते हितैषी । इत्युत्तरार्द्धपाठान्तरम् ।।२५३।। स्नेहेन भर्त्तुः प्रियदर्शनापि स्वीकुर्वती तन्मतमन्वियाय । तमेव संयाति सुरापगाऽपि दुष्पाननीरं लवणोदमेव ।।२५४।। धवानुरागो जनकादिरागान्महागरीयानिति सत्यमुक्तम् । जमालिमन्वैदवमत्य वीरं गुरुं यदार्या प्रियदर्शनाऽपि ।।२५५।। सा वीरवाचि च्युतसर्वशङ्कातङ्कस्य ढङ्कस्य कुलालमौलेः । तस्थावनुज्ञाप्य निकेतनेऽथ समं सहस्रेण तपस्विनीनाम् ।।२५६।। ढङ्कस्य चैत्यप्रणिनंसयाऽथ चैत्यालये जातु समाजगाम । तेनापि साऽवन्धत साऽपि तस्मै प्राचीकथद्व्युत्थितधीर्दुरध्वम् ।।२५७।। ततः समाकर्ण्य वचो विदित्वा चार्हन्मते विप्रतिपत्तिमस्याः । आख्यादसौ क्षोदमवैति सम्यग् मृदोविचारस्य न साध्वि मादृक् ।।२५८।। कदाचिदस्या अथ सूत्रपौरुषीं संसूत्रयन्त्याः सिचयाञ्चले रहः । उद्वर्त्तयन्पक्तुममत्रसंहतिं ज्वलन्तमङ्गारकणं न्यधादसौ ।।२५९।। अथाकुला सा न्यगदत् कुलीन सङ्घाटिका मे भवतोषिता किम् । स प्राह यूयं प्रतिपादयध्वे न दह्यमानं भवतीह दग्धम् ।।२६०।। सङ्घाटिकाऽतो न मयोषिता यद्वीरसिद्धान्तमुपेयुषां नः । युज्येत वक्तुं खलु दह्यमानं दग्धं न भावत्कमताध्वतानाम् ।।२६१।। प्रज्ञापिता तेन ततोऽभ्युपैषीद्वीरोदितं साति पथाऽपि सिन्धुः । आगन्तु भूयो जडसङ्गमेन तदत्यये संश्रयति स्वमार्गम् ।।२६२।। प्राजिज्ञपत्साऽथ जमालिमेत्य न चामुचत्स्वाभिनिवेशमेषः । दिग्मोहरोहद्विपरीतबुद्धिः प्राचीभ्रमं किं त्यजति प्रतीच्याम् ।।२६३।। अहो महीयोऽभिनिवेशधाम साक्षाज्जिनोक्तौ यदलीकबुद्धिः । यद्वा नृणां पित्तविदूषितानां द्राक्षाऽपि भूनिम्बविडम्बिनी स्यात् ।।२६४।। मिथ्याऽभिमानेन मतिर्विलिप्ता स्याद्वादसूक्तिं विविनक्ति मिथ्या । न शर्क्कराया: किमु तिक्तभावं पित्तोपदिग्धा रसना व्यनक्ति ।।२६५।। दुर्मन्थमिथ्याभिनिवेशवेश्मनां पुंसामनेकान्तकथा न रोचते । किं सन्ततध्वान्तनिमग्नविग्रहा द्योताय भानोः स्पृहयन्ति कौशिकाः ।।२६६।। अहो नु मिथ्याभिनिवेशिनामसत्पक्षग्रहः कर्म्ममलीसात्मनाम् । सद्यः स्वनाशाय भवत्यमूदृशां पिपीलिकानामिव दुर्विनिग्रहः ।।२६७।। वीरोपदिष्टैकपदापलापात्सङ्घे जमालिर्बत दुर्भगोऽभूत् । व्यङ्गः पुमानङ्गुलिमात्रभङ्गात्किमङ्ग मङ्गल्यपदं लभेत ।।२६८।। तमुग्रमिथ्याभिनिवेशदोषादाज्ञाप्रणेया विजहुर्विनेयाः । उल्लाघमूर्त्तिर्ध्रुवसञ्चरिष्णुरुजायुजा संवसतिं क इच्छेत् ।।२६९।। एवं यदा

वीरमतं प्रपेदे नायं तदा सा जिनमभ्युपागात् । दृष्ट्वा पुरः पातुकमन्धमन्धौ दक्षः सदक्षस्तमनुव्रजेत् कः ।।२७०।। चम्पामकम्पामसुहृद्भयेन ततो सान्द्रतमा जमालिः । स्थित्वा पुरस्तत्र च वीरनेतुरुच्चैस्तरामुद्धतधीर्जगाद ।।२७१।। प्रैष्यन्ति सर्वेऽपि तवार्यशिष्याश्छद्मस्थभावानतिवृत्तिभाजः । सर्वज्ञभूयं त्वनुभूय सद्यः सेत्स्याम्यहं धौतमलोपलेपः ।।२७२।। श्रीगौतमस्वाम्यथ तं न्यगादीद्याद्यार्य सार्वज्ञ्यमदोऽस्ति ते तत् । किं नित्य आहोश्विदनित्य एष लोको भवत्येतदुदाहर त्वम् ।।२७३।। तथैष जीवः किमु नित्य आहो अनित्य इत्येतदपि प्रजल्प । अथैतदाकर्ण्य गलत्सभेदः स्वेदप्रवाहस्नपिताङ्गवासाः ।।२७४।। जमालिरक्षुभ्यदसभ्यभाषी पयोधिवेलामिव दुर्विगाहाम् । श्रुत्वा न को जल्प कथां विकल्पकल्लोलमालाजटिलां बिभीयात् ।।२७५।। स वादिमौलेरथ गौतमस्य गीर्वाण गीर्वाणगणेन शंके । विदारितव्या हृतिवर्गणत्वात्तूष्णीमभूदप्रतिभः सभायाम् ।।२७६।। ततो बभाषे भगवान् जमाले ? छद्मस्थभावेऽपि यथा मदीयाः । शिष्या विदन्त्युत्तरमत्र न त्वं जानासि तद्वच्छ्रुतगर्वितोऽपि ।।२७७।। तथाहि–न जातु नाभून्न भवत्यभावीत्येतावता शाश्वत एष लोकः । उत्सर्पिणीपूर्वविवर्त्तभूष्णु पदार्थवैचित्र्यदृशा त्वनित्यः ।।२७८।। तथैष जीवो न कदापि नास्ति नासीन्नभावीति नयेन नित्यः । गीर्वाणतिर्यग्नरनारकादिपर्यायरूपेण भवत्यनित्यः ।।२७९।। अश्रद्दधानो भगवद्वचोऽथ ततोऽपचक्राम गतक्रमोऽसौ । चन्द्रप्रभाभास्वरमण्डलस्य पूष्णः पुरस्तिष्ठति कौशिकः किम् ? ।।२८०।। व्युद्ग्राह्य मुग्धान् कियतोऽप्यथासौ श्रामण्यमासेव्य च भूरिकालम् । अपह्नुवानो भगवद्वचः स्वं व्यडम्बयन्निह्नवनाम भङ्ग्या ।।२८१।। संलिख्य संलेखनया स्वदेहं ततः क्रमाल्लान्तकनाकलोके । अजन्यसौ किल्बिषिकामरेषु व्यञ्जन्निव प्राग्भवबाह्यभावम् ।।२८२।। ततश्च्युतः [1]क्षेत्रियवन्निकाममुद्दाममारातुरमानसोऽसौ[2] । [3]अन्यान्ययोनीरुपभोक्ष्यते यन्मिथ्याभिमानस्य विजृम्भितं तत् ।।२८३।। तन्मिथ्याऽभिनिवेशभूरुह इदं निस्सीमभीमं फलं । ज्ञात्वा सादितनिह्नवादिमपदस्येत्थं जमाले रहो ? । तं क्षेमप्रतिपक्षमक्षतधियो निर्मूलयध्वं बलादास्ते चेन्मुखलिम्बचुम्बनविधौ मुक्तिश्रियः कौतुकम् ।।२८४।।

**।। जमालिकथा समाप्ता ।।**



१. क्षेत्रियवत्, क्षयाव्याधिमत् पुरुष इव ।। २. मारः कामो मरणं च ।। ३. योनयो भगानि जीवोत्पत्तिस्थानानि च ।।

## अथ गोष्ठामाहिलस्य कथोच्यते--

आश्रीखण्डद्रुमालीपरिमललहरीमांसलाच्चन्दनाद्रेराच प्रालेयशैलात्स्मरविधुरसुरस्त्रीविलासाधिवासात् । आप्राच्याद्राप्रतीच्याद्य इह जलनिधेः स्रागनेकान्तवाद-क्रीडां कुर्वन्नुनोद प्रसभमधिसमं वादिनां वादकण्डूम् ॥१॥ त्वद्वद्विभो किं विवृणुते भरते यातुर्थधु कश्चिदित्यमरपेण महाविदेहे । पृष्टो जिनोऽभ्यधितनिस्तुषतद्विचारचातुर्यधुर्यवचनं स्वसमं यमस्मै ॥२॥ आगत्य भारतमथो मघवान् [1]द्विजातिच्छायाच्छलात्प्रथमतोऽतिशयान् परीक्ष्य । हर्षात्ततः प्रकटितस्ववपुः स्वरूपो नन्वाऽन्वयुङ्क्त यमुपास्य निगोदरूपम् ॥३॥ यो [2]नवममप्यनवमं प्रथमादारभ्य धारयन् पूर्वम् । शक्रनतः ख्यातिमगान्नाम्ना श्रीरक्षितार्य इति ॥४॥ अन्यदा स विहरन् महीतलं भव्यबोधनविधित्सया तया । श्रीविलासभवनं जगद्दृशां कार्म्मणं दशपुरं पुरं ययौ ॥५॥ उच्चैर्दिक्कूलमज्जन् कलकलविरुतिच्छ झना हर्षभाजो नूनं कान्तान् वनान्तानन्नुदिवसमुपश्लोकयन्तः समन्तात् । यत्र प्रीणन्ति सूता इव [3]नवमधुना कुङ्कुमेनेव लिप्ता उद्यद्बालप्रवालप्रसवकवलनोत्फुल्लुदङ्ग विहङ्गाः ॥६॥ [4]न क्रव्याहृतिसंस्तुतस्य नृपतेर्वीराग्निपझालिनः । [5]सिन्धोः पत्युरुदायनस्य सुमनोमालामिवाज्ञां मुदा । बिभ्राणैर्दशभिः शिरस्यवनिपैर्निर्मापितं स्पर्द्धया दिक्पालैरिव यत्स्ववासविधये तद्वर्णने कः कविः ? ॥७॥ इतश्च-उत्तरस्थे मथुरापुरे प्रतिपथान् [6]वैतण्डिकः खण्डयन्नुन्मीलन्नवतर्ककर्कश-मतिर्न व्याहतः कैरपि । दिव्यव्याहृति भल्लिशल्यितरिपुप्रावादुकग्रामणीर्विद्यानिर्जिवादिकोविदकृतोपास्तिर्महानास्तिकः ॥८॥ गर्जन्तमुन्मदमिवेभमखर्वगर्वं रथ्यासुजैनमपि मार्गमधिक्षिपन्तम् । दृष्ट्वा तमप्रतिहतप्रसरं सरन्तं [7]मीमांसते स्म समवेत्य

१. अतिशयान् निजायुष्कानुयोगद्वारेणातीन्द्रियार्थदर्शित्वादिविशेषान् ॥ २. अनवमम् उत्कृष्टम् ॥ ३. नवमधुना प्रत्यग्रमकरन्देन ॥ ४. नक्रव्याहृतिसंस्तुतस्य जलचरविशेषव्याहारपरिचितस्य ॥ ५. सिन्धुर्नदीविशेषो देशविशेषश्च ॥ क्रव्याहृतिर्मांसाहारः, न नैव तत्संस्तुत श्रावकत्वात् ॥ ६. स्वपक्षसाधनन्यासाभावेन परपक्षसाधनखण्डनमात्रप्रवृत्तिर्वैतण्डिकः, अविज्ञाततत्त्वेऽर्थे करणोपपत्तितस्तत्त्वे ज्ञानार्थमूहस्तर्कः ॥ ७. मीमांसते स्म, विमृशति स्म ॥

ततश्च सङ्घः ।।९।। अथ यतिसमवाये वाद्यभावेन तत्र क्षुभितहृदिव सङ्घो रक्षितार्यस्य दध्यौ । अजनि तदिह लोके सत्य आभाणकोऽयं यदशिशिरमरीचिः स्मर्यते क्षुत्प्रणाशे ।।१०।। युगोत्तमश्रीमुनिरक्षितार्यपार्श्वेऽथ सङ्घः प्रजिघाय शीघ्रम् । सङ्घाटकं [1]जाङ्घिकमेष हीलार्हच्छासनस्य क्षणमप्यसह्या ।।११।। अर्थे निवेदिते तेन वार्द्धकात्सोऽथ गन्तुमसहिष्णुः । सूरिर्गोष्ठामाहिलकृतिनं प्रातिष्ठिपत्तत्र ।।१२।। गोष्ठामाहिलसंयतोऽथ रभसाद्गत्वा महातार्किकः [2]सज्जातिच्छलनिग्रहाधिकरणप्रावीण्यमासेदिवान् । तत्रानल्पविकल्पजालमुदधौ प्रस्तार्य जल्पे महापाठीनं बत [3]धीवरो निजगृहे चार्वाकमौलिं बलात् ।।१३।। श्रावकैस्तदनु तत्र स वर्षारात्रमर्थिभिरधार्यत भक्त्या । को गुरोर्गुणगरीयसि शिष्ये गौरवं न विदधीत सकर्णः ।।१४।। इतश्च–गावोऽपि नो गोपमृते चरन्ति ततः क एषां यतिनामधीशः । गुणावलीकन्दलनक्षमः स्यादित्यामृशंस्ते स्थविरा मुनीन्द्राः ।।१५।। दुर्बालिकापुष्पमित्रस्ततस्तेषां हृदि स्थितः । केवलंगच्छवर्त्तिन्यास्तद्बन्धोः साधुसंहतेः ।।१६।। गुरूणां सोदरः फल्गुरक्षितो मातुलोऽथवा । गोष्ठामाहिल इष्टोऽभूदहो ? मोहो दुरुत्तरः ।।१७।। ज्ञातेयभावेऽपि समं स्वसाधुभिर्गुणैकरागान्मुमुहुर्न सूरयः । सिद्धाञ्जनाक्तानि विलोचनानि किं समाव्रियन्ते तमसा कदाचन ।।१८।। आहूय शिष्यौघमुदाहरंस्ते निष्पावतैलाज्यकुटान्मुदेऽथ । हेतुप्रयुक्तावपि वादिनां स्याद्विना सपक्षं नहि साध्यसिद्धिः ।।१९।। तथाहि–वल्ला निर्यान्ति निःशेषा वल्लकुम्भादवाकृतात् तैलकुम्भात्तथा तैलमपैति नतु सर्वथा ।।२०।। घृतकुम्भादपि तथा घृतं निर्याति केवलम् सज्जन्त्यवयवा भूम्ना स्निग्धत्वात्तस्य तत्र भोः ? ।।२१।। एवं दुर्बलिकापुष्पमित्रं प्रत्यजनिष्यहम् । वल्लकुम्भोपमस्तेन मत्तः सर्वागमग्रहात् ।।२२।। फल्गुरक्षितमाश्रित्य तैलकुम्भसमोऽभवम् । कियतोरग्रहात्तेन बह्वोः सूत्रार्थयोर्ग्रहात् ।।२३।। गोष्ठामाहिलमुद्दिश्याहं सर्पिः कुम्भसन्निभः । सूत्रार्थानां ग्रहात्तेनानुपादानाच्च भूयसाम् ।।२४।। ततश्च–तदेतेषामाद्यो भवतु भवतामेष गणभृत् । समुद्यन्निःसीमस्वपरसमयाभ्याससुभगः । इति प्रह्वाः शिष्याः सरभसमुपायन् गुरुगिरं विधेयानामाप्ते कथमपि विपर्येति न मनः ।।२५।। संस्थाप्य तं सूरिपदेऽथ गर्वसर्वङ्कषानन्विशिषन्

१. जाङ्घिकं वेगवद्गतिकम् । २. स्वात्मव्याघातकमुत्तरं जातिः, अनभिप्रेतमर्थम् अभिप्रेतं प्रकल्प्य अभिप्रेतं निरुन्धानेन तदनुपपादनं छलं कथायां तत्त्वाप्रतिपादकं, निग्रहस्थानं, विजिगीषमाणयोरपि साधनवती कथां जल्पसूत्रमहापाठीनं गुरुतराध्येतृस्वामिनि गुरुतमत्स्यविशेषं च ३. धीवरं बुद्धिश्रेष्ठं मत्स्यबन्धकं च ।

मुनींस्ते । दुःशिक्षितास्ते यदनात्मनीनाः पीना इवाश्वाः श्लथयन्ति संस्थम् ॥२६॥ गोष्ठामाहिलफल्गुरक्षितमुनी सूरेः सुविद्याविमौ । [1]किञ्चिद्भीममनोरमैर्बत गुर्णैर्मद्भक्त्वमावर्जयेः । सारङ्गाः प्रियकाननना अपि यतः पौरैस्तथा लालिता यूथ्यालोकनतोऽपि यान्ति न बहिर्भावं प्रणुन्ना अपि ॥२७॥ आर्याः शश्वत्समयवचसां श्रोत्रमैत्र्या पवित्राः, यूयं मां प्रत्यकुरुत यथा तद्वदस्यापि भक्तिम् । कुर्वीध्वं यद्विनयरचनाकूतकण्डूलदोषाणां क्रीडत्यङ्के मुदितहृदया भाग्यसौभाग्यलक्ष्मीः ॥२८॥ किं चाकृतेऽप्यहं कृत्ये न कुप्यामि कृते यथा । मौर्यवंश्य इवायं तु नाज्ञाभङ्गं सहिष्यते ॥२९॥ इति मुनीशमुनीननुशिष्य ते प्रतिययुर्गुरवः सुरवर्णिताः । अनशनं प्रतिपद्य समाहिताः कुशलचित्तदशास्त्रिदशालयम् ॥३०॥ स्वर्गरूणामधाकर्ण्य गोष्ठामाहिल एयिवान् । सूरिपदे नियुक्तः कः ? इत्यपृच्छधतीन् बहिः ॥३१॥ कुटादिदृष्टान्तमथो निशम्य दर्पोद्धतोऽसौ पृथगाश्रयेऽस्थात् । एयाय मूलावसथे स पश्चादभ्युत्थितस्तत्र च साधुरूपैः ॥३२॥ इहैवासध्वमिति प्रोक्तः साधुभिर्नैष्टवानसौ । अन्धानानिव न प्रेक्षा दर्प्पिष्ठानां प्रसर्प्पति ॥३३॥ ततो व्युद्ग्राहयामास स्थित्वा बालानसौ बहिः । पक्षिणामिव मूढानां स्वपक्षस्फोरणं महत् ॥३४॥ सूरयो विदधतोऽर्थपौरुषी प्रैरिरंस्तमथ देशनाविधौ । त्वं दिशेत्यलपदीर्ष्यया सद्वल्लकुम्भसदृशो गुरुस्त्वयि ॥३५॥ तेषूत्थितेषु स्वस्त्रीयो गुरोर्विन्ध्योऽन्वभाषत । कर्म्मप्रवादपूर्वोक्तं बन्धचेतनकर्मणोः ॥३६॥ आत्मनोऽस्ति त्रिधा कर्म्म बद्धं स्पृष्टं निकाचितम् । बद्धं यथाऽत्र सूचीनां भारः स्पृष्टं पुनर्यथा ॥३७॥ निरन्तरीकृता गाढं बद्धा दवरकेण ताः । निकाचितं तापयित्वा पिण्डितास्ताः कुशानुना ॥३८॥ एवं कर्मक्रमाज्जीवः स्वप्रदेशैः समं समैः बध्नाति श्लथबन्धं प्राग् द्वेषारागादिहेतुभिः ॥३९॥ अमुञ्चंस्तं परीणामं ततः स्पृशति तद्दृढम् । निकाचयति सङ्क्लेशोत्कर्षात्तत्सुतरां ततः ॥४०॥ केवलं तद् संवेद्येन क्षिणोत्यनुपक्रमम् । एवं व्याख्यातमाकर्ण्य तमसौ प्रत्यषेधयत् ॥४१॥ विन्ध्य ? मैवमभिधा मुधासुधीरन्यथा ननु गुरोर्मया श्रुतम् । चेन्निकाचयति कर्म्म चेतनस्तर्हि मुक्तिविरहः प्रसज्यते ॥४२॥ शिष्याः प्रोचुः कथं तर्हि वध्यते कर्म गीयताम् स प्राह शृणुताव्यग्राः स्वग्राहा म्लानमानसाः ॥४३॥ स्पृशन् कञ्चुकिनं यद्वन्नूनं बध्नाति कञ्चुकः । एवं कर्म्म स्पृशज्जीवं न बध्नीयादभेदतः ॥४४॥ तादात्म्येन सबद्धश्चेत्कर्म्मणा ज्ञानवत्तदा । तस्य य तद्विगमाभावान्न स्यान्निर्वृतिसङ्गमः ॥४५॥ आकर्ण्य तद्वचो विन्ध्यः

१. भीममनोरमैः, कृत्रिमकोपसांत्वचनादिभिः ॥

संदिग्धो दातुमुत्तरम् । अप्रभुः प्रभुपार्श्वेऽथ जगाम प्रष्टुमुत्सुकः ।।४६।। ततो जगद्गुराचार्यास्तस्येत्थं जल्पतो मुनेः । वर्त्ततेऽयमभिप्रायः प्रायस्त्वं शृणु सम्प्रति ।।४७।। यत्पृथग् भविता यस्मात्स्पृष्टमात्रं हि तेन तत् । कञ्चुकप्रावृतस्तन्याः कामिन्याः कञ्चुको यथा ।।४८।। आत्मनश्च पृथक्कर्म्म भवितेत्यनुमानतः । प्रसिध्यति स्पर्शमात्रं न बन्धो जीवकर्म्मणोः ।।४९।। तथा हि–कर्म्म, आत्मना स्पृष्टमात्रं, ततो भाविपृथग्भावत्वात् । यद्यतो भाविपृथग्भावं तत्तेन स्पृष्टमात्रं यथा कञ्चुकिना कञ्चुकः । तथा चेदं तस्मात् तथेति, न चायमसिद्धो हेतुः ध्यानादिहेतुभ्यश्चेतनात् कर्मणां भविष्यतः पृथग्भावस्यो–भयवादिसिद्धेः ? अन्यथा सर्वेषां मुक्त्यभावप्रसङ्गात् आत्मन एकान्तिकात्यन्तिकसकलकर्म्मपृथग्भावस्यैव मुक्तित्वेनाभ्युपगमादिति, अत्रोच्यते– कञ्चुकवत्स्पृष्टमात्रता कर्म्मणः किमेकैकजीवप्रदेशपरिवेष्टनेन, आहो सकलजीवप्रदेशप्रचय परिवेष्टनेन, कतिपयजीवप्रदेशपरिवेष्टनेन वा । न प्रथमः, तथाहि–किमिदं परिवेष्टनं किं वलयनं परिवेषेणेव सूर्यमण्डलस्य, उतावरणं वाससेव शरीरस्य, नाद्यः तदाहि सूर्यस्य परिवेषेणेव जीवस्य कर्म्मणा स्पर्शमात्रस्याप्यभावेन तन्निर्वर्त्तितसुखदुःखाद्यनुभवस्याप्यभावापत्तेः, तथा च भवदभिमतस्याप्यसिद्धिः, न द्वितीयः, मूर्त्तेन मूर्त्तस्यैव मुख्यावरणसम्भवेन जीवस्यामूर्त्तस्य मूर्त्तेन कर्म्मणा तदसम्भवात्, कथञ्चित्सम्भवे वा शरीरणेव वाससः पृथग्देशस्यैव कर्म्मणो जीवेन ग्रहणापत्तेः, अस्त्वेमिति चेन्न, अपसिद्धान्तात्, यत्राकाशदेशे यो जीवप्रदेशोऽवगाढस्तेन तद्देशावगाढमेव कर्म्म गृह्यत इति सिद्धान्तन्यायात्, यदाहुः शिवशर्माचार्याः–‘‘**एगपएसो गाढं सव्वपएसेहि कम्मुणो जोगं । गिण्हइ जहुत्तहेउ**’’ मित्यादि । अत्र चाद्यपादस्यायमर्थः– एकस्मिन् प्रदेशेऽवगाढमेकप्रदेशावगाढं, यत्रैव जीवस्यात्मप्रदेशास्तत्रैव यदवगाढं तदेव गृह्णाति, न पुनरन्यत् आनीय गृह्णातीत्यर्थः, अथ यथा कञ्चुकी कञ्चुकेन गाढं नियमितश्च मुख्यवृत्त्या वृतश्च तथा जीवप्रदेशानां कर्म्मपरमाणुभिर्मुख्यपरिवेष्टनावरणासम्भवेऽपि प्रतिप्रदेशं तैस्तथा नियमनात्कञ्चुकिसाधर्म्यात् जीवः परिवेष्टितश्चावृतश्च गौणवृत्त्योच्यत, इति चेत्, एवं तर्हि सिद्धोऽस्मदभिमतोबन्धः, अस्माभिरप्युपनताभिः कर्म्मपरमाणुवर्गणाभिरात्मप्रदेशानां वह्न्ययस्पिण्डवत् परस्परं गाढानुवेधस्यैव बन्धत्वेनाभ्युपगमात्, ।।६८।।
तथा च साध्यविपर्ययसाधनाद्विरुद्धो हेतुः, क्षीरोदकयोः कदाचित्सितच्छदचञ्चुपुटसंश्लेषाद्भविष्यत्पृथग्भावत्वेऽपि तादात्म्येन

स्पर्शमात्रत्वासम्भवाद्धेतोर्विपक्षेऽपि गतत्वेनानैकान्तिकश्च, अपि च किं सर्वैरेवात्मभिः कर्म्मणो भविष्यत्पृथम्भावत्वं विवक्षितं कतिपयैर्वा, नाद्यः, अभव्यात्मभिः कर्म्मणस्तदसिद्धेः, तथा च भागासिद्धो हेतुः, न द्वितीयः, तदाहि भव्यपदेनात्मनेति साध्यभागो विशेषणीयः, स्यादितरथा भागासिद्धयपरिहारात्, एवं च साध्यं विशिंषतस्ते प्रतिज्ञान्तरनिग्रहस्थानापातः, स्वोक्तस्य परदूषितस्य साध्यभागस्य पूर्वानुक्ताविशेषणवतोऽभिधानं प्रतिज्ञान्तरमिति तल्लक्षणात्, एवं च नास्माद्धेतोरेकैकजीवप्रदेशपरिवेष्टनेन कर्मणः स्पृष्टमात्रतासिद्धिः, न द्वितीयः अनभ्युपगमात्, नह्येकेनैव कर्म्मणा सकलजीवप्रदेशप्रचयपरिवेष्टनमिति जैनैरभ्युपेयते, प्रतिप्रदेशं पृथक् पृथक्कर्म्मवर्गणाभिस्तैस्तद्बन्धस्वीकारात्, किञ्चास्मिन्नपि पक्षे भिन्नदेशस्यैव कर्म्मणो ग्रहणापत्तेरपसिद्धान्तः, न तृतीयः, जीवप्रदेशानां सकर्म्मनिष्कर्म्मतया विरुद्धधर्म्मसंसर्गेण तदभिन्नात्मनो जीवस्यापि भेदप्रसङ्गात् न चैतदिष्टम्, अपि चात्मना कर्म्मणः स्पृष्टमात्रताभ्युपगमे शरीरमलस्येव कर्म्मणो यथा कथञ्चित्पुण्यानुष्ठानमात्राद्वियोगेन प्रेत्यानुवृत्तिर्न स्यात्, अयत्नसिद्धा च सर्वेषां मुक्तिर्भवेत्, निष्कर्मणामपि तदन्नभ्युपगमे वा मुक्तानामपि भूयः संसारप्रसवप्रसङ्गात्, अथ यथाऽऽत्मना स्पृष्टमात्रस्यापि शरीरस्य विगमे पुनर्भवः स्वीक्रियते, तथा कस्यचित्कर्म्मणो विगमेऽपि कर्म्मान्तरसञ्चयात्, पुनर्भवो भविष्यतीति चेत् ? न, आत्मशरीरयोः क्षीरनीरवदन्योन्यानुगमाभ्युपगमेन स्पृष्टमात्रतानङ्गीकारात्, तत्स्वीकारे वाऽनयोः पुरुषसम्बद्धस्तम्भस्येव शरीरस्याचैतन्येन शीतोष्णस्पर्शादिसंवेदनाभावापत्तेः, यदपि कर्म्मान्तरसञ्चयात्पुनर्भवसमर्थनं तद्पि न चारु, स हि कर्म्मान्तरसञ्चयः प्राच्यजन्मनिर्वर्त्तितो वा स्यात्, आगामिभवनिर्वर्त्तितो वा निर्निमित्तो वा, नाद्यः कर्म्मसहकृतस्यैवात्मनः कर्मान्तरोत्पादनाभ्युपगमात्सह कारिणश्च प्राच्यभवकर्म्मणः केनचित्पुण्यकर्म्ममात्रेण शरीरमलस्येव जलमात्रेणोच्छेदात्, एवमस्वीकारे वा सिद्धानामपि तदुत्पादनप्रसङ्गेन पुनर्भवापत्तेः, न द्वितीयः, आगामिभवस्यासत्त्वात्तन्निर्वर्त्तित–कर्म्मान्तरसञ्चयस्याप्यभावेन पुनर्भवानुपपत्तेः, कर्म्मान्तरसञ्चयादागामिभवसम्भवः तत्सम्भवे च कर्म्मान्तरसञ्चय इति परस्पराश्रयप्रसङ्गाच्च, न तृतीयः, शशविषाणादेरप्युत्पादापत्तेः, अपि चान्तः–शरीरं सुखदुःखं संवेदनं निर्निमित्तं सनिमित्तं वा ? आद्ये मुक्तानामपि तत्संवेदनापातः, द्वितीयेऽपि किं स्रक्चन्दनाद्यहिकण्डकादिदृष्टनिमित्तमेव तत्संवेदनम्, उतादृष्टनिमित्तमेव

तत्संवेदनम् उताऽदृष्टमिनित्तमपि ? आद्ये स्रक्कण्टकादिजन्यबाह्यतत्संवेदनस्यापि दृष्टनिमित्तकत्वेनोपपत्तावदृष्टनिमित्तकत्वकल्पना वैयर्थ्यात्, अथ सर्व भावानामदृष्टनिमित्तकत्वस्य सकललोकानुभवसिद्धतया। दुरपह्नवत्वेन तत्संवेदनस्य तन्निमित्तकत्वमप्यवश्यं कल्पत इति चेत्, एवं तर्हि तददृष्टं यत्रैवावतिष्ठते तत्रैव तत्संवेदननिमित्तम्, अहो अन्यत्रापि, आद्यकल्पे भवन्मतेनात्मनो बहिःप्रदेश एव तदवतिष्ठत इत्यतस्तत्संवेदनानुपपत्तिः, द्वितीयकल्पेऽपि बहिः स्थितेन कर्म्मणान्तस्तत्संवेदनजननाभ्युपगमे एकात्मव्यवस्थितेनापि तेनान्यत्राविशेषात्सर्वात्मस्वपि तत्संवेदनजननप्रसङ्गात्, एवं च तुल्यकक्षतया सर्वेषां सुखाद्यनुभवापत्तिः, अथ येनैव तन्निर्वर्त्तितं तस्यैव तत्तत्संवेदननिमित्तं नान्यस्येत्यतो नातिप्रसङ्ग इति चेत्, न, पादे मे सुखं शिरसि मे वेदनेत्यवयवप्रतिनियमेन सुखाद्यनुभवाभावप्रसङ्गात्सर्वदेहविषय एव तदनुभवो भवेत्, भवतोऽपि समानमेतदिति चेत्, न, अभिप्रायापरिज्ञानात्, भवन्मते ह्यात्मबहिर्देशवर्त्तित्वेन स्रक्चन्दनादिव कर्म्मणोऽपि सुखादिकं प्रति बाह्यनिमित्ततैव प्रसज्यते, तथा च स्रगादीनां कदाचित्प्रतिनियतावयवगोचरत्वेऽपि कर्म्मणः सुखादिबाह्यनिमित्तशिरोमणेर्देहसर्वगतात्मवर्त्तितया सर्वदा सर्वस्मिन्नपि देहे सुखाद्यनुभवप्रसङ्गः केन वार्येत, न च कर्म्मणो बाह्यनिमित्तस्य सर्वगत्वेऽपि स्रगादिबाह्यनिमित्तान्तरस्य प्रतिनियतावयववर्तिया सुखाद्यनुभवप्रतिनियमो भविष्यतीति वाच्यम्, .एवं हि कर्म्मकल्पनावैयर्थ्यात् स्रगादिभ्य एव तदनुभवप्रतिनियमोपपत्तेः, अस्माकं त्वात्मतादात्म्येन कर्म्मणोऽवस्थानाभ्युपगमादात्मवत्तस्योपादानकारणतुल्यता, नतु स्रगादिवदाहत्य निमित्तकारणता, तथा च तत्तच्चन्दनादिबाह्यनिमित्तसन्निकर्षप्रतिनियमेन तत्तद्देहतदवयवेषु सुखाद्यनुभवोपपत्तेर्न भवत्पक्ष इव सर्वस्मिन्नपि देहे शश्वत्तदनुभवप्रसङ्गोऽवकाशमासादयति, श्रूयन्ते च सहकारिकारणप्रतिनियमेन कर्म्मणः क्वचित्काचिदुदयादयः, यदाह–"**उदयक्खयक्खओवसमोवसमा जं च कम्मुणो भणिया । दव्वं खेत्तं कालं भवं च भावं च संपप्प ।।१।।**" त्ति, एवं च कथं साम्यापादनोल्लापोभवतः शोभां बिभृयात्, तस्माद्यत्किञ्चिदेतत्, अथ सञ्चरिष्णुशीलतया कर्म्मणो बहिर्वर्त्तिनोऽप्यन्तः सञ्चारादन्तरपि सुखाद्यनुभवो न विरुध्यत इति चेत्, न, अन्तः सञ्चारक्षणे बहिस्तदनुभवाभावापत्तेः, अथ युगपदुभयत्र सर्वदा तत्संचरतीति चेत्तन्न, वाद्यादेरिवैकस्य एकस्मिन्नेव क्षणे उभयत्र सञ्चारानुपपत्तेः, उपपत्तौ वा सञ्चारापरनाम्ना

कर्मात्मनोस्तादात्म्यरूपो बन्ध एवोपपादितः स्यात्, नहि तयोस्ताद्दग्बन्धादन्यो युगपदुभयत्र सञ्चारो नाम, अपि च सञ्चारित्वाभ्युपगमे कर्म्मणः शरीरस्थवायोः प्राणादेरिव न प्रेत्यानुगमो भवेत्, यदुक्तम्–''न भवंतरमन्नेई सरीरसंचारओ तदनिलो व्व ।'' न च तयोरैकात्म्ये ज्ञानात्मनोरिवकदाचित्पृथग्भावानुपपत्त्या मुक्त्यभावप्रसङ्ग इति वाच्यं वह्न्यादिसंयोगेन काञ्चनतन्मृदोरिव प्रसङ्ग्यानादिप्रयोगेण तयोरपि पृथग्भावोपपत्तेः, काञ्चनमृदोरपि स्पर्शमात्रमेवेति चेत् न, अग्न्यादिसम्प्रयोगात्पश्चादिव प्रागपि तयोः पृथगुपलम्भप्रसङ्गात् नचोपायविशेषात्, तत्र प्रागसत एव काश्चनस्योत्पाद इति वक्तव्यं, पीडनादेरिक्षुकाण्डेभ्य इव सिकताकणेभ्योऽपि रसस्याविर्भावापत्तेः, एवं तर्हि कर्मात्मवज्ज्ञानात्मनोरपि पृथग्भावापत्तिरिति चेत्, न, तादात्म्यस्य द्वैरूप्यात्, एकं हि तत्तत्स्वरूपत्वं यथा ज्ञानात्मनोः, ज्ञानं विना ह्यात्मा स्वरूपमेव नासादयतीति तयोस्तादात्म्येऽपि न कदाऽपि पृथग्भावः, तत्रापि कुतश्चिदुपायादसौ भविष्यतीति चेत्, न, यथा यथा ज्ञानात्पृथग्भावेनात्मनो जडीकरणाय प्रयत्नस्तथा तथा तत्प्रकाशप्रकर्षप्रत्यापत्तेः, अपरं तु तादात्म्यं तेन सह लोलीभावो यथा क्षीरनीरयोस्तथा च कर्म्मात्मनोरपि, तत्र हि जीववीर्यातिशयात्कर्माणूनां जीवतया परिणामो जीवस्यापि कर्म्मतयेति ''जीवज्झवसायाओ जीवत्ता पुग्गला परिणमंति । पुग्गलकम्मनिमित्तं जीवोवि तहेव परिणमइ ।।१।।'' इति वचनात्, तद्गतोश्च कर्म्मात्मनोः क्षीरनीरयोरिवोपायाद्भवति पृथग्भावः, अन्यथा मुक्त्यनुपपत्तेः, एवं चासिद्धविरुद्धानैकान्तिकदोषकलुषितत्वान्न प्रकृतो हेतुः साध्यसाधनायालं, तस्माद्बन्ध एवानयोर्न स्पर्शमात्रमिति, तथा च प्रयोगः–कर्म्म आत्मनि सर्वगं तत्र सर्वस्मिन् सुखाद्यनुभवहेतुत्वात्, यद्यत्र सर्वस्मिन् यदनुभवहेतुस्तत्तत्र सर्वगं यथा काञ्चनं तन्मृदि तथा चेदं तस्मात्तथेति, न चात्र हेतोरसिद्धत्यादिकमाशङ्कनीयं, पूर्वोपदर्शितन्यायेन तस्यापास्तत्वात्

।। एवमादि मुनीन्द्रोक्तं बन्धसिद्धिनिबन्धनम् । साधनं साधयामास विन्ध्यो गत्वाऽथ तत्पुरः ।।५०।। ततो विप्रतिपत्तिं स तत्र कर्त्तुमपारयन् । आयाति प्रत्यहं तत्र बकवद्गूढमानसः ।।५१।। सङ्क्षोभयिष्ये पुनरेवमुच्चैरिति क्षणं सोऽन्वहमन्वियेष । भवन्ति नागा इव वक्रगा यद्विष्टाः परच्छिद्रविनिद्रनेत्राः ।।५२।। अन्यदा नवमे पूर्वे यावज्जीवं त्रिधा त्रिधा । प्रत्याख्यामि प्राणघातमित्येवं संयतानभि ।।५३।। अन्वाचक्षाणमाकर्ण्य प्रत्याख्यानमुवाच सः । नैवमेतद्भवेद्विन्ध्य स्यात्कथं तर्हि भोः ? शृणु ।।५४।। युग्मम्

।। प्राणाघातमहं सर्व परिमाणं विना कृतम् । प्रत्याख्यामि त्रिधा त्रैधमिति सम्यगिदं भवेत् ।।५५।। विन्ध्यः प्राह किमर्थं नो परिमाणं विधीयते । आशंसापरिहारायेत्यभाषत स दोषहृक् ।।५६।। यावज्जीवमितीयत्तोच्चाराद्यत्तेन संश्रुतम् । यथा प्राणान् हनिष्यामि समाप्तावववधेरिति ।।५७।। इत्याक्षिप्तोऽपि नाक्षुभ्यद्विन्ध्यसाधुरवन्ध्यधीः । स्यादाजौ भृत्य ओजस्वी व्यग्रः किं स्वामिसन्निधौ ।।५८।। तेनोचेऽथ स ते बुद्धिः श्राद्धस्येत्वरवन्मुनेः । यावज्जीवं प्रत्याख्यानं साकाङ्क्षमवधेर्भवेत् ।।५९।। तथा च प्रयोगः—मुनेर्यावज्जीवं सर्वसावद्यप्रत्याख्यानं, साभिष्वङ्गं, परिमाणवत्त्वात्, यदेवं तदेवं यथा गृहिणः सामायिकादीत्वरप्रत्याख्यानं, तथा चेदं तस्मात्तथा,न चायमसिद्धो हेतुः, यावज्जीवमिति पक्षभागश्रवणात्प्रकृतप्रत्याख्यानस्य परिमाणवत्त्वप्रतीतेरविसंवादादिति, अत्रोच्यतेअथ कोऽयमभिष्वङ्गः ? किं रागमात्रम् ? आहो ? गाढमिष्टविषयप्रसक्तिः ? उताशंसा ? न प्रथमः, उपशान्तक्षीणमोहसयोग्यादिगुणस्थानवर्त्तिनां परिमाणवत्सर्वसावद्यप्रत्याख्यानवत्त्वेऽप्यभिष्वङ्गाभावात्, मोहनीयोपशमादिना तेषां वीतरागत्वेन सिद्धान्ते प्रतिपादनात्, तस्य च तेषां भवताऽपि स्वीकारात्, तथा च तत्प्रत्याख्यानेनानैकान्तिको हेतुः, न द्वितीयः, तदानीं कृतप्रत्याख्यानत्वेन तदभावात्, भावे वा प्रत्याख्यानस्यैवाभावात्, उपभुज्यमानवस्तुविषयतयैव च तस्या लोके प्रतीतेर्न तूपभोक्ष्यमाणविषयतया, तथा चाश्रयासिद्धो हेतुः, सन्दिग्धसाध्यधर्मो हि धर्मी हेतोराश्रयः, अत्र तु विकल्पितसाध्यधर्माभावनिश्चयेनं सन्देहाभावात्, नाश्रयता धर्मिणः, न तृतीयः, अथ केयमाशंसा ? किमितः प्रत्याख्यानाद्देवो वाऽस्यां, सार्वभौमो वाऽस्यामित्यादिकामनारूपोऽध्यवसायः, अथ जन्मान्तरे सावद्यमहं सेविष्य इत्यादिरूपो वा ? नाद्यः प्रत्याख्यानप्रतिपत्तिकाले तदभावात्, केवलमोक्षार्थमेव तस्य तदानीं प्रवृत्तेः, कथञ्चिद्भावेऽपीद्धक्कामनाया निदानरूपत्वेन मिथ्यात्वोदय एव जायमानतया चारित्रिणः प्रतिषेधात्, न द्वितीयः, सर्वस्य अपि यतिधर्मस्य मोक्षभवयोराशंसापरिहारेणैवाभिमतत्वात्, तदानीं च तस्य संवेगनिर्वेदाभ्यां तत्प्रतिपत्तेरीद्दगाशंसाया असम्भवात्, किञ्च—गृहिणामप्याशंसाया अतीचाररूपतया **''इहलोए परलोए जीविय मरणे य आसंसपओगे ।''** इत्यादिना प्रतिषेधप्रतिपादनात्, तथा च कथं यतिप्रत्याख्याने साशंसत्वं प्रसज्यमानं शोभेत, तत्प्रसञ्जने सर्वसामायिकरूपस्य यतिप्रत्याख्यानस्याप्यसिद्धया हेतोराश्रयासिद्धद्यापत्तेः, तथैकादशीं

प्रतिमा प्रतिपन्नस्य प्रविव्रजिषोर्गृहिण इत्वरप्रत्याख्यानमपि न साभिष्वङ्गं निराशंसदीक्षाभिमुखत्वेन तद्ग्राहिणो निरभिष्वङ्गत्वात्, तथा च साध्यविकलो दृष्टान्तः, अपि च यतेरद्धाप्रत्याख्यानमस्ति न वा ? अस्ति चेत्तदा पौरुष्यादिपदोपादानेन कालनियमात्परिमाणवत्त्वेन तस्यापि साभिष्वङ्गत्वप्रसङ्गः, न च भवतोऽपि तत्र तदिष्टं, तथा च भूयोऽप्यनैकान्तिको हेतुः, अथ प्रकृतप्रत्याख्यानवत्तत्रापि पौरुष्यादिपदोपादानमसङ्गतम् अपरिमाणतयैव तस्यापि मयेष्टत्वादिति चेत्, तर्हि दीक्षादिवसा-दारभ्यानशनप्रसङ्गः, तदपरिमाणत्वस्यैवमेव सम्भवात्, न चैवमस्त्विति वाच्यं **''परिवालिओ य दीहो परियाओ वायणा तहादिन्ना। निप्फाइयाय सीसा किं मज्झं संपयं जुत्तं ॥१॥''** इत्यादिनाऽन्त्यसमय एव तत्प्रतिपत्तिश्रवणात्, अथ नास्ति यतेरद्धाप्रत्याख्यानमिति चेत् न 'अणागयमइक्कंत' मित्यादिना दशविधप्रत्याख्यानाभिधायकागमेन स्फुटमेव यतीनां तदभिधानात्, एवं चेदस्य निरभिष्वङ्गता, किमर्थं तर्हि यावज्जीवमिति पदेनावधिनिरूपणम् ? प्रत्युतैतत्करणे संशयापत्तिः ? किं यावज्जीव आत्मा वर्त्तते, उत यावत्प्राणान् धारयामि ? इति, अव्ययीभावणम्विधानाभ्यामुभयथाऽपि यावज्जीवमिति रूपसिद्धेरिति चेत् न, आत्मनो नित्यत्वेन सर्वजन्मभावित्वं मृतस्यावश्यभाविनं प्रत्याख्यानभङ्गं च जानतो जैनस्या यावज्जीव आत्मेत्यव्ययीभावानाश्रयणेन यावज्जीवामीति णम् विधानेनैव यावज्जीवमिति शब्दनिष्पत्तिनिश्चयात्, यच्चानेन पदेनावधिकरणं तत्प्रत्याख्यानभङ्गभयात् न तु प्रेत्य सावद्यं सेविष्य इत्यभिप्रायेण, यदाह-**''वयभंगभया उच्चिय जावज्जीवंति निद्दिट्ठं।''** किञ्च-'जावज्जीवाए' इतिपदमुत्सार्य तत्स्थान 'अपरिमाणए' इति पदं स्वमनीषाकल्पितं निक्षिपतो भवतो जिनमतारोचनेन गणधरदृब्धसूत्रान्यथाकरणान्मिथ्यादृष्टित्वापत्तिः, तदुक्तम्-**''पयमक्खरंपि इक्कं जोउ न रोएइ सुत्तनिद्दिट्ठं। सेसं रोयतो वि हु मिच्छद्दिट्ठी मुणेयव्वो ॥१॥''** **''एकस्मिन्नपि तत्त्वे सन्दिग्धे प्रत्ययो जिने नष्टः। मिथ्या च दर्शनं तत् स चादिहेतुर्भवगतीनाम् ॥१॥''** अपि चापरिमाणं प्रत्याख्यानमित्यत्र नञ्, किं प्रसज्ज्यवृत्तिः पर्युदासवत्तिर्वा ? आद्ये परिमाणप्रतिषेधमात्रं प्रतीयते न च तेन भवतः काचिदिष्टसिद्धिः, परिमाणवत्त्वेऽपि प्रत्याख्यानस्योक्तन्यायेन निरभिष्वङ्गतासिद्धेः, द्वितीयेपि पर्युदासस्य सदृशाग्राहीतया वस्त्वन्तरं विधिः प्रतीयते, तत्र वस्त्वन्तरं किं शक्तिरनागतकालसाकल्यं वा ?, आद्येऽपि

किं यावच्छक्तिस्तावन्मे प्रत्याख्यानम्, अथ यावति विषये शक्तिस्तावतीतिकल्पद्वयम् ? आद्ये शक्त्या प्रत्याख्यानकालस्य नियमितत्वात्परिमाणवत्त्वमेव प्राप्तमिति घट्टकुट्यां प्रभातं, परिमाणं परिहरतो भवतस्तत्प्रत्यावत्तेः, तथा च जीविताvधेरर्वागपि प्राणवधमैथुनादिषु प्रवर्त्तमानस्य न व्रतभङ्गातिचारादयो भवेयुः, शक्त्यानुगुण्येनैव मे व्रतप्रतिज्ञा अधुना तु नास्ति शक्तिरित्युत्तरेण सकलापराधशोधनात्, एवं च न क्वचित्कस्यापि प्रायश्चित्तमिति सुखीभव, द्वितीयेऽपि महाव्रतपञ्चकान्यतरप्रतिपत्तावपि यतित्वलाभेन सकलमद्ग्रहणपालनप्रयासवैयर्थ्यप्रसङ्गात्, आह च–''**इत्तियमेत्ता सत्तित्ति नाइयारो नयावि पच्छित्तं । न य सव्वव्वयनियमो एगेणवि संजयत्तत्ति ।।१।।**'' न द्वितीयः, तदा हि क्षीणमोहादिगुणस्थानत्रयवर्तिनामेव प्रेत्यख्यानं स्यान्न प्रमत्तादिगुणस्थानवर्त्तिनां, प्रेत्यजन्मनि तेषामवश्यविरतिभावेन सकलानागतकालभाविप्रत्याख्यानाभावात्, अपि च किं व्यञ्जनोच्चारणं प्रत्याख्यानं, तादृक्परिणामो वा, तद्व्यतिरिक्तं वा किञ्चित्, न प्रथमः, अयोगिकेवलिनां मूकयतीनां माषतुषादीनां च प्रत्याख्यानाभावापत्तेः, तत्तद्धेतुभ्यस्तेषां व्यञ्जनोच्चाराभावात्, अविरतानामपि च गृहिणां कथञ्चित् षड्जीवनिकादिपाठात् तदुच्चारणेन प्रत्याख्यानापत्तेः, न द्वितीयः किं शश्वत्सावद्यमहं न सेविष्य इति तस्य परिणामः, आहो ? कदाचिदिति, नाद्यः शश्वन्न सेविष्य इति प्रतिज्ञाय भवान्तरे तत्सेवमानस्य प्रत्याख्यानभङ्गापातात् शश्वत्पदेन सर्वभवाक्षेपात्, न द्वितीयः, तत्रापि किं यथा परिणामस्तथा व्यञ्जनोच्चारणम् उतान्यथा ? यद्याद्यस्तदा छद्मस्थावस्थायां मृतस्यावश्यम्भावी विरत्यभाव इति शङ्कया जीवन् सावद्यं न सेविष्य इति तस्य परिणामस्तथा च यथा परिणामं यावज्जीवमिति व्यञ्जनोच्चारणे हटादायातं परिमाणवत्त्वम्, अथ जीवितावधि मे प्रत्याख्यानमिति तस्य परिणामोऽपरिमाणमिति च व्यञ्जनोच्चारणमिति द्वितीयः पक्षोऽभिमतस्तदा प्रत्यक्षमृषावादितापत्तिः, अन्यथा मनसि कृत्वाऽन्यथोच्चारणेन वाङ्मनसविसंवादात्, यदाह महाभाष्यकारः–''**जो पुण अव्वयभावं मुणमाणोवरसभाविणं मुणइ । वयमपरिमाणमेयं पच्चक्खं सो मुसावाई ।।१।।**'' न तृतीयः, तद्धि निष्कर्मतया प्रत्याख्यानपरिणामाभावेऽप्युपचारा–दन्तर्वृत्त्या तत्कार्यजीवरक्षादिकं वा स्यात्, लाभपूजादिकामनया विरतिपरिणामाभावेऽपि बहिर्वृत्त्या तत्कार्यकरणं वा, नियमाभावेऽपि तादृग्विभवाद्यसम्पत्त्या भूमिशयनमलिनचेलत्वब्रह्मचर्यादिबाह्यतल्लिङ्गवत्त्वं वा, न प्रथमः, मुक्तानामपि चारित्रापत्तेः, आसंसारं

तेष्वेव सम्पूर्णजीवरक्षादिदर्शनात्, नचैवमस्त्विति वाच्यं ''**सिद्धे नो चारित्ति नो अचारित्ती**'' इत्याद्यागमेनोभयपक्षबहिर्भावेनैव तेषामभिधानात्, न द्वितीयः, अर्हन्मतवर्त्तिनामपि केषाञ्चिन्मुनिर्व्यंसकानां लोभाद्यर्थमेव बाह्यवृत्त्या महाव्रतमौनाद्यवलम्बिनां प्रत्याख्यानप्रसङ्गात्, न तृतीयः, दुर्गतराजाद्यनुजीविनामपि यतित्वापत्तेः, न चैतदसिद्धं प्रत्यक्षतस्तेषां तदुपलब्धेः, तथा च लौकिका अपि पठन्ति–''**भूमीसयणं जरचीरधारणं बंभचेरियं भिक्खा । मुणिचरियं दुग्गयसेवयाण धम्मो परं नत्थि ॥१॥**'' एवं च सावधित्वेऽपि न विवादाध्यासितप्रत्याख्यानस्य साभिष्वङ्गता, तत्साधनायोपन्यस्तस्य भवद्धेतोरनैकान्तिकत्वादिना निरासात्, तथा च स्वपक्षसिद्धये प्रयोगोऽपि दर्श्यते–विवादास्पदं सावधित्वेऽपि न साभिष्वङ्गं मुमुक्षुणाऽप्रमत्ततया विधीयमानत्वात्, यदेवं तदेवं यथा कस्यचित्क्षपकयतेः श्राविकावितीर्णाधाकर्मिकपायसभोजनं तथा चेदं तस्मान्नचेति, नच भोजनस्य निरभिष्वङ्गत्वानुपपत्त्या दृष्टान्तस्य साध्यविकलतेति वक्तव्यं, तथात्वे भुञ्जानस्यैव तस्य केवलज्ञानोत्पादश्रवणानुपपत्तेः, न च तथाऽपि सावधित्वस्य साध्यभागस्यासिद्धया तस्य तद्विकलत्वमिति वाच्यं, यतिभोजनस्य प्रायः पौरुष्याद्यद्धाप्रत्याख्यानावच्छिन्नतया सावधित्वस्याव्याघातात्, तस्माद्यावज्जीवमित्येव साधु नत्वपरिमाणमिति ॥ इत्यादि विन्ध्यसाधूक्तं ते सर्वेऽप्यन्वमंसत ।
मात्रयाऽपि गुरोर्वाचामन्यथा ननुवादतः ॥६०॥ श्रुताब्धेः पारदृश्वानो गच्छान्तरगता अपि । तदा सदाशयाः पृष्ठा विन्ध्योक्तं
प्रत्यतिष्ठिपन् ॥६१॥ मुग्धा दुग्धानना यूयं किं जानीध्वे ब्रवीम्यहम् । यत्तज्जिनोदितं नूनमित्यवादीत्ततः स तान् ॥६२॥
यदैवं मुहुरुक्तोऽपि नासौ तत्त्वं प्रपद्यते । सङ्घेन देवतां ह्वातुं कायोत्सर्गस्ततः कृतः ॥६३॥ ततः सम्यग्दृगागत्य भक्त्या सङ्घं
बभाण सा । आज्ञापयत किं कार्यं मयाऽथ स उवाच ताम् ॥६४॥ गच्छ देवि ? विदेहेषु तत्र पृच्छ जिनेश्वरम् । यद्
गोष्ठामाहिलो ब्रूते तत्किं तथ्यमुताखिलः ॥६५॥ सङ्घो दुर्बलिकापुष्पमित्रपूर्वो यदित्यथ । तयाऽवाचि न साचिव्यमृतेऽहं
गन्तुमुत्सहे ॥६६॥ युग्मम् ॥ कायोत्सर्गं ततोऽदत्त सङ्घः संहत्य रंहसा । गत्वा सा जिनमप्राक्षीत् साक्षीकृत्य सभासदः
॥६७॥ व्याजहार जिनेन्द्रोऽथ सङ्घः [1]सम्यग्वदावदः । मिथ्याविवावदूकोऽन्यः सप्तमो ह्येष निह्नवः ॥६८॥ सङ्घः सुवादी वत ।।७५।।
[2]कद्वदोऽन्य इत्युच्चकैः सा गिरमुद्गिरन्ती । दूरादथागान्मुदिता स्वपक्षोत्कर्षेऽथवा कस्य भवेन्न हर्षः ? ॥६९॥ इयं हि [3]नाकिष्वितरा

१. सम्यग्वदावदः, सम्यग्वक्ता । २. कद्वदो गर्ह्यवाग् ॥ ३. इतरा निहीना ॥

वराकी काकीव पत्रिष्विति तत्र गन्तुम् । का शक्तिरस्या 'इति तद्वचोऽसावश्रद्दधानस्ततत आचचक्षे ॥७०॥ आचार्योऽथ जगावार्य ! प्रतिपद्यस्व सन्मतम् । मा त्वामुज्जीघटन् सङ्घो नैच्छदेष कदाग्रहात् ॥७१॥ अविनयभुवा संपद्यन्ते मृषाभिनिवेशिनामहह विशदा हृद्या विद्यास्तमस्तमयूद्धये । प्रकृतिमधुराः किं नीचानां न निस्तुषचक्षुषां विदधति बलादान्ध्यं वन्ध्यं श्रियोहि निरर्गलाः ॥७२॥ कदाग्रहपरिग्रहो नयति तत्र युक्तिं पुमान्निमज्जति मतिर्भ्रमात्सततमस्य यस्मिन् पदे । बलात्खरसमीरण-स्तरणिमन्यदिक्प्रस्थितां न तत्र हरतेहि किं वहति हन्त ! यस्यां दिशि ॥७३॥ प्रामाण्यदुर्ललितमाकलयन्ति सूत्रं ही निह्नवाः स्वमतिक्लृप्तविकल्पजालैः । किं सारसं जलमनर्गलपादपातैः सुस्वादु वन्यमहिषा न विलोडयन्ति ॥७४॥ अङ्कुरयत्यार्हती न बोधिं द्ढमिथ्याभिनिवेशासिक्त आत्मा । भूनिम्बरसोक्षितः प्रसूते भूतः स्वादिमं सुन्दरफलं किम् ! ॥७५॥ तीर्थेशानां वीक्षया शिक्षया वा क्लिष्टाच्चित्ताज्जातु मिथ्याभिमानः । नापक्रामत्येष चेलादजस्रं नीलीरागोपैति किं धावनेन ॥७६॥ ततो यदार्हन्तमभ्युपैषीन्नापथ्यमिथ्याभिनिवेशितोऽसौ । सङ्घस्तदानीमुपधिश्रुतादिसम्भोगभङ्ग्याश्वकृवान् बहिस्तम् ॥७७॥ इति यतिगणगोष्ट्या दुस्सहं बाह्यभावं जनुरिदमनुगोष्ठामाहिलस्याधिगम्य । जिनवचसि हितैषी कोऽपि मिथ्याऽभिमानं विपथमथनहर्षी मास्म कार्षीन्मनीषी ॥७८॥

**॥ इति गोष्टामाहिलकथानकं समाप्तम् ॥**

*******

अथ मिथ्याभिनिवेशोऽप्यात्मधर्मत्वात्कथं लक्षणीयः ! इत्याशङ्कायां तल्लिङ्गं निरूपयन्नाह–

**ता सुत्तुत्तविउत्ता गीयत्थनिवारिया अणाइन्ना । चिच्चा मिच्छाभिनिवेससाहिगा सो उ मिच्छस्स ॥१०॥**

व्याख्या–यस्मादेवंविधा चेष्टा मिथ्याभिनिवेशाऽव्यभिचारिणी तत्तस्मान्मिथ्याभिनिवेशस्य साधिकेति सम्बन्धः, सूत्रोक्तात्सिद्धान्तभाषितार्थाद्वियुक्ता–पृथग्भूता आगमार्थविरोधिनीत्यर्थः, महाबलस्य ह्यसाधारणतपोऽभिग्रहादिकाऽपि क्रिया कथमहमेभ्यो मित्रमुनिभ्यो गृहवास इव सम्प्रत्यपि निष्प्रतिमो भवेयमिति मिथ्याभिनिवेशजन्यत्वात् सिद्धान्तविरुद्धा, पीठमहापीठायोरपि गुरुं प्रति तीव्रसङ्क्लेशाध्यवसायसचिवत्वात्तथा, जमाल्यादीनां च भगवद्वचोविपर्यस्तप्ररूपकत्वात्तथेति, एवमन्येषामप्येवंजातीया चेष्टा एवमेव द्रष्टव्या, अत एव गीतं–सूत्रम् अर्थस्तदभिधेयं तयोर्योगाद्गीतार्थः, आह च–"**गीयं भन्नइ सुत्तं अत्थो तस्सेव होइ वक्खाणं । गीयस्स य अत्थस्स य संजोगा होइ गीयत्थो ॥१॥**" तैः श्रुतपारगैर्निवारिता आगमवैपरीत्यात् कर्त्तव्यत्वेन निषिद्धा शुद्धसिद्धान्तोपदेशकत्वात्तेषाम्, अथ सूत्रानुक्ताऽपि द्रव्यकालाद्यपेक्षया काचिद्गीतार्थाचरिता प्रमाणं भविष्यतीत्यत आह–'अनाचीर्णा सावद्यतया गीतार्थैराचरणीयतयाऽनादृता, 'चेष्टा' वाचिकी कायिकी च 'क्रिया' मिथ्याभिनिवेशस्य साधिका–अनुमापिका लिङ्गमित्यर्थः, तत्कार्यत्वात्तस्याः कार्येण च कारणानुमानस्योपपत्तेः, ततः किम् ! इत्याह–'स तु' स पुनर्मिथ्याभिनिवेशोमिथ्यात्वस्य–उक्तरूपस्य साधको मिथ्यात्वकार्यत्वात्तस्येत्यर्थः, अत्रापि साधिकेत्यनुषज्यते, पुंल्लिङ्गता तु मिथ्याभिनिवेशशब्दसम्बन्धादिति गाथार्थः ॥१०॥ साम्प्रतमेनामेव चेष्टामसद्ग्रहापरपर्यायां दिङ्मात्रेण नामग्राहं गाथाद्वयेन दर्शयन्नाह–

**गिहिदिसिबन्धो तह णो हवंत अवहरणमच्छरो गुणिसु । अववायपयालंबण पयारणं मुद्धधम्माणं ॥११॥**

**सढयाए समाइन्नं एयं अन्नं य गीयपडिसिद्धं । तत्तं सज्जाणतबहुमाणा उ असग्गहो होइ ॥१२॥**

**व्याख्या**–गृहिणां–श्रावकाणां, दिश्यते–ज्ञाप्यते अनया दिक् आचार्यादिः, व्यपदिश्यते ह्याचार्यादिना अस्याचार्यायं गच्छोऽयं शिष्य इत्यादि तया तस्या वा बन्ध आचार्यद्यायत्ततापादनेनात्मनो निवेदनं, तं विहाय निष्कारणं गच्छान्तरेषूपसम्पदुपादान–

परिहार इत्यर्थः, एष च सूत्रे साधुसाध्वीरुद्दिश्याभिहितः, न तु गृहिणाऽतो गृहिणां दिग्बन्धविधानमसद्ग्रहो भवतीति द्वितीयगाथान्तेन योगः, 'तथेति' समुच्चये 'आभवन्तः' आभजनीया आङ्पूर्वस्य भवतेराभागार्थत्वात्, ततश्चाभाव्यव्यवस्थाया नियतविषयतयैवा–भिधानाद्वस्तुनोऽनाभवताम्' अनाभजनीयानामपि पारम्पर्येणास्मद्गच्छप्रतिबद्धा एतेऽस्माकमेवैते आभाव्याः, अस्मभ्यमेवामीषां पुत्रवस्त्रपात्रादिगुरुबुद्धया दातुं कल्पते, नान्येभ्य इति व्यवस्थापि नाभाव्यत्वानां शुद्धदेशकतया धार्मिकतया च गुरुत्वेनाभ्युपेतसुविहितानां श्रावकाणामपहरणं राजदण्डादिभयदर्शनेन सुविहितेभ्य आकर्षणं सर्वथा तेषां तत्पार्श्वे व्रतादिवारणमित्यर्थः, 'मत्सरो' द्वेषः, गुणिषु रत्नत्रयपवित्रेषु सुविहितेषु, तीर्थकरगणधरादिविरहे हि सम्प्रति सङ्घ एव सकलसाधुश्रावकादिव्यवस्थाकरण–पटीयान्, स एव च भगवन्नमसनीयत्वादाराध्यः सर्वेषामिति, प्रायो जैनमतानुगामुकास्तमेव पूजयन्ति, एते त्वात्मंमन्यास्तमप्य–वमन्यन्त इति सङ्घबाह्यत्वादेतेषां तिरस्कार एव श्रेयानिति, अपवादपदानामसंयमहेतुतया निषिद्धानां कारणेन यतनाविधेयतयादिष्टानां नित्यवासादीनां कादाचित्ककृत्यानाम् 'आलम्बनम्' अतिप्रमादितयाऽवष्टम्भनं, यदि ह्येतानि सर्वथा यतीनामकृत्यान्यभविष्यन् तदा कथं पूर्वसूरयोऽकरिष्यन् तस्मात्कृत्यान्येवामूनीति, सुखलोलतयाऽशक्तिख्यापनच्छद्मना मनसि सम्प्रधारणं, यथा समीचीन एव नित्यवासो मुनीनां सङ्गमस्थविराचार्यैस्तदासेवनात्, चैत्यपूजाऽपि सङ्गता वैरस्वामिना स्वयमाचरणात्, आर्यिकालाभोपभोगोऽपि युक्त एव अण्णिकापुत्राचार्येण तद्विधानात्, सततं विकृतिभोगोऽप्युपपन्न एव उदायनमहर्षिणा तदुपयोगात्, यदाह–"**नीयावासविहारं चेइयभत्तिं च अज्जियालाभं । विगईसुयपडिबंधं निद्दोसं चोइया बिंति ॥१॥**" अनुस्वारलोपादय इहान्यत्र च प्राकृतत्वाद्द्रष्टव्याः, 'प्रतारणं' विप्रलम्भनं 'मुग्धधर्मिणाम्' अव्युत्पन्नश्राद्धानां समयविचाराचतुरतया यो यथा यदुपदिशति स एव धर्म्ममार्ग इति श्रद्धालूनाम्, यथा भवत्पूर्वजैरेतद्भगवद्बिम्बं कारितमर्चितं च, एतदेव च भवजलधौ प्रवहतां वहित्रं तस्माद्भवद्भिरप्यत्र महान् आदरो विधेयः, स्वकीयं वा नूतनं निर्मापणीयं, पूजा चात्र सन्ध्यात्रयाधविभागेन दिवा नक्तं च विधीयमाना मोक्षायेत्यादिवचोभिरात्मवश्यतापादनमित्यर्थः ॥११॥ तथा 'शठतया' मायावितया शैथिल्येनेत्यर्थः, 'समाचीर्ण'मिति आवरणरूपतया प्रकटितम्, 'असढेणसमाइन्न' मित्याद्याचरणलक्षणोत्तीर्णम्, एतत् प्रागुक्तं गृहिदिग्बन्धादिकं

सर्वमपि, कथमेतच्छठाचीर्णम् ? इति चेदुच्यते—''दुविहा साहूण दिसा तिविहा खलु साहुणीण विन्नेया ।'' इत्यादिना साधुसाध्वीनामेवागमे श्रूयते, दिग्बन्धो न गृहिणामतस्तत्करणं सकलतद्व्रतपापारम्भानुमत्यादिना यतेर्महान् दोष इति निवारितं, तथा आभाव्यव्यवस्थापि प्रविव्रजिषूत्प्रव्रजितसारूप्यादिविशेषविषयतयैवाभिहिता, न सामान्यगृहिगोचरतया तत्रापि सुविहितानां न पार्श्वस्थादीनाम् अत आभाव्यछद्मना तेषामपहरणं महासङ्क्लेशनिबन्धनं, तथा गुणसमुदायरूपस्य साध्वादेः सङ्घशब्दवाच्यत्वात् तस्यैव च भगवन्नमस्करणीयत्वात् आधुनिकस्य तु प्रकटप्रतिसेवित्वेन गुणशून्यतया वस्तुतोऽसङ्घत्वादतस्तद्ग्राह्यत्वं गुणिनां भूषणमेव, ततस्तेष्वपि मत्सरो गुरुकर्म्मताहेतुक एव यदुक्तम्—''**संतगुणछायणा खलु परपरिवाओ य होइ अलियं च । धम्मे य अबहुमाणो साहुपओसे य संसारो ।।१।।**'' तथा सङ्गमस्थविरैरपि नवभागकल्पितवसतिगोचरचर्याविहारित्वेनाप्रतिबद्धतया क्षीणजङ्घाबलत्वादिनिमित्तेन नित्यवासासेवने तद्दृष्टान्तावष्टम्भेन साम्प्रतिकानां जाङ्घिकानामपि प्रतिबन्धेन तदभ्युपगमः सुखलाम्पट्यादेव, यथोक्तम्—''**उभे सीसपवासं अप्पडिबंधं अजंगमत्तं च । न गणिंति एगखित्ते गणिंति वासं निययवासी ।।१।।**'' तथा वैरस्वामिनोपि चैत्यार्थे पुष्पाद्याहरणं कुतीर्थिकापभ्राजना स्वतीर्थप्रभावनाद्यर्थमत आधुनिकानां निःशूकतया पूजाव्याजेन तत्परिग्रहो महाव्रतनिरपेक्षतां व्यनक्ति यदाह—''**ओभावणं परेसिं सतित्थ उब्भावणं व वच्छल्लं । न गणिंति गणेमाणा पुव्वुच्चियपुप्फमहिमं च ।।१।।**'' तथा अण्णिकापुत्राचार्यस्यापि पुष्पचूलानीताशनाद्युपभोगः स्वयं विचरितुमशक्ततयाऽत इदानींतनानां बलिष्टानामपि साध्वीलाभग्रहणाग्रहो गृद्धानां तदनुरागितां च सूचयति तदुक्तम्—''**गयसीसगणं उभे भिक्खायरिया अपव्वलं थेरं । न गणिंति विसहाविसढा अज्जियलाभं गवेसंता ।।१।।**'' तथा राज्यदशायां शीतलरूक्षाद्याहारापरिशीलनेन तदसहिष्णुतयोदायनमुनेरपि क्षीराद्युपयोगो न गृध्नतयाऽतोऽधुनातनानां नीरुजां पुष्टानामपि नित्यतद्भोगो रसनालौल्यं स्फुटयति, आह च—''**सीयललुक्खाणुचियं वएसु विगईगएण जाचिंतं । हट्ठावि भणंति सढा किमासि उद्दायणो न मुणी ।।१।।**'' तदेवमियमनाचरणैव भूयसामपवादपदस्थैर्योत्पादकत्वेनातिविरुद्धत्वात् तदाह—''**जे जत्थ जया जइया बहुसुयाचरणकरणपब्भट्ठा । जं ते समाचरंती आलंबणमंदसड्ढाणं ।।१।।**'' मुग्धप्रतारणं चातीवव्रतिनां दुष्टम् ''**ऋणे**

**व्याजो धने व्याजो व्याजः पुत्रकलत्रयोः । सर्वत्र विद्यते व्याजो धर्मे व्योजो न विद्यते ॥१॥**'' इतिवचनात्, तस्माद्युक्तमुक्तं, '**सढयाए समाइन्नं एयं**'ति, तदेवं गृहिदिग्बन्धादिकमसद्ग्रहं साक्षादभिधाय शेषमतिदिशन्नाह–'अन्नं चे'त्ति न केवलमेतदेव, किं तर्हि ! 'अन्यच्च' अपरमपि गीतैर्गीतार्थैः प्रमादबाहुल्यकालादिदोषादागमोक्तमपि 'प्रतिषिद्धं' निवारितं, यतीनां सम्प्रति मासकल्पविहारात्मादिप्रमाणकल्पधारणपटलादि ग्रहणप्रभृति मासकल्पप्रायोग्यक्षेत्राद्यभावेन यतीनां धृतिसंहननादिवैकल्पेन शैक्षागीतार्थादीनां भिक्षादिषु मर्यादालोपेन च गीतार्थैर्द्रव्यतो मासकल्पविहारादिप्रतिषेधेनाचरणा कल्पव्यवस्थापनात्, तथा च व्यवहारभाष्यकारः–''**धिइसंघयणाईणं मे राहाणिं च जाणिउं थेरा । सेह अगीयत्थाणं ठवणा आइन्नकप्पस्स ॥१॥**'' तथा–''**कालाइ दोसओ पुण न दव्वओ एस कीरइ नियमा । भावेण उ कायव्वो संथारगवच्चयाईहिं ॥१॥**'' इत्यादि, एताश्च गीतार्थाचरणा आगमेनैव वयं व्यवहारामो नाचरणयेत्याग्रहेणातिक्रामतामसद्ग्रह एव, तथा च पञ्चकल्पभाष्यम्–''**कुलगणसंघट्ठवणा जाओ य कया तहिं तु थेरेहिं । कुलबहुमज्जायाविव ताओ य नईक्कमिज्जंति ॥१॥**'' तद्वंशजानां विरुद्धाचरणाकारिपूर्वपुरुषसन्तानप्रभवाणां यत्याभासानां तासु तत्पूर्वजैः स्वकपोलरचनया सिद्धान्ताननुपातित्वेन कल्पितास्वाचारणासु पूर्वोक्तासु बहुमानोऽस्मद्वंश्यानां सर्वज्ञकल्पत्वेन तदादिष्टाचरणानां श्रुताविसंवादितया प्रामाण्याभिमानेनात्यान्तिकपक्षपातस्त–स्माद्गृहिदिग्बन्धादिः सर्वोऽप्यसद्ग्रह उक्तस्वरूपो भवति ज्ञायते मिथ्याभिनिवेशाभिव्यञ्जकत्वादिति गाथाद्वयार्थः ॥१२॥ अधुना प्रकारान्तरेणासद्ग्रहमाह–

**सढयाइ पक्खसाहणजुत्ती वि असग्गहो मुणेयव्वो । जणरंजणत्थपरमो न होइ समत्तगमओ उ ॥१३॥**

**व्याख्या**–'शठतया' मायावितया लाभख्यातिरञ्जनाद्यर्थमित्यर्थः, 'पक्षः' सत्पक्षः शुद्धं जिनमतमिति यावत्, तस्य साधने सर्थने युक्तिरपि सतर्कसाधनदृष्टान्तोपन्यासोऽप्यसद्ग्रहो ज्ञातव्यः, उपलक्षणं चैतत्–शठस्य हि शुद्धं प्ररूपयतोऽपि राजसभायां साधनदृष्टान्तोपन्यासेनार्हन्मतव्यवस्थापनया प्रौढप्रतिवादिमदक्षोदेन प्रवचनप्रभावनां विदधानस्यापि देशनातिशयेन भूयसो भव्यान् सम्यक्त्वादिगुणस्थानेष्वारोपयतोऽपि मिथ्यादृष्टित्वेन तत्त्वाश्रद्धालुतया लोकरञ्जनाद्यर्थमेव प्रवृत्तेरङ्गारमर्दकादेरिव

सम्यक्क्रियाऽप्यसद्ग्रह एव, आस्तामंशुकाञ्चलवन्दनकदापनचैत्यवासाद्यसत्पक्षसाधिकायुक्तिरसद्ग्रह इत्यपिशब्दार्थः, तदेवं वास्तव एव मिथ्याभिनिवेशोपशमः सम्यक्त्वलिङ्गमिति प्रत्यपादि, यस्तु पूजाद्यर्थतया तदाभासः स बाष्प इव वह्नेर्न तल्लिङ्गमित्याह, जनरञ्जनार्थं पुनरेते हि शुद्धसिद्धान्तकथनसम्यक्क्रियाकषायोपशपतपःस्वाध्यायादिदर्शनेन तुष्टा अस्मद्वाञ्छितं वस्त्रपानान्नादिकं पूरयन्ति, अतो मा भूत्तत्त्वं किंचित्किं नस्तेनेत्याशयेन लोकमनस्तोषणप्रयोजनः प्रशमः बहिर्वृत्त्या मिथ्याभिनिवेशोपशमव्यञ्जका–सद्ग्रहव्यपगम इत्यर्थः, 'न भवति' न जायते सम्यक्त्वगमकः 'तुः' पुनरर्थो योजित एव सम्यग्दर्शनस्यानुमापकः, देवगुरुधर्म्मतत्त्वप्रतिपत्तेरभावात्तद्वतः सम्यक्त्वानुपपत्तेः, हेत्वाभासानां च प्रामाणिकैः साध्यासाधकत्वेन व्युत्पादनादित्यर्थः, तदियता न केवलं ये गृहिदिग्बन्धादिकं सूत्रोत्तीर्णं विदधति, त एवासद्ग्रहवत्त्वान्मिथ्यादृष्टयः, किं तर्हि ! ये दीर्घसंसारित्वादिहेतुभिर्मनागपि तत्त्वमपरिणमयन्तो लाभाद्यर्थमेव भगवन्मतसमर्थनादिषु यतन्ते, तेऽपि तथैव मिथ्यादृश इति दर्शितं, तन्मिथ्याभिनिवेशशान्तिमुदितालक्ष्माक्षतं सद्दृशः सत्तर्कप्रणयान्निदर्शनयुजो निर्व्यूढमुच्चैस्तराम् । मिथ्यात्वप्रतिपन्थिमन्थिततमः सूर्योदयस्योद्धतध्वान्तध्वस्तमिवोपगच्छत बुधा दूरोज्झितासद्ग्रहाः ।।१।। इतिगाथार्थ इति प्रथमं लिङ्गम् ।।

## ॥२॥ अथ द्वितीयलिङ्गम्

इयता सूत्रेणाद्यं लिङ्गं विवृतमित्यर्थः, इदानीं द्वितीयलिङ्गं विवरीतुं तद्वतो निःश्रेयसाभिलाषव्यञ्जिकां चिन्तां दिदर्शयिषुस्तावत्प्रस्तावनामाह—

**सम्मद्दिट्ठी जीवो कम्मवसा विसयसंपउत्तोवि । मणसा विरत्तकामो ताण सरूवं विचिंतेइ ॥१४॥**

**व्याख्या**—'सम्यग्दृष्टिः' मिथ्याभिनिवेशोपशमेन ज्ञापितसम्यग्दर्शनो जीवो भव्यसत्त्वः, कर्म्मवशाच्चारित्रावारकमोहनीयोदयात् 'विसिन्वन्ति' बध्नन्ति स्वसौन्दर्येण वश्यं देहिनं कुर्वन्ति 'विषयाः' स्रक्चन्दनवनितादयस्तेषु संप्रयुक्तो—व्यासक्तोऽपि हातुमशक्ततया कायेन तानुपभुञ्जानोऽपीत्यर्थः, आस्तां तदन्य इत्यपेरर्थः, 'मनसा' चेतसा विरक्तकामो विषयदोषश्रवणदर्शनाभ्यां तेषु व्यावृत्ताभिलाषस्तेषां विषयाणां स्वरूपं तात्त्विकं स्वभावं 'विचिन्तयति' विशेषेण तेषु व्यासङ्गनिवृत्तये परामृशतीति गाथार्थः ॥१४॥ सम्प्रति तच्चिन्तामेवाह—

**आवायसुंदरावि हु भाविभवासंगकारणत्तणओ । विसया सप्पुरिसाणं सेविज्जंतावि दुहजणया ॥१५॥**

**व्याख्या**—'आपातसुन्दरा अपि' मनोदर्शनस्पर्शनादीन्द्रियानन्दकतया आमुखमधुरा अपि आस्तां तदितरे इत्यपेरर्थः 'हुः' पूरणे, भाविभवासङ्गकारणत्वात्, अभिष्वङ्गपोषकत्वेन भविष्यज्जन्मपरम्पराप्रवाहप्राप्तिहेतुत्वात् रागद्वेषमूलत्वाच्च संसारस्य, विषयाः प्रतीताः 'सत्पुरुषाणां' विवेकसाकल्येन विदितविषयदोषाणां महाशयानां 'सेव्यमाना अपि' भुज्यमाना अपि, दुःखजनकाः कायिकमानसोपरीतापोत्पादकाः, आस्तां पश्चान्नरकादिकारणतयेत्यपेरर्थः, धिगस्मान् यदेवं श्रुत्यनुभवाभ्यां विषयहेवाकविपाकं विदन्तोऽपि भूयो भूयस्तेष्वेव व्यासजामः, सर्वथा विषममापतितमेतदिति सततं दोधूयमानान्तःकरणत्वात्तेषामिति गाथार्थः ॥१५॥

**हा धी विलीणबीभच्छकुच्छणिज्जम्मि रमइ अंगम्मि । किमिकव्व एस जीवो दुहंपि सुखंति मन्नंतो ॥१६॥**

**व्याख्या**–'हा' इति विषादे धिगिति निन्दायां महान् मे विषादो निन्द्यमेतदतीव यद् एष जीवोऽङ्गे रमत इति सम्बन्धः, 'विलीनं' निरंन्तरस्रवत्प्रस्रवणादितया पूतिगन्धि, बीभत्सं विकृतत्वेन नयनवैमुख्याधायकं 'कुत्सनीयं' दुर्गतिद्वारायमाणत्वेन विदुषां निन्दनीयं, ततः कर्म्मधारयः, तस्मिन् 'रमते' रतक्रीडामनुभवति, अङ्गे योषितो गोप्यावयवविशेषे, कृमिक इव व्रणादिजन्मकीटभेद इव कुत्सायां कः, एष इति कुत्सनीयगृध्नुतया प्रत्यक्षत्वेन निर्दिशति 'जीवः' आत्मा यथा कृमिः पूयक्लिन्ने प्राण्यङ्गे क्षतादौ रज्यते, एवमेषोऽपि वराकस्तादृश्येव योषिदङ्गे रतिं बध्नाति यदुक्तम्–''**उत्तानोच्छूनमण्डूकपाटितोदरसंनिभे । क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते ॥१॥**'' दुःखमपि देहायासक्षयव्याध्यादिनिमित्तत्वेन पारतन्त्र्यक्षयित्वादिदुःखहेत्वनुवेधेन च वस्तुतः कष्टमपि सम्भोगसुखं, सौख्यमिति, अयमेव परमानन्द इति 'मन्यमानः' जानानः सन्, तदुक्तम्–''**नग्नः प्रेत इवाविष्टः क्वणन्तीमुपगूह्य ताम् । खेदायासितसर्वाङ्गः सुखी स रमते किल ॥१॥**'' विषयतृष्णातरलितान्तः करणतया विपर्यस्तग्राहिभिः कामिभिस्तत्त्वतो दुःखरूपेऽप्यङ्गनाङ्गजन्मनि सुखे मृगतृष्णायां जलस्येव सुखस्याध्यारोपात्, अत एव कामिनः प्रणयकलहकुपितकामिनीचरणतलाघातमपि स्मरज्वरजर्जरितानामस्माकमेष शिशिरकोमलकदलीकाण्डस्पर्श इति मन्वानाः प्रीयन्ते, तथा च तेषामुल्लापः–''सत्यं वच्मि हितं वच्मि सारं वच्मि पुनः पुनः । अस्मिन्नसारे संसारे सारं सारङ्गलोचना ॥१॥'' इति गाथार्थः ॥१६॥

**ता ताण कए दुक्खसयनिबंधणं भयइ बहुविहं जीवो । आरंभमह परिग्गहमओ वि बंधो वि पावाणं ॥१७॥**

**व्याख्या**–'यतो' दुःखेऽपि सुखाभिमानोऽस्य जीवस्य तत्तस्माद्धेतोस्तेषां–विषयाणां 'कृते' निमित्तं विषयार्जनार्थमिति यावत्, 'दुःखशतनिबन्धनं' तदर्जनस्य दुष्करत्वेन शारीरमानससन्तापसन्दोहकारणं 'भजते' स्वीकुरूते 'बहुविधं' विचित्रं 'जीवः' प्राणी 'आरम्भं' भूरिजीवोपमर्दकतया महासावद्यं कृषितथाविधबाणिज्यराजसेवादिकं व्यापारम् 'उद्दवओ आरंभो' इति वचनात्, अथेति आरम्भानन्तरं 'परिग्रहम्' आरम्भार्जितामार्थानां भाण्डागारादिषु न्यासेनात्मायत्तताकरणं, यद्वा समर्थक्रीतानां

धान्यादीनाम् आविक्रयकालं भाण्डशालादिषु स्थापनं, यदि वा आरम्भश्च महापरिग्रहश्चेति समाहारद्वन्द्वः, तदन्तरेण द्रव्यार्जनाभावेन तद्धेतुकविषयसुखानुपपत्तेः 'अतस्तु' अस्मात्पुनरारम्भात् परिग्रहाच्च आरम्भमहापरिग्रहाद्वा, बन्धस्तु बन्ध एव पापानां नरकादिहेतुपापकर्म्मरूपकर्म्मप्रकृतीनां भवतीति शेषः, तस्य तद्बन्धहेतुत्वेनाभिधानात्, तथा चागमः—''**महारंभयाए महापरिग्गहयाए कुणिमाहारेणं पंचिंदियवहेणं जीवा निरयाउयं कम्मं बंधंति ।**'' इति गाथार्थः ॥१७॥ ततः किमित्यत आह—

**तो नरयवेयणाओ तिरियगईसंभवा अणेगाओ । ता जरियजंतुणो मज्जियाए पाणोवमा विसया ॥१८॥**

**व्याख्या**—'तो' तस्मात् पापबन्धात् 'नरकवेदनाः' निरतयातनाः 'तीव्राः' कुम्भीपाकादिकाः समयप्रतीताः 'तिर्यग्गतिसम्भवाः' शूकशुश्वगवादिपशुजातिजाः शीतायपक्षुत्तृष्णादिप्रभवाः 'अनेकाः' अगण्याः, पूर्वपदाद् वेदनापदस्येहापि सम्बन्धात् वेदना भवन्तीति शेषः, पापबन्धनिबन्धनतयैव नरकादिवेदनानां प्रतीतेः, यस्मादेषा विषयिणां गतिस्तस्मात् 'ज्वरितजन्तोः' ज्वरव्याधितस्य पुंसः 'मार्जितायाः' शिखरिण्याः 'पानोपमाः' आस्वादनसमाः 'विषयाः' इन्द्रियार्थाः शब्दादयः, यथा दाहज्वरार्त्तस्य मृष्टमधुरशीतलतया मुखे रोचमानमपि रसालापानं ज्वरपोषकतया परिणामे दारुणं, तथा आपातमधुरा अपि विषयाः पर्यन्ते दुर्गतिहेतुतया भीषणाः यदाह—**आपातमात्रमधुरा विपाककटवो विषोपमा विषयाः । अविवेकिजनाचरिता विवेकजनवर्जिताः पापाः ॥१॥** तस्माद्धेया एवामी विवेकिनामिति तात्पर्यमिति गाथार्थः ॥१९॥ अथ विषयाणामेव दृष्टान्तद्वारेण हेयतां दर्शयन्नाह—

**जइ हुज्जइ गुणो विसयाण को वि तित्थयरचक्किवलदेवा । जुत्तत्तणंपि विसए चएउं अब्भुट्ठिया कहं णु ॥१९॥**

**व्याख्या**—'जइ' 'यदि' चेत् 'भवेत्' विद्येत 'गुणः' सेवकानामुपकारकोऽतिशयः 'विषयाणां' शब्दादीनां 'कोऽपि' स्वल्पोऽपि तदा तीर्थकराः—श्रीनाभेयाद्याः चक्रवर्त्तिनो—भरतप्रभृतयः बलदेवा—अचलप्रमुखाः, ततो द्वन्द्वः, निरतिशयरूपशालिनोऽप्य—नन्यसाधारणप्राज्यसाम्राज्यसमृद्धिबन्धुरा अप्यगण्यपुण्यसम्भारप्रादुष्यन्निखिलाभिलषितविषयग्रामा अप्याज्ञैश्वर्यवर्या अपि महापुरुषा

एते 'जीर्णतृणमिव' 'जरत्तृणमिव' 'विषयान्' इन्द्रियार्थान् 'त्यक्तुं' हातुम् 'अभ्युत्थिताः' सर्वविरतिजिघृक्षया उद्यमवन्तः, कथं ? कुतो हेतोर्जाता इति शेषः, 'णु:' वितर्के अक्षमायां वा यथा अत्यन्तासारतया जरत्तृणत्यागे न कस्यापि वैमनस्यं, तथा तेषां महासत्त्वानां तादृग्विषयपरित्यागेऽपि तत्त्यागस्यैव महाफलतया तैर्निश्चितत्वात्, अतो वितर्कयामि न विषयाणामणुरपि गुणोऽस्ति, न क्षम्यते वा तेषां सगुणत्वं महापुरुषत्वाविशेषेऽपि निदानदूषितत्वेन वासुदेवानां सर्वेषामपि विषयत्यागासम्भवादिहानुपादानमिति गाथार्थः ॥१९॥ आस्तां विषयोपभोगः तदाशाऽपि महीयसी दुरन्तेति दृष्टान्तेनाह–

**विसयासासंदामियचित्तो विसएहिं विप्पउत्तोवि । परिभमइ कंडरीओव्व नियमओ घोरसंसारे ॥२०॥**

**व्याख्या**–विषयाशया–भोगतृष्णया सन्दामितं–दाम्ना पशुरिव संयमितं चित्तं यस्य स तथा, रागबाहुल्येन प्रबलभोगतृष्णा निगडितमनाः विषयैः–प्रतीतैर्विप्रयुक्तोऽपि निष्पुण्यतया तदसम्प्राप्त्या, तल्लाभेऽपि शरीरापाटवादिनोपभोगासामर्थ्येन वा तैर्विरहितोऽपि आस्तां तैः सम्प्रयुक्त इत्यपेरर्थः, 'परिभ्रमति' पर्यटति 'कण्डरीक इव' कण्डरीकाभिधाननृपतिरिव 'नियमतः' निःसन्देहं 'घोरसंसारे' अतिभीषणनरकादौ, कथञ्चिद् विषयसेवाविरहिणामपि तीव्रसङ्क्लेशेन विषयतृष्णाया एवंविधफलत्वात् किं पुनः सतततत्सेवापरायणानामिति गाथार्थः । **कण्डरीककथा** चैवमागमे श्रूयते–

जम्बुद्वीपविदेहेषु [1]पुष्कलाश्चर्यधामनि । विजये पुष्कलावत्यामास्ते पूः पुण्डरीकिणी ॥१॥ राजहंसाधिवासेन पद्मालयतया बभौ । उदञ्चच्चित्रपत्रत्वात्सत्यं या पुण्डरीकिणी ॥२॥ यदि कोऽपि [2]पराभूतिं व्यधत्त तस्मै तथाऽपि जनराजी । बत यत्र पराभूतिं वितरन्त्यप्यानशे कीर्त्तिम् ॥३॥ पुष्पचापस्य यत्र स्त्रीः शस्त्रीः कामिमनोभिदि । चिरसंभृतलावण्यव्ययेन वासृजद्विधिः ॥४॥ नालस्यसङ्गहं[3] कुर्वंस्तत्र प्रीणन् [4]सितच्छदान् । [5]वारितारी [6]रजोहारी [7]महापद्मोऽभवन्नृपः ॥५॥ ध्रुवमेष महच्छब्दार्थान्यथानुपपत्तितः । गुणैरभ्यर्हितः [8]पद्मान्निच्छद्म मम सद्मनः ॥६॥ इति कौतूहलान्नूनं रूपदासीकृतस्मरम् । यं श्रीः सर्वाङ्गमालिङ्गन्नव्यरनिङ्गतरङ्गिता ॥७॥ युग्मम् । बीजानीव यशोराशेर्वप्तुं गुप्तानि यत्नतः । मौक्तिकानि समाक्रष्टुं स्वस्वामिपरितुष्टये ॥८॥ दुर्भेदान्निर्भरं

१. पुष्कलाश्चर्याणि, संपूर्णाद्भुतानि ॥ २. पराभूतिं, पराभवं जनराज्यै इति दृश्यं, तस्मै पराभवकारिणे पराभवं ददाविति विरोधः, अथ च पराभूतिं परेभ्योऽलक्ष्मीं विपदम् अपकारिण्यपि उपकारं कुर्वाणा कीर्त्तिं लेभे ॥ ३. आलस्यं क्रियामान्धं ॥ ४. छाद्यते अनेन अङ्गमिति व्युत्पत्त्या छदशब्देन वस्त्रमपि उच्यते, इतिः । सितच्छदाः श्वेताम्बरा हंसाश्च ॥ ५. वारितारिः, निषिद्धशत्रुः, जलतरणशीलश्च ॥ ६. रजोहारी बाह्याभ्यन्तरमलक्षेपी, परागमनोहरश्च ॥ ७. महापद्मः सहस्रपत्रादिरपि ॥ ८. निच्छद्मनिर्व्याजं यथा भवति ॥

कुम्भिकुम्भिगर्भान्महाद्विषाम् । यस्य कौक्षेयकस्तीक्ष्णो विददार सदा रणे ॥९॥ युग्मम् ॥ [1]स्वाराधा [2]सत्यभामाऽपि समुद्रतनयाऽप्यहो[3] ? । देवी पद्मावती तस्य संजज्ञे सर्वमङ्गला ॥१०॥ यां सौन्दर्यसुधाधारां चित्रीयितजगत्रयाम् । विधिर्निर्मायं निर्माय मन्ये स्वोत्कर्षभूरभूत् ॥११॥ यौवने निर्गुणे प्रायोऽविन्दन्तो योग्यमाश्रयम् । भेजुर्मन्येऽनुरूपां यां लज्जाशीलादयो गुणाः ॥१२॥ पुण्डरीककण्डरीकावभूतां तनयौ तयोः । अधिदोर्दण्डभोजःश्रीक्लृप्तताण्डवाडम्बरौ ॥१३॥ स्थातुं नैकत्र मे [4]स्थाने नश्वरत्वान्नृणां ध्रुवम् । इत्ययोग्यापरत्यागाच्छोर्यश्रीर्यावशिश्रियत् ॥१४॥ [5]स्रगादिभोगभङ्ग्या वां श्रीवन्नास्ते मयाफलम् । इत्युक्त्वैव विषादेन ययोः कीर्त्तिरगाद्दिशः ॥१५॥ [6]परदारखलीकारकौशलं बिभ्रतावपि । स्वदारवर्जिनौ श्लाघ्यं कौलीन्यं यावावापतुः ॥१६॥ ययोर्वर्जयतोः शश्वन्महेलाकरपीडनम् । [7]अभूत्सम्यक्कुमारत्वं रज्यतोर्विषयेष्वपि ॥१७॥ [8]परिग्रहवतोर्बाल्ये [9]बहुशस्त्रीकरग्रहम् । तारुण्ये कुर्वतोश्चित्रं कौमारमभवद्ययोः ॥१८॥ यौ वीक्ष्य तत्यजुः सद्यः प्रणयं चिरसम्भृतम् । स्तनेषु रिपुनारीणां कस्तूरीपत्रवल्लयः ॥१९॥ लीलया संचरिष्णू यौ प्रेक्ष्य [10]प्रद्युम्नसुन्दरौ । भेजिरे [11]स्तम्भसंरम्भं वामाः [12]समितिषु द्विधा ॥२०॥ यौ गुरोः पृथिवीभर्त्तु समक्षं सत्यवादिनः[13] । सांयुगीनौ विजिग्याते शत्रून् भीमार्जुनाविव ॥२१॥ तयोः संवसतोः कालः [14]क्षिप्तभीमदशास्ययोः । तुष्टयोरत्यवर्त्तिष्ट रामलक्ष्मणयोरिव ॥२२॥ [15]सारङ्गलक्ष्मणात्यक्ते सदापि [16]कचितेऽन्यदा । [17]परागभरसन्नद्ध उद्याने नलिनीवने ॥२३॥ संस्थायां तस्थिवांसोऽस्यां स्थवीयांसः श्रुतश्रिया । स्थेयांसः

---

१.स्वा आत्मीयाः, राधा गोपी विशेषा, स्वाराधा सुखाराधनीया ॥ २. सती साध्वी अभामा अक्रोधा ॥ ३. समुद्रतनया लक्ष्मीः समर्यादपुत्र्यः, समुद्रतं सहर्ष संभोगं नयति प्रापयति वा, सर्वाणि मङ्गलानि यस्या विरोधपरिहारः ॥ ४. न स्थाने नैव युक्तम् एकत्रैकस्मिन् क्वापि पुरूषे अनेक हि कारणं कार्यविशेषमाधते, रेणुकणाश्छायामिव ततो द्वाविमौ आश्रयामि मा कदाचिदत्रानश्वरत्वेन स्थैर्य स्यादिति ॥ ५. यथा भोगेन श्रियः फलं वा न तथा मयेति ॥ ६.खलीकारस्तिरस्कारः, स्वस्य आत्मनो ज्ञातिवर्गस्य वा, दारो विदारणमात्मघात इति यावत् ॥ ७. अकृतस्त्रीकरपीडनो हि कुमारः, युवराजश्च, महेलाया गुरुतरपृथित्वाः, करेण दण्डेन ॥ ८. परिग्रहः कलत्रं पत्त्यादिपरिकरश्च ॥ ९. बहुशोऽनेकशः, बहुशस्त्र्यः, प्रभुतश्रुरिकाः ॥ १०. प्रद्युम्नः कन्दर्पः ॥ प्रकृष्टतेजोपि ॥ ११. स्तम्भो विष्टब्धचेष्टत्वं वामा योषितो रिपवश्च ॥ १२. समितिषु ,सभासु संग्रामेषु च ॥ १३. सत्यवादी युधिष्ठिरोऽपि ॥ १४. भीमदशा घोरावस्था, दशास्यो रावणः सहविहारित्वादनयोरेककर्तृकत्वेऽपि रावणक्षेपस्योभयकृतत्वोक्तिः १५. सारङ्गलक्ष्मणा, चन्द्रेण त्यक्ते विकाशाविधानात् ॥ १६. कचिते जलव्याप्ते, ॥ १७. परागः सुमनोरजः ॥ उद्याने तु सारङ्गैर्मृगर्लक्ष्मणाभिश्च सारसारङ्गनाभिरत्यक्ते, पिकैः कोकिलैः परागाः प्रकृष्टतरवः ॥

सपरिवाराः स्थविराः समवासरन् ॥२४॥ युग्मम् ॥ गत्वाऽथ पृथिवीनाथः पाथःपतिसमस्थितिः । गरीयसो गुरून्नत्वा श्रेयः शुश्राव विश्रुतः ॥२५॥ स न्यस्याद्यसुतं राज्ये भवाद्भीरुरदीक्षत । खेलत्कुण्डलिवल्मीकं को भजेत विजीविषुः ॥२६॥ द्रागधीत्य स चतुर्दशपूर्वी दुस्तपान्यथ तपांसि वितन्वन् । कर्म्मवारमसुवारमुदस्यन्निर्ववार शिवसौधनिलीनः ॥२७॥ अन्यदा पुरि तस्यां ते स्थविराः पुनरराययुः । जग्मतुर्भ्रातरौ तौ तान् वन्दितुं राजनन्दनौ ॥२८॥ गुरुणापि प्रबन्धेन व्यक्तमुक्तिपथा कथा । व्यातेने विकथाकन्थां नहि गृह्णन्ति साधवः ॥२९॥ तथाहि—ज्ञानदृष्टिचरित्राणां त्रयी संवलिता मिथः । हेतुर्मुक्तेर्हृषीकार्था लोकानामिव दृग्धियः ॥३०॥ विनागमं न जीवादीनात्मा जानाति तत्त्वतः । चक्षुष्मानिव कुम्भादीन् विना लोकं तमोनुदम् ॥३१॥ वस्तुवृत्त्या त्वनिश्चिन्वन् श्रद्दधीत कथं नु तान् । [1]मृगतृष्णाव्यवस्थित्या जलं तृष्णातुरो यथा ॥३२॥ तद्रक्षादौ प्रवर्त्तेत तथेत्यश्रद्दधत् कथम् ? । तृष्णन् किमु पयः पातुं यतेताप्रत्ययन्नपि ॥३३॥ संहत्य मुक्तिहेतुत्वेऽप्येषां विज्ञानदर्शने । परस्पराविनाभूते कार्यत्वानित्यते इव ॥३४॥ यत्तु मिथ्यादृशां ज्ञानं [2]चातुर्विद्यादिगोचरम् । स्याद्वादालालिद्यतत्वेन तदज्ञानं विनिश्चितम् ॥३५॥ तथा चावाचि वाचकमुख्येन तत्त्वार्थे मतिश्रुतावधयो विपर्ययंश्च । सदसतोरविशेषाद् यदृच्छोपलब्धेरुन्मत्तवदिति ॥३६॥ यच्च माषतुषादीनामज्ञानं श्रुतगोचरम् । ज्ञानावरणदार्ढ्यात्तत्पाठव्याख्याद्यपेक्षया ॥३७॥ विज्ञानफलभावेन सद्गुरोः पारतन्त्र्यतः । केवलस्यान्यथा सिद्ध्या तत्त्वतो ज्ञानमेव तत् ॥३८॥ युग्मम् ॥ ततो गेहं यथादीपः प्रकाशयति तत्क्षणात् । तत्रत्यं च रजस्तोमं संमार्जयति शोधनी ॥३९॥ वातायनादिभिर्द्वारैः प्रविशन्तं च तं पुनः । तत्पिधानं सुनीरन्ध्रं निरुणद्धि समन्ततः ॥४०॥ परिच्छिनत्ति विज्ञानमात्मानं तत्त्वतस्तथा । विशोधयति सम्यक्त्वं प्राच्यं तत्कर्मसञ्चयम् ॥४१॥ संसृजन्तं च तं भूयः प्राणघातादिभिर्मुखैः । चारित्रमनतीचारं प्रतिबध्नाति सर्वतः ॥४२॥ चतुर्भिः कलापकम् ॥ अदूरविप्रकर्षेण नान्तरीयकभावतः । ज्ञानदर्शनयोरैक्याद् द्वयं वा मुक्तिकारणम् ॥४३॥ प्रत्येकं व्यभिचारित्वात्ततो ज्ञानचरित्रयोः । सिद्धिपुर्याः सुगःपन्था योगः पंग्वन्धयोरिव ॥४४॥ पङ्गुरालोकमानोऽपि धावन्नपि वनेऽन्धदृक् । एकशो वह्निना प्लुष्टौ संहितौ प्रापतुः पुरम् ॥४५॥ तद्भो रत्नत्रयीमेतां श्रयध्वं [3]यदिनिर्वृतिम् । [4]गौराङ्गीं [5]वृणुताश्रान्तमुक्ताहारपरिष्कृताम् ॥४६॥ एतन्निशम्य भूयांसः प्रानुल्सत

१. विषयेण विषयिण उपलक्षणात् मृगतृष्णाशब्देन तज्ज्ञानमुच्यते ॥ २. चातुर्विद्या ब्राह्मणादयः ॥ ३. निर्वृत्तिः मुक्तिशिलापि ततो ॥ ४. गौरांगी स्फटिकविशदाम् ॥ ५. मुक्ताहारास्त्यक्तभोजनाः ॥

तनूभृतः । धारासारा इवाभ्राणां गुरूणां न वृथा गिरः ।।४७।। पुण्डरीकोऽपि चारित्रबद्धकक्षो गृहानथ । गत्वाऽऽहूय सहामात्यैः कण्डरीकमभाषत ।।४८।। गुणैरिव गुणैः षड्भिः स्यूतं मूतं च शक्तिभिः । तिसृभी रश्मिभिरिव भ्रातः ! प्राज्यमनेहसम् ।।४९।। चतुःसङ्ख्यैरनीकाङ्गैरिवोपायैरभङ्गुरैः । वशीकृतप्रतिक्ष्मापं सौराज्यं बूभुजे मया ।।५०।। युग्मम् ।। सुकुमारकरादानोद्वर्त्तनापरिवर्त्तनैः । भक्तदानेन पित्रेव लालिताः पालिताः प्रजाः ।।५१।। नग्नं करणमत्यन्तं पण्यस्त्रीमग्नचेतसः । अन्धंकरणमासत्वं पुंसस्तत्त्वविवेचने ।।५२।। विशरारुजरद्दारुवत्तारुण्यमपि द्विधा । [1]गुरून् शुश्रूषमाणेन मयाऽस्ताघमलङ्घ्यत ।।५३।। युग्मम् ।। सतामनुचिता भोक्तुं विषवद्विषमा मया । विषयाः संबुभुजिरे परेषां विषया इव ।।५४।। यूनामुच्छृङ्खलत्वेन मास्मैष [2]परिवीवदत् । मत्सखं निपरीवादं कथञ्चिदतिचारतः ।।५५।। यतिधर्म्ममितीवासौ श्राद्धधर्म इयच्चिरम् । उज्झाञ्चकार राज्येऽपि न मामनुजिघृक्षया ।।५६।। युग्मम् ।। अपक्रमितुमारेभेऽधुना तरुणिमा मम । अञ्जसा साधुधर्मस्य योग्यतां व्यञ्जयन्निव ।।५७।। मन्ये मयि विरोधिन्यां कथमेष चरिष्यति । चरित्रमलसाऽसाध्यमिति प्रत्यासदज्जरा ।।५८।। एष संवेगपीयूषं सद्यः पास्यत्यतो ध्रुवम् । नाहमस्मीति भीतेः प्राग् नेशे विषयतृष्णया ।।५९।। भवसौख्यात्पराजेष्ट शश्वद्भुक्तचरत्वतः । नूनं भोज्यादिवैकस्मान्मनोऽरोचकिनो मम ।।६०।। अनिर्विष्टचरत्वेन मन्ये शृङ्गारिणामिव । मानसं मत्तकाशिन्यां मुक्तावृत्कण्ठते मम ।।६१।। तदभ्युपेहि साम्राज्यं न्याय्यं वर्त्म परामृशन् । भ्रातः ! प्रातरहं दीक्षामाददे येन सादरम् ।।६२।। अथ प्राह स मां भ्रातः ! किं पातयसि संसृतौ ? । ग्राहयन् राज्यमब्धौ को द्वीपमाप्य प्रियं क्षिपेत् ।।६३।। भूजङ्गसङ्गदुर्वेशमुज्झिद्रछिद्रमुद्रितम् । वल्मीकमिव कस्त्याज्यं राज्यमिच्छेदतुच्छधीः ।।६३।। नानापृथ्वीभुजङ्गास्यचुम्बनेन रतिं क्वचित् । अविन्दन्तीव राज्यश्रीः पण्यस्त्रीव न रज्यते ।।६४।। सद्विरेफं श्रियः पद्मं वस्त्रं व्यादाय जिघ्रताम् । वदतां [3]सव्रणा मन्ये जिह्वा स्खलति भूभुजाम् ।।६५।। नित्यं श्रीपङ्कजस्निग्धमधुपानान्महीभुजाम् । मत्तानामिव जायन्ते पादपाता विसंस्थुलाः ।।६६।। राजकसञ्चारभुवा नृपश्रियः कीलिताः [4]कुशीलतया । न नमन्त्यङ्गावयवाः स्तम्भा इव भूभृतां मन्ये ।।६७।। लक्ष्मीर्भुजशितकरनखशिखरविहार क्षतांहिपद्मेव । बध्नाति गुणिषु न पदं राजसु किमुताविनीतेषु ।।६८।। राज्यलक्ष्म्यां निधौ लुब्धा [5]भोगाऽऽभोगानुषङ्गिणः । क्ष्माभुजङ्गा भुजङ्गा



---

१. शुश्रूषा पर्य्युपास्तिः, श्रवणेच्छा च, अस्तांघं दुरवगाहं निष्पापं च ।। २. परिवीवदत, परिवादवन्तं मा कार्षीत् ।। ३. स व्रणां द्विरेफपक्षत्वेन ।। ४. कुशीलता दुराचारता लौहियं च यष्टिः ।। ५. भोगा विषयसेवा; स्फुटाश्च, तेषामाभोगा विस्ताराः ।।

वा नान्यद्विन्दन्त्यधोगतेः ।।६९।। तदसत्या इवामुष्या भ्रातर्दुश्चेष्टितं कियत् । दर्शयाम्येतदाश्लिष्टा नूनं नरकपातुकाः ।।७०।। किं च न्यशमि निस्सङ्गपुङ्गवादङ्ग ! भङ्गुरम् । जगद्वृत्तं गतीनां च स्वरूपमसमञ्जसम् ।।७१।। तथाहि—किमस्मदपि कल्लोला लोला इति तदीर्ष्यया । अजायन्त ध्रुवं भोग्या भावाः क्षणविनश्वराः ।।७२।। क्रन्दन्ति तुद्यमाना बहुकृत्वो नारका नरकपालैः । भैरवरवमात्मविमोचनाय तानि च बिभीषयितुम् ।।७३।। पशवः शीतवातादिन् सहन्तं धर्म्मवर्जिताः । वनस्थस्य मुनेर्दृष्टेः स्पर्द्धयेव दिवानिशम् ।।७४।। क्षणिकत्वाद्विलीयन्ते हेतुनाऽल्पेन मानुषाः । वह्निसन्निधिमात्रेण कलशा इव जातुषाः ।।७५।। वधशस्त्रप्रहाराद्या नेशते नो रिपुष्वपि । इतीवेर्ष्यादिभिर्ग्रस्ता देवा दुःखं सदासते ।।७६।। तद्भ्रातस्त्वमिवादास्ये प्रव्रज्यामहमप्यमूम् । सौधमूर्द्ध्नि स्थितेर्लाभे स्थित्वाऽलं सङ्कटे वटे ।।७७।। ततो राज्ञा द्विरुक्तोऽपि यदाऽसौ नाभ्युपागमत । तदोचे यत्त्वयाऽचिन्ति भ्रातस्तत्कार्यमञ्जसा ।।७८।। एकत्र वसतिः शश्वद्यन्न दीक्षां विनात्मनः । ऋते रसायनं पुंसो वयः स्तम्भो भवेत् किमु ? ।।७९।। किन्तु पातुमविश्रामं श्रामण्यं वत्स ! दुष्करम् । प्रमद्वरैः समारोढुं कृपाणस्येव पुष्करम् ।।८०।। यदिन्द्रियाणि मर्त्त्यानां चपलान्यतितृष्णया । शङ्के युगपदन्यान्यविषयाणां बुभुक्षया ।।८१।। अनादि त्यजतां सख्यं भवित्री नः कृतघ्नता । इति मुञ्चन्ति नात्मानं रागाद्याः प्रणयादिव ।।८२।। मन्ये प्रतिपदं प्रेम्ला दोषविलब्धविग्रहम् । विकारोद्भिदुरं पुंसां यौवनं यौवतं यथा ।।८३।। स्थेमानं क्वापि बध्नाति मानवानां न मानसम् दण्डेनेव कुलालेन प्रणुन्नं चक्रमक्रमात् ।।८४।। [1]नालबनं विना प्रायः प्राणभाजः प्रमादिनः । प्रवर्त्तन्ते यथा मत्ताः सिन्धुरा विन्ध्यबन्धवः ।।८५।। प्रयुक्त [2]उपसर्गाणां वर्गः प्राग्विबुधादिभिः । स्वार्थान्द्वच्च्यावयते न्दणां प्रायो [3]धातुमयं वपुः ।।८६।। पवित्रं सच्चरित्रेण पङ्कयति सितांशुकम् । मषीबिन्दुरिवाशङ्कं स्तोकोऽपि गृहिसंस्तवः ।।८७।। [4]कल्याणनिधयः पञ्च पालनीया महायमाः । [5]मेरुवत्सुमनोऽधीशा धर्त्तुं यान् प्रभविष्णवः ।।८८।। स्वयंभुरमणं दोर्भ्यां सद्यस्तरति दुस्तरम् । बाढं स एव निर्वोढुं प्रव्रज्यां शक्नुयाद्यदि ।।८९।। त्वं पुनर्भ्रातरद्यापि तत्त्वं प्रत्येषि [6]नार्थतः । पच्यते न मतिः प्रायो यौवने विदुषामपि ।।९०।। तच्छ्रुतार्थं परिज्ञाय प्रतिपाल्य गृहीव्रतान् । भुक्त्वा राज्यमतिक्रान्तयौवनस्त्वं तपश्चरेः ।।९१।। एवं निगडिता प्रायः प्रव्रज्या न वियुज्यते । विस्रोतसि कया घ्राताऽप्यद्रितटच्येव नौर्जले ।।९२।। बभाषेऽसौ ततो राजन्

१. आलम्बनम् अवष्टम्भनं नालं तृणविशेषमयम् ।। २. उपसर्गाः कदर्थनानि प्रपरादयश्च ।। ३. धातुमयं त्वगादिनिर्वृत्तमपि ।। ४. कल्याणं मङ्गलं सुवर्णश्च ।। ५. [illegible]शीला दन्ता अपि ।। ६. अर्थतः प्रयोजनवशात् । अर्थित्वेनेति यावत् ।।

! एवमेतत्तथाऽपि यत् । जल्पितं तत्तथा धार्स्ये वागेका हि मनस्विनाम् ।।९३।। किञ्चैतद्दुष्करं भूप ! क्लीबानां नतु मानिनाम् । झटिति त्यजतां प्राणान् प्रतिज्ञाभङ्गशङ्कया ।।९४।। दृश्यन्ते दन्तिनां दन्तानुत्खनन्तो द्विषन्तपाः । शौर्योष्मणा तृणायान्यं मन्यमाना रणे भटाः ।।९५।। सिंहा इव साहसिका रसिका युधि रुधिरपिञ्जराः शस्त्राः । नखकोटीर्बिभ्राणा निपतन्त्यरिघटतटीषु ।।९६।। निशि रज्जुमपि भ्रान्त्या फणीति निर्णीय कातराः केचित् । वेपन्ते पवनहतास्तरुच्छदा इव तरलताराः ।।९७।। अपि कुण्डलिनं बलिनः कालायसवलयसवयसन्तमसि । कटकमिति विनिश्चित्य क्षिपन्ति दिवि पाणिनाऽदाय ।।९८।। तदग्रजानुजानीहित्वत्सखो निर्वृणोम्यहम् । [1]पोगण्डोऽपि सदङ्गानुगत्वरः पुरमश्नुते ।।९९।। ततोऽसौ वार्यमाणोऽपि बन्धुवर्यैरदीक्षत । मनीषितं किमप्राप्य कृष्णसारोऽवतिष्ठते ।।१००।। निःक्रामन् पुण्डरीकस्तु मन्त्रिभिर्विधृतो बलात् । आस्व निष्पद्यते यावद्राज्यधुर्योऽङ्गजः प्रभो ! ।।१०१।। कण्डरीकोऽप्यनाहार्यं सामाचार्यं समामनत् । मुनिभिर्बहुमेने कः कुर्याद्गुणिषु मत्सरम् ।।१०२।। एवमुद्यच्छतस्तस्य सयंतः प्रशमामृतम् । भवेऽपि श्रायसं शर्म्म भुञ्जानस्य दिनान्यगुः ।।१०३।। अन्यदा चापलं पुष्यन् पुष्पचापस्य कामिनाम् । अमन्दकुसुमस्यन्दिमधुर्मधुरजृम्भत ।।१०४।। वाणीभावाय पुष्पेषोरमीषु सुहृदो मम । कतमा उपयोक्ष्यन्त इतीव मधुनाधुना ।।१०५।। पादपेषु समग्रेषु व्यञ्जिता बहुभङ्गिभिः । सौरभ्यदिग्धदिक्कुञ्जाः पुञ्जाः सुमनानसां मुदा ।।१०६।। युग्मम् ।। स्त्रीणां दोलाधिरूढानां सुभगानां रिरंसया । आचकर्षोपसव्यानं शङ्के मलयमारुतः ।।१०७।। जगुः श्रुतिपुटीपेयं गेयं राज्यमहोत्सवे । पञ्चेषोः कूजितव्याजात्कोकिलाः केलिकानने ।।१०८।। दधुर्मधुकरीन्द्रस्य कुम्भस्फोटास्रपाटलान् । प्रसवाल्लोहितारालानङ्कुशानिव किंशुकाः ।।१०९।। शीतेन मधुना सस्नुर्लेपभङ्ग्या मधुव्रताः । गुञ्जितच्छद्मकन्दर्प्पकीर्त्तिगानश्रमादिव ।।११०।। अदुन्वञ्ञन्वहं यूनः शीतलाः केरलानिलाः । वियोगिनीहृदयासश्वाससन्दलिता इव ।।१११।। सान्द्राः पञ्चेषुभुः सक्ता भृङ्गमाला विलासिनाम् । कामेन हृदयं भेत्तुमुत्खाता क्षुरिका[2] इव ।।११२।। अधिज्यधन्वनो राज्यं मत्सखस्याधुना भुवि । स्मरस्येति मुदा नूनं विधुर्मधुरतामगात् ।।११३।। जृम्भमाणमधावेवं सस्रंसे तस्य मानसम् । द्राग्दरिद्रिष्यतो दैवाच्चिन्तारत्नादिव व्रतात् ।।११४।। वैचित्र्यात्कर्म्मपाकस्य चापलादिन्द्रियावलेः । प्राच्यानादिभवाभ्यासाद्विषयेषु जनुष्मताम् ।।११५।।

१. पोगंडो विकलाङ्गः ।। २. अक्षुरिका सत्वेपि कामस्यास्त्रमात्रविवक्षया क्षुरिका इत्युक्तम ।।

प्रसूनसमयोद्यानयौवनानां मनोभुवः । उद्दीपनविभावत्वाद्वस्तुस्वावाप्यतो नृणाम् ।।११६।। मामनाद्यनुगं हित्वा मोक्ष्यते किमसौ ध्रुवम् । इत्युदैत्तस्य चारित्रलवित्रं कर्म तत्क्षणात् ।।११७।। त्रिभिर्विशेषकम् ।। प्रेयस्यास्याधुना सार्द्धं न पापस्पृहया क्षमम् । वस्तुं ममेति सद्धर्म्मश्रद्धा नूनं ततो व्यगात् ।।११८।। अस्याः स्मर्त्ताऽस्मि चेत्तन्मे नांहःशङ्का निवर्त्स्यति इति दुःस्वप्नवच्छिक्षां स गुरोः प्रास्मरद् ध्रुवम् ।।११९।। कामान्धानां न लज्जेति स्वप्रवादस्य तथ्यताम् । स्थापयितुमिव व्रीडा क्रीडयाऽपागमत्ततः ।।१२०।। विडम्बितश्रिया पात्रमपात्रन्यासतोऽहमाः । इतीवान्तः परीभावात्कुलमानस्ततोऽत्यगात् ।।१२१।। दुरपोहो महामोहो यस्तं धर्मादलोलयत् । कल्पानिलो महाशैलं भूतलात् किं न चालयेत् ।।१२२।। दुर्ग्रहः कर्ममहिमा यत्तस्यापीदृशी दशा । संख्याविदपि संख्यायात् को वा [1]नारककारिकाः ।।१२३।। अहो ! कर्म्मपरीणामस्तच्छीलमभनग् दृढम् । किंवा कल्पातपःशैलान्न कुर्यात्परमाणुसात् ।।१२४।। तदध्यासीय तद्राज्यमित्याचिन्ति ततोऽमुना । तुषकण्डनसोदर्या कृतं प्रव्रज्ययाऽनया ।।१२५।। भोगिनीभिः समं भोगान् भुञ्जे कुञ्जे भुजङ्गवत् । अपजह्यात्सुखं दृष्टं को ह्यदृष्टतदाशया ।।१२६।। सम्प्रधार्य मनस्येवं ततः स्वनगरीमगात् गृहीतद्रव्यलिङ्गोऽसावुद्याने तस्थिवान् बहिः ।।१२७।। असहायं तमालोक्य हूतः साकूतचेतसा । सद्य उद्यानपालेन गत्वा विश्वंभरापतिः ।।१२८।। किमेष पुनरेकाकीत्यवनिपो विभावयन् । ततः कतिपयश्रेष्ठपुंवृत्तोऽगात्तदन्तिकम् ।।१२९।। [2]ततो भग्नपरीणामं तं वीक्ष्य व्याकरोन्नृपः भो नरेन्द्रा ममारुच्या प्रागेवासावदीक्षत ।।१३०।। यावत्तथैव तज्जातमतः साम्प्रतमप्यसौ । राज्यं गृह्णात्वहं दीक्षामभ्युपैमीति साम्प्रतम् ।।१३१।। अपात्रमप्यसौ राज्ञा ततो राज्ये न्यवेश्यत । द्विषेऽपि प्राक् प्रतिज्ञातं नहि लुम्पन्ति सत्तमाः ।।१३२।। स प्रस्मृतपरीणामो गृध्नुस्तत्प्राप्य पिप्रिये । यथा लब्धपरीपाकं किम्पाकमशनायितः ।।१३३।। न कथञ्चिन्न्यवर्त्तिष्ट स ततो भोगलोलुपः । कस्य हीषत्करो रोद्धुं [3]काकपाकः पुरीषतः ।।१३४।। अदत्त राजलिङ्गानि तस्मै पृथ्वीपतिस्ततः । उद्वोढुं साधनानीव दुर्गतिं वामवीक्षणाम् ।।१३५।। ततोऽथ प्रतिजग्राह साधुलिङ्गानि भूपतिः । वरीतुं सुन्दरीं मुक्तिं साधनानि ध्रुवं मुदा ।।१३६।। राज्यं वितीर्य भूपेन चारित्रं कर्षता ततः । क्रमाद्दुर्गतिसद्गत्योः परिवृत्तिरिवादधे ।।१३७।। ततः सचिवसामन्तनागराणामनिच्छया । विलक्षः स उपाविक्षद्वञ्चकः सिंहविष्टरे ।।१३८।। अथ तं ते समारब्धोत्प्रासाभ्यासा

१. कारिका यातनाः ।। २. ततो राज्याभिलाषात् ।। ३. काकपाको वायसडिम्भः ।।

विमेनिरे । उच्छिष्टमिव को नष्टं भ्रष्टशीलं स्पृशेदपि ॥१३९॥ तावत्सद्मनि गत्वाऽह्नि दर्शयिष्ये तिरस्कृतेः । फलमेषामिति ध्यायन् क्रुधा सोऽथाविशत्पुरीम् ॥१४०॥ युगपत्सर्वभोज्यानामनवाप्तेरियच्चिरम् । नातृप्यन्मे कदाऽप्यात्मा समीयुस्तानि सम्प्रति ॥१४१॥ इत्युक्तमादिभेदेन स [1]सूदैर्नूनमादरात् । सर्वाङ्गीनो विनिष्पाद्य तान्यभुक्त प्रभूतशः ॥१४२॥ युग्मम् ॥ क्षोदितस्य क्षुधाऽत्यन्तं प्रकामस्निग्धभोजिनः । स्त्रीसङ्गमप्रसङ्गेन समग्रां जाग्रतो निशाम् ॥१४३॥ महावैशसभाण्डेन भण्डेनेवामुना वयम् । खण्डिता निशितैर्दन्तैरित्यमर्षप्रकर्षतः ॥१४४॥ शङ्के स्थानबलं प्राप्य भोज्यैस्तस्योदपाद्यतः । स्ववैरशुद्धये मृत्युसूचिका स्राग्विसूचिका ॥१४५॥ विशेषकम् ॥ तस्य दुःखलतामूलं प्रतिकूलमथायुषः । स्वच्छन्दं दारयत्तुन्दं शूलं शूलमिवासृजत् ॥१४६॥ लौल्यादीदृग्दशास्याभूत्किमतोऽपि भविष्यति । जाने नेतीव हृदयं चकम्पे तस्य शङ्कया ॥१४७॥ [2]मद्भागोऽप्यतिलाम्पट्यात्पर्यपूर्यमुना ध्रुवम् । भक्तेनेत्यकुपद्वायुरुदर्यो नाप्नुवन् स्थितिम् ॥१४८॥ अहं पानानुगं प्राय एष त्वम्बु विनाऽपि माम् । [3]अश्नन्नपाकृतेत्यन्तर्भक्तं तेने ध्रुवं तृषम् ॥१४९॥ एष नरकानुपूर्व्या हठान् समाकृष्यमाण इव गाढम् । विललाप गलगृहीतः पाटच्चर इव तलवरेण ॥१५०॥ यातनां नरकस्यैव प्रत्याययितुमङ्गिनाम् । प्रागेव वेदनीयेन तस्याऽतानि महाव्यथा ॥१५१॥ प्रयुक्ताऽत्र चिकित्साऽपि भविष्यति मलीमसा । इतीव कारयामासुर्बन्धवोऽपि न तस्य ताम् ॥१५२॥ आक्रन्दन्निन्दितः पौरैर्गोघातुक इवाथ सः । कर्णेजप इवाभ्यर्णे बान्धवैरवधीरितः ॥१५३॥ दरिद्र इव निद्रालुर्न्यत्कृतोऽमात्यमालया । वान्तःसामन्तचक्रेण मलिम्लुच इवात्मजः ॥१५४॥ ममधारयतः प्राणांश्चेद्विभाति विभावरी । जीवग्राहं ग्रहीष्येऽहं तदाऽमूनिति चिन्तयन् ॥१५५॥ सप्तम्यामप्रतिष्ठाने रौद्रध्यानवशीकृतः । नैरयिकस्त्रयस्त्रिंशत्सागरायुरभूद्भुवि ॥१५६॥ चतुर्भिः कलापकम् ॥ अथ तत्र प्रतीत्याहो ! [4]यदाकर्णनवर्णने । एलमूका भवन्ति ज्ञाः शिक्षितश्रुतिसूक्तयः ॥१५७॥ तीव्रास्ताः प्राच्यसङ्क्लेशसंस्कारोद्बोधपक्त्रिमाः । सम्भोगाशाप्लुतस्वान्तः सेहे पीडा विडम्बनाः ॥१५८॥ युग्मम् ॥ भिया परीषहाणां द्राग् वृश्चिकानामिवालयम् । स्वमिव व्रतमुत्सृज्य राज्यं पितृगृहं मुदा ॥१५९॥ श्रयन्नेव प्रमादान्ध्याच्चरिष्णुरसमञ्जसम् । दैवादाशीविषेणेव जग्रसे नरकेण सः ॥१६०॥ युग्मम् ॥ महर्षिः पुण्डरीकोऽपि पुण्डरीकोज्ज्वलाननः । [5]धन्योऽहं येन दीक्षेयं लेभे कामदुघेव गौः ॥९२॥

१. सूदैः सूपकारैः, सर्वाङ्गीनः सर्वभोजी ॥ २. मद्भागोपि षष्ठांशलक्षणः ॥ ३. अपाकृतेति, अभिमतासंपादनेन निराचकार ॥ ४. यासामाकर्णनं वर्णनं च प्रतीत्योद्दिश्य ज्ञा अप्येसमूकतां भजन्ते ॥ ५. आयतां आजगाम तान्तिः खेदः ॥

॥१६१॥ तद्गत्वा तामहं साक्षात्करोमि गुरुसाक्षिकम् । स्वधिया धीयमाना न क्रिया प्रामाण्यमश्नुते ॥१६२॥ इति चेतसि सन्धाय सत्यसन्धाय सूरये । निवेदयितुमात्मानं स प्रतस्थे व्रतस्थिरः ॥१६३॥ त्रिभिर्विशेषकम् ॥ यस्य प्रयातुरङ्गानि गलत्स्वेदकणच्छलात् । सुखासिकाऽधुना नः स्यात्क्वेति शोकादिवारुदन् ॥१६४॥ यातुरस्याधुना भूमौ गतं लालतमावयोः । इतीव हृदयस्फोटाद्रेमतुर्यत्क्रमावसृक् ॥१६५॥ चिरात् प्रस्ताव आवाभ्यामलाभीत्युन्मुदाविव । यमपीपिडतां बाढं क्षुत्पिपासापरीषहौ ॥१६६॥ तथाऽपि न स वैक्लव्यमव्यत्यस्तमना अगात् । धैर्यधुर्या विषीदन्ति विधुरेऽपि न साधवः ॥१६७॥ कुलकम् ॥ ग्राममध्यामधीः काञ्चित्सायमायततान्तिमान् । प्रार्थ्य तत्राश्रयं तार्णे प्रस्तरे निषसाद सः ॥१६८॥ प्राप्य पादौ गुरोर्दीक्षां कदा सम्यक्करोम्यहम् । इति ध्यायन्नमश्चके जिनांस्तत्र गुरून्निजान् ॥१६९॥ पापस्थानानि सर्वाणि कषायान् बन्धनद्वयीम् । शल्यानि धर्म्मसूरीणां प्रत्याचक्षेऽधुनाऽन्तिके ॥१७०॥ इत्यालोच्य प्रतिक्रम्य वपुरुत्सृज्य निर्जरः । सर्वार्थेऽसौ त्रयस्त्रिंशत्सागरायुरजायत ॥१७१॥ युग्मम् ॥ मोक्ष्यते पुण्डरीकात्माविदेहेषु ततश्च्युतः । उद्धृत्य कण्डरीकस्तु भवं भूरि भ्रमिष्यति ॥१७२॥ इत्थं दुर्गतिकीलशीलवसतेः श्रीपुण्डरीकाह्वयक्ष्मापस्य प्रशमं दिनैः कतिपयैरध्यूषुषः कञ्चन । क्लृप्तश्रीव्यतिषङ्गभङ्गविषयव्यासङ्गभङ्गिक्रमव्यावृत्तेः[1] फलमाकलय्य सहसा तस्या रमध्वं बुधाः ॥१७३॥ क्लिष्टेन ज्वलनेन हन्त ! मनसा [2]यत्कण्डरीको यदासक्तस्त्यक्तमहाव्रतोऽतनुतमाः कृत्वा तपस्यां समाः । [3]बह्वेधान्निरुवोषदोषमुषितज्ञानेक्षणस्तेष्वतः को रज्येत विचक्षणः क्षणमहो भोगेषु रोगेष्विव ॥१७४॥

**॥ इति कण्डरीककथा समाप्ता ॥**

---

१. क्लृप्तश्रीव्यतिषङ्गभङ्गः समृद्धिसम्बन्धध्वंसो येन स चासौ विषयव्यासङ्गश्च तस्य भङ्गिक्रमः प्रकृत्तिप्रकारपरिपाटी ततो व्यावृत्तिः ॥ २. यद् यस्मात्कारणात् कण्डरीकः कृत्वापि तपस्यां यदासक्तः ॥ ३. बह्वेधां प्रचुरधाम्नीम् अथ च वह्वेधान् प्राज्यकाष्ठानि, अतनुतमाः प्रभूताः ॥ समा वर्षाणि क्लिष्टमनोज्वलनेन बह्वेधानिव निर्दोषास्तेषु को रज्येत मनसां ज्वलने तत्पादौ व्यस्तरूपकम् ॥

अथ विषयभोगस्य हेयतामुपसंहरन् मोक्षसुखस्योपादेयतामाह–

**ता अलमिमेहिं मज्झं अज्जं कल्लं च दे चइस्सामि । मुक्खसुहाओ किमन्नं परमत्थेणत्थि सुक्खं ति ।।२१।।**

**व्याख्या**–यस्माद्विषयाणामयं परिणामस्तत्तस्मात् 'अलं' पर्याप्तम्, अलमिति निषेधेऽव्ययम्, एभिर्विषयैर्ममेति आत्मनिर्देशो अद्य कल्यं च अद्य श्वो वा लोकोक्त्या त्वरितमित्यर्थः 'दे' इति प्राकृतेऽव्ययम् इह आत्मसंमुखीकरणे 'त्यक्ष्यामि' प्रव्रज्याग्रहणेन परिहरिष्यामि, अथ किमदृष्टमुक्तिसातस्पृहयालुना दृष्टसुखपरित्यागश्चिन्त्यते ? इत्याह–'मोक्षसुखात्' निःश्रेयसशर्म्मणः सकाशात् किमिति प्रश्ने 'अन्यते' अपरंवैषयिकादि 'परमार्थेन' तत्त्वतः 'अस्ति' विद्यते 'सौख्यं' सातम् 'इतिः' हेतौ यस्मान्मोक्षसुखं विहाय तत्त्वचिन्तया न किञ्चिदन्यत्सुखमस्ति वैषयिकस्य सकलस्यापि सुखस्य क्षणक्षयित्वायाससाध्यत्वपरिणामविरसत्वादिदूषितत्वेन वस्तुतो दुःखत्वादिति गाथार्थः ।। ।। कथं मुक्तिसुखस्यैव सुखत्वं नान्यस्य इत्याशङ्क्य वैषयिकसुखापेक्षयोत्कृष्टात्प्रशमसुखादपि तस्योत्कर्षमाह–

**अक्खयमकिलेससाहणमलज्जणीयं विवागसुंदरीयं । पसमसुहमिमाहिंतो णंताणंतेहिं संगुणियं ।।२२।।**

**मुक्खस्स सुहं ता तस्स साहणे इहहुज्जमो जुत्तो । धन्ना तिव्विय परमत्थसाहगा साहुणो निच्चं ।।२३।।**

**व्याख्या**–'अक्षयं'समाहितकेवलात्माधीनतया अविच्छेदेनोत्पादात्, अक्षयमिव 'अक्षयं' नित्यम् अक्षयमुक्तिसुखकारणत्वाद्वा, अक्लेशसाधनं मनः–समाधिजन्यतया देहाद्यखेदनिष्पाद्यत्वादकष्टसाध्यम् 'अलज्जनीयं' स्त्रीपुंससङ्गमासाध्यत्वादत्रपास्पदं, विपाकसुन्दरं, तदेव स्वार्थे कप्रत्ययात् 'सुन्दरकं' प्रेत्यापवर्गहेतुत्वात्परिणामसुभगं 'प्रशमसुखं' चेतसो रागद्वेषकपाय विषादाद्यनेकविकाराऽरूपितत्त्वं प्रशमः स एव सुखं परमानन्दमयत्वात् तदुक्तम्–''**भोगसुखैः किमनित्यैर्भयबहुलैः काङ्क्षितैः परायत्तैः । नित्यमभयमात्मस्थं प्रशमसुखं तत्र यतितव्यम् ।।१।।**'' संसारेऽपि वसतां योगिनां मुनीनां विषयसुखेभ्यस्तावदनन्तगुणं प्रशमसुखं वर्त्तते, 'इमाहिंतो'त्ति अस्मादपि अपिरत्र स्वयंगम्यः तेन प्रशमसुखात्पुनरनन्तेभ्योऽनन्तैर्गुणकारैरिति शेषः 'सङ्गुणितम्' अभ्यस्तं किम् ? इत्याह–'मोक्षः' निखिलकर्म्मक्षयलभ्यो

जन्मजरामृत्युरोगशोकभयादिसंसारविकारविरहित ऐकान्तिकात्यन्तिकामन्दानन्दसुन्दरः परमपदस्थात्मस्वभावः, यदुक्तम्– **''कृत्स्नकर्मक्षयान्मोक्षो जन्ममृत्वादिवर्जितः । सर्वाबाधाविनिर्मुक्त एकान्तसुखसङ्गतः ॥१॥''** तस्य सुखं स्वतन्त्रमुत्कण्ठावियुक्तं दुःखसंभेदशून्यं प्रतिपक्षाबाधितं सकलकल्याणपरमकोटिरूपं नैसर्गिकं शाश्वतं शर्म्म यदाह– **''अपरायत्तमौत्सुक्यरहितं निष्प्रतिक्रियम् । सुखं स्वाभाविकं तत्र नित्यं भयविवर्जितम् ॥१॥ परमानन्दरूपं तद्गीयतेऽन्यैर्विचक्षणैः । इत्थं सकलकल्याणरूपत्वात्साम्प्रतं ह्यदः ॥२॥''** एतच्चैवंविधं सुखं न मानवानां नापि निखिलामराणां किन्तु मुक्तानामेव तथाचागमः– **''नवि अत्थि माणुसाणं तं सुक्खं णविय सव्वदेवाणं । जं सिद्धाणं सुक्खं अव्वाबाहं उवगयाणं ॥१॥ सिद्धस्स सुहो रासी सव्वद्धापिंडिओ जइ हविज्जा । सोऽणंतवग्गभइओ सव्वागासे न माएज्जा ॥२॥''** यत एवंरूपं सुखं न क्वचित्समस्ति तत्तस्मात् तस्य मोक्षसुखस्य साधने सम्पादके 'चारित्ते इह्व'त्ति इदानीम् 'उद्यमः' प्रयत्नो युक्तः' मम सङ्गतः कर्त्तुमिति शेषः, अत एव चारित्राभिलाषोत्कर्षात्तत्साधकान् विशेषेण प्रशंसन्नाह–'धन्याःसुकृतिनः, त एव नास्मदादयः 'परमार्थसाधकाः' परमपदलक्षणप्रधानपुरुषार्थनिर्मापकाः, साधयन्ति ज्ञानादिभिर्मोक्षं समतां वा सत्त्वेषु ध्यायन्ति निरुक्तैः, साधवो यतयः, आह च– **''निव्वाणसाहए जोगे जम्हा साहिंति साहुणो । समा य सव्वभूएसु तम्हा ते भावसाहुणो ॥१॥''** 'नित्यं' सर्वदा लोकव्यापारविरततयाऽनुपमशमसुखसंवेदनेन मुक्तप्रायत्वादिति गाथार्थः ॥ ॥ पुनस्तानेव स्तुवन्नाह–

**पिहियासवा तवड्ढा धणियं किरियामु संपउत्ता उ । रागदोसविउत्ता भवतरुनिस्सियासिणो धीरा ॥२४॥**

**व्याख्या**–आस्रवति–उपादत्ते जीवः कर्म्म एभिरित्यास्रवाः–प्राणिवधादयः, यथा निर्वृतैर्द्वारैः प्रविशता जलेन महासरः पूर्यते, एवमास्रवद्वारैरसंवृतैः कर्म्मणा जीवोऽपि, ततस्तन्निवारणाय 'पिहितास्रवाः' निरुद्धास्रवद्वाराः, अनशनप्रायश्चित्तादिभेदा–द्वादशविधेन बाह्याभ्यन्तररूपेण तपसा आढ्या धनिनस्तद्वत्त्वात्तेषां धणितम्–अत्यर्थं, क्रियासु प्रत्युपेक्षाप्रमार्जनादिदिवसचर्यासु 'संप्रयुक्तास्तु' व्यग्रा एव 'तुः' एवकारार्थः, एतेन न ते ज्ञानमात्रान्मुक्तिमिच्छन्ति किन्तु ज्ञानक्रियासमुच्चयादिति व्यञ्जितं

ज्ञानक्रिययोरेकैकशोऽभिमतफलसाधकत्वेन तैरनिष्टत्वान् यदाह–''**हयं नाणं किया हीणं हया अन्नाणओ किया । पासंतो पंगुलो दड्ढो धावमाणो य अंधओ ।।१।।** क्रियोद्यता अपि रागादिमन्तो न तथा फलभाज इति आह–रागद्वेषवियुक्ता अभिष्वङ्गमात्सर्यविनिर्मुक्ता अत एव 'भवतरुनिशितासय' संसारविटपिच्छेदनतीक्ष्णकरवालाः 'धीराः' बुद्धिमन्तः, अनेन ज्ञानिता दर्शिता व्यसनेष्वप्यविह्वलमनसो वेति गाथार्थः ।। ।। चारित्रिणः स्तुत्वा संप्रति त्वस्य चारित्रेच्छातिशयं व्यञ्जयन्नाह–

**कइया होही सो वासरुत्ति गीयत्थगुरुसमीवंमि । सव्वविरयं पव्वज्जिय विहरिस्सामि अहं जम्मि ।।२५।।**

**व्याख्या**–'कदा' कस्मिन् काले भविष्यति स इति ममाभीष्टो 'वासरः' दिवसः, इतिशब्दादाद्यर्थात्तिथिनक्षत्रादिपरिग्रहः, 'गीतार्थगुरुसमीपे' बहुश्रुतसुविहिताचार्यपार्श्वे एतेनागीतार्थसमीपे प्रव्रज्यादिनिषेधमाह, तस्य स्वयं दीक्षादिसकलयतिसामाचारी चातुरीविरहेणायतमानस्य परेषामनुष्ठानप्रयत्नोत्पादनायोगात्, यदाह–'**पव्वावणविहिंसु ठावणं च अज्जाविहिं निरवसेसं । उस्सग्गववायविहिं अजाणमाणो कहं जयउ ।।१।।**' सर्वविरतिं भागवतीं भावदीक्षां 'प्रपद्य' स्वीकृत्य 'विहरिष्यामि' अनियतवासादिमुनिक्रियासु यतिष्ये अनित्यवासभिक्षाचर्याऽज्ञातोञ्छप्रमुखो यतीनां क्रियाकलापो विहारोऽत्राभिधीयते, आह च–''**अणिययवासो समुयाणचरिया सन्ना य उंछंपइरिक्कयाय । अप्पोवहीकलह विवज्जणा य विहारचरिया इसिणं पसत्था ।**'' अहमित्यात्मानं निर्दिशति, यस्मिन् वासरे प्रव्रज्याग्रहणविकलतयाऽशेषशेषवासराणां वैफल्येन तस्यैव साफल्यादिति गाथार्थः ।। ।। सम्प्रति कर्म्मदोषाच्चारित्रेऽप्रवर्त्तमानः स्वं निन्दन्नाह–

**धी धी मज्झ अणज्जस्स इंदियत्थेसु संपउत्तस्स । परमत्थवेरिएसु विदाराइसु गाढरत्तस्स ।।२६।।**

**व्याख्या**–धिगित्यव्ययं निन्दायां वीप्सया तु स्वस्यातिनिन्दतां द्योतयति, मामित्यात्मनिर्देशे धिग् योगे द्वितीयाप्राप्तावपि प्राकृतत्वात् षष्ठी, 'अनार्यस्य' असमंजसचरिततया असाधोः 'इन्द्रियार्थेषु' चक्षुरादीन्द्रियग्राह्येषु शब्दादिविषयेषु 'संप्रयुक्तस्य' व्यासक्तस्य तथा परमार्थवैरिष्वपि तत्त्ववृत्त्या प्रतिकूलेष्वपि 'दाराः' कलत्रम् आदिग्रहणात्पुत्रपुत्रिकादिग्रहः, तेषु 'गाढम्' अतिशयेन् 'रक्तस्य' स्नेहमग्नस्य दारादिरागस्यातिगरीयस्तया दुर्गतिदुःखमूलकारणत्वात्ततो वस्तुतः शत्रव दारादयोऽतस्तेष्वपि रागो

ममानार्यतामाऽऽविष्करोतीति गाथार्थः ।। ।। अथ चिन्तामुपसंहरन्नाह—

**इइ भावणासमेओ विरत्तकामो पयट्टमाणो । कम्मवसा विरएसुं बाहुमाणपरो सदोसन्नू ।।२७।।**

**व्याख्या**—'इति अनन्तरोक्ता भावना स्वनिन्दागुणवद्गौरवपुरस्सरं शुभालम्बनं मनःप्रणिधानं तया समेतः—सम्पन्नः' विरक्तकामः, भोगपराङ्मुखमनाः, प्रवर्त्तमानोऽपि भोगान् सेवमानोऽपि कर्म्मवशाच्चारित्रमोहनीयपारतन्त्र्यात्, विरतेषु सर्वतो देशतश्च निवृत्तकामेषु बहुमानपरः प्रमोदनिर्भरः, तत्र सर्वतो विरतेषु यथा कृतार्था अमी महासत्त्वा मुनयो निगृहीतकामा आजीवितं विमलं शीलमनुशीलयन्ति, यथोक्तम्—''**वन्द्यास्ते पूजनीयास्ते तैस्त्रैलोक्यं पवित्रितम् । यैरेष भुवनक्लेशी काममल्लो निपातितः ।।१।।**'' देशतो विरतेषु यथा धन्यास्ते कामदेवप्रभृतयः श्राद्धा ये गृहे वसन्तोऽपि देवाद्युपसर्गैरप्य-प्रकम्प्रमानसा व्यपगतमन्मथतृष्णा अतिचारपङ्कविहीनां देशविरतिं प्रतिपद्य पालयामासुः, तदुक्तम्—''**संसर्गेऽप्युपसर्गाणां दृढव्रतपरायणाः । धन्यास्ते कामदेवाद्याः श्लाघ्यास्तीर्थकृतामपि ।।१।।**'' स्वदोषज्ञो विदितभगवद्धर्म्मतत्त्वोऽप्येवमहमसमञ्ज-सकारीति निजापराधदर्शीति गाथार्थः ।। अथ भावनाफलं दर्शयन् सम्यग्दृष्टेर्गाथाचतुष्टयेन क्रियामाह—

**चारित्तपक्खवाया अप्पडिविरओ सुरेसु । संविग्गो विरओ इच्चुव्विय संविग्गो पूयाण विघाओ ।।२८।।**

**व्याख्या**—चारित्रपक्षपाताद् विप्रकृष्टदेशायातपथि श्रान्तदुर्गतक्षुधितब्राह्मणस्य घृतपूर्णभोजनाभिलाषाधिकाच्चरणानुरागात् 'अप्रतिविरतोऽपि' अल्पस्थूलप्राणातिपातादिप्रत्याख्यानरहितोऽपि आस्तां तद्विरत इत्यपेरर्थः, बध्नाति—अर्जयति आयुरिति शेषः, 'सुरेषु' देवेषु सम्यक्त्वस्य देवायुर्बन्धनिबन्धनत्वेऽपि चारित्रप्राधान्यख्यापनार्थं चारित्रपक्षपातादित्युक्तम् 'अत एव' चारित्रपक्षपातादेव संविग्नो मोक्षैकतानमानसः, अनेन यथाक्रमं वृत्तवर्त्तिष्यमाणाभ्यां भावनाक्रियाभ्यां संवेगाख्यलिङ्गवत्त्वं तस्य व्यनक्ति 'विरतः' निवृत्तः पूज्यानां भव्यसत्त्वैर्भक्त्या विधिना च विधीयमानानां भगवत्प्रतिमादिसपर्याणां 'विघ्नात्' अन्तरायात् स हीर्ष्याभिमानादिभिरसहिष्णुतयेतरदेवीनिर्माप्यमाणसर्वज्ञबिम्बार्चनादिविघ्नप्रवृत्तानां कुन्तलदेव्यादीनां दारुणं फलमाकलयन् कथमिव पूजान्तरायं विदध्यात् प्रत्युत पूजकानामनुमोदनां साहायकं चासौ कुर्यादिति, यद्वा पूजाशब्देन पूजार्हाणामुपलक्षणं तेन

पूज्यानां चैत्यसाध्वादीनां विघ्नाद्–विध्वंसाशातनादेरुपसर्गाद्विरतः सहि–''**साहूण चेइयाण य पडणीयं तह अवन्नवाइं च । जिणपवेणस्स अहियं सव्वत्थमेण वारेइ**'' इति न्यायेनान्यानपि विघ्नकारिणः सर्वबलेन निवारयन् कथं स्वयं तत्र प्रवर्त्तत इति गाथार्थः ॥

**पाणच्चयेवि न कुणइ जत्तो जिणसासणस्स उड्डाहो । गुणिणो बहुमाणपरो दाराइसु सिढिलपडिबंधो ॥२९॥**

**व्याख्या**–'प्राणात्ययेऽपि' जीवितप्रध्वंसेऽपि 'न करोति' न विधत्ते तदिति शेषः 'यतः' यस्माच्चौर्यपारदार्य–साधर्मिकदेवद्रव्यभक्षणसाध्वीप्रतिसेवादेः कर्म्मणः 'जिनशासनस्य' भगवत्प्रवचनस्य 'उड्डाहो' मालिन्यं भवतीति शेषः, तीर्थमालिन्यविधानस्य तेन स्वस्यान्येषां च बोधिघातुकत्वेन सम्प्रधारणात्, यथोक्तम्–''**यः शासनस्य मालिन्येऽनाभोगेनापि वर्त्तते । स तन्मिथ्यात्वहेतुत्वादन्येषां प्राणिनां ध्रुवम् ॥१॥ बध्नात्यपि तदेवालं परं संसारकारणम् । विपाकदारुणं घोरं सर्वानर्थविवर्द्धनम् ॥२॥**'' गुणिन इति जातिविवक्षयैकवचनं सप्तम्यर्थे च षष्ठी तेन 'गुणिषु' ज्ञानादिगुणवत्सु पात्रेषु 'बहुमानपरो' भक्तिप्रह्वाङ्गः 'दारादिषु' भार्यापुत्रप्रभृतिषु 'शिथिलप्रतिबन्धः' मन्दस्नेहः, तत्प्रतिबन्धस्य दीर्घसंसारप्रबन्धबीजत्वेन तेनावगमादिति गाथार्थः॥

**संसारियअब्भुदये न मुणइ हरिसं असंजमे धणियं । वट्टन्तो परितप्पइ मुणइ उवादेयमह धम्मं ॥३०॥**

**व्याख्या**–सांसारिकाभ्युदये साम्राज्यपरमैश्वर्यस्वाराज्याद्यैहिकामुष्मिकभवप्रभवमहासमृद्धिलाभे 'न मुणइ'त्ति नानुसंधत्ते 'हर्षम्' आत्मोत्कर्षं क्षणिकत्वेन तस्य तेन निर्णीतत्वात्, अत एव सम्यग्दृष्टेस्तल्लाभनाशाभ्यां न हर्षविषादसम्भवः 'असंयमे' नानारूपगृहारम्भकृष्यादिना जीववधाद्यविरतौ 'धणियं' अतिशयेन 'वर्त्तमानः' व्याप्रियमाणः 'परितप्यते' पश्चात्तापमनुभवति अविरतिहेतुकत्वेन कर्म्मबन्धस्य तेन प्रतीतेः, 'मुणइ' जानाति, उपादेयं कर्त्तव्यतया ग्राह्यम्, अथेति परितापानन्तरं 'धर्म्मं' सर्वविरतिलक्षणं तस्यैव निःश्रेयसावन्ध्यकारणत्वेन निश्चिततत्वात्, अत्र च भिन्नवाक्यतया मुणइ इति क्रियाया द्विरुपन्यासो न दुष्ट इति गाथार्थः ॥

**चेइयजइसु बज्जुज्जउ जत्तियमत्तं तदेव सहलंति । अन्नमणत्थमणत्थस्स बट्टयं मुणइ निच्चंपि ॥३१॥**

**व्याख्या**—चैत्येषु—भगवद्बिम्बादिषु यतिषु चारित्रिषु 'उपयुज्यते' उपकुरुते आत्मानुग्रहबुद्ध्या तेभ्यो दीयत इत्यर्थः 'यावन्मात्रं' यावत्प्रमाणं धनधान्यद्विपदचतुष्टदादिकं, तदेव तावन्मात्रमेव सफलमिति सार्थकमित्येवंरूपतया मन्यत इत्युत्तरेण सम्बन्धः, चैत्यदानादेरेव पुण्यानुबन्धिपुण्यजनकत्वेन मुक्तिहेतुतया निर्णयात् तत्रैव तस्य सदा प्रवृत्तेरित्यर्थः, अन्यत्पुनश्चैत्यसाधूपयुक्तादपरम् 'अनर्थं' निष्प्रयोजनं निष्फलमितियावत्, 'अनर्थस्य' अर्थलुब्धपार्थिवतस्करादिग्राह्यतया वेश्याद्यूतकुटुम्बाद्युपयोगितया च संसारक्लेशदुर्गत्याद्यैहिकपारभविकापायस्य 'वद्र्धकं' विस्तारकं 'मन्यते' निश्चिनोति 'नित्यमपि' सर्वदैवेति गाथार्थः ॥ सम्प्रति संवेगलिङ्गं निगमयन्नाह—

**इइ किरियाए इइ भावसंगओ निच्छएण सम्मत्ती । भावो णज्जइ पच्छाणु तावओ तासु किरियासु ॥३२॥**

**व्याख्या**—'इति क्रियया' शासनोड्डाहरक्षाचैत्यादिपूजाप्रभृतिकया अनन्तरोक्तया सच्चेष्टया करणभूतया, इति भावसङ्गतः—क्रियायाः प्राग्व्यावर्णितसर्वविरतिजिघृक्षादिपरिणामसमेतः 'निश्चयेन' निःसंशयं 'सम्यक्त्ववान्' सम्यग्दृष्टिर्भवतीति शेषः तदन्तरेण तथारूपभावाभावात्, अथैवंविधो भावोऽन्तरङ्गत्वात्कथं लक्ष्यते ? इत्यत आह—'भावः' संवेगापरनामा मुक्तिमनोरथो 'ज्ञायते अनुमीयते, पश्चात्' करणान्तरमनुतापात् किं मया पापेनेदं दुष्कृतं कृतमित्युद्वेगात्, तासु पश्चात्तापयोग्यासु विषयसेवादिकासु क्रियासु, प्रयोगश्चात्र विवक्षितः पुरुषः सम्यक्त्ववान् संवेगवत्वात् जम्बूस्वामिवदिति द्रष्टव्यः, अध्यास्य [1]कुन्दविशदद्युतिसिद्धिसौधं वेगादहष्टचरसिद्धिसमाजगोष्ठ्याम्[2] । सम्यग्दृशोऽकृतकसातसुधापिपासोः संवेगनाम विवृतं खलु लिङ्गमेतत्, इति गाथार्थः ॥ द्वितीयं लिङ्गमिति पूर्ववद्द्रष्टव्यम् ॥

---

१. सिद्धिर्मुक्तिस्तस्या कर्मकालुष्याभावात् विशदत्वं मुक्तिशिलायास्तु स्फटिकवर्णत्वेन ॥ २. गोष्ठ्यां पानभूमौ ॥

## अथ तृतीयलिङ्गं ३ ।

साम्प्रतं तृतीयं लिङ्गं व्याख्यातुं तद्वतश्चिन्तामाह–

**सम्मद्दिट्ठी जीवो भवगहणदुहाणं सुट्ठु निव्विण्णो चिंतेइ । अणाइभवो अणाइजीवो तहा कम्मं ॥३३॥**

**व्याख्या**–'सम्यग्दृष्टिः' संवेगाख्येन लिङ्गेन लक्ष्यमाणसम्यक्त्वो 'जीवः' प्राणी 'भवगहनदुःखेभ्यः' संसारविपिनकृच्छ्रेभ्यः पञ्चम्यर्थे षष्ठी, सम्बन्धविवक्षया वा 'सुष्ठु निर्भरं निर्विण्णः' उद्विग्नः, भवत्येव हि सम्यग्दृशां जन्मजरादिपीडितानां पुनस्तत्प्रादुर्भावमनिच्छतां मनसि सन्तापः, यदुक्तम्–''**जरामरणदौर्गत्यव्याधयस्तावदासताम् । जन्मैव किं न धीरस्य भूयो भूयस्त्रपाकरणम् ॥१॥**'' 'चिन्तयति' मनसा ध्यायति 'अनादिः' प्रवाहवाहितया इतः प्रभृत्ययं जात इति प्राथम्यशून्यः, अत्र विसर्गलोपः प्राकृतत्वात्, एवमन्यत्रापि, भवन्ति कर्मवशवर्त्तिनः प्राणिनोऽस्मिन्निति भवः–संसारः अनादिः–अनुत्पत्तिधर्मतया इदं प्रथमताविकलः 'जीवः' आत्मा तथेति संतानवृत्तितया अनादीत्यर्थः 'क्रियते' निर्वर्त्त्यते जीवेन मिथ्यात्वादिभिः कारणैरिति कर्म्म, ज्ञानावरणादिकमिति गाथार्थः ॥३३॥ ततः किम् ? अत आह–

**बहुसो अणाइसंसारसायरे नरयतिरियदुक्खाइं । पत्ताइं कम्मवसवत्तिजन्तुणा नत्थि संदेहो ॥३४॥**

**व्याख्या**–'बहुशः' अनन्तकृत्वः 'अनादिसंसारसागरे' अनर्वाचीने भवपारावारे 'नरकतिर्यग्दुःखानि' नरकतिर्यग्गतिजन्मोत्था वेदनाः 'प्राप्तानि' लब्धानि कर्म्मवशवर्त्तिजन्तुनाऽनादिकर्म्मपरतन्त्रेणानादिना देहिना 'नास्ति सन्देहः' अस्मिन्नर्थे न विद्यते संशयः, भवजीवकर्म्मणां त्रयाणामपि अनादितयाऽनन्तशो दुःखप्राप्तेर्निश्चितत्वादित्यर्थः, गतिचतुष्टयभावित्वेऽपि दुःखस्य प्रायः प्राणिनां पापकारित्वेन नरकतिर्यक्षूत्पादात् मनाक्सुखसंभेदवत्यौ मनुजदेवगती विहाय नरकतिर्यग्दुःखप्राप्तिरनन्तशो जीवस्येहोक्तेति भाव इति गाथार्थः ॥३४॥

**एवमणंतो जीवो मिच्छत्ताईनिबंधणमणंतं कम्मं । तत्तो संसारदुहसयाइं च पुणारुत्तं एवत्ति ॥३५॥**

**व्याख्या**–एवमिति अनन्तरोक्तानादित्ववत् 'अनन्तः' अविनाशी प्रध्वंसाभावशून्यतया नित्यः 'जीवः' जन्तुः 'मिथ्यात्वं' प्रतीतम् आदिशब्दादविरतिकषाययोगा गृह्यन्ते, तन्निबन्धनं मिथ्यात्वादिहेतुकं दीर्घत्वं प्राकृतत्वात् 'अनन्तम्' अपर्यवसितं 'कर्म्म' प्रसिद्धम्, इह च कर्मणो जीवेन सहानन्तपुद्गलपरावर्त्तानुगामुकत्वात् प्रवाहरूपतयाऽनन्तत्वं जीवस्य तु नित्यतया तद्बोद्धव्यं, ततः कर्म्मणः 'संसारदुःखशतानि' भवकष्टपरम्पराः 'चः' अवधारणे 'पुनरुक्तमेव' वारंवारमेव भवन्तीति शेषः, यदुक्तम्–"**रङ्गभूमिर्न सा काचिच्छुद्धा जगति विद्यते । विचित्रैः कर्म्मनेपथ्यैर्यत्र सत्त्वैर्न नाटितम् ॥१॥**" अत्र चैकस्याप्यत्यन्तोच्छेदे दुःखपरम्परानुपपत्तेर्द्वयोरप्यानन्त्यमुक्तं न किञ्चिदेकमेकस्मात्सामग्र्याः सर्वसम्भव इति न्यायादिति गाथार्थः ॥३५॥ इदानीं गतिचतुष्टयेऽपि दुःखं भावयन् नरकादिगतिक्रमेण तन्निरूपणायाह–

**अच्छिनिमीलियमित्तं नत्थि सुहं दुक्खमेव संतत्तं । नरओ नेरईयाणं अहोनिसं पच्चमाणाणं ॥३६॥**

**व्याख्या**–'अक्षिनिमीलितमात्रं' लोचननिमेषपरिमाणम् अत्यल्पपीत्यर्थः, 'नास्ति' न विद्यते 'सुखं' शर्म्म 'दुःखमेव' कष्टमेव, 'संतप्तं' तीव्रं, दुस्सहमिति यावत् सुखानुषक्तं हि दुःखं तीव्रमपि कथञ्चित्सोढुं शक्येत, तत्र य सुखसंभेदगन्धोऽपि नास्ति इत्येवकारार्थः, अन्यथा सुखनास्तित्वाभिधानेनैव दुःखसम्भवप्राप्तेर्दुःखमेवेत्यभिधानं पुनरुक्तमापद्येत्,यद्वा 'संतत्त'मिति द्विर्भावः प्राकृतत्वात् तेन सन्तत–मविच्छिन्नमित्यर्थः, 'नरके' सीमन्तादौ 'नैरयिकाणां' नारकाणाम् 'अहर्निशं' प्रतिक्षणं पच्यमानानां तन्दुलानामिव कुम्भ्यां वह्निना राध्यमानानाम्, अत्र च जिनजन्मादिक्षणे मनाग्नारकाणां सुखसम्भवेऽप्यल्पीयस्तया तदविवक्षणादेवमुक्तमिति गाथार्थः ॥३६॥ अथ तत्र कियन्तं कालमुत्कर्षतो नारकाणामेवंविधं दुःखं भवति ? इति अत आह–

**सागरमेगं ति य सत्त दस सत्तरस तह य बावीसा । तित्तीसं जाव ठिइ सत्तसु पुढवीसु उक्कोसा ॥३७॥**

**व्याख्या**–'सागरं' समयभाषया पल्योपमदशकोटिकोटिप्रतीमः कालः सागरोपममेकं, तथा त्रीणि सप्त दश 'चः' ॥१०१॥
समुच्चये सप्तदश तथा येति समुच्चये द्वाविंशतिः त्रयस्त्रिंशतं यावदित्यव्ययमवधौ. तद्योगेच द्वितीया सागरोपमाणीति सर्वत्र

संबध्यते, स्थीयते विवक्षिते भवेऽनयेति स्थितिः, आयुः सप्तसु रत्नप्रभाशर्क्कराप्रभाद्यासु पृथिवीषु पृथिवीत्याख्यया समयप्रसिद्धासु यथाक्रमम् 'उत्कृष्टा' उत्कर्षमापन्ना गरीयसीत्यर्थः नारकाणां भवतीतिशेषः, यथा रत्नप्रभायां सागरोपममेकं, शर्क्कराप्रभायां त्रीणि सागरोपमाणि, एवं शेषास्वपि बोद्धव्यम्, इह च पापीयसां प्राय उत्कृष्टैव स्थितिर्भवतीति ज्ञापनार्थमुत्कृष्टा सा दर्शिता, जघन्या तु प्रथमायां दशवर्षसहस्राणि द्वितीयादिषु तु पूर्वस्यां पूर्वस्या या उत्कृष्टा सा यथोत्तरं जघन्या मन्तव्येति गाथार्थः ॥३७॥

**नरयाओ उव्वट्टो तिरिओ नरए पुणो वि तिरिएसुं । दमणंकणाइजणीयं भयतण्हछुहाइजणियं च ॥३८॥**
**दुक्खं नरयसमाणं तत्थ य मणुओ तु हयविहिनियोगा । हीणकुलजाइ जीवो पेसाण वि पिसणनिउत्तो ॥३९॥**

**व्याख्या**—'नरकात्' प्रतीतात् 'उद्वृत्तः' स्थितिक्षयेण प्रत्यावृत्तः 'जीवः' तिर्यग्भुजगसिंहगृध्रादिरूपतिर्यग्जातीयो भवतीति शेषः, तत्र च पापं संचिन्त्य 'नरके' नरकावासे उत्पद्यते 'पुनरपि' भूयोऽपि निकादुद्वृत्त्य असम्भृतधर्म्मत्वात् 'तिर्यक्षु'तिर्यग्जातौ वृषभादिषु जायते, तत्र च दुःखं नरकसमानमित्युत्तरगाथया सम्बन्धः, कीदृशम् ? इत्याह—'दमनम्' अशिक्षितस्य वृषभादेराहारादिनिषेधरज्वादिसंयमनपुरस्सरं वश्यतापादनम् 'अङ्कनं' प्रत्यभिज्ञानार्थं देहत्वग्दाहपूर्वमक्षरादिनिर्माणम्, आदिग्रहणात्कर्णच्छेदनासिकावेधासनकरणनिर्लाञ्छनादिपरिग्रहः, ततो द्वन्द्वगर्भो बहुव्रीहिः, तैः 'जनितम्' उत्पादितं 'भयं' प्रहारार्थं प्राजनलगुडाद्युत्क्षेपेण त्रासः 'तृष्णा' जलाप्राप्तौ दुस्सहा पिपासा 'क्षुत्' आहारालाभे शरीरग्लानिहेतुर्बुभुक्षा, आदिशब्दाच्छी—तवातातपादिग्रहः, अत्रापि पूर्ववत्समासः, तैर्जनितं 'चः' समुच्चये 'दुःखं' नानाविधा बाधा 'नरकसमानं' दुर्विषहत्वान्निरयतुल्यं तत्र चेति तिर्यक्षु पुनर्जातस्य भवतीतिशेषः, यदुक्तम्—''**सीउण्हवासधारानिवायदुक्खं सुतिक्खमणुभूयं । तिरियत्तणंमि नाणावरणसमुत्थाएणावि ॥**'' एवं तिर्यग्गतौ भूयांसमनेहसं महादुःणान्यनुभूय ततः कथञ्चित्कर्म्मक्षयोपशमेन निष्क्रान्तः सन् पुनर्मनुजः, तुः पूर्वस्माद्'भिनत्ति' मनुष्यतया जायते, ततश्च हतविधिनियोगाद् दुःखसागरं गच्छतीत्युत्तरगाथान्तेन सम्बन्धः, हतेति दुर्दैवस्याक्रोशवचनं विधिर्दैवं कर्मेत्यनर्थान्तरं, तेन दग्धकर्मपारवश्यात् 'हीनकुलजातिः' कुलं—पैतृकं जातिर्मातृकी

ततो नीचचण्डालादिकुलजातिप्रसूत इत्यर्थः, विभक्तिलोपः प्राकृतत्वात् 'जीवः' जन्तुः 'प्रेष्याणामपि' नीचानामपि 'प्रेषणनियुक्तः' कर्म्मकरणव्यापृतः, दुष्कर्म्मयोगात्प्रेष्या अपि तं स्वनिन्द्यकर्म्मसु व्यापारयन्तीत्यर्थ इति गाथाद्वयार्थः ॥३९॥

**वाहिसयविहुरियंगो दारिद्दमहागहेण परिभूओ । पियविप्पओगविहुरियचित्तो दुहसागरमईइ ॥४०॥**

**व्याख्या**–'व्याधिशतविधुरिताङ्गः' आमयसमूहपीडितगात्रः, दारिद्र्यमहाग्रहेण प्रभूतविडम्बनाकारित्वाद्दौर्गत्यमेव महाभूतं तेन 'परिभूतः' सर्वेषां हीलागोचरीकृतः, अत एव पठ्यते–"**निर्द्रव्यो ह्रियमति ह्रीपरिगतः प्रभ्रंशते तेजसो, निस्तेजाः परिभूयते परिभवान्निर्वेदमागच्छति । निर्विण्णः शुचमेति शोकविहतो बुद्धेः परिभ्रश्यति, प्रभ्रष्टः क्षयमेत्यहो ! निधनता सर्वापदामास्पदम् ॥१॥**" 'प्रियविप्रयोगविधुरितचित्तः' प्रतिकूलदैवयोगात्प्रेयसीपुत्रभ्रातृपित्रादिविरविह्वलीकृतमनाः, दुःखसागरं सागरजलवदपरिमेयत्वाद्दुःखानां सागरेणोपमा कृच्छ्रसमुद्रम् 'अईइ'त्ति गच्छति गमेस्तिप्रत्ययान्तस्य प्राकृते अईत्यादेशः तत्र निमज्जतीत्यर्थः, यदुक्तम्–"**अंतोनिक्खंतेहि पत्तेहिं पियकलत्तपुत्तेहिं । सुन्ना मणुस्सभवनाडएसु निज्झाइया अंका ॥१॥**" इति गाथार्थः ॥४०॥

**अप्पियसमागमुब्भवदुहमुग्गरदलियमाणसो जीवो । पावइ जं दुहं तं जिणाउ को वागरेउ अन्नो ॥४१॥**

**व्याख्या**–'अप्रियसमागमोद्भवानि' प्रतिकूलकलत्रदुष्पुत्ररिपुखलप्रमुखानिष्टसंयोगप्रादुर्भूतानि 'दुःखानि' क्लेशाः तान्येवमुद्गरो–हृदयशिलास्फोटकत्वाद् घणः, तेन दलितमानसः–चूर्णितचेताः बाढं कदर्थित इति यावत्, 'जीवः' प्राणी 'प्राप्नोति' अनुभवति यद् दुस्तार्णत्वात् अपरिगण्यत्वाच्चार्वाग्दृशाऽभिधातुमशक्यं 'दुःखम्' अविच्छिन्नसन्ततितया जायमानम् असातं, तत् दुःखं 'जिनात्' सर्वज्ञात् को महावाग्म्यऽपि 'व्याकुर्यात्' निःशेषतया व्याहरेत् 'अन्यः' अपरः न कश्चिदित्यर्थः, अचिन्त्यातिशयशालि–तया जिनस्यैव तज्ज्ञानव्यावर्णनयोः सामर्थ्योलब्धेरिति गाथार्थः ॥४१॥

**चिंतासंतावेहि य दारिद्दरुयाहि दुप्पउत्ताहि । लद्धूणवि माणुस्सं मरंति केइ सुनिव्विण्णा ॥४२॥** 

**व्याख्या**–'चिन्ता' कुटुम्बपोषणादिकृते चित्तव्यग्रता, सन्तापाः–राजचौरादिग्रहजन्याः, शारीराः क्लेशास्ततो द्वन्द्वस्तैः

'चः' समुच्चये स च यथायोगं योज्यः 'दारिद्र्येण' निःस्वतया 'रुजाभिः' कासादिरोगैः, अत्रापि द्वन्द्वः, 'दुष्प्रयुक्ताभिः' प्रागुपार्जितदुष्कृतजनिताभिः 'लब्ध्वाऽपि' दुरापं प्राप्यापि 'मानुष्यं' मानवजन्म, म्रियन्ते–प्राणांस्त्यजन्ति 'केचित्' अकृतपुण्याः 'सुनिर्विण्णाः' दुःखप्रकर्षादतिदैन्योपदद्रुताः, इह च शारीरमानसानेकदुःखप्रदर्शनेन भव्यजन्तूनां सर्वथा निर्वेदोत्पादनस्य साध्यत्वात् तैरेव पदैः पुनः पुनस्तदुपदेशो पौनरुक्त्यं न शङ्कनीयमिति गाथार्थः ॥४२॥

देवोवि पुढवीकाए उववज्जिउकामु तं विचिंतेइ । जं जिणवराउ अन्नो वागरिउं जे समत्थो को ॥४३॥

**व्याख्या**–'देवोऽपि' त्रिदशोऽपि. मनुष्याद्यपेक्षया, समुच्चये अपिः, 'पृथिवीकाये' षड्जीवनिकायाद्यनिकायेऽसङ्ख्येय–स्थितिके, अप्कायवनस्पत्योरुपलक्षणं चैतत् 'उत्पत्तुकामः' जनिष्यमाणो, देवानामप्येकेन्द्रियजातिप्रायोग्यतथाविधाविरत्यादिप्रत्ययेन तत्रोत्पादश्रवणात् यदाह–''**पुढवीआउवणस्सइगब्भे पज्जत्तसंखजीवीसु । सग्गच्चुयाण वासो सेसा पडिसेहिया ठाणा** ॥१॥'' 'तत्' अनुभवैकगोचरम् आर्त्तध्यानं 'विचिन्तयति' नाटयति, आह च–''**एगदिणे जे देवा चविंति तेहिंपि माणुसा थोवा । कत्ता मे मणुभवो इइ चिंतइ सुरवरो दुहिओ** ॥१॥'' यत् 'जिनवरात्' अर्हतः 'अन्यः' अपरः अर्वाग्दर्शी 'व्याकर्त्तुं' भणितुं 'जे' इति वाक्यालङ्कारे 'समर्थः' शक्तः, कः न कोऽपीत्यर्थः, इति गाथार्थः ॥४३॥

**तं सुरविमाणविहवं चिंतिय चवणं च देवलोगाओ । अइबलियं चिय जन्न वि फुट्टइ सयसक्करं हिययं ॥४४॥**

**व्याख्या**–'तम्' अद्भुतसौख्यहेतुतयाऽनुभूतपूर्वं 'सुरविमानविभवं' रत्नकनकविभूषणमहार्हांशुकदिव्याङ्गनापरिच्छदादिकं देवावासैश्वर्यं 'चिन्तयित्वा' पर्यालोच्य 'च्यवनं च' स्थितिक्षयेण प्रतिपातं च चिन्तयित्वा, चशब्दश्चिन्ताद्वयस्यापि यौगपद्यं ध्वनति, 'देवलोकात्' तादृक्सुखातिशयास्पदात् स्वर्गात्, अतिबलिकमेव अत्यर्थनिष्ठुरमेव 'यत्' यस्मात् 'नापि' नैव 'स्फुटति' विदीर्यते 'शतशर्करं' शतखण्डं हृदयं चेताः, यथा घटःस्फोटकारणलगुडाद्यभिघाताच्छतशर्क्करो भवति, एवं निरुपमस्वर्गलक्ष्मीभ्रंशचिन्तने स्फोटहेतौ सत्यपि हृदयं यन्न खण्डशो भिद्यते तन्नूनं वज्रघटितं तदिति गाथार्थः ॥४४॥ अथ गतिचतुष्कंदुःखचिन्तामुपसंहरंस्तात्पर्यमाह–

**ता देवमणुयनारयतिरिक्खजोणिसु जाइं दुक्खाइं । भावीभवभावुगाइं हियए वियरंति ताण सया ॥४५॥**

**व्याख्या**–यस्मादुदितनीत्या चतस्रोऽपि गतयो दुःखमय्यः, स च भगवत्समयभावितमतित्वात्सर्वं दुःखमेव भावयते 'तत्' तस्मात् 'देवमनुजनारकतिर्यग्योनिषु' सुरमनुष्यनिरयप्रमुखगतिलक्षणेषु जीवोत्पत्तिस्थानेषु गत्यनानुपूर्वी, निर्देशश्चात्र जीवस्य नरकादिक्रमजन्मनियमनिरासार्थः, यानि प्राग्वर्णितानि दुःखानि 'बाधाः' 'भाविभवभावुकानि' भविष्यज्जन्म–परम्परासूत्पादुकानि 'हृदये' चेतसि तस्येति शेषः 'विचरन्ति' साक्षादिव परि[illegible]स्फुरन्ति तानि 'सदा' शश्वत्, अयमर्थः–अनवरतं जिनागमनिरूपितगतिचतुष्कवर्त्तिषु दुःखश्रुत्या तन्मयतामिव प्राप्तस्यावि[illegible]तप्रत्ययमात्मनो भाविदुःखाविर्भावं निश्चिन्वतः सम्यग्दृष्टेर्भविष्यत्कालानुभाव्यान्यपि तानि वर्तमानकालानुभाव्यतया मनसि विपरिवर्त्तन्त इति गाथार्थः ॥४५॥

**इत्तो च्चिय संलत्तं अप्पडिविरओ सुदिट्ठीजं दुक्खं । वेयइ तं न अन्नो संसारी माणसं भयइ ॥४६॥**

**व्याख्या**–यत एव सम्यग्दृष्टेर्मनसि सर्वगतिदुःखानि विचरन्ति, अत एव हेतोः 'संलपितं' भणितमागमे 'अप्रतिविरतः' अविरतः 'सुदृष्टि' सम्यग्दृष्टिर्यदनाख्येयस्वभावं 'दुःखं' खेदं 'वेदयते' स्वानुभवे न चेतयते, तत् 'नान्यः' सम्यग्दृष्टेर्नापरः 'संसारी' भवस्थो जीवः 'मानसं' चेतः प्रभवं 'भजते' अनुभवति इह च वेदयत इति क्रियानुवृत्तावपि यत्पुनर्भजतीति तदेकार्थक्रियान्तरोपादानं तत्तस्य दुःखातिशयं सूचयति, स ह्येवं मन्यते प्रवर्त्तन्तां नामैते पापकर्मसु जिनवचनश्रुत्याऽविद्धकर्णा हलधरगोपालादयः पशुदेश्याः, अहं तु नित्यं सिद्धान्ताकर्णनावगतसंसाररहस्योऽपि यदेवं निःशङ्कतया तेषु व्याप्रिये तत् क्व मे संसारान्मोक्ष इत्याशयवान् भाविनीं दुःखश्रेणीमात्मनः कलयन् कथञ्चित्कायिकादिसुखसम्भवेऽपि यदसौ मानसं कष्टं संवेदयते, तत्कोऽन्योऽनुभवेत् ? किं चाऽन्येषां प्रायः स्वदुःखेन दुःखितत्वं, तस्य तु गतिचतुष्टयवर्त्तिनामङ्गिनां दुःखदर्शनात् तत्त्याजनचिन्तया महादौस्स्थ्यमिति तथा चागमः–''**भयवं के संसारे दुक्खिया ? गोयमा सम्मद्दिट्ठी अविरय**''त्ति, इति गाथार्थः ॥४६॥

पुनस्तच्चिन्तामेव स्फुटयन्नाह–

**वालोहधूलिगिहिरमणसंनिभं तस्स सव्वमाभाइ । देविन्दचक्कवट्टणाइपयमद्धुयमवस्सं ॥४७॥**

**व्याख्या**—'बालौघस्य' शिशुसमूहस्य 'धूलिगृहेण' जलार्द्रपांशुनिर्मितक्षुद्रगेहेन वर्षादिषु 'रमणं' क्रीडा तेन 'संनिभं' सदृशं 'तस्य' सम्यग्दृष्टेः 'सर्वं' सकलं देवेन्द्रादिपदम् 'आभाति' मनसि प्रतिभासते, यथाहि बालाः क्रीडारसेन धूलिगृहं निर्माय पुनस्तत्क्षणाद्विध्वंसयन्तीति तत्क्षणविनश्वरम् एतमेतदपि तच्चित्ते तथा प्रतिभातीत्यर्थः, 'देवेन्द्रत्वं' स्वाराज्यं, 'चक्रवर्त्तित्वं' षट्खण्डवसुधाधिपत्यम्, आदिशब्दाद्वासुदेवत्वबलदेवत्वादिग्रहः, द्वन्द्वगर्भो बहुव्रीहिः, 'पदं' सम्पदाङ्गैश्वर्यस्थानम् 'अध्रुवं' क्षणिकं 'अवश्यं' निश्चित्तं निरन्तरं संसारोदरवर्त्तिसकलपदार्थानित्यताऽवलोकनाविर्भूतक्षणिकत्ववासनापहसितस्थैर्यसंस्कारतया क्वचिदप्यास्थाबुद्धेरभावात्, कतिपयसागरोपमादिस्थाय्यपि शक्रादिपदं शिशुनिर्मितधूलिगृहोपमया सत्वरगत्वरमेवासौ भावयतीत्यर्थ इति गाथार्थः ।।४७।।

**इय सव्वत्थ असरणं अणंतदुहभायणंमि संसारे । अप्पणं मन्नन्तो निच्चुव्विग्गो महादुक्खं ।।४८।।**

**व्याख्या**—'इति' उक्तनीत्या इन्द्रादिपदस्यानित्यत्ववत् 'सर्वत्र' सर्वस्मिन् देशकालादौ 'अशरणं' विरतेरेव संसारदुःखरक्षितृत्वात्तस्याश्चाल्पीयस्या अप्यभावेन रक्षितृशून्यम् 'अनन्तदुःखभाजने' अपर्यवसितक्लेशनिवासे 'संसारे' भवे 'आत्मानं' स्वं 'मन्यमानः' सम्भावयन् 'नित्योद्विग्नः' सततपरितप्तहृदयः 'महादुःखमिति' क्रियाविशेषणम् अतिकष्टं यथा भवति तथा वसतीति शेषः, इति गाथार्थः ।।४८।।

**तो जत्थ जत्थ सावज्जकज्जमब्भुज्जमं समुव्वहइ । सो तत्थ तत्थ तम्मइ विरइ महन्तो अपावन्तो ।।४९।।**

**व्याख्या**—यस्मादेवमशरणं स्वं मन्यते 'तत्' तस्मात् यत्र यत्रेति वीप्सया सर्वसङ्ग्रहः, यस्मिन् सावद्यकार्ये गृहारम्भकृषिविषयभोगादौ सपापकर्मणि मकारः प्राकृतत्वात्, सप्तमी चात्र द्रष्टव्या, अभ्युद्यमं वाक्कायादिप्रयत्नं 'समुद्वहति' करोति स इत्यधिकृतः सम्यग्दृष्टिः, तत्र तत्र कर्म्मणि उद्यच्छन् 'ताम्यति' सावद्यकार्यस्य दारुणफलत्वं जानानः खिद्यते 'विरतिं' सर्वसावद्ययोगप्रत्याख्यानम्, अनुस्वारलोपः प्राकृतत्वात्, 'महंतो'त्ति अभिलषन्नपि, अपिरत्राध्याहार्यः, अप्राप्यनुवन् च तदावारककर्मोदयेन निबिडनिगडितत्वादलभमानः, अथवा 'विरतिमहं' सर्वविरतिमहोत्सवं 'तो'त्ति तस्मात्सावद्याभ्युपगमादप्राप्नुवन्,

इति गाथार्थः ॥४९॥

**मन्नइ जयंमि धन्ने सुसाहुणो चत्तभवदुहासंगे । अन्नमणाहमसरणं जयं सुदिट्ठी विचिन्तेइ ॥५०॥**

**व्याख्या**–'मन्यते' अवधारयति 'जगति' लोके 'धन्यान्' सुकृतिनः 'सुसाधून्' सुविहितमुनीन्, कुत एतत् ? अत आह– 'त्यक्तभवदुःखासङ्गान्' समुज्झितसंसारक्लेशसम्बन्धान् तत्कारणपुत्रकलत्रमित्रसगोत्रप्रतिबन्धविरहादित्यर्थः, हेतुगर्भं विशेषणं, 'अन्यद्यतिव्यतिरिक्तम्' अनाथं सत्यपि राजादौ स्वामिनि भवदुःखरक्षणाक्षमत्वेन तस्य वस्तुतोऽस्वामित्वात्स्वामिरहितम् अत एव 'अशरणं' दुःखत्राणवर्जितं 'जगत्' त्रिभुवनं यतिजनं विहायान्यत्र भवक्लेशत्राणपटीयस्याः सर्वविरतेरभावात् 'सुदृष्टिः' सम्यग् दर्शनसम्पन्नः 'विचिन्तयति' विवेचयति इति गाथार्थः ॥५०॥ एवं च चारित्रिष्वनुरागाद्याद्यसौ भवति तद्दर्शयन्नाह–

**सो सव्वविरइ आरा हरिसट्ठाणं अपावमाणो उ न लहइ । सव्वत्थ धिइं धणपरियणसयणगेहेसु ॥५१॥**

**व्याख्या**–स इति प्रागुक्तचिन्तावान् सुदृष्टिः, 'सर्वविरतेः' प्रव्रज्यायाः 'आरात्' अर्वाक् तद्ग्रहणं विनेत्यर्थः 'हर्षस्थानम्' उत्सवपदम् 'अप्राप्नुवन्' अनासादयन् सर्वविरतेरेव नित्यानन्दमयपरमपदपथरथायमानत्वेन महोत्सवतया तेनेष्टत्वात् 'तुः' अवधारणे स चाग्रिमपदे योज्यः,'न लभत एव' न प्राप्नोत्येव सर्वत्र क्वापि धृतिं रतिं धनपरिजनस्वजनगेहेषु द्रविणपरिच्छदबान्धवमन्दिरेषु धनादीनिहि मूर्च्छाहेतुतया गाढबन्धनत्वेन सम्प्रधारितान्यपि मोहाद्विहातुमपारयन् समन्ताद्दहनप्रदीपितं कारागारमिव गृहाधिवासमधिगच्छन्न क्वचिदप्यसौ स्वास्थ्यं विन्दतीत्याशय इति गाथार्थः ॥५१॥ इदानीं निर्वेदलिङ्गमुपसंहरन्नाह–

**इइ भावणासमेओ सम्मदिट्ठी जिणेहिं अक्खाओ । तव्विहचिट्ठा अवसियमणपरिणामो महासत्तो ॥५२॥**

**व्याख्या**–'इतिभावणासमेतः' प्रागभिहितसंसारदुःखमयत्वानित्यत्वशरणत्वादिमनः परिणामसहितः, सम्यग्दृष्टिः 'जिनैः' भगवद्भिः 'आख्यातः' कथितः, अथान्तरत्वात्परिणाम एवायमस्मदादिभिः कथमवसीयते ? इति, अत आह–'तव्विह'त्ति 'तद्विधा' तत्प्रकारा निर्वेदाऽभिव्यञ्जिकेति यावत्, 'चेष्टा' निःसूकतया सावद्यकर्माकरणात्मिका बाह्यक्रिया तया लिङ्गरूपया 'अवसितमनःपरिणामः' अनुमितनिर्वेदलक्षणचित्ताध्यवसायः 'महासत्त्वः' व्यसनेऽप्यनाकुलः, प्रयोगश्चात्र अधिकृतः पुरुषः

सम्यक्त्ववान्निर्वेदवत्त्वात् सनत्कुमारचक्रवर्त्तिवदिति मन्तव्यः, ''दुःखैः स्वस्य तथाऽङ्गिना भवभुवां रोहद्भिरन्तस्तरामात्मा दुस्त्यजमिन्द्रियार्थजसुखस्नेहं परित्याजितः । शङ्के निष्प्रतिपातसातरतये येन क्षणात्सदृशां निर्वेदः स कथं न संसृतिहरः ? सम्यक्त्वलिङ्गं भवेदिति गाथार्थः ॥५२॥ तृतीयं लिङ्गमिति, निर्वेदाख्यं लिङ्गं विवृतमित्यर्थः

# ॥४॥ चतुर्थ लिङ्गम् ॥

साम्प्रतमनुकम्पाख्यं तुर्यं लिङ्गं व्याख्यातुकामो भव्यानुकम्पापरीतमनसः सम्यग्दृष्टेः कर्त्तव्यमभिधित्सुराह–

**सम्मद्दिट्ठी जीवो अणुकंपपरो सयावि जीवाणं । भाविदुहविप्पओगं ताण गणंतो विचिंतेइ ॥५३॥**

**व्याख्या–**'सम्यग्दृष्टिः' निर्वेदलिङ्गेन निश्चितसम्यक्त्वो जीवः 'अनुकम्पा' दया सा च द्वेधा द्रव्यभावभेदात्, तत्र द्रव्यतो बुभुक्षादिना क्लिश्यमानानां दीनादीनां दानादिना तत्प्रहीणे बुद्धिः, यथोक्तं 'भीतेषु आर्त्तेषु दीनेषु याचमानेषु जीवितम् प्रतीकारपरा बुद्धिः, कारुण्यमभिधीयते भावतश्च मिथ्यादृशां मिथ्यात्वादिनिबन्धनेन संसारदुःखेन दुःखितानां बोधिप्रापणेन तद्वियोजनेच्छा, एषा च यद्यपि ''**दट्ठूण पाणिनिवहं भीमे भवसायरंमि दुक्खत्तं । अविसेसओणुकंपं दुहावि सामत्थओ कुणइ ॥१॥**'' इत्यादिना द्विविधाऽपि सम्यग्दृष्टेः सम्यक्त्वलिङ्गत्वेन विधेयतयोक्ता तथाऽपीह वक्ष्यमाणसूत्रानुसारेण द्रव्यानुकम्पाया उपसर्जनीभूतत्वेनाविवक्षणाद् भावानुकम्पा सम्यक्त्वलिङ्गं द्रष्टव्या, ततश्चानुकम्पापरो मुख्यतो भावकरुणापरायणः 'सदाऽपि' सर्वदैव 'जीवानां' जन्तूनां 'भाविदुःखविप्रयोगं' मिथ्यात्वादिहेतुकभविष्यद्भवक्लेशविरहं तेषां जीवानां 'गणयन्' परिभावयन् विचिकीर्षन्नित्यर्थः 'विचिन्तयति' परामृशति, इति गाथार्थः ॥५३॥ इह हि द्वये जीवाः, सम्यग्दृष्टेरनुकम्पास्पदं भव्याश्चाभव्याश्च, तत्र ;चानुकम्पास्पदत्वे समानेऽपि दुःखवियोगस्य कर्त्तुमशक्यत्वेन चाऽभव्यान् व्यवच्छेत्तुं भव्यांश्च सङ्ग्रहीतुं तच्चिन्तामाह–

**निययसहावेण हया तावदभव्वा ण मोइउं सक्का । भवदुक्खाओ इमे पुणभव्वा परिमोयणीया उ ॥५४॥**

**व्याख्या–**'निजकस्वभावेन' अनाद्यनन्तेन मुक्तिगमनायोग्यतालक्षणेन जीवपरिणामेन 'हताः' दूषिताः तावदिति निर्द्धारणे भवदुःखाशक्यमोचनत्वेन भव्येभ्योऽभव्या निर्द्धारिता इत्यर्थः, न भविष्यन्ति कदाचित्कल्याणपात्राणीत्यभव्याः, मुक्तिगमनायोग्या जीवाः 'मोचयितुं' वियोजयितुं 'न शक्याः' न पार्याः 'भवदुःखात्' सङ्क्लेशात् 'इमे' योग्यतया प्रत्यक्षनिर्देश्याः, पुनरित्येनेनाभव्येभ्यो भिनत्ति, भव्या पुनरनादि तथास्वाभाव्याद्भविष्यकल्याणपात्राणि परिमोचनीयास्तु 'तुः' अवधारणे

भवदुःखाद्वियोजयितुं शक्या एव यदाह–"**भव्वा जिणेहिं भणिया इह खलु जे सिद्धिगमणजुग्गाओ । ते पुणअणाइपरिणाम भावओ हुंति नायव्वा ॥१॥ विवरीया उ अभव्वा न कयाइ भवन्नवस्स ते पारं । गच्छिंसु जंति व तहा तत्तुच्चिउ भावओ नवरं ॥२॥**" इति गाथार्थः ॥५४॥ अथ मोचनोपायं दर्शयन् प्रस्तावनामाह–

**संसारदुक्खमोक्खणहेउं जिणधम्मं अन्तरा नान्नो, । मिच्छत्तुदयसंगयजणाणं स य परिणमिज्जइ कहं नु ॥५५॥**

**व्याख्या**–'संसारदुःखमोक्षणहेतुः' भवविबाधावियोजनकारणं 'जिनधर्मं' तीर्थकरप्रणीतं मार्गम्, अन्तरेति प्राकृतत्वात्तेन अन्तरेण विना 'नान्यः' नापरो विद्यत इति शेषः, कुतीर्थ्यादिधर्म्माणां निर्वाणकल्पविटपिबीजभूतसम्यक्त्वादिरत्नत्रयशून्यत्वेन संसारनिस्तारणाऽसामर्थ्यात्, 'मिथ्यात्वोदयसङ्गतजनानां' मिथ्यादर्शनपुद्गलानुभवभाजां प्राणीनां, स च जिनधर्मः 'परिणमेत्' तथेति प्रत्ययविषयतां यायात् 'कथं' केन प्रकारेण ? 'नु' 'वितर्के' एवमहं वितर्कयामि न कथञ्चित्तेषामसौ परिणमते, विपर्ययज्ञानविप्लुतमतित्वात् तेषां काचे मणिबुद्धिवदधर्म एव धर्माभिमानात्, इति गाथार्थः ॥५५॥ सम्प्रति संसारनिदानमिथ्यात्वापगमोपायं तेषामाविष्कुर्वन्नाह–

**नायज्जियवित्तेणं कारेमि जिणालयं महारम्भं । तद्दंसणाउ गुणरागिणो जंतुणो बीयलाभुत्ति ॥५६॥**

**व्याख्या**–'न्यायार्जितेन' चौर्यपरवञ्चनादिकुत्सितोपायविरहितशिष्टजनानिन्द्यव्यवहारव्यापृतेन 'वित्तेन' द्रव्येण 'कारयामि' निर्मापयामि 'जिनालयम्' अर्हत्सदनं, न्यायात्तधनव्ययस्यैव जिनादिपात्रेषु महाफलत्वात् 'महारम्यम्' अनल्पशिल्पतल्पवैज्ञानिक–घटितविशालशालभञ्जिकादिरूपकरुचिररचनयाऽतिशयेन मनोहरं, किमित्येतदेवम् ? अत आह–'तद्दर्शनात्' रमणीयजिनालयावलोकनात् 'गुणरागिणः' मिथ्यादृशोऽपि विवेकितया गुणपक्षपातिनः 'जन्तोः' प्राणिनो, बीजलाभः सम्यक्त्वमूलकारणत्वात् बीजमिव बीजं–जिनालयादिप्रशंसादिकं तस्य लाभः–प्राप्तिस्तत्कारणमित्यर्थः, भवेदितिशेषः 'इतिः' हेतौ यस्मादभिरूपजिनगृहदर्शनात्, वीतरागस्यैवैवंरूपं भवनमुचितं धन्यश्चासौ येन स्वविभवोऽस्मिन्नियोजित इत्यादिपक्षपातरूपं

कस्यापि लघुकर्म्मणः सम्यक्त्वबीजमुपजायत इति गाथार्थः ॥५६॥

**कारेमि बिंबममलं दट्ठुं गुणरागिणो जओ बोहिं । सज्जो लभेज्ज अन्ने पूयाइसयं च दट्ठूणं ॥५७॥**

**व्याख्या**–'कारयामि' विधापयामि 'बिम्बं' भगवत्प्रतिमाम् 'अमलं' निस्तुषं विभवौचित्येन निष्कलङ्कमाणिक्यचामीकरपित्तलोपलादिमयं 'दृष्ट्वा' तदेव वीक्ष्य 'गुणरागिणो' रागद्वेषाद्यभिद्योतककामिनीशस्त्रपरिग्रहादिवियुक्तबिम्बावलोकनमात्रेणैव वीतरागत्वानुमितेरर्हन्नेव देवाधिदेवो नापरे ततोऽयमेव परलोकार्थिनाऽऽराध्य इत्यादिरूपभगवद्गुणबहुमानिनो जनाः केचन 'यतः' यस्माद्धेतोर्बोधिंसम्यक्त्वं 'सद्यः'–बिम्बदर्शनक्षण एव 'लभेरन्' प्राप्नुयुः 'अन्ये' अपरे केचित् परिमलोज्ज्वलविकस्वरबकुलविचकिलमालतीप्रमुखप्रसूनमालाभिः मरकतपद्मरागमुक्ताफलमहानीलादिमाणिक्यखचितकाञ्चनविभूषणैः मलयजघुसृणघनसारमण्डनादिभिश्च 'पूजातिशयं' जिनबिम्बस्य सपर्याप्रकर्षं 'चः' समुच्चये 'दृष्ट्वा' विलोक्य भिन्नवाक्यप्रयोगात् दृष्ट्वेत्यस्य न पौनरुक्त्यं एषैव वीतरागप्रतिकृतिरीदृशीं पूजामर्हति नान्येत्येवं गुणप्रमोदातिशयाल्लभेरन्नित्यत्रापि योज्यत इति गाथार्थः ॥५७॥ ननु महानयं जिनगृहाद्यारम्भस्तत्र चावश्यं भावी पृथिव्याद्युपमर्दस्तथा चास्तां भावानुकम्पा द्रव्यानुकम्पाऽपि सम्यग्दृष्टेर्दूरापास्तेत्याशङ्क्य तां द्विविधामपि समर्थयितुमाह–

**पुढवाइयाण जइ वि हु होइ विणासो जिणालयाहिंतो । तव्विसयावि सुदिट्ठिस्स नियमओ अत्थि अणुकंपा ॥५८॥**

**व्याख्या**–पृथिव्यम्बुतेजोवायुवनस्पतित्रसलक्षणानां षड्जीवनिकायानां यद्यपि 'हुः' अवधारणे तेन 'भवत्येव' जायत एव 'विनाशः' विध्वंसः, भूखननेष्टकापाकजलसेकादेरवश्यं तत्र भावात् 'जिनालयात्' अर्हद्भवनादिनिर्मापणात् तथाऽपि तद्विषयाऽपि विनश्यत्पृथिव्यादिगोचराऽपि आस्तामविनश्यत्तद्विषयेत्यपेरर्थः, 'सुदृष्टेः' सम्यग्दृशस्तन्निर्मापयितुः 'नियमतो' निश्चयेन 'अस्ति' विद्यते 'अनु कम्पा' रक्षणाभिप्राय इति गाथार्थः ॥५८॥ अथ तादृशं जीवोपमर्दं प्रत्यक्षेण पश्यन्तः कथं तस्यानुकम्पासद्भावं प्रतीम इत्यत आह–

**एयाहिंतो बुद्धा विरया रक्खंति जेण पुढवाई । इत्तो निव्वाणगया अबाहिया आभवमिमाणं ॥५९॥**

**व्याख्या**—'एतस्मात्' सद्दृष्टिना विधिनिर्मापितजिनसदनादिदर्शनात् 'बुद्धाः' तत्त्वज्ञानेन प्राप्तसद्दर्शनास्ततो 'विरता' विरत्या वारककर्म्मक्षयोपशमेन प्रतिपन्नचारित्राः सन्तः 'रक्षन्ति' न हिंसन्ति 'येन' यस्माद्धेतोः 'पृथिव्यादीन्' जन्तून् षड्विधजीवनिकायरक्षारूपत्वाद्विरतिप्रतिपत्तेः, ततः किम् ? इत्याह—'इतः' एतस्मात्पृथिव्यादिरक्षणरूपाच्चारित्रात् 'निर्वाणगता' मुक्तिपदं प्राप्ताः सन्तोऽबाधका अहिंसका रक्षका इति यावत् 'आभवम्' आसंसारम् 'इमाणं'ति एषां जिनालयाद्युपयुज्यमानानामितरेषां च पृथिव्यादीनां ते जीवा भवन्तीति शेषः, सद्दृष्टिकारितजिनालयादिदर्शनाऽऽसादितरत्नत्रयमहिम्ना लब्धशाश्वतपदैस्त्रैर्यावत्संसारं सर्वपृथिव्यादीनामभयदानविश्राणनात्कथं तत्त्वतस्तेषु तस्यानुकम्पा नास्तीति गाथार्थः ॥५९॥ एतदेव दृष्टान्तद्वयोपदर्शनेन दृढयन्नाह—

**रोगि सिरावेहो इव सुविज्जकिरिया व सुपउत्ता उ । परिणामसुंदर च्चिय चिट्ठा से बाहयोगेवि ॥६०॥**

**व्याख्या**—'रोगिणो' रक्तविकारादिना व्याधितस्य षष्ठीलोपोऽत्र प्राकृतत्वात्, 'शिरावेध इव'—क्षतजाकर्षणाय शस्त्रेण नाडीबन्ध इव 'सुवैद्यक्रियेव' च वैद्यकग्रन्थाभिज्ञव्याधिनिदानौषधपथ्यादिकुलशभिषग्वरचिकित्सेव 'सुप्रयुक्ता' निर्व्याजमुपचिकीर्षया प्रवर्त्तिता, तुश्चार्थे योजित एव, रोगिण इतीहापि संबध्यते 'परिणामसुन्दरैव' आगामिनि काले सुखावहैव चेष्टा विधिना जिनावासादिनिर्मापणारम्भलक्षणाक्रिया भवतीति शेषः 'से' इति तस्य सम्यग्दृशः, बाधयोगेऽपि दृष्टान्तपक्षे आपाततो रोगिपीडादिसद्भावेऽपि दार्ष्टान्तिकपक्षे तु पृथिव्याद्युपमर्दसम्भवेऽपि, एतदुक्तं भवति—यथा रुधिररोगिणः शिरामोक्षलक्षणा ज्वरादिरोगिणो वा लङ्घनोष्णोदककटुकषायौषधक्वाथपानादिका क्रिया सुवैद्येन क्रियमाणा शरीरत्वग्विदारणादिना रसनावैरस्योदरक्षोभविरेकापादनादिना चापाततो दुःखदाऽपि तदुत्तरकालं रोगव्यपगमेनातीव साधीयसी, तथा जिनालयादिनिष्पादनक्रियाऽपि सुदृष्टिना अपि विधीयमाना आमुखे पृथिव्यादीनां बाधाधायिन्यपि आयतौ स्वस्यान्येषां च भव्यानां विरतिग्रहणसिद्धिगमनाभ्यां शाश्वतकालं तेषां रक्षणात्सुखदैवेति गाथार्थः ॥६०॥ एवं जिनभवनादिद्वारा भव्यदेहिनां

सम्यक्त्वाद्युत्पादनेनानुकम्पां भावयित्वा सम्प्रति सिद्धान्तलेखनादिद्वारेण तां भावयिष्यन् प्रस्तावनामाह–

**अन्नेसिं पवत्तीए निबन्धणं होइ विहिसमारंभो । सो सुत्ताओ नज्जइ तं चिय लहेमि ता पढमं ॥६१॥**

**व्याख्या**–'अन्येषाम्' आत्मव्यतिरिक्तानां भव्यजीवानां, 'प्रवृत्तेः' सदनुष्ठानाचरणस्य 'निबन्धनं' कारणं 'भवति' जायते, विधिना–''**जिणभवणकारणविही सुद्धा भूमीदलं च कट्ठाई । भियगाण तिसंधाणं सासयवुड्ढी य जयणा य ॥१॥**'' इत्यादि सूत्रनीत्या नतु स्वमत्या समारम्भः–जिनगृहादिसम्पादनं, विधिसमारम्भं हि दृष्ट्वाऽन्येऽपि तदनुसारेण प्रवर्त्तन्त इत्यर्थः, स च विधिः 'सूत्रात्' आगमात् 'ज्ञायते' अवगम्यते, तत्रैव तस्य भणनात्, तदेव विधिज्ञाननिबन्धनं सूत्रमेव 'लेखयामि' पुस्तकेष्वक्षरैर्न्यासयामि 'तत्' तस्मात् 'प्रथमं' पूर्वं पुस्तकलेखनं हि विना साम्प्रतं मन्दमतितया व्याख्यातृणामपि सूत्रार्थविस्मृतेरुपदेशाद्ययोगादिति गाथार्थः ॥६१॥ अथ सूत्रलेखनस्यैव फलमाह–

**जिणवयणामयसुइसंगमेण उवलद्ध वत्थुसब्भावं । कुस्सुइनियत्तभावा भयंति जिणधम्ममेगे उ ॥६२॥**

**व्याख्या**–जिनवचनमेव आगम एव, अमृतम् अजरामरत्वहेतुत्वाद्रसायनं तस्य श्रुतिसङ्गमेन सद्गुरुसंयोगेन आकर्णनसम्प्राप्त्या श्रुत्योर्वा कर्णयोः सङ्गमस्तेन कर्णाञ्जलिपानेनेत्यर्थः 'उपलभ्य' सम्यक्परीक्ष्य 'वस्तुसद्भावं' देवादिपदार्थतत्त्वं, कुश्रुतिभ्यः परस्परव्याहतार्थेभ्यो हिंसाद्युपदेशकेभ्यश्च कुतीर्थिकसमयेभ्यो निवृत्तः–परावृत्तो भाव–उपादेयताऽभिप्रायो येषां ते तथा, भगवद्वचः–पीयूषपानेन चैतन्यलाभाद्व्यपगतकुप्रवचनजनितमिथ्यात्वविषमूर्च्छाः सन्त इत्यर्थः 'भजन्ते' तत्त्वबुद्ध्या प्रतिपद्यन्ते 'जिनधर्मम्' अर्हन्मतम् 'एके' केचन जीवाः 'तुः' एवकारार्थः, सच भजन्त इत्यत्र योज्य इति गाथार्थः ॥६२॥ साम्प्रतं न केवलं स्वसमय एव मया लेखनीयः किं तर्हि परव्याकरणाद्यवबोधं परतर्काद्यवगमं च विना साम्प्रतिकानां मन्दमतितया स्वसमयस्याऽपि दुर्बोधत्वादशक्यसमर्थनत्वाच्च परव्याकरणादीन्यपि साधुकृते लेखनीयानि, तथा पाठकसाधूनां वसत्याद्युपष्टम्भेन पुस्तकदानेन च कुतीर्थ्याज्ञेयतामागते प्रवचने भव्यसत्त्वप्रबोधोऽपि मदभिसन्धित्सितः संपत्स्यत इति तच्चिन्तां गाथापञ्चकेनाह–

**जिणवयणं साहंती साहू जं ते वि साहणसमत्था । वायरणछंदनाडयकव्वालंकारनिम्माया ॥६३॥**

**व्याख्या**–'जिनवचनं' भगवन्मतं 'साधयन्ति' भव्येभ्य उपदिशन्ति, प्रतिवादिकुतीर्थिकनिराकरणेन प्रतिष्ठापयन्ति वा 'साधवः' बहुश्रुता मुनयः 'यत्' यस्मात्कारणात् 'तेऽपि' साधवोऽपि 'साधनसमर्थाः' जिनमतस्योपदेशनपटिष्ठाः प्रतिष्ठापनपटिष्ठा वा, व्याकरणाद्यभिज्ञाः सन्तो भवन्तीति शेषः, तत्र व्याकरणं–शब्दशास्त्रं, छन्दः–विचित्रपद्यलक्षणाभिधायकं शास्त्रं, नाटकं–'चतुः–षष्ट्यङ्गसमन्वितमुखप्रतिमुखादिसम्पन्नः कौशिक्यादिवृत्तिचतुष्कपुष्कलः शृङ्गारवीरान्यतराङ्गिरसप्रधानः षड्भाषानुषक्तः पञ्चादिदशान्ताङ्कपरिच्छिन्नोऽभिनयनायकादिचरितसम्बद्धः काव्यप्रबन्धः, काव्यं–सर्गबन्धः, 'अलंङ्कारः' काव्यदोषगुणव्युत्पादको ध्वनिशब्दार्थालङ्काराद्युपदर्शको ग्रन्थस्ततो द्वन्द्वः, तेषु निर्माता–निपुणास्तन्मर्मवेदिन इति यावदिति गाथार्थः ।।६३।।

**छद्दरिसणतक्कविआ कुतित्थिकद्धंतं जाणया धणियं । ता ताण कारणे सव्वमेव इह होइ लेहणीयं ।।६४।।**

**व्याख्या**–'जैनसौगतसाङ्ख्यजैमिनीयनैयायिकलौकायतिकमतभेदात् षड् दर्शनानि–प्रवादास्तेषां तर्काः तत्तन्मतव्यवस्थापकानि प्रमाणशास्त्राणि तद्विदः–तद्रहस्यभिज्ञाः, 'कुतीर्थिकानां' द्विजादीनां सिद्धान्ताः–श्रुतिस्मृतिपुराणदयस्तज्ज्ञायकाःतत्कुशलाः 'धणियंति' नितान्तं परतीर्थिकतर्कग्रन्थसिद्धान्तावबोधं हि विना प्रतिपक्षविक्षेपेण स्वपक्षसमर्थनायोगात्, एतेन स्वसमयपरसमयविदस्त इत्युक्तं भवति, न च परसमयानां मिथ्यात्वाङ्कितत्वात्सम्यग्दृशां तत्पाठो न सङ्गत इति वाच्यं, सद्दृष्टिपरिग्रहेण तेषामपि दुष्टत्वप्रदर्शनेन स्वसमयव्यवस्थापनया समीचीनत्वाभिधानात् तदुक्तम्–''परसमओ उभयं वा सम्मद्दिट्ठिस्स ससमओ चेव ।'' यत एवंविधा एव जिनागमसाधनसमर्थाः 'तत्' तस्मात्तेषां साधूनां 'कारणे' इति निमित्तं सर्वमेव, सकलमेव स्वपरशास्त्रवृन्दम् 'इह' प्रवचने 'भवति' युज्यते 'लेखनीयं' पुस्तकेषु (निवेश्यम्) नियोज्यमिति गाथार्थः।।६४।।

**पइभाइगुणजुयाण वसही सयणासणाइणा निच्चं । आहारोसहिभेसज्जवत्थमाईहिं उवठंभं ।।६५।।**

**काऊण पुत्थयाइं समप्पियं सासणं कुतित्थीणं । अधरिसणीयमेयं काहामि तओ य जिणधम्मे ।।६६।।**

**गुणरागिणो जणा खलु संवुज्जस्संति तेउ सत्ताणं । अभयं काहिता तओ एयं एयं च कारेमि ।।६७।।** 

**व्याख्या**–सुसमाहिते चेतसि पदानां नवनवार्थविस्फुरणं प्रतिभा यदुक्तम्–''**प्रज्ञा नवनवोल्लेखशालिनी प्रतिभा**

**मता ।''** इति, आदिशब्दान्मेधास्मृत्यूहाक्षोभ्यतादिग्रहः, प्रतिभादिभिर्गुणैरात्मधर्मैर्युतानां–सम्पन्नानां कुशाग्रीयप्रज्ञानां मुनीनां, 'वसतिः' आलयः, शयनं–संस्तारकः, आसनं–पादप्रोञ्छनादि, आदिशब्दात्फलकादिग्रहः 'तदादिना' तत्प्रभृतिना वस्तुजातेन 'नित्यं' सर्वदा 'आहारः' भोजनम् 'औषधम्' अगदः 'भैषज्यं' तदेव बहुद्रव्यमेलकनिष्पन्नं 'वस्त्रम्' आच्छादनम्, आदिशब्दात्कम्बलादिपरिग्रहः, तैः प्राशुकैषणीयैः 'उपष्टम्भं' शरीरोपग्रहं 'कृत्वा' विधाय, शुद्धाहाराद्युपष्टम्भं विना महाप्राज्ञानामपि शास्त्राध्ययनाद्यसम्भवात्, 'पुस्तकानि' प्रतीतानि 'समर्प्य' तेभ्यो दत्त्वा 'शासनं' जिनप्रवचनं 'कुतीर्थिनां' सौगतादीनाम् 'अधर्षणीयम्' अजय्यम् 'एतत्' इदं 'करिष्यामि' विधास्यामि प्रतिभादिप्रगल्भतार्किकमुनिपुङ्गवालोकनेन स्वपराजयशङ्कया प्रागेव प्रतिवादिनां भगवच्छासनविजिगीषाया असम्भवात् कथञ्चित्सम्भवे वा तदैव राजसभायां तेषां तैः पराजयादिति कुतस्त्या तस्य धृष्यतेत्यर्थः, ततश्च अधृष्यत्वबोधानन्तरं 'जिनधर्मे' अर्हत्पथे 'गुणरागिणः' प्रेक्षावन्तः 'जनाः' लोकाः 'खलु' निश्चयेन 'संभोत्स्यन्ते' सम्यक् प्रतिपत्तिं करिष्यन्ति, परीक्षापूर्वकारितया हि हेयपरिहारेणोपादेयस्य तैरुपादित्सितत्वात्, अन्यथा गुणरागित्वानुपपत्तेरित्यर्थः 'तेतु'ते पुनः संबुद्धाः सन्तः 'सत्त्वानां' पृथिव्यादीनां प्राणिनाम् 'अभयं' सर्वविरतिपरिग्रहेण रक्षां 'करिष्यन्ति' सम्पादयिष्यन्ति 'ततः' तस्माज्जनसम्बोधनादेर्हेतोः एतत् एतच्चेति वीप्सया इदं चेदं च सर्वं पूर्वोक्तं जिनालयनिर्माणपुस्तकलेखनादिकं 'कारयामि' निर्मापयामीत्यनुकम्पावान् चिन्तयतीति गाथात्रयार्थः ॥६५॥६६॥६७॥ तदेवं सम्यग्दृष्टेरनुकम्पावतो विधेयमुक्त्वा सम्प्रति निषेध्यमाह–

**वावीकूवतडागाइगोयरं देइ न खलु उवदेसं । जमसंखविणासेणं न होइ थेवाणमणुकंपा ॥६८॥**

**व्याख्या**–वापी दीर्घिका कूपः–उदपानं, तडागः–सरः, आदिशब्दादरघट्टप्रपादि गृह्यते, तद्गोचरं वाप्यादिविधापनविषयं 'ददाति' वितरति 'न खलु' नैव लोकानामनुकम्पावानिति शेषः, 'उपदेशं' तृषार्त्तानां जलपानादिना सौस्थ्यापादकत्वेन वाप्यादीनामनुकम्पाहेतुत्वात् कर्त्तव्यतया शिक्षणं, कस्मादेवम् ? इति, अत आह–'यत्' यस्मात् 'असङ्ख्यानां' गणनातिगानाम् एकेन्द्रियादिपञ्चेन्द्रियपर्यन्तानां जीवानां 'विनाशेन' वधेन 'न भवति' न जायते 'स्तोकानां' विनाश्यजन्त्वपेक्षयाऽत्यल्पानामपि

मनुष्यतिरश्चाम् 'अनुकम्पा' तज्जलास्वादनादिना प्राणरक्षा, खननादारभ्य हि यावद्वाप्यादिसद्भावं निरन्तरमुत्पद्यमानानां परस्परतो मनुष्यतिर्यग्भिश्च भक्ष्यमाणानामपरिमेयप्राणिनां संहारं पश्यन् कथमिव कतिपयजीवानुकम्पामात्रकृते सम्यग्दृष्टिर्वाप्याद्युपदेशं दद्यात्, नहि बहुव्ययेनात्यल्पफलं कर्म कश्चिदारभते विनोन्मत्तादिति गाथार्थः ॥६८॥

**सव्वाणुकंपगस्स उ गुणहेऊ ता कहं अपत्तंमि । दाणमसुद्धं गुणहेऊ वेइ अणुकंपसंजुत्तो ॥६९॥**

**व्याख्या**–सर्वानुकम्पकाय तु सर्वविरताय रत्नत्रयविभूषिताय पात्रायैव 'तुः' अवधारणे चतुर्थ्येऽत्र षष्ठी प्राकृतत्वात्, उत्तरवाक्यगतदानपदस्येहापि सम्बन्धात् दानमिति योगः, शुद्धं दीयमानमिति शेषः 'गुणहेतुः' दायकस्य पुण्यानुबन्धिपुण्यलक्षणानुग्रहकारणं भवति नत्वपात्राय, तथा चोच्यते–''**निर्निदानमुनिदानपुण्यतः शालिभद्रकृतपुण्यकादयः । लेभिरेऽनुपमभोगसम्पदं पश्य मुक्तिवनिताकटाक्षिताम् ॥१॥**'' यस्मादेवं 'तत्' तस्मात् 'कथं' केन प्रकारेण 'अपात्रे' परिग्रहारम्भमग्ने 'अब्रह्मचारिणि' असंयते 'स्वपक्षे' पार्श्वस्थादौ 'परपक्षे च' द्विजादौ 'दानं' भक्त्या भक्तपानवस्त्रादिवितरणं क्रियमाणं, तत्राप्यशुद्धं षट्कायाद्युपमर्देन तदर्थमेव निष्पन्नतया क्रीतत्वादिना च दूषितं 'गुणहेतुः' पुण्यानुबन्धिपुण्यकर्म्मनिर्जरा–दिलक्षणोपकारकरणं 'ब्रवीति' उपदिशति, अपि तु पापनिमित्ततयैव तद्ब्रवीति, अनुकम्पासंयुक्तः, भूतकरुणार्द्रान्तःकरणः सहि दयालुत्वादपात्रकृते षड्जीवनिकायप्रध्वंसनिष्पाद्यभक्तादिदानं कथङ्कारं धर्म्महेतुतया ब्रूयात्, दानेन तेषां पोषणे हि बहुतमासंयमप्रवर्त्तकतया तस्यानुकम्पावत्त्व हानिप्रसङ्गात् यदुक्तम्–''**सीलव्वयरहियाणं जं खलु दिज्जइ धणं कुपत्ताणं । तं खलु धोयइ वत्थं रुहिरखयं सोणिएणेव ॥१॥**'' पात्रदानस्यापि शुद्धस्यैव स्वर्गापवर्गहेतुतयाऽभिधानादिति गाथार्थः॥६९॥

**इत्तो च्चिय सो हलसयडपोयसंगामगोहणाईसु । उवएसंपि हु कहं देइ सत्तअणुकंपासंयुत्तो ॥७०॥**

**व्याख्या**–'अत एव' उक्तनीत्या स्तोकेन बहुहारणादेवेत्यर्थः, स इति सम्यग्दृष्टिः, 'हलं' लाङ्गलं शकटः–गन्त्री, पोतः–यानपात्रं सङ्ग्रामः–रणः, गोधनं–गोकुलं, हलादिभिश्च तत्कर्माणि लक्ष्यन्ते, आदिशब्दादन्यदपि तथारूपं पापहेतुमृगयादिकर्म्मग्राह्यं, ततो द्वन्द्वगर्भो बहुब्रीहिः अतस्तदादिषु–तत्प्रभृतिषु कर्म्मसु 'उपदेशमपि' भोः कृषीवलाः ! 'धन्याः'

धार्मिकप्रवरा यूयं यन्निर्मितेन कृषिकर्म्मणा सर्वाऽपीयं प्रजा जीवतीत्यादि प्रशंसावचनसन्दर्भेण तेषां तदन्येषां च तत्र सुतरां प्रवर्त्तनम्, एवं शकटादिकर्मस्वपि उपदेशः स्वधिया भावनीयः, आस्तां निरवद्यजीविकया निर्वहतः स्वयं करणकारणे इत्यपि शब्दार्थः 'हुः' वाक्यालङ्कारे 'कथं' केन प्रकारेण 'ददाति' प्रयच्छति श्रोतृभ्य इति शेषः, न कथञ्चित्, 'सत्त्वानुकम्पासंयुक्तः' भूतकृपालुः हलकर्षणादीनां ह्यसङ्ख्यप्राणिप्रमापणकारणत्वेन महापापाधिकरणतया तदुपदेशस्य सततमर्हत्समयसुधारसपूर्णकर्णहृदयस्य सम्यग्दृष्टेरनौचित्यात्, यदाह–"**खित्ते खडेह गोणे दमेह एमाइ सावगजणस्स । उवइसिउं नो कप्पइ जाणिय जिणवयणसारस्स ॥१॥**" इति गाथार्थः ॥७०॥

**चाणक्क पंचतंतय कामंदयमाइरायनीइओ । वक्खाणंतो जीवाणं न खलु अणुकंपओ होइ ॥७१॥**

**व्याख्या**–चाणक्यप्रणीता राजनीतिश्चाणक्यः, उपचारात्, 'पञ्चतन्त्रकं' पञ्चाख्यानकं, कामन्दकिप्रोक्ता राजनीतिरपि कामन्दकिः, मकारः प्राकृतवात्, आदिशब्दादन्या अपि तथाविधा मन्तव्याः तदाद्या राजनीतिः–राज्ञामर्थाद्युपायप्रदर्शकानि शास्त्राणि व्याख्यानयन् श्रोतृणामवबोधार्थं तदर्थं प्रकाशयन् विचक्षणोऽपि 'नखलु' नैव 'अनुकम्पकः' प्राणिदयालुर्भवति, चाणक्यादिनीतीनां हि यथाक्रममनेकविधच्छलपरस्परमित्रविरोधवञ्चनकूटयुद्धप्रयोगादिव्युत्पादकत्वेन प्रभूतभूतसङ्घातघातनहेतुतया तद्व्याख्यानस्य व्याख्यातुर्निष्करुणताभिद्योतकत्वात् अतोऽनुकम्पावान् सुदृष्टिस्ताः कथञ्चिदपि न व्याचक्षीतेति गाथार्थः ॥७१॥

**तह जोइसत्थकंडाइ विज्जुयं मणुयतुरयहत्थीणं । तहा हेमजुत्तिमिसुकलमक्खायंतो हणे जीवे ॥७२॥**

**व्याख्या**–तथेति राजानीतिन्यायेन तिथिनक्षत्रग्रहादिबलाबलप्रतिपादकं प्राणिनामतीन्द्रियशुभाशुभादिव्यञ्जकं शास्त्रं ज्योतिषं, देशकालाद्यपेक्षया धान्यादिपण्यानां समर्घमहार्घतादिव्युत्पादको ग्रन्थोऽर्थकाण्डम्, आदिशब्दाच्चूडामण्यादिपरिग्रहस्ततो द्वन्द्वगर्भो बहुव्रीहिः, रोगचिकित्साप्रकाशकं शास्त्रं वैद्यकं, केषां तत् ? इत्याह–'मनुजतुरगहस्तिनां' मानवाश्वकरिणां, चरकसुश्रुतवाग्भटशालिहोत्रादिकं, 'तथेति' समुच्चये, मूलादियोगेन सुवर्णादिसिद्धिप्रयोजकं हेमयुक्तिर्धातुवादशास्त्रमित्यर्थः, ॥११७॥
शास्त्राभ्यासप्रदर्शकम् इषुकला धनुर्वेद इत्यर्थः, एतानि शास्त्राणि 'अक्खायंतो'त्ति व्याचक्षाणः 'हन्यात्' विध्वंसयेत्, तादृशोपदेशेन

साक्षात् श्रोतृप्रयोजकतया व्याख्यातुरेव वस्तुतः कर्तृत्वात् हन्यात् इत्युक्तम्, अन्तर्भूतन्यस्तार्थोवाहनिस्तेन घातयेदित्यर्थः, 'जीवान्' जन्तून्, तथाहि ज्योतिषस्य शुभलग्नादिपूर्वं विवाहसङ्ग्रामाद्यनेकमहासावद्ययोगप्रवर्त्तकतया, अर्थकाण्डस्य चासङ्ख्यजीवसंसक्तिप्रध्वंसविधायिधान्यस्नेहादि भूरिपण्यसङ्ग्रहविधायकतया, वैद्यकस्य भूयिष्ठसाधारणप्रत्येकवनस्पत्युत्पाटनमधु-पिशितमदिरादिप्रयोजकतया, हेमयुक्तेश्च कन्दमूलादिसमूलोन्मूलनवह्निप्रज्वालनादिप्रदर्शकतया, इषुकलायाश्च साक्षादेव शरीरिहिंसनोपायोपदेशकतया तद्व्याख्यानस्य जीवघातनिमित्ततास्वरससिद्धैव, अतो दयालुः-सम्यग्दृष्टिरमूनि नोपदिशेदिति गाथार्थः ॥७२॥ तदेवं सम्यग्दृष्टेर्विधेयनिषेध्यान्युपदर्श्य सम्प्रति तेष्वेव विधिप्रतिषेधौ कर्त्तव्यतया निगमयन्नाह-

**तो अणुकंपपरेण अविरयसम्मत्तणा उ पडिसेहो । पडिसिद्धाणं नियमा विहियाणं विहिओ कायव्वा ॥७३॥**

**व्याख्या**-यस्मात्प्रागुक्तं कर्म्मजातं सकलं निःशूकतासूचकं तस्मादनुकम्पापरेण जीवदयाप्रधानेन अविरतसम्यग्दृष्टिना 'तुः' अवधारणे स च प्रतिषेधपदेन संबध्यते 'प्रतिषेध एव' निवृत्तिरेव कर्त्तव्य इतियोगः, प्रतिषिद्धानां जिनशासने कर्त्तव्यतया निवारितानां प्रागभिहितवाप्यादीनां 'नियमात्' निश्चयेन 'विहितानां' भव्य जन्तुनिस्तारणाय विधेयतयोपदिष्टानां जिनालयादीनां 'विधिः' निर्मापणं 'कर्त्तव्यः' अनुष्ठेयः न चास्याविरतत्वेन प्रागुक्तप्रतिषेध्यप्रतिषेधावधारणानुपपत्तिरिति वाच्यं, वापीकूपादिनिर्मापणस्य लोके धर्म्मतया रूढत्वेन तदुपदेशस्य मिथ्यात्वाविर्भावकतयाऽस्य मूलहान्यापत्तेः, तस्मान्निषेध्यनिषेधे विधेयविधौ चास्य नियम एव श्रेयान्, तद्भावस्य यथाक्रमं मिथ्यात्वहानिसम्यक्त्वशुद्धिव्यञ्जकत्वादिति गाथार्थः ॥७३॥ ननु भवतु भणितयुक्त्या वाप्यादिविषय उपदेशः सम्यग्दृशः प्रतिषेध्यः, दानोपदेशो दानं च पुनः पात्रापात्राविभागेन तस्य विधेयं भविष्यति, तयोः पुण्यहेतुत्वनैव प्रायः सर्वेषामविवादसिद्धत्वादित्याशङ्क्य तत्र यन्निषेध्वं यच्च विधेयं तद् गाथाद्वयेनाह-

**दाणं न होइ विहलं पत्तमपत्ते य संनिउज्जंतं । इय वि भणिए दोसा पसंसओ किं पुण अपत्तो ॥७४॥**

व्याख्या-'दानं' भक्त्या भक्तपानादिविश्राणनं 'न भवति' न जायते 'विफलं' समीहितफलापेक्षया निरर्थकं 'पात्रे' 
संयते मकारः प्राकृतत्वात्, 'अपात्रे' असंयते 'चः' समुच्चये 'संनियुज्यमानं' वितीर्यमाणम् अविशेषेण पात्रापात्राभ्यां दानं

सफलमेव भवतीत्यर्थः, तथाच केषाञ्चिदुक्तिः—"**आहारवस्त्रपात्रादिदाने पात्रपरीक्षणम् । कुर्वन्तः किं न लज्जन्ते दरिद्राः क्षुद्रचेतसः ॥१॥**" इत्यपि, एवमपि भणिते दातृप्रेरकतया प्रतिपादिते, इयन्मात्राभिधानेऽपीत्यर्थः, दोषा आज्ञाभङ्गानवस्था—मुग्धजनोत्पथस्थिरीकरणसत्पथवैमुख्यादयोऽपराधा भवन्ति, भगवत्यां हि सुपात्रशुद्धान्नपानदानस्याभीष्टफलसाधकतया कुपात्रशुद्धाशुद्धान्नपानदानयोश्च दुष्कर्म्मबन्धनिबन्धनतयाऽभिधानात्, तथा च तत्सूत्रम्—"समणोवासगस्स णं भंते ! तहारूवं समणं वा माहणं वा फासुएणं एसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणस्स किं कज्जइ ? गोयमा ! एगंत सो निज्जरा कज्जइ नत्थि य से पापे कम्मे कज्जइत्ति, समणोवासगस्स णं भंते ! तहारूवं अस्संजयअविरयअपडिहयअप्पच्च—क्खायपावकम्मं फासुएण वा अफासुएण वा एसणिज्जेण वा अणेसणिज्जेण वा पडिलाभेमाणस्स किं कज्जइ ? गोयमा ! एगंत सो पावे कम्मे कज्जइ ? नत्थि से कावि निज्जरा कज्जइ"त्ति, एवं चाऽऽगमार्थविवेचनेन यत्कैश्चिद्दाने पात्रापात्रपरीक्षानिवारणं तत्तेषां लौल्यमेवाविष्करोतीति, प्रशंसतः पुण्यवानयं प्राप्तमनेन बह्वायाससाध्यस्य वित्तस्य फलं निस्तीर्णो विस्तीर्णोऽप्यमुना भवाम्भोधिः, नेदीयसी स्वर्गापवर्गश्रीरमुष्य येनास्मै लिङ्गिनेऽपि दानं दत्तमित्यादिभिर्गीर्भिः श्लाघ्यमानस्य अपात्रे दानं संनियुज्यमानं गुणमत्सरिणः पुंसः 'किं पुण'त्ति किं पुनर्दोषप्रसङ्गविषये किमत्र वक्तव्यम् अपात्रदानं प्रशंसतः प्राग्वर्णिता एव दोषाः प्रकर्षवन्त उत्कृष्टस्थितितीव्ररसादिकर्म्मबन्धकारणतया जायन्त इत्याशय इति गाथार्थः ॥७४॥

**गिहमागयाणमुच्चियं पडिसिद्धं भगवया वि नहु सुत्ते । जंपुण तदत्थमसुमंतघायणं तं न जुत्तं ति ॥७५॥**

**व्याख्या**—गृहमागतानाम् अपात्राणामपि भैक्ष्यजिघृक्षया दातृभवनं प्राप्तानाम्, 'उचितं' योग्यं लोकव्यावहाराबहिर्भूतमिति यावत् दानं 'प्रतिषिद्धं' निवारितं 'भगवताऽपि' तीर्थकरेणापि न तु तीर्थान्तरीयैरेवेत्यपि शब्दार्थः 'नहि' नैव 'सूत्रे' आगमे सर्वत्रौचित्यप्रवृत्तेर्गुणकारितया प्रतिपादनात् यदाह—"**उचियं खलु कायव्वं सव्वत्थ सया नरेण बुद्धिमया । इय फलसिद्धी नियमा एस च्चिय होइ आणत्ति ॥१॥**" तर्ह्यपात्राण्युद्दिश्य किमनुचितम् ? इत्याह—यत्पुनः 'तदर्थं' गृहागतापात्राद्यर्थम् ॥११९॥ 'असुमता' पृथिव्यम्बुवनस्पत्यादिजीवानां 'घातनम्' अन्नपाकाय वह्न्यादिसंयोगेन व्यापादनं तत् 'न युक्तं' न समीचीनम्

अपात्रार्थं निरर्थकं जीववधेन तावतः पापराशेः स्वात्मनि भारारोपस्य प्रेक्षावतोऽत्यन्तानुचितत्वात्, यदुक्तम्—"**काऊण य पाणिवहं जो दाणं देइ धम्मसद्धाए । देहिऊण चंदणं सो करेइ अंगारवाणिज्जं ॥१॥ कडमद्दं काऊणं दमदयरहियाण देइ जो दाणं । सो मूसे मारेउं पोसेइ नवरि मज्जारे ॥२॥**" इतिशब्द आद्यर्थः, तदर्थं जीवहत्याकारणानुमती अपि न युक्तेति दर्शयतीति गाथार्थः ॥७५॥ एतत्समर्थनायैव परस्यानिष्टप्रसङ्गद्वयमाह—

**इह सत्तागाराई कहं न दिट्ठं जिणिंदधम्मम्मि । इहरा इट्ठापूयं न निसिद्धं हुज्ज समयम्मि ॥७६॥**

**व्याख्या**—इतरथा इतिपदं, मध्यगतं पूर्वोत्तरयोर्वाक्ययोः संबध्यते, 'इतरथा' अन्यथा असंयतदानार्थं जीवघातस्य युक्तत्वाभ्युपगम इत्यर्थः, 'इह' अस्मिन् 'सत्रागारं' सदा दानगृहं यत्रातिथिकार्प्पटिकरङ्कादीनां शश्वत्पुण्यार्थं भक्तादि दानं दीयते, आदिग्रहणात्प्रपादि 'कथं' केन प्रकारेण 'न दृष्टं' विधेयतया पुण्यहेतुतया च न भाषितं 'जिनेन्द्रधर्मे' वीतरागमते, अयमर्थः—यदि जीवविराधनयाऽपि असंयतदानं पुण्यहेतुरभविष्यत्तदा सत्रागाराद्यपि जिनमतेऽद्रक्ष्यत उभयत्रापि जीवघातेनाऽसंयतपोषाविशेषान्न चैवमस्ति तस्मात्तन्न युक्तमिति, तथा इतरथा इष्टं च पूर्तं च इष्टापूर्त्तम्, इष्टापूर्त्तस्वरूपं च तद्ग्रन्थे एवमभिधीयते—"**एकाग्निकर्म्म हवनं त्रेतायां यच्च हूयते । अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते ॥१॥ वापीकूपतडागानि देवतायतनानि च । अन्नप्रदानमारामाः पूर्त्तं तदभिधीयते ॥२॥**" ततश्चैतदपि न 'निषिद्धं' न निवारितं 'भवेत्' स्यात् 'समये' सिद्धान्ते यद्यपात्रदानं विधेयमभविष्यत्तदेष्टापूर्त्तमपि न समये न्यषेत्स्यत, किन्तु तदपि पुण्यनिमित्ततयोपादेक्ष्यत प्रागुक्तयुक्तेरेव, न चैवमस्ति तत्कस्य हेतोः सर्वस्याप्येतस्य सत्रागारेष्टापूर्त्तादेः परतीर्थिकैः पुण्यानुकम्पार्थं प्रज्ञाप्यमानस्यापि प्राज्यजीवघातपुरस्सरमसंयतपोषणेन निष्प्रयोजननिबिडपातकवज्रलेपकारितया जिनैरननुज्ञातत्वात्, तथा च सूत्रकृताङ्गम्—"**हणंतं णाणुजाणिज्जा आयगुत्ते जिइंदिए । ठाणाइं संति सड्ढीणं गामेसु नगरेसु य ॥१॥**" अस्य चायमर्थः—धर्मश्रद्धावतां ग्रामेषु नगरेषु वा खेटकर्बटादिषु वा 'स्थानानि' आश्रयाः 'सन्ति' विद्यन्ते, तत्र तत्स्थानाश्रितः कश्चिद्धर्मोपदेशेन कल्पितधर्म्मश्रद्धालुतया प्राण्युपमर्दकारिणीं धर्म्मबुद्ध्या कूपतडागखननप्रपासत्रादानयागादिकां क्रियां

कुर्यात्, तेन तथा भूतक्रियायाः कर्त्रा किमत्र धर्मोऽस्ति नास्ति वा ? इत्येवं पृष्टोऽपृष्टो वा तदुपरोधाद्भयाद्वा तं प्राणिनो घ्नंतं नानुजानीयात् स मुनिः सावद्यमनुष्ठानं नानुमन्येत इत्यादिना प्रबन्धेन, तत्र सत्रागारेष्टापूर्त्तादीनां निषेधात्, तस्मादेतद्गाथोपन्यस्ततर्कद्वयपुरस्कारेण दुष्टतया पार्श्वस्थाद्यपात्रदानं सत्रागारादिवत्सम्यग्दृष्टेरत्यन्तमनुचितमिति, एवं च व्यवस्थितमेतद् । विवादपदं दानं, सम्यग्दृशो न विधेयं, जीववधेनासंयतपोषकत्वात्, सत्रागारादिवदिति, तस्मात्पात्रदानमेव शुद्धं मुक्तये देयमिति गाथार्थः ।।७६।। इदानीमनुकम्पालिङ्गं निगमन्नाह–

**एवंविहपरिणामो सम्मद्दिट्ठीजिणेहिं पन्नत्तो । तव्विहचिट्ठाइ पुणो नज्जइ भावो वि एयस्स ।।७७।।**

**व्याख्या**–एवं 'विधपरिणामः' प्रागुक्तानुकम्पारूपाध्यवसायः, 'सम्यग्दृष्टिर्जिनैः भगवद्भिः 'प्रज्ञप्तः' प्रख्यापितः, अथैवं रूपः परिणामोप्यतीन्द्रियत्वात्कथं ज्ञायते ? इति, अत आह–'तद्विधचेष्टया पुनः' उक्तप्रकारजिनालयादिनिर्मितिरूपबहिःक्रियया तु 'ज्ञायते' अनुमीयते 'भावोऽपि' भवोदधिनिमज्जज्जन्तुजातोद्दिधीर्षारूपोंऽतरोऽपि परिणामो योऽतीन्द्रियत्वेन दुर्ज्ञाततया तवाभिमत इत्यपिशब्दार्थः, 'एतस्य' सम्यग्दृष्टेः ''**अर्हद्वेश्मविधापनादिविधिना**[1] **सम्यग्दृशा क्लृप्तया लब्ध्वा बोधिमबाधितां बत यया भव्या विरत्याऽऽहताः । गत्वा निर्वृतिमाभवं विदधते रक्षां पृथिव्यादिषु, ध्येया दर्शनलक्षणं क्षणकरी सैवानुकम्पा बुधैः ।।१।।**'' इति गाथार्थः ।।७७।। चतुर्थलिङ्गमिति अनुकम्पाख्यं लिङ्गं व्याख्यातमित्यर्थः



१. अर्हद्वेश्मेति, विधिनिर्मापणेन, क्षणकरी समस्तस्वर्गापवर्गादिलाभोत्सवहेतुः ।।

## ॥५॥ पञ्चम लिङ्गम् ॥

साम्प्रतं जिनप्रणीतजीवाजीवादिनवतत्त्वगोचरतथ्यताप्रतिपत्तिरूपमास्तिक्यं व्याचिख्यासुर्जीवसिद्ध्यधीनत्वादपरतत्त्वसिद्धेः सकलतत्त्वमूर्द्धाभिषिक्तं जीवतत्त्वं प्रथमं तावद् व्याख्यातुमाह–

**सम्मदिट्ठी जीवो जहत्थाबोहाणुगो तओ मुणइ । परलोगाणुट्ठाणं न घडइ जीवं विणा सव्वं ॥७८॥**

**व्याख्या**–सम्यग्दृष्टिरनुकम्पालक्षणेन लिङ्गेनानुमितसम्यक्त्वो जीवो 'यथार्थबोधानुगो' निरन्तरशुद्धान्ताकर्णेनोपजाता विपर्यस्तज्ञानानुषक्तः, ततः यथार्थबोधात्तच्छब्देनात्र योग्यत्वात् यथार्थबोधोऽनुक्षप्यते 'मुणइ'त्ति जानाति किम् ? इत्याह– 'परलोकः' स्वर्गापवर्गादिस्तत्प्राप्त्यर्थम् 'अनुष्ठानं' जिनपूजादानमहाव्रतपालनतपोब्रह्मचर्यातिकं कुशलकर्म्म, 'न घटते' न सङ्गच्छते, जीवति–पञ्चेन्द्रियाणि त्रिविधं बलं च उच्छ्वासनिःश्वासमायुरेकंरूपान् दशविधप्राणान् धारयति त्रिकालमिति जीवः, प्राणधारणं च जीवशब्दस्य व्युत्पत्तिनिमित्तं, न तु प्रवृत्तिनिमित्तं, प्राणधारणाभावेन मुक्तात्मनामनेनासङ्ग्रहात्, अतोऽनेन व्युत्पत्तिनिमित्तेन तदेकार्थसमवेतं जीवशब्दप्रवृत्तिनिमित्तमुपयोगो लक्ष्यते उपयोगलक्षणत्वात् जीवस्य. तेन मुक्तात्मनोऽपि जीवत्वेन संगृहीता भवन्ति, यथा गच्छतीति गौरिति गमनक्रियायां व्युत्पादितस्यापि गोशब्दस्य गमनक्रियैकार्थसमवेतं गोत्वं प्रवृत्तिनिमित्तं, न गमनं, तेन गच्छन्नगच्छन् वा गौर्गोशब्दप्रवृत्तिविषयी भवति, एवमिहापि प्राणान् धारयन्नधारयन् वा उपयोगलक्षणेन जीवो जीवशब्दप्रवृत्तिगोचरीभवति, सकलजीवव्यक्तिव्यापकत्वादुपयोगस्य, तथा चागमः–''**सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो निच्चुग्घाडिओ**''त्ति सर्वजीवानामपि अक्षरस्य–केवलदर्शनकेवलज्ञानरूपस्य शाश्वतबोधस्यानन्तो भागो नित्योद्घाटितः, यथा वहलाऽविरलजलधरपटलविलुप्तमरीचिनिचयप्रसरस्यापि भानोरह्नि कियानपि प्रकाशो विजृम्भते । अन्यथा जगदन्ध्यप्रसङ्गात्, तथा यद्यप्यनन्तानन्तैः कर्म्मपुद्गलैर्जीवा आवृता एव सन्ति, तथाऽपि चैतन्यस्यालीयानपि भागस्तेषां नित्यमनावृत्त एवास्ते, इतरथा स्वस्वरूपत्यागात् जीवो जीवत्वमेव जह्यात्, तस्मादुपयोग एव जीवस्य लक्षणं. तच्च व्यतिरेक्यनुमानं

जीवसिद्धौ, तथाच प्रयोगः—विवादाध्यासितः पदार्थो जीव इति व्यवह्रियते, उपयोगवत्त्वात्, यः पुनर्जीव इति न व्यवह्रियते, नासावुपयोगवान्, यथा घटः, न चायं नोपयोगवान्, तस्मान्न जीव इति न व्यवह्रियत इति, तमेवंविधं जीवं 'विना' अन्तरेण परलोकानुष्ठानं न सङ्गतिमियर्त्ति, विवाहोपकरणमेलक इव वोढारं विना निष्प्रयोजनत्वात्, सर्वोऽपि हि प्रेक्षावान् कथमहं निरर्गलदुर्गतिभ्रमणरीणः स्वर्गापवर्गसंसर्गलाभेन सुखी स्यामित्यात्मप्रयोजनमुद्दिश्य तदर्थं कुशलकर्म्मणि प्रयतते, यदि वाऽहं शब्दगोचरः पदार्थ एव नास्ति, तदा क इवाकर्णहृदयः किमर्थं परलोकं मृगयेत, परलोकिनोऽभावात्परलोकस्याप्यसिद्धेः, कश्च तदर्थं बहुवित्तव्ययशरीरायाससाध्यमनुष्ठानं विदधीतेति, अत्र भूतचैतनिकाः प्रत्यवतिष्ठते—ननु चैतन्यमुपयोगो ज्ञानमिति पर्यायाः, चैतन्यं च जीवलक्षणत्वेन भवता प्रत्यपादि, तच्च न घटां प्राञ्चति, चैतन्यस्य भूतगुणत्वात्, अन्यगुणस्य चान्यलक्षणत्वे रूपादेरप्याकाशलक्षणत्वप्रसङ्गात्, तस्माद्येषां प्रवृत्तिनिवृत्तिभ्यां तन्निमित्तत्वेनेच्छाप्रयत्नावनुमाय ताभ्यां च तदेकार्थसमवेतं चैतन्यमनुमीयते, तेषां च गुणश्चैतन्यं तानि च कायाकारपरिणतानि भूतानि तस्माच्छरीरगुणश्चैतन्यमिति चेत् तन्न, चैतन्यस्येच्छाप्रयत्नहेतुकयोः प्रवृत्तिनिवृत्त्योः प्रयोज्याश्रयतयैव परश्वादिषु दर्शनात्, तद्यदि चैतन्याद्याश्रयः शरीरं तदा तस्य प्रयोजकतया तदाश्रये प्रवृत्तिनिवृत्ती न स्यातां, ततश्च तत्रापि प्रवृत्तिनिवृत्ती ततः शरीरादन्यः कश्चिच्चैतन्याद्याधारस्तस्य प्रवृत्तिनिवृत्ती प्रति प्रयोजकोऽभ्युपेयः, तथा च प्रयोगः शरीरमिच्छाप्रयत्नचैतन्यानाश्रयः इच्छादिजनितप्रवृत्तिनिवृत्त्याश्रयत्वात्, परश्वादिवदिति, किञ्च यदि कश्चिदविशेषेण भूतानां चैतन्यमिच्छन्निच्छाप्रयत्ननिमित्तिके प्रवृत्तिनिवृत्ती प्रयोजकेऽपि शरीरेऽभ्युपगच्छेत्, तदा तस्य मते यथा पृथिव्यादीनां गुरुत्वादिगुणान्तरहेतुका पतनादिका प्रवृत्तिस्तत्प्रतिबन्धहेतुका चापतनादिका निवृत्तिः सर्वपृथिव्यादिषूपलभ्यते, न तु शरीराम्भकेष्वेव तेषु, तथा चैतन्येन भूतानां तदिच्छाप्रयत्ननिमित्तिके अपि प्रवृत्तिनिवृत्ती सर्वभूतेषूपलभ्येयातां चैतन्यादीनामपि पृथिव्यादिगुणत्वेन गुरुत्वादिवद्द्रवदुपगमेन सकलपृथिव्यादिसाधारणात्, न च घटादिभावमापन्नेषु पृथिव्यादिषूपलभ्यन्ते चैतन्यादयस्तन्निमित्तिके प्रवृत्तिनिवृत्ती वा, तस्मान्न पृथिव्यादिगुणाश्चैतन्यादयः, ननूक्तं मदशक्तिवच्चैतन्यं भूतानामस्माभिरभ्युपेयते न त्वविशेषण, यथा हि परिणामविशेषेण मदिराभावमापन्नेष्वेव गुडधातकीप्रभृतिषु

मद्याङ्गेषु मद्रयित्री शक्तिर्न त्वेवमेव विशकलितेष्वपि, एवं कायाकारपरिणतेष्वेव भूतेषु चैतन्यमाविरस्ति नान्येषु, तत्कथं घटादिषु प्रसङ्गः स्यात्, प्रयोगश्च विवादाध्यासितानि भूतानि चैतन्यवन्ति कायाकारपरिणामवत्त्वात्, यानि पुनरचेतनानि न तानि कायाकारपरिणामवन्ति यथा दण्डादिभूतानीतिचेत् न, अचेतनेष्वपि मृतशरीरभूतेषु कायाकारपरिणामवत्त्वस्य गतत्वेन हेतोरनैकान्तिकत्वात्, अथानैकान्तिकत्वभियेत्थं प्रयोगः क्रियते—कायाकारपरिणतानि भूतानि चैतन्यवन्ति प्रवृत्तिविशेषवत्त्वात्, यानि पुनरचेतनानि न तानि प्रवृत्तिशेषवन्ति यथा घटादिभूतानीति तन्न, एवमपि कायाकारपरिणतेष्वपि मृतदेहभूतेषु प्रवृत्तिविशेषाभावेन हेतोर्भागासिद्धत्वात् ननु कायाकारपरिणतान्येवेति हृदयस्थावधारणेन यदि चैतन्यं भूतेषु तदा कायाकारपरिणतेष्वेवेति चैतन्यं नियम्यते, नत्वेवमवधार्यते, कायाकारपरिणतानि चेतनान्येवेति, तथा च प्रवृत्तिविशेषकक्षीकृतानामेव पक्षीकरणात्, तद्विकलानां कायाकारपरिणतानामपि मृतदेहभूतानां पक्षबहिर्भावात् तैर्भागासिद्धत्वोद्भावनं हेतोरसङ्गतमिति तन्न, कथायां हि वचनगतानां गुणदोषाणां विचार्यमाणतया हृदयस्थावधारणेन दोषोद्धारानवकाशात्, भवतु वा हृदयस्थावधारणं, तथाऽपि प्रवृत्तिविशेषवत्त्वस्य स्वरूपासिद्धत्वात्, तथा हि प्रागुक्तमदशक्तिदृष्टान्तेन हि भवता कायाकारपरिणतानामेव भूतानां चैतन्यं साधयितुमुपक्रान्तं तन्न्यायेन च मदिरावयवेष्वेकैकशोऽपि मदशक्तेरुपलम्भाच्छरीरावयवेष्वपि प्रत्येकं चैतन्यप्रसङ्गेनैकस्मिन्नपि शरीरे बहूनि चेतनानि प्राप्तानि, बहूनां च विरुद्धविचित्राभिप्रायतया ऐकमत्येन प्रवृत्तिविशेषासम्भावात्, अजाकृपाणीयन्यायेन कथञ्चिदेकाभिप्रायत्वेऽपि नियमा भावात्कथं न स्वरूपासिद्धता हेतोरिति, प्रत्यक्षमेवैकं प्रमाणमातिष्ठमानस्य च भवतोऽनुमानप्रयोगेऽपसिद्धान्तः, किञ्च प्रत्येकमवयवचैतन्याभ्युपगमे कथञ्चित्करचरणाद्यपगमे तदनुभूतार्थस्मरणं न स्यात्, न च शरीरे भूतसमुदायपर्यवसितमेव चैतन्यमिति वाच्यं, कतिपयावयवापायेऽपि चैतन्यभावात्, बाल्यकौमारयौवनवार्द्धकावस्थासु शरीरान्यत्वेन प्रागवस्थानुभूतस्यास्म- रणप्रसङ्गाच्च, तस्माच्छरीराच्चैतन्यं तद्व्याप्यं चेच्छादिकं व्यावर्त्तमानं तदन्यगुणत्वेन व्यवतिष्ठते, तस्माच्च शरीरे इच्छाप्रयत्नपूर्वकप्रवृत्तिविशेषसिद्धिः, तथा च प्रयोगः—प्राणिशरीरे प्रवृत्तिविशेषः स्वाश्रयव्यतिरिक्ताश्रयगुणनिमित्तकः प्रवृत्तिविशेषत्वात् । परश्वादिगतप्रवृत्तिविशेषवदिति, अपि च शरीरस्य चैतन्ये बालस्य स्तन्यादिषु प्रथमं प्रवृत्तिर्न प्राप्नोति, प्रयत्नपूर्वकत्वात्प्रवृत्तेः,

तस्य चेच्छापूर्वकत्वात्, इच्छायाश्चेष्टसाधनतानुसन्धाननिबन्धनत्वात्, तस्य च यदेतज्जातीयं तन्ममेष्टसाधनं यथा प्रागनुभूतमितीह जन्मानुभूतप्रतिबन्धस्मरणपुरस्सरत्वात्, पिपासुरपि हि जलमवलोक्य प्रथमं पूर्वानुभूतस्य जलस्यापि पिपासोपशमनसामर्थ्यं स्मरति, ततः प्रतिबन्धं, ततस्तज्जातीयत्वेन प्रकृतस्यापि जलस्य पिपासोपशमनसामर्थ्यमनुसन्धायः तत्र प्रवर्त्तते, न च तदहर्जातस्य बालस्येह जन्मनि प्रथमं स्तन्यानुभवोऽस्ति, तदभावान्न तस्य तृप्तिसाधनता स्मरणं, नाऽपि प्रतिबन्धस्मृतिर्येन तज्जातीयतया स्तन्यस्य तृप्तिसाधनतानुसन्धानेन तत्र प्रवर्त्तते, ननु मा भूदिह जन्मनि बालस्य स्तन्यानुभवस्तथाऽपि प्राग्भवीयस्तन्यानुभवाहितसंस्कारद्वारा स्तन्यस्य तृप्तिसाधनतास्मरणादिक्रमेण तत्रासौ प्रवर्त्स्यति ? इति चेत् न, स्तन्यानुभवितुः प्राक्तनशरीरस्य भस्मसाद्भूतत्वेनेह जन्मभाविना शरीरेण स्तन्यस्य तृप्तिसाधनतादिस्मरणायोगात्, तस्माद्बालस्य प्रागप्रवृत्तिप्रसङ्गादपि शरीरस्य चैतन्यानुपपत्तिः, एवं च शरीरं चेतनं न भवति भूतत्वान्मूर्त्तत्वाद्वा घटवदिति प्रयोगोऽपि सङ्गच्छते, नापि शरीरस्य कार्यं चैतन्यं, तद्धि उपादानतया वा चैतन्यं जनयेत् सहकारितया वा, नाऽऽद्यः, जडाजडयोः शरीरचैतन्ययोरत्यन्तवैलक्षण्येनोपादानोपादेयभावाभावात्, सहकारितया तु कारणत्वमस्माभिरपीष्यत एव, शरीरावच्छेदेनैवात्मन-श्चैतन्योत्पादाभ्युपगमात्, किन्तु शरीरस्य चैतन्यं प्रति सहकारित्वस्वीकारे भवताऽन्यदुपादानकारणं वक्तव्यं, तच्च नात्मनो व्यतिरिक्तं पश्यामः, नापीन्द्रियगुणश्चैतंन्यं, चक्षुरादीन्द्रियप्रध्वंसेऽपि पूर्वानुभूतार्थस्मरणात्, न चानुभवितरि प्रध्वस्ते स्मरणं घटते, विवादास्पदं रूपादिस्मरणं नेन्द्रियोपादानकं, तदन्तरेणापि जायमानत्वात्, तंतूनन्तरेण जायमानघटवत्, दर्शनस्पर्शनाभ्यामेकार्थग्रहणाच्चेन्द्रियगुणश्चैतन्यं न भवति, यमहं पटमद्राक्षं तमेवेदानीं स्पृशामीत्येकार्थविषयं हि प्रतिसन्धानं दृष्टम्, इन्द्रियचैतन्ये च चक्षुषो रूपविषयत्वेन स्पर्शनस्य च स्पर्शं विषयत्वेनैतन्न स्यात्, न हि यदेवं रूपमहमद्राक्षं तमेवाधुना स्पर्शं स्पृशामीति चक्षुः प्रतिसंधत्ते, नापि यमेव स्पर्शमस्प्राक्षं तदेवेदानीं रूपं पश्यामीति स्पर्शनस्य प्रतिसन्धानमस्ति, प्रतिनियतेन्द्रियग्राह्यत्वेन रूपस्पर्शयोर्भेदात्, तस्माद्रूपस्पर्शवन्तमेकमर्थं चक्षुःस्पर्शनाभ्यां करणाभ्यां यः प्रतिसन्धत्ते स इन्द्रियातिरिक्तोऽन्योऽभ्युपेतव्यः, अथ सर्वार्थविषयत्वेन प्रतिसन्धानादिसम्भवात् मनसो गुणश्चैतन्यं भविष्यतीतिचेत् न,

आन्तरसुखादिज्ञानोत्पत्तौ चेतनापेक्षणीयतया करणत्वेनैव तस्यानुमानात्, न चैकमेवैकदा कर्तृ करणं च भवितुमर्हति, किञ्च शरीरवदिन्द्रियमनसोरपि जडत्वेन चैतन्यमजडं प्रत्यत्यन्तवैजात्येन नोपादानभावः कथमपि सङ्गच्छते, तस्माच्छरीराद्यतिरिक्तस्य यस्य चैतन्यं गुणः स जीव इत्यात्मेति चाख्यायते, स चाहं सुखी अहं दुःखीत्यादिरूपान्तर्मुखसंवेदनप्रत्यक्षेण प्रतीयमानत्वात्सर्वप्राणीनां स्वसंवेदनप्रत्यक्षः, नन्वहं सुखीत्यादिप्रत्ययस्याहं गौरः पीनो युवेत्यादिप्रत्ययच्चैतन्यविशिष्ट–कायविषयत्वेनाप्युपपत्तेः, किं ? कायातिरिक्तात्मकल्पनया, नह्यहं गौर इत्यादिप्रत्ययः कायातिरिक्तालम्बनतयोपपादयितुं पार्यत इति चेत् न, अहं सुखीत्यादिप्रत्ययस्य कायविषयत्वे घटादिवत्कायस्यापि भूतत्वेन घटादिष्वयं घट इत्यादिबहिर्मुखप्रत्ययवत्कायेऽप्ययं सुखीति बहिर्मुखः प्रत्ययः स्यात् न चैवमस्ति, कायाकारपरिणतिलक्षणस्तु घटादिभ्यो विशेषः प्रागेव निरस्तस्तस्मादहं सुखीत्याद्यन्तर्मुखप्रत्ययेन कायातिरिक्तश्चेतनः संवेद्यते, कथं तर्ह्यहं गौरं इत्यादौ कायविषयोऽहमिति व्यपदेशः ? इति चेत् न, औपचारिकत्वात्तस्य, अनादिकालात्यन्तिकसम्बन्धेनाभेदाध्यवसायादात्मनः कायेऽप्यहंशब्दाध्यारोपादहं गौर इत्यादिप्रतीतेरूपपत्तेः, अहं सुखीत्यादिप्रत्ययः कायाद्यतिरिक्तालम्बनः कायादिप्रत्ययेभ्यो विलक्षणप्रत्ययत्वात् पटादिप्रत्ययवदिति, तथा सात्मकं जीवच्छरीरं प्राणादिमत्त्वाद्यत्पुनर्निरात्मकं न तत्प्राणादिमद् यथा घटः, न च जीवच्छरीरं न प्राणादिमत्, तस्मान्न निरात्मकमिति आत्मानं विना प्राणादिमत्त्वमनुपपद्यमानं विपक्षघटादिव्यावृत्त्या जीवच्छरीरे उपलभ्यमानमात्मसत्तां गमयति, तदेवं कायाद्यतिरिक्तस्य चैतन्याश्रयस्य त्रिकालस्थायिनो जीवस्य सिद्धेः, प्रेक्षावतां परलोकानुष्ठानस्यापि फलवत्त्वसिद्धिः, स्वर्गापवर्गार्थिनां कुशलानुष्ठानं फलवत् प्रेक्षावदनुष्ठानत्वात्, वणिगादीनां वाणिज्याद्यनुष्ठानवत्, तदेतदपि जीवं विना अघटमानं प्रेक्षावद्भिश्चादरेण विधीयमानं परलोकिनं जीवं सूचयति, न हि प्रेक्षावन्तो निष्फलं चेष्टन्त इति गाथार्थः ॥७८॥ अत्र बौद्धः प्राह–त्रिकालानुगश्चैतन्याश्रयो जीवोऽस्तीति न सङ्गच्छते, सकलभावानां क्षणिकत्वात्, तथा हि यत्सत्तत् क्षणिकं, यथा घटः, संश्च विवादाध्यासित इति, सत्त्वं चार्थक्रियाकारित्वं, नहि संश्चार्थो न चार्थक्रियाकारीति संभवति, तथा ज्ञानान्येव संतन्यमानानि क्षणिकानि सन्ति, न ततोऽन्यदाश्रयस्थास्नुः कश्चित् ? इति चेत् न, दृष्टान्ते घटादौ कालान्तरस्थायिनि क्षणिकत्वस्यासिद्धेर्हेतोर्विरुद्धत्वेन सत्त्वस्य

क्षणिकत्वेन व्याप्त्यसिद्धेः, ननु कालान्तरभाविजलधारणाद्यर्थक्रियासामर्थ्येन वर्त्तमानकाले च तदसामर्थ्येन सामर्थ्यासामर्थ्यलक्षण–विरुद्धधर्म्मसंसर्गेणं पूर्वापरकालयोर्घटादेर्दृष्टान्तस्यैकत्वासिद्धौ क्षणिकत्वं सेत्स्यति, योहि विरुद्धधर्म्माध्या–सितो नासावेकः, यथा जलानलौ, विरुद्धधर्माध्यासितश्च पूर्वापरकालयोरेकत्वेन विवक्षितो घटादिरिति चेत् न, सामर्थ्यासामर्थ्यलक्षणविरुद्ध–धर्म्मसंसर्गासिद्धेः, प्रसङ्गतद्विपर्ययाभ्यां विरुद्धधर्म संसर्गः सिध्यतीति चेत्, तथा हि वर्त्तमानक्षणभावि कार्यं जनयतो बीजस्य यदि भूतभाविकार्यजननसमर्थाद्वीजाद्भेदो नास्ति, तदा समर्थस्य क्षेपायोगेन भूतभाविनी अपि कार्ये वर्त्तमानक्षण एव जनयेदिति प्रसङ्गः, न जनयेच्चेत्तर्ह्यसमर्थं तदिति विपर्ययः, तच्च समर्थादन्यदिति, न ह्येकमेवैकस्मिन्नेव कार्ये समर्थमसमर्थं चेति घटते, यद्यदा यज्जननसमर्थं तत्तदां तत्करोत्येव, यथा सामग्रीमध्यमध्यासीनं बीजमङ्कुरं, समर्थश्चायं वर्त्तमानक्षणभाविकार्यकारी भावो भूतभाविनोरपि कार्ययोर्भवद्भिरभ्युपगत इति प्रसङ्गहेतुः, न च वर्त्तमानक्षणभाविकार्यकाले भूतभाविनी अपि कार्ये करोति, तस्माद्भवतु विपर्ययः, यद्यदा यन्न करोति न तत्तदा तज्जननसमर्थं, यथा शाल्यङ्कुरे यवबीजं, न करोति च भावो वर्त्तमानक्षणभाविकार्यकाले भूतभाविनी कार्ये इति, तस्मात्समर्थात्सामग्रीपतिताद्भावादन्यः कुशूलादिनिहितोऽसमर्थो भाव इति सिद्धः क्षणभङ्ग इति चेत् न, विकल्पानुपपत्तेः, प्रसङ्गहेतौ हेतुतया सामर्थ्यं यदुपन्यस्तं तत्किं करणं वा विवक्षितं योग्यता वा, नाद्यः, साध्यसाधनयोरभेदेन साध्याविशिष्टत्वप्रसङ्गात्, नापि द्वितीयः, योग्यता हि सहकारिसाकल्यं वा स्वाभाविकी वा, न प्रथमः, सहकारिसाकल्यवतो बीजस्य सर्वैरप्यङ्कुरकर्तृत्वाभ्युपगमेन सिद्धसाधनात्, स्वाभाविकी तु योग्यता बीजत्वं वा बीजत्वावान्तरजातिभेदो वा स्यात्, नाद्यः, कुशूलादिनिहिते बीजेऽङ्कुरमकुर्वाणेऽपि बीजजातीयत्वस्य सम्भवात्, भवतोऽपि तत्र विप्रतिपत्तेरभावात्, न द्वितीयः, अङ्कुरं कुर्वाणे बीजे बीजत्वावान्तरजातिभेदस्याप्रामाणिकत्वेन मयाऽनभ्युपगमात्, तथा च साधनविकलो दृष्टान्तः, नहि बीजत्वावान्तरजातिभेदः प्रत्यक्षेण गृह्यते, तथा निश्चयाभावात्, नाप्यनुमानेन लिङ्गाभावात्, ननु तर्हि कुतो विशेषात्समर्थमपि कुशूलगतं बीजमङ्कुरं न करोति, सामग्रीमध्यगतं तु करोतीति चेत् सत्यं, सहकारिलाभालाभाभ्यामिति संभावयामः, तथा च ताभ्यामेव समर्थस्यापि बीजस्याङ्कुरकरणाकरणसम्भवेन सामर्थ्यासामर्थ्यलक्षणविरूद्धधर्म्मसंसर्गाभावात्कुशूल–

निहितसामग्रीगतबीजयोर्भेदाभावेन क्षणिकत्वायोगान्न सत्त्वक्षणिकत्वयोर्व्याप्तिसिद्धिः, एतेन विपर्ययसाधनमपि प्रत्युक्तं कुशूलनिहितबीजादङ्कुरानुत्पादस्य सहकारिवैकल्यप्रयुक्तत्वात्, तथाच न सत्त्वेन क्षणिकत्वं भावानां सिध्यति, भवतु वा क्षणिकोऽर्थः तथाऽपि सोऽर्थक्रियां कुर्वाणः स्वक्षणे कुर्यात्, पूर्वक्षणे वा, उत्तरक्षणे वा, इति त्रयः कल्पाः, तत्र न तावत्स्वक्षणे समसमयभावित्वेन क्षणयोः सव्येतरगोविषाणयोरिव हेतुहेतुमद्भावानुपपत्तेः, न द्वितीयः, स्वयमसतः कारकत्वायोगात्, न तृतीयः, उत्पादानन्तरं विनष्टस्य कर्तृत्वाभावात्, ततश्च त्रिष्वपि कालेषु क्षणिकस्यार्थक्रियाऽसम्भवेन कार्यस्याकस्मिकत्वप्रसङ्गः, किञ्च त्रिकालस्थाय्यात्माऽभ्युपगमे ज्ञानानां क्षणनश्वरत्वेन पूर्वानुभूतार्थस्मरणानुपपत्तिः, अन्येन ज्ञानक्षणेनानुभूतेऽर्थेऽन्येन स्मृतेरसम्भवात्, अन्यथा देवदत्तानुभूतेऽर्थे यज्ञदत्तस्यापि स्मरणप्रसङ्गात् प्रतिसन्धानमपि न प्राप्नोति, तद्धि यज्जातीयं स्रक्चन्दनादिकं सुखहेतुम् अहिकण्टकादिकं दुःखहेतुं वा पूर्वानुभूतं स्मरामि तज्जातीयमिदानीमनुभवामीति एवमाद्याकारेण पूर्वानुभवतज्जन्यसंस्कारद्वारकस्मरणवर्त्तमानानुभवानामेकेनानुव्यवसाययेनैककर्तृकतयासङ्कलनं तदेतदेतेषां ज्ञानानामेकं सङ्कलयितारं विना न स्यात्, भावे वा चैत्रज्ञानानां मैत्रेण प्रतिसन्धानापत्तेः, नानात्वेऽपि ज्ञानानां कार्यकारणभावादन्यज्ञानक्षणानुभूते-ऽन्येन स्मरण प्रतिसन्धानं वा भविष्यति, चैत्रमैत्रज्ञानानां तु तदभावान्न चैत्रानुभूते मैत्रस्य स्मरणादिकमिति चेत्तन्न, उपाध्यायानुभूते शिष्यस्य स्मरणादिप्रसङ्गात्, तज्ज्ञानानां कार्यकारणभावाविशेषात्, शरीरभेदाग्रहे सतीति चेत्, न, प्राग्जन्मानुभूतार्थनामिह जन्मनि जातिस्मरेणास्मृतिप्रसंगात्, जातिस्मरणस्य च भवताऽप्यभ्युपगमात्, सर्वज्ञेन च प्राग्भवीयस्वज्ञानानामप्रतिसन्धानापत्तेः, किञ्च कार्यकारणभावमात्रस्य स्मृतिहेतुत्वे प्रत्यक्षोपलभ्यमानेऽप्यर्थे स्मृतिरापद्येतेति, तदेवमेवमादौ सत्यपि दूषणे सूत्रकारो बालानामपि झटितिसुखप्रतीत्याधायकमस्मिन् पक्षे दूषणान्तरमाह-

**अकयागमकयनासो विण्णाणखणम्मि भावओ सन्ते । उदयाणंतरनासे जेण कयं सो न भुत्त त्ति ॥७९॥**

**व्याख्या**-येन ज्ञानेन न कृतं-न विहितं ब्रह्मचर्यदानादिकं स्वर्गादिहेतुः, प्राणवधचौर्यादिकं च नरकादिहेतुः कर्म्म तस्य ज्ञानक्षणस्य आगमः, शुभकर्मफलस्य स्वर्गादेः, अशुभकर्म्मफलस्य च नरकादेः प्राप्ति-रुपभोग इति यावत्, येन च

 

ज्ञानक्षणेन कृतं शुभाशुभानुष्ठानं तस्य नाशः–स्वर्गादिनरकादिलक्षणस्य फलस्य अलाभोऽनुपभोग इत्यर्थः, ततो द्वन्द्वः, तौ प्रसज्येते इति शेषः, अयमर्थः–ब्रह्मचर्यप्राणवधादिफलं हि स्वर्गनरकादिकं जन्मान्तरे भोक्ष्यते येन च ज्ञानक्षणेनेह जन्मवर्त्तिना ब्रह्मचर्यादिकमनुष्ठितं तस्य तदैव विनष्टत्वान्न ब्रह्मचर्यादिफलस्य स्वर्गादेरूपभोगः–सङ्गतिमियर्ति, यस्य च जन्मान्तरभाविनो ज्ञानक्षणस्य स्वर्गाद्युपभोगः संपत्स्यते न तेन ब्रह्मचर्याद्यनुष्ठितं, तथा चान्यो ज्ञानक्षणः शुभाशुभकर्म्मणः कर्त्ता, अन्यश्च तत्फलोपभोक्तेत्यकृतागमकृतनाशौ प्राप्नुतः, तथा च वृथा परलोकानुष्ठानाभ्युपगमः, 'विज्ञानक्षणे' क्षणिकज्ञान एव, 'भावतः' परमार्थतः 'सति' विद्यमाने, ज्ञानक्षण एव प्रतिक्षणविशरारुः संतन्यमानो वास्तवः कर्त्तृभोक्तृस्वभावः समस्ति,न तु तदाश्रयः स्थेयान् कश्चिदात्मा प्रमाणसहोऽस्तीति पक्षाभ्युपगम इत्यर्थः, तेन संवृत्तिसत्यऽप्रामाणिकलोकस्थिरैकप्रत्ययगोचरे सत्यप्यात्मनि नास्माकं काचित्क्षतिस्तस्याऽपारमार्थिकत्वादिति भावः कथमकृताभ्यागमादिप्रसङ्गः ? इति चेद् अत आह–'उदयानन्तरम्' उत्पादोत्तरक्षण एव 'नाशे–' पूर्वज्ञानक्षणस्य ध्वंसे अभ्युपगम्यमाने इति शेषः, येन ज्ञानक्षणेन 'कृतं' निर्म्मितं कुशलाकुशलकर्म्म स ज्ञानक्षणो 'न भोक्ता' न फलानुभावुकः, कर्म्मकर्त्तुर्ज्ञानक्षणस्य विनाशेन फलभोगक्षणेऽन्यस्योत्पत्तेः 'इतिः' हेतौ अस्माद्धेतोरकृतागमकृतनाशप्रसङ्गः, किं वाऽस्मिन् पक्षे शुभाशुभकर्म्मप्रवृत्तिनिवृत्त्योरप्यभावः प्राप्नोति, सर्वो हि प्रेक्षावान् शुभाशुभकर्म्मणोरागामिस्वर्गनरकादिफलभिसन्धानेन शुभकर्म्मणि दानादिके प्रवर्त्तते, अशुभकर्म्मणश्च हिंसादेर्निवर्त्तते, यदा त्वेवं निश्चितम्–अन्यः कर्म्मकर्त्ता अन्यश्च तत्फलभोक्तेति, तदा क इव शुभकर्म्मणि प्रवर्त्तेत ? तत्प्रवृत्तावपि तत्फलस्य स्वर्गादेरन्येनोपभोगात्, स्वमुखसम्पत्तेरेव च सर्वैरिष्टत्वात्, नाप्यशुभकर्म्मणः कश्चिन्निवर्त्तेत, तदनिवृत्तावपि तत्फलस्य नरकादेरन्यप्राप्तेः, तथा चासौ निःशङ्कं हिंसादौ प्रयतेत तस्मादत्र पक्षे एकस्यैव कर्त्तृत्त्वभोक्तृत्वाभावाज्जगन्निरीहं जायेतेति, अभ्युपगम्य चेदमुक्तं–वस्तुतस्तु प्रतिक्षणं स्वोत्पादव्ययाभ्यामाकुलीकृतानां ज्ञानक्षणानां शुभाशुभकर्म्मकरणतत्फलोपभोगकालासम्भव एव, तस्मात्क्षणिकज्ञानपक्षे परलोकानुष्ठानं कथमपि न सङ्गच्छत इति गाथार्थः ॥७९॥ ननु क्षणिकज्ञानपक्षे एकस्यैव ज्ञानक्षणस्य कर्तृत्वभोक्तृत्वे मा भूतां तत्सन्तानस्य तु भविष्यतः तस्य स्थिरैकरूपत्वात्, यथा हि लाक्षारसावसेकः कर्प्पासबीजे

निषिक्तस्तज्जनितातिशयाधानक्रमेण कालान्तरे कुसुमेषु रक्ततामुन्मीलयंति, तथा यस्मिन्नेव ज्ञानसन्ताने कुशलाकुशलकर्म्मयोगः सञ्जातः, तस्मिन्नेव विशिष्टविशिष्टतरोत्तरोत्तरक्षणोत्पादक्रमेण प्रेत्य सुख–दुःखफलोपभोगोऽपि सम्पत्स्यते यदुक्तम्–"**यस्मिन्नेव हि सन्ताने आहिता कर्म्मवासना । फलं तत्रैव संधत्ते कर्प्पासे रक्तता यथा ॥१॥**" तथा चैक एव ज्ञानसन्तानः कर्त्ता भोक्ता च घटिष्यत इत्याशङ्क्याह–

**संताणो उ अवत्थू अचेअणाओ य चेयणमजुत्तं । जुज्जइ सहकारित्तं नूणमुवादाणरूवत्तो ॥८०॥**

**व्याख्या**–सन्तानस्तु 'तुः' पुनरर्थे 'सन्तानः' कार्यकारणभावक्रमेण निरन्तरोपजायमानो ज्ञानप्रवाहः, स पुनरवस्तु विचारासहत्वादविचारितरमणीयः, तथा ह्यधिकृतसन्तानः सन्तानिभ्यो ज्ञानक्षणेभ्यो व्यतिरिक्तोऽव्यतिरिक्तो वा स्यात्, यद्यव्यतिरिक्तस्तदा सन्तानिनो ज्ञानक्षणा एव सन्तानः, तथा च विज्ञानक्षणपक्षोक्त एव दोषः, अथ व्यतिरिक्तस्तदाऽपि किं वस्तु सन् तदितरो वा, यदाऽपि वस्तु सन् तदाऽपि किं चेतनोऽचेतनो वा, यदि तावत्सन्तानिभ्यो व्यतिरिक्तो वस्तु सन् चेतन इति पक्षस्तदा नामान्तरेणात्माभ्युपेतः स्यात्, कथंचिज्ज्ञानव्यतिरिक्तस्य वस्तुसतश्चेतनस्यैवास्माभिरप्यात्मतयोपगमात्. अथ व्यतिरिक्तो वस्तुसन्नचेतन इति पक्षस्तत्र सूत्रकार एवाग्रिमपादेनोत्तरं वक्ष्यति, अथ व्यतिरिक्तोऽवस्तुसन्निति पक्षस्तदा अवस्तुसतः सन्तानस्य वन्ध्यासुतज्ञानसन्तानायमानत्वेन कर्तृत्वभोक्तृत्वानुपपत्तिः, तदिदमुक्तं 'संताणो उ अवत्थू'त्ति ॥ साम्प्रतं यदुक्तं सूत्रकार एवोत्तरं वक्ष्यतीति तदाह–अचेतनाच्च सन्तानाद्वस्तुसतोऽपि सकाशात् 'चः' समुच्चये 'चेतनं' जन्मान्तरभाविज्ञानं, भोक्तृ उपजायत इति शेषः, अयमर्थः–इह जन्मभाविनोऽचेतनात् ज्ञानसन्तानात्कर्म्मकर्तुः प्रेत्यभावी ज्ञानसन्तानः फलोपभोक्तोत्पद्यते, इह च कर्तृभोक्तृसन्तानस्यैकत्वेऽपि जन्मद्वयभाविकर्तृत्वभोक्तृत्वोपाधिद्वयापेक्षया पञ्चम्या भेद उक्तस्ततश्चाचेतनाच्चेतनं जायत इति 'अयुक्तम्' अनुपपन्नं, तदाहि घटादपि भोक्तृचेतनोत्पादप्रसङ्गात्, ननु मा भूदचेतनस्य सन्तानस्य वस्तुसतोऽपि जन्मान्तरभाविभोक्तृज्ञानं प्रत्युपादानतया हेतुत्वं सहकारितया तु भविष्यतीति चेत् तत्राह–'युज्यते' उपपद्यते 'सहकारित्वं' निमित्तकारणत्वं 'नूनम्' अवश्यम्भावेन उपादानरूपत्वे उपादानकारणत्वे सति किञ्चित्कार्यं प्रत्युपादानकारणमेव सन् भावकार्यान्तरं

प्रति निमित्तकारणं भवति, तथा हि क्षितिजलानिलतेजोबीजलक्षणात् पञ्जति प्राग्भाविनः समर्थादुत्तरोत्तरः क्षितिजला अनिलतेजोबीजलक्षण एव पुञ्जः समर्थतरादिक्रमेणोत्पद्यते, यावदत्यसमर्थान्त्यपुञ्जोत्पादः, तत्र च प्रथमपुञ्जगतं बीजमुत्तरपुञ्जगतं बीजं प्रत्युपादानकारणं क्षित्यादीनि तु प्रथमपुञ्जगतानि निमित्तकारणम्, एवं क्षित्यादीन्यपि प्रथमपुञ्जगतानि उत्तरपुञ्जगतक्षित्यादीनि प्रति यथा स्वमुपादानकारणानि बीजं तु प्रथमपुञ्जगतं निमित्तकारणम्, एवं क्षित्यादिष्वपि परस्परं निमित्तकारणभावो बौद्धमते बोद्धव्य इति उपादानसहकारिकारणव्यवस्था, इह तु सन्तानोऽचेतनो न किञ्चिदपि प्रति भवतोपादानकारणमिष्यते, येन जन्मान्तरभाविभोक्तचेतनं प्रति सहकारितां यायात्, उपादानव्याप्तत्वान्निमित्तताया इति भवत्सिद्धान्तात्, तस्मादेकज्ञानक्षण वत्सन्तानस्यापि न कर्तृत्वभोक्तृत्वे संभवत इति तदतिरिक्तात्माङ्गीकार एव सर्वमुपपद्यत इति गाथार्थः ॥८०॥

ननु ज्ञानमेव शुभानुष्ठानजनितवासनातिशयसहकृतं कालान्तरे स्वर्गनरकादौ स्रग्वनितादिविषकण्टकाद्यभिप्रेतान-भिप्रेतविषयसान्निध्ये सुखरूपं दुःखरूपं च प्रादुरस्ति, तथा च किं तदतिरिक्तसुखदुःखलक्षणफलभोक्तृकल्पनयेति चेत् तन्न, किं प्रवृत्तिज्ञानसन्तानगतज्ञानमधिकृत्य ज्ञानस्य सुखदुःखरूपता साध्यते भवता, आहोस्वित् आलयसन्तानगतज्ञानमधिकृत्य ? नाद्यः, हेतुस्वरूपफलभेदेन ज्ञानात्सुखदुःखयोर्भेदसिद्धेः, न खलु वनितारूपादिज्ञानोत्पत्तौ या सामग्री वनितादिलक्षणा सैव सुखदुःखयोरपि, किन्तु रागादिवासनाविशेषोऽपि, अन्यथा रागिण इव मुमुक्षोरपि वरवर्णिनीपिशाच्यो रूपादिज्ञानात्सुखदुःखोत्पाद-प्रसङ्गात्, निदाघेऽपि शिशिर इव घुसृणस्पर्शज्ञानादाह्लादापत्तेः, ननु तथाऽपि रूपालोकमनस्कारादिसामग्रीजन्यत्वात् ज्ञानसुखदुःखानामभेदोऽस्तु इति चेत्, न, सामग्रीसामान्याविशेषेऽप्यवान्तरदेशकालभावादिसामग्रीविशेषाद्भेदोपपत्तेः, एवं च हेतुभेदात्कथमभेदो ज्ञानात्सुखदुःखयोः, तथा स्वपरप्रकाशकं ज्ञानम्, अनुकूलप्रतिकूलवेदनीये च सुखदुःखे इति स्वरूपभेदोऽपि तेषां हिताहितप्राप्तिपरिहारार्थे च प्रवृत्तिनिवृत्ती ज्ञानस्य फलं, नवनवस्वगोचरतृष्णातद्वैमुख्यजननं, नयनादिप्रसादवैवर्ण्याद्युत्पादनं च, सुखदुःखयोरिति फलभेदोऽपि, नापि द्वितीयः विकल्पः, तत्रापि हेतुस्वरूपफलभेदस्योक्तन्यायेन सम्भवात्, आलयज्ञानस्य हेतुः समनन्तरप्रत्ययसंज्ञि पूर्वज्ञानं, सुखदुःखयोस्त्विष्टानिष्टविषयसन्निकर्षादिकं, स्वरूपं तु ज्ञानस्य स्वान्यनिर्भासकत्वमहं

प्रत्ययविषयत्वं च, सुखदुःखयोस्तु प्रागुक्तमेव, फलं तु तस्योत्तरज्ञानप्रवाहजननं प्रवृत्तिज्ञानोत्पादनं च, सुखदुःखयोस्तूक्तमेव, किं चालयज्ञानस्य सुखदुःखरूपत्वेऽहं सुखमहं दुःखमिति प्रत्ययः स्यात्, न त्वहं सुखी अहं दुःखीति, तस्माज्ज्ञानात्सुखदुःखयोः कथञ्चिद्भेद एवेति, तदेवं भेदसिद्धावपि बालाङ्गनादिप्रतीताऽसाधारणकारणप्रदर्शनेन ज्ञानात्सुखदुःखयोर्भेदं प्रतिपादयन् सूत्रकारः प्रवृत्तिज्ञानादिविशेषाविवक्षया ज्ञानमाश्रित्य तदभेदं निरसितुमाह–

**इह पुण्णापावपभवा सुहदुहसंवित्ति जंतुणो जम्हा । ता देवसुया णाणं सुहदुहसंवेयणं नत्थि ॥८१॥**

**व्याख्या**–'इह' अस्मिन् लोके प्रवचनेन च, कुशलानुष्ठानसाध्या कर्म्मप्रकृतिः पुण्यम्, अकुशलानुष्ठानसाध्या तु पापं, ततो द्वन्द्वः, 'तत्प्रभवा' पुण्यपापलक्षणाऽसाधारणकारणनिष्पाद्या, न तु ज्ञानवन्मनस्कारादिमात्रसाध्या, सद्वेदनीयोदयादात्मनः प्रसादपरिणामः सुखम्, असद्वेदनीयोदयादात्मनः सन्तापपरिणामो दुःखं, तयोः संवित्तिरनुभवो भोग इति यावत्, अत्र विसर्गलोपः प्राकृतत्वात् 'जन्तोः' आत्मनः, अनेन च सुखदुःखयोरधिकरणं ज्ञानातिरिक्तं दर्शयति, यस्माद्यतो हेतोः, बालादिलोकस्यापि पुण्यपापहेतुकत्वं सुखदुःखयोः प्रतीतमेव, बालानामपि धर्म्मं कुरु वयस्य ? येन सुखी भवसि, पापं मा कार्षीर्येन दुःखी भवसी त्यादेर्वचनोपन्यासस्य श्रवणात्, आगमे तु–**बालस्य परस्स बालत्तं अधम्मं पडिवज्जिया । चिच्चा धम्मं अहम्मिट्ठे नरएसुववज्जए ॥१॥ धीरस्स परस्स धीरत्तं सव्वधम्माणुवत्तिणो । चिच्चा अहम्मं धम्मिट्ठे देवेसु उववज्जइ ॥२॥** त्ति, इत्यादिना सुखदुःखयोः पुण्यपापप्रभवत्वस्य प्रपञ्चनात्, तत्तस्मात् कारणाद्देवसुता बुद्धपुत्रा इति सौगतानामाभिमुख्यकरणं तेषामिहं वादित्वात्, 'ज्ञानं' भवदभिमतालयज्ञानप्रवृत्तिज्ञानलक्षणं चैतन्यम्, अत्र चैवकारोऽवधारणार्थो द्रष्टव्यः, तेन ज्ञानमेव सुखदुःखसंवेदनं –सुखदुःखरूपो भोगो न तु ज्ञानातिरिक्तः सुखदुःखोपभोक्ताऽन्यः कश्चित् इतिरत्रगम्यस्तेन इति 'नास्ति' न विद्यते आलयज्ञानप्रवृत्तिनाज्ञाभ्यां पुण्यपापलक्षणासाधारणकारणप्रभवत्वेन सुखदुःखयोर्भेदप्रसाधनात्, एवमप्यभेदे जगति भेदव्यवहारोच्छेदप्रसङ्गात्, सुखदुःखे ज्ञानाद्भिन्ने तत्कारणभिन्नकारणप्रभवत्वात् घटात्पटवदिति, तन्न ज्ञानमेव स्वर्गनरकादौ सुखदुःखरूपं जायत इत्यास्थेयं, किन्तु तदतिरिक्तः सुखदुःखभोक्ता जीवः परलोकानुष्ठाननिर्वाहाय श्रद्धेय इति गाथार्थः ॥८१॥

तदेवमात्मनि व्यवस्थिते आत्माद्वैतवादी पूर्वपक्षयति, नन्वेक एवात्मा परमब्रह्मरूपो व्यापकः सकलजगच्छरीराण्यभिव्याप्य शश्वद्वर्तते, न तु प्रतिशरीरं पृथगात्मानः सन्तीति ? तदसमीचीनम्, एकस्यैवात्मनः सकलशरीरेधिष्ठायकत्वे निखिलशरीरभाविनां सुखदुःखादीनामेकस्मिन्नेव देवदत्तशरीराऽनुभवप्रसङ्गात्, इतरथा तस्य निखिलशरीरव्यापकत्वं नोपपद्येत, यथा च बाल्यकौमाराद्यवस्थास्वात्मन एकत्वाद्बाल्याद्यनुभूतं यौवनाद्यवस्थायां स्मर्यते, तथैकेनानुभूतं सर्वैः स्मर्येत सर्वशरीरेष्वात्मनोऽभेदात्, तथैकात्म्ये सुखदुःखनिमित्तयोर्धर्म्मा धर्मयोः सर्वसाधारण्येन कश्चित्सुखी कश्चिद्दुःखीत्यपि प्रतिनियमो न स्यात्, सर्वे सुखिनो दुःखिनो वा भवेयुः, शरीरभेदेनैकस्याप्यात्मनः कश्चित्सुखीत्यादिप्रतिनियमो भविष्यतीति चेत्, भवतु किं नाम योऽहं चैत्रः सुखी अभूवं सोऽहं मैत्रः सम्प्रति दुःखी जात इति प्रतिसन्धानं स्यात्, ननु यथा स्वप्राग्भवानुभूतसुखादीनां शरीरभेदादिह जन्मनि प्रतिसन्धानं न भवति, तथा ऐकात्म्येऽपि चैत्रानुभूते मैत्रस्य प्रतिसन्धानं न भविष्यतीति चेत् तन्न, प्राग्भवीयसुखादीनां हि तदनुभवजनितसंस्कारस्य मरणगर्भवासादिदुःखैरभिभूतत्वादप्रतिसन्धानं युक्तं, न चेह चैत्रानुभूते मैत्रस्याप्रतिसन्धानकारणं किञ्चिदुपलभ्यते, एवमेवाप्रतिसन्धाने च स्वानुभूतार्थस्यापि चैत्रेणाप्रतिसन्धानप्रसङ्गात्, परमात्मन एकत्वेऽपि संसार्यात्मनां नानात्वान्न विश्वेषां स्मरणप्रतिसन्धानादयो भविष्यन्तीति चेत् ? नन्वेवं नानात्वाभ्युपगमे आत्माद्वैतसिद्धान्तव्याकोपः, अविद्यामहिम्ना संसार्यात्मनां परमात्मनो भेदप्रतिभास इति चेत् न, किमधिष्ठानेयम् अविद्या परमात्मसंसार्यात्मनां भेदप्रतिमासं जनयति, न तावत्परमात्माधिष्ठानां तस्य स्वसंवेदनप्रत्यक्षशुद्धबुद्धस्वभावत्वात्, नापि संसार्यात्माधिष्ठानां सा हि तदधिष्ठाना तदुत्पाद्यत्वेन वा भवेत्, अन्यकृततत्संयोजनेन वा, न तावदाद्यः, अविद्योत्पत्तेः प्राक् संसार्यात्मनां भिन्नप्रतिभासविषयतया सत्त्वेन तदुत्पाद्यत्वाभावात्, न द्वितीयः, स ह्यन्यः परमात्मा वा स्यात्, तद्व्यतिरिक्तोऽपरो वा कश्चित्, न तावत्परमात्मा, तस्य स्वयमनवद्यविद्यामयत्वेना– विद्यादरिद्रतया संसार्यात्मसु अविद्यासंयोजनाभावात्, न द्वितीयस्तस्याभावात्, नहि परमात्मव्यतिरिक्तोऽन्यः कश्चिदविद्यावान् जगत्यस्ति यः संसार्यात्मस्वविद्यां संयोजयेत्, तस्मादविद्याया असत्त्वादेव तत्कृतपरमात्मसंसार्यात्मभेदाभावे ैकस्य देवदत्तादेरनुभवस्मरणसुखदुःखप्रवृत्त्यादिभिर्विश्वेषामनुभवस्मरणादयो युगपत्प्रसज्यमानाः केन निवार्येरन्, न च यौगपद्येनोपलभ्यन्ते

देवदत्तादीनामनुभवादयः, तस्मात्प्रतिशरीरं पृथगात्मान इति स्थितं, तदेवं नानात्मसिद्धावपि ।।८१।। सूत्रकारो युक्त्यन्तरेणात्मनानात्वं समर्थयन्नाह –

पंचलिंगी ।।१३४।। बृहद्वृत्तिः ५ लि.

**पइजंतुभेय भिन्नो जीवो इहरा उ सव्वजीवाणं । संसारो मुक्खो वा विरोहओ उ कह णु एगत्तं ।।८२।।**

**व्याख्या**–इह जन्तुशब्देन कथञ्चित्तदभेदाज्जन्त्वधिष्ठानं शरीरमुच्यते, तेन प्रतिजन्तुभेदं, प्रतिशरीरनानात्वम् अनुस्वारलोपः प्राकृतत्वात्, 'भिन्नः' पृथग् 'जीवः' आत्मा, यावन्ति जीवच्छरीराणि तावन्तस्तदधिष्ठातारो जीवाः पृथक् सन्तीत्यर्थः, विपक्षे दोषमाह–'इतरथा तु' अन्यथा पुनरात्मैकत्वाङ्गीकारे इत्यर्थः 'सर्वजीवानां' सकलसंसारिसत्त्वानां, संसारो देवादिगतिषु पौनः पुन्येन 'संसरणं' पर्यटनम् 'आजवं' जवीभाव इति यावत्, मोक्षो वा निःश्रेयसं वा संसारप्रध्वंस इत्यर्थः, प्रसज्यत इति शेषः, उपलक्षणं चैतत्तेन सुखंदुःखं वेत्याद्यपि द्रष्टव्यम्, अयमर्थः केचिज्जीवाः संसारिणः केचिन्मुक्ताः केचित्सुखिनः केचिद्दुःखिन इत्यादिव्यवस्था तावत्सर्ववादिसिद्धाऽस्ति, ऐकात्म्ये त्वेकस्य कस्यचिन्मुक्तौ सर्वेऽपि युगपन्मुच्येरन् तदभिन्नत्वात्तेषां न कश्चित्संसरेत्, तथा च जीवशून्यो जीवलोकः स्यात्, न चैतावन्तं कालं न कश्चिन्मुक्त इति वाच्यं, तथा सति कदाचिदपि कोऽपि न मुच्येत, नह्येतावता कालेन यन्न भूतं तदिदानीं भविष्यतीति सङ्गच्छते, उपलभ्येते च व्यवस्था प्राणिनां संसारमोक्षौ, अतो विरोधतः सर्वेषां युगपत्संसारप्रसङ्गेन मोक्षप्राप्त्या वा विरोधात् ऐकात्म्यपक्षस्य प्रमाणबाधात् 'कथं' केन प्रकारेण 'नु' इति आक्षेपे 'एकत्वम्' ऐकात्म्यवादो घटते न कथञ्चिद् उक्तनीत्या तन्निरासात्, तस्मात्प्रतिशरीरं भिन्न आत्मनो व्यवस्थावत्त्वात् नानागृहान्तर्वर्त्तिप्रदीपवदिति स्थितमिति गाथार्थः ।।८२।।

स चायमात्मा स्वदेहव्यापको न तु सर्वगतः, स्वदेहावच्छेदेनैव सुखदुःखोपभोगात्, सर्वगतत्वे हि सर्वत्र सुखदुःखोपभोगप्रसङ्गः, अदृष्टवत आत्मनः सर्वत्राभावात्, सर्वगतत्वेऽपि स्वादृष्टाकृष्ट इव देहे तस्य तदुपभोग इति चेत्, अथादृष्टस्य स्वकीयत्वं कुतः सिद्धं ? स्वात्मनि तस्य समवायादिति चेत् न, समवायस्यैकत्वेन सर्वगतत्वेन च परकीयादृष्टानामपि ।।१३४।। स्वात्मनि समवायात्, परकीयादृष्टजन्यानामपि सुखः–दुखानां स्वदेहे भोगप्रसङ्गः, अथ येनात्मना यददृष्टं क्रियते तत्तस्य

स्वकीयं, ततश्च परकीयादृष्टानां देवदत्तात्मनाऽकृतत्वान्न तज्जन्यसुखदुःखानां देवदत्तदेहे भोगः प्रसज्यत इति चेत्, न, कुशलाकुशलकर्म्मलक्षणमदृष्टं कुर्वतो देवदत्तात्मनो ज्ञानचिकीर्षाप्रयत्नसमवायो हि भवन्मते कर्तृत्वं, तस्य चैकत्वात्स्वादृष्टकरण इव परकीयादृष्टकरणेऽप्यविशेष इति परकीयादृष्टानामपि देवदत्तात्मकृतत्वात्तदवस्थ एवातिप्रसङ्गः, तस्मात्स्वदेह एव सुखदुःखोपभोगात्सर्वेषां स्वदेहव्यापक एवात्मा न सर्वगतस्ततः सिद्धमात्माऽविभुः नियतदेशावच्छेदेनोपलभ्यमान कार्यत्वान्मनोवदिति, न च तथात्वेनोपलभ्यमानशब्दलक्षणकार्येणाकाशेन व्यभिचारः, शब्दस्य द्रव्यत्वोपगमेनाकाशगुणत्वासिद्धेः, यथा चैतत्तथाऽग्रे निवेदयिष्यते विस्तारार्थिना त्वभयदेवग्रन्थो निरूपणीयः, चेतनश्चायमबाधितस्वसंवेदनेन तत्र चैतन्योपलंभात्, चैतन्यं चात्मनो नैकान्तेन भिन्नं तथात्वे चैत्रचैतन्येनापि मैत्रादीनामपि वस्तुपरिच्छेदप्रसङ्गात्, आत्मनोऽत्यन्तभेदेऽपि चैत्रात्मन्येव तस्य समवायात् चैत्रस्यैव तेन वस्तुपरिच्छेदो न मैत्रादीनामपीतिचेत् न, चैतन्यस्यात्मसम्बन्धस्तावत्समवायाद्भवता प्रसाधितः, आत्मचैतन्ययोः समवाय इत्यत्र तु समवायस्यात्मचैतन्याभ्यां सह सम्बन्धः कस्मात्सिध्यति ? समवायान्तराच्चेत् तदाऽनवस्थाप्रसङ्गः, समवायबहुत्वप्रसङ्गेनापसिद्धान्तापातश्च, अथानवस्थादिभिया समवायान्तरमन्तरेणापि समवायः समवायिभ्यामात्मचैतन्याभ्यां स्वत एव संबध्यते, तदा चैतन्यमपि समवायं विनाऽप्यात्मना सह स्वतः संभत्स्यते किं समवायकल्पनया, तस्माच्चैतन्यं नात्मनोऽत्यन्तं भिन्नं, नाप्येकान्तेनाभिन्नम्, अहं छिनद्मीत्यत्र छिदाया इवाहं ज्ञानामीत्यादौ ज्ञानक्रियायाश्चाऽहं शब्दवाच्यादात्मनो भेदप्रतिभासात्, द्रव्यकालाद्यपेक्षया बाह्याध्यात्मिकज्ञानानां कादाचित्कत्वदर्शनाच्च नित्यानित्यश्चासौ, एकान्तनित्यत्वे ह्यविचलितैकस्वभावत्वेन सुखदुःखादिरूपविलक्षणपरिणामान्तराभावात्स्वकृतधर्माधर्म्मफलोप–भोगाभावप्रसङ्गः, एकान्तानित्यत्वेऽपि जन्मानन्तरमेव विनाशेन सुखादिकारणकुशलाद्यनुष्ठानावसराभावात्स एव प्रसङ्गः, उभयोरपि पक्षयोः संसाराभावप्रसङ्गश्च, जीवस्य मनुष्यादिपर्यायपरित्यागेन देवादिपर्यायप्राप्तिर्हि संसारः, एकान्तनित्यत्वे तु तस्यैकस्वभावत्वात् पर्यायान्तरप्राप्तेरसम्भवात् कः संसरेत् ? तथाऽस्मिन् पक्षे कर्त्ता चेदात्मा तदा सर्वदाऽपि कर्त्तैव, भोक्ता ।।१३५।। चेत् शश्वद्भोक्तैव स्यात्, तथा च कः शुभाशुभं कर्मेह जन्मनि कृत्वा जन्मान्तरे तत्फलं भुञ्जीत, येन कर्तृत्वभोक्तृत्वे एकस्य

स्यातां, तथात्वे चैकस्वभावत्वहानेः, एकान्तामित्यत्वेऽपि निरन्वयनश्वरत्वात् कः संसरेत् ? नित्यानित्यत्वे त्वात्मनोऽन्वयित्वादनेकस्वभावतया कर्तृत्त्वभोक्तृत्वे नारकादिपर्यायाश्चोपपद्यन्ते, यथा हि कनकस्य कनकत्वेनावस्थितस्यैव कटकादयः पर्याया उत्पद्यन्ते व्ययन्ते च, एवं जीवद्रव्यस्यापि जीवद्रव्यतयाऽवस्थितस्तस्य कर्तृत्वभोक्तृत्वादिरूपा नारकादिरूपाश्च पर्याया उयन्ते व्ययन्ते च, तथा च जीवतया नित्यत्वं तस्य सर्वपर्यायेष्वनुगमात्, पर्यायरूपतया त्वनित्यत्वमपि, यथा हि युवकृतकर्म्मणश्चौर्यादिकस्य फलं बन्धनादिकं कश्चिद्वृद्धः सन् वेदयते, स च यूनः कथञ्चिदन्योऽवस्थाभेदेनावस्थावतोऽपि कथञ्चिद्भेदात्, न च सर्वथाऽन्य एव येन मया यूना सता चौर्यं कृतं स एवाहं तत्फलमिदानीं प्राप्तवानित्यनन्यत्वेनापि द्वयोरप्यवस्थयोरात्मनः प्रतिसन्धानात्, एवं वृद्धवदेव मनुष्यपर्यायकृतस्य शुभाशुभकर्म्मणः फलं देवादिपर्यायप्राप्तः स एव जीवोऽनुभवति, मनुष्यपर्यायपरिहारेण देवादिपर्यायतया तस्यैव परिणामात्, पर्यायतया भेदेऽपि जीवद्रव्यतयाऽभेदादिति नित्यानित्यपक्षे कथञ्चिदेकस्यैव कर्तृत्वं स्वकृतकर्म्मभोक्तृत्वं च घटत इति नित्यानित्य आत्मेति, तथा देहाद्भिन्नाभिन्नश्च, मूर्त्तत्वामूर्तत्वाभ्यां देहजीवयोर्भेदः देहस्य पट्टतूलादिस्पर्शे च जीवेन तत्संवेदनाभेदः, अन्यथा देहस्याचेतनत्वेन जीवस्य चामूर्त्तत्वेन स्पर्शानुभवो न स्यात्, तथा देहजीवाभ्यां कृतयोः पुण्यपापयोरन्योन्यं जीवदेहाभ्यां फलोपभोगादपि तयोर्भेदाभेदः, तथाहि देहप्राधान्यविवक्षयेह देहकृताऽहिंसाहिंसादिपुण्यपापफलस्य स्वर्गनरकादेर्जन्मान्तरे जीवेनानुभवात्, नतु तेनैव देहेनानुभवः स्वर्गादौ तस्य देहस्याभावात्, एवं जीवप्राधान्यात् शुभाशुभाध्यवसायाभ्यां जीवकृतपुण्यपापफलस्य स्वर्गनरकादौ सुखदुःखस्य देहेनानुभवात् न तु केवलेनैव जीवेनानुभवः, देहं विना जीवस्य सुखदुःखानुपपत्तेः, किञ्च जीवदेहयोर्भेदाभेद एव चन्दनालेपवासीतक्षणादिनामुत्पादिदेहोपकारापकाराभ्यां तत्कर्त्तुः पुण्यपापसम्भवः, इतरथाऽत्यन्तभेदे तयोरन्तर्वर्त्तिनि चटके घटमात्रविभूषाभङ्गाभङ्गाभ्यामिव पुण्यपापे न स्याताम्, एकान्ताभेदे च जीवदेहयोर्देहापायेऽवश्यं जीवस्याप्यपाय इति परलोकाभावेन कर्म्मबन्धादेरपि अपार्थक्यं स्यात्, तथा च सर्वमालूनं विशीर्णं भवेदिति तस्मात् ''**जीवज्झवसायाओ जीवत्ता पुग्गला परिणमंति । पुग्गलकम्मनिमित्तं जीवो वि तहेव परिणमइ ॥१॥**'' इत्यागमसिद्धन्यायेन क्षीरनीरवदन्योन्यानुगमाद्

भेदाभेद एव तयोः सर्वमेतदुपपद्यत इति देहाद्भिन्नाभिन्न एवात्मेति, नन्वात्मनो देहमात्रव्यापकत्वे निष्क्रियत्वेन देशान्तरप्राप्तेरभावात्, कथं तत्र तत्र देशे सुरलोकादौ च सुखदुःखोपभोगः ? इति चेत् न, गतिमत्त्वेनात्मनो देहद्वारा देशान्तरादिस्थितभोग्यपदार्थ जन्यानामपि सुखदुःखानामुपभोगसम्भवात्, यदि पुनरात्मनो गतिमत्त्वं नाभ्युपगम्यते, तदा तदधिष्ठितस्यापि देहस्यानन्ततादृक्पुद्गलनिष्पन्नतया गुरुत्वाद् घटादेरिव स्वयं देशान्तरप्राप्तिर्न भवेत्, तस्माद्गतिमान् आत्मा द्रव्यान्तरगतिहेतुत्वात् वायुवदिति, ननु देहव्यापकत्वस्वीकारे बालदेहे आत्मा लघुपरिमाणः, तरुणदेहे च महापरिमाणः प्राप्नोति, लघुपरिमाणनिवृत्त्या च महापरिमाणोत्पत्तिर्लघुपरिमाणनिवृत्तिश्च तदाश्रयस्य बालदेहवर्त्तिन आत्मनो विनाशादेव संभवति, तथा च तरुणमहापरिमाणात्मान्तरोत्पादाद्बालावस्थानुभूतस्यार्थस्य स्मरणप्रतिसन्धानानुपपत्तिरिति चेत्, तन्न, उभयोरप्यवस्थयेयर–सङ्कुचेप्रदेशात्मकस्य सत आत्मनः प्रदीपवदाश्रयानुविधानात्सङ्कोचविकाशधर्म्मकत्वेनैकत्वात्स्मरणाद्युपपत्तेः, यथा हि प्रदीपप्रभाः सङ्कीर्णं विस्तीर्णं वाऽपवरकादिदेशं प्राप्य सङ्कुचन्ति विकशन्ति वा, तथाऽऽत्मनोऽपि स्वकर्मोपार्जितं लघुदेहमशितपीतादिना विवर्द्धमानं च बृहद्देहमासाद्य वीर्यान्तराय–क्षयोपशमजन्यवीर्यातिशयात्प्रदेशाः सङ्कुचन्ति विकशन्ति च, तथा च प्रदेशविकाशकृतस्तरुणदेहे आत्मनो महत्त्वप्रतिभासो न तु बालदेहवर्त्तिलघुपरिमाणात्मविनाशेन महापरिमाणात्मान्तरोत्पत्त्या, एवं चोभयोरप्यवस्थयोः सङ्कोचविकाशपरिणामेनात्मनः कथञ्चिदेकत्वाद्बाल्यावस्थानुभूतार्थस्य स्मरणप्रतिसन्धानादयस्तारुण्या–वस्थायामप्युपपद्यन्त एव, ननु प्रदीपदृष्टान्तेनात्मनः सङ्कोचविकाशधर्म्मत्वाभ्युपगमे तद्वदेवानित्यत्वापत्तिः, तथा हि आत्मा अनित्यः सङ्कोचविकाशवत्त्वात्प्रदीपवदिति चेत्, न तैजसपरमाणुप्रभयाऽनैकान्तिकत्वात्, साऽपि हि पार्थिवादिपरमाणु–व्यवधानाव्यधानाभ्यां सङ्कोचविकाशवती भवति न त्वनित्या, न च तैजसपरमाणौ नास्त्येव प्रभेति वाच्यं, कार्ये तदनुत्पादप्रसङ्गात् कारणप्रभापूर्वकत्वाकार्ये तदुत्पत्तेः, भवतु वा सङ्कोचविकाशवत्त्वं प्रदीपात्मनोस्तथाऽपि सतोरकारणवत्त्वेनात्मनो नित्यत्वं भविष्यति, प्रदीपस्य तु कारणवत्त्वादनित्यत्वमिति को दोषः । तथाऽनादिश्चायं, कथम् ? इति चेत् उच्यतेहर्षादिकारणरूपादिविषयग्रहणा–समर्थेष्वपीन्द्रियेषु बालस्य तदहर्जातस्यापि स्मितरूदितिभ्यां स्तन्यादिलाभालाभकृतौ हर्षशोकावनुमाय ताभ्यां च पूर्वजन्मसु

॥१३७॥

पौनः–पुन्यानुभूतस्तन्यपानस्मृत्यनुबन्धानुमानेनात्मनोऽनादित्वानुमानात्, तथा चाक्षपादः पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेरिति, तदेवं देहव्यापकश्चेतनो नित्यानित्यः स्वकृतकर्म्मफलभोगी देहाद्भिन्नाऽभिन्नो गतिमान् प्रदेशसङ्कोचविकाशधर्म्माऽनादिश्च व्यवस्थित आत्मेति, ॥८२॥ एतदेव च सूत्रकारः शिष्यानुग्रहाय सङ्क्षेपेण दर्शयन्नाह–

**सोवि य संकोयविकाससंगओ देहवावगो नियमा । भोगाययणेणवि तस्स हंदि जोगो समो इहरा ॥८३॥**

**व्याख्या**–स इति तच्छब्देन प्रकृतवादात्मा परामृश्यते, अपि चेति पुनरर्थे तेन स पुनरात्मा, अल्पदेहे असङ्ख्येयप्रदेशात्म–कस्याप्यात्मनः स्वप्रदेशैस्तावद्देशावगाहित्वं सङ्कोचः, महति देहे बहुदेशावगाहित्वं विकाशस्ततो द्वन्द्वः ताभ्यां सङ्गतः–समन्वितस्तादृग्निजवीर्यविशेषात्सङ्कोचविकाशपरिणामपरिणत इत्यर्थः, तेन तरुणदेहे बालदेहवर्त्तिनो लघुपरिमाणस्यात्मनो निवृत्त्या महापरिमाणस्यात्मानन्तरस्योत्पादो न शङ्कनीयः, सर्वास्ववस्थास्वेकपरिमाणस्यैवात्मनः सङ्कोचविकाशवत्तया परिणामात्, 'देहव्यापकः' स्वकर्मोपढौकितस्वशरीरमात्राधिष्ठायकः, तदवच्छेदेनैवात्मनश्चैतन्योत्पाददर्शनात् सुखदुःखोपभोगाच्च 'नियमाद्–अवश्यम्भावेन, अनेन च विशेषणद्वयेन नैयायिकाद्यभिमतमेकान्तनित्यत्वं सर्वदा सर्वगतत्वमात्मनः प्रतिक्षिपति, उक्तन्यायेन तस्य नित्यानित्यत्वदेहव्यापकत्वयोः प्रसाधनात्, ननु सर्वगत्वेऽप्यात्मनो देहावच्छेदेनैव भोगो भविष्यति भोगायतनत्वेन तस्य स्वकर्म्मभिरुपनयनात् ? इति, अत आह 'भोगायतनं' भोक्तुरात्मनो भोगः–सुखदुःखानुभवः तस्य आयतनम्–अधिकरणं देहमधिकरणं विहायान्यत्रात्मनः सुखदुःखानुभवो नास्तीति भोगायतनं देहमुच्यते, ततश्च भोगायतनेन देहेन परकीयेणेति शेषः 'अपिः' समुच्चये तेन न केवलं स्वकीयेन भोगायतनेन किं तर्हि ? परकीयेणापीत्यपिशब्दार्थः, तस्य अधिकृतात्मनः, हन्दीति प्रतिवाद्यामन्त्रणे 'योगः' सम्बन्धः 'समः' तुल्यः प्राप्नोतीति शेषः, तथा च सति स्वदेह इव परकीयदेहेऽपि अधिकृतात्मनो भोगप्रसङ्गः, 'इतरथा' अन्यथा, आत्मनः सर्वगतत्वाभ्युपगम इत्यर्थः, एतदुक्तं भवति–अधिकृतात्मनो हि स्वकीयेनापि देहेन सह संयोग एव सम्बन्धः, न तु अस्मत्पक्ष इव कथञ्चित्तादात्म्यं, स चात्मनः सर्वगतत्वेन परकीयदेहेनापि सहास्ति, ॥१३८॥
ततश्चाधिकृतात्मा यथा स्वदेहे सुखदुःखानि भुङ्क्ते तथा परकीयदेहेऽपि भुञ्जीत, यदि वाऽधिकृतात्मनो यथा भोगायतनेन

स्वकीयदेहेन सह संयोगः सम्बन्धस्तथा परकीयात्मनामपि सर्वगतत्वेनाधिकृतात्मदेहेन सह स एव सम्बन्धः, तथा च यथा ते स्वस्वदेहेषु सुखदुःखानि भुञ्जते तथाऽधिकृतात्मदेहेऽपि भुञ्जीरन्, न चैवमस्ति सर्वेषामेवात्मनां स्वस्वदेहेष्वेव भोगोपलम्भात् तस्मात्स्वदेहव्यापका एव सर्वात्मनः, तदेवमुक्तस्वरूपात्मसिद्धौ परलोकानुष्ठानं विधीयमानं सर्वं सङ्गतिमृच्छति नान्यथेति गाथार्थः ॥८३॥ तदेवं जीवतत्त्वं व्याख्याय साम्प्रतं तत्प्रतिपक्षमजीवतत्त्वं पञ्चधाऽभिधातुमाह–



**तव्वइरित्तो धम्मा-धम्मागासाई होइ अजीवो वि । अगमविहिया धम्मा धम्मागसो मुणेयव्वा ॥८४॥**

**व्याख्या**–तस्मात्–जीवाच्चेतनाद् व्यतिरिक्तः–अचेतनत्वेन भिन्नजातीयः, यथा क्रमं विहायोगतिकर्म्मणा विस्रसादिना च स्वयं गतिपरिणतान् जीवान् पुद्गलांश्च गतौ धारयति–उपगृह्णातीति धर्म्मः, तेषामेव तद्विपरीतस्थितिलक्षणकार्योपग्राहकोऽधर्म्मः, आकाशन्ते–प्रसरन्त्यस्मिन् द्रव्याणीत्याकाशं–नभः, ततो द्वन्द्वः, तानि आदयो यस्य स तथा, आदिग्रहणात्कालपुद्गलग्रहः, पुद्गलास्तिकायं चाग्रिमगाथायां व्याख्यास्यति, अस्यां च चत्वार एव व्याख्येयाः एषां च कालं विहाय सिद्धान्तेऽस्ति कायपदसमभिव्याहारेण धर्म्मादिसञ्ज्ञाभिधानात्, इह चैकदशे समुदायोपचारादित्थमभिधानं, तत्रास्तीनां प्रदेशानां कायो–बाहुल्यं समूह इति यावत् अस्तिकायः, ततो धर्म्मश्चासावस्तिकायश्चेति समासः, असङ्ख्येयप्रदेशात्मको धर्म्मास्तिकाय इत्यर्थः, एवं शेषेष्वपि 'भवति' विद्यते अजीवोऽपि न केवलमुक्तरूपो जीव एवास्ति, किं तर्हि ? जीवनादितत्स्वरूपविपरीतस्वभावोऽ–जीवोऽपीत्यपेरर्थः, नन्वस्मदाद्यतीन्द्रियत्वादेषां सत्त्वे किं प्रमाणम् ? इति, अत, आह–'आगमे' सिद्धान्ते विहिताः, लक्षणादिप्रतिपादनेन प्रमाणविषयीकृता धर्म्माधर्म्माकाशास्तिकायाः 'मुणेयव्वा' ज्ञातव्याः, आगमश्चायम्–''धम्मत्थिकाएणं भंते ? जीवाणं किं पवत्तइ ? गोयमा ! धम्मत्थिकाएणं जीवाणं आगमणगमणभासउम्मेसमणजोगे वयजोगे कायजोगे जे एयावन्ने तप्पगारावलाभावा सव्वे ते धम्मत्थिकाए पवत्तंति, गइलक्खणेणं धम्मत्थिकाएणं अहम्मत्थिकाइणं जीवाणं किं पवत्तइ ? गोयमा ! अहम्मत्थिकाएणं जीवाणं ठाणनिसीयणतुयट्टणमणस्स य एगत्तीभावकरणया जे एयावन्ने तप्पगारा थिरा भावा सव्वे ते अहम्मत्थिकाए पवत्तंति, ठाणलक्खणेणं अहम्मत्थिकाए ।'' इति, आगमस्य च प्रामाण्यमग्रे साधयिष्यते, तत्र जीवपुद्गलानां

स्वत एव गतिस्थितिपरिणतानां गतिस्थित्योरुपष्टम्भकौ धर्म्माधर्म्मास्तिकायौ, ननु यदि जीवपुद्गलेभ्य एव गतिस्थिती भवतस्तदा कृतं धर्म्माधर्म्माभ्यां तत्कार्यस्यान्यथासिद्धेः ? इति चेत् तन्न, जीवपुद्गलेभ्यः परिणामिकारणेभ्यो गतिस्थित्योरुत्पादेऽपि ज्ञानोत्पत्तौ चक्षुरादेरिव ताभ्यां सहकारितया धर्माधर्म्मास्तिकाययोरप्यपेक्षणात्, न च क्षितिजलतेजसां तत्र सहकारित्वं भविष्यतीति वाच्यं, क्षित्याद्यभावेऽपि वियति पक्षिणां पवनोद्धूतकस्त्वादीनां च गतिस्थित्योरुपलम्भात्, ननु वियति स्थूलक्षित्याद्यभावेऽपि सूक्ष्मक्षित्यादिसम्भवात्तदपेक्षयैव तत्र पक्ष्यादीनां गतिस्थिती भविष्यतः ? इति चेत् न, एवं तर्हि सूक्ष्मक्षित्यादीनां तत्र गतिस्थित्योरभावप्रसङ्गः, ‘‘तदीयगतिस्थित्योस्तत्रापेक्षाकारणन्तराभावात्, अत एव न वायोरप्यपेक्षाकारणता, तस्याप्यपेत्क्षाकारणा–न्तरराभावेन गतिस्थित्योरभावप्रसङ्गात्:,’’ तस्माद् ययोर्न गत्वा स्थितिः स्थित्वा च न गतिस्तन्निमित्ते जीवपुद्गलानां गतिस्थिती, न च धर्म्माधर्म्मास्तिकायाभ्यामन्यस्तादृशः क्षित्यादिषु कश्चिदप्यस्ति, ननूक्तस्वरूपाभावात्क्षित्यादीनां मां भूत् कारणत्वं तद्योगाच्चाकाशस्य तद्भविष्यति ? इति चेत् न, लोकालोकविभागाभावप्रसङ्गात्, यत्र हि जीवपुद्गलानां गतिस्थिती स्तः, स लोक इतरस्त्वलोक इति लोकालोकव्यवस्था, आकाशनिमित्तत्वे तु गतिस्थितित्योरलोकेऽपि तद्भवप्रसङ्गेन लोकत्वप्राप्त्याऽलोकवार्त्ताऽप्युच्छिद्येत, अत एव पुण्यपापयोरपि न तदपेक्षाकारणत्वं, स्वदेहव्यापकात्मगतत्वेन नियतदेशस्थयोरपि पुण्यपापयोः पुद्गलानां गतिस्थितिकारणत्वेऽसम्बद्धत्वाविशेषात्, तन्महिम्नैव तेषां लोक इवालोकेऽपि गतिस्थितिप्रसङ्गात्, तथा चालोकस्यापि लोकत्वमापद्येत, मुक्तात्मनां च पुण्यपापाभावेनेतः कर्मक्षयेण मुक्तौ गच्छतां गतेस्तत्र स्थितेश्चाभावप्रसङ्गात्, नाप्यालोकतमसोस्तदपेक्षाकाणत्वम्, अह्नि तमोऽभावेपि रजन्यां चालोकाभावेऽपि गतिस्थितिदर्शनात्, न च यदभावेऽपि यद्भवति तत्तस्य कार्यं नाम, तस्मात् क्षित्यादीनामपेक्षाकारणत्वाभावाद्व्यापकयोर्धर्माधर्मास्तिकाययोरेव जीवपुद्गलगतिस्थिती प्रत्यपेक्षाकारणत्वमिति स्थितं, न चैवं सति सर्वदा जीवादीनां गतिस्थितिप्रसङ्ग इति वाच्यं, सदा सान्निध्येऽप्येतयोः स्वयं गतिस्थितिपरिणतानामेव जीवादीनां गतिस्थित्युपष्टम्भकत्वात्, तथा च प्रयोगः–जीवपुद्गलानां गतिः–साधारणबाह्यनिमित्तापेक्षा ।।१४०।।
गतित्वात्, एकसरोजलाश्रितानां प्रभूतमत्स्यादीनां गतिवत्, एवं स्थितावपि द्रष्टव्यं, साधारणं चानयोर्निमित्तमितरनिरासेन

यथाक्रमं धर्म्माधर्म्मास्तिकायावेव, असङ्ख्येयप्रदेशत्वलोकाकाशव्यापकत्वामूर्त्तत्वादयश्च तद्धर्म्मा इति, साम्प्रतमाकाशस्वरूपमुच्यते तत्र चागमः—"**आगासत्थिकाएणं भंते ? जीवाणं किं पवत्तइ ? गोयमा ! आगासत्थिकाए जीवदव्वाण अजीवदव्वाणं य भायणभूय**" इत्यादीति, अवगाहदायकं चाकाशम्, अवगाहश्च प्रतिनियताकारस्य जीवद्रव्यादेरवगाहकस्यावगाह्यमध्य एव तद्भावः, एवं च धर्म्माधर्म्मास्तिकाययोरपि लोकसंस्थानवत्त्वेन प्रतिनियताकारत्वादवगाहकत्वमेव नावगाह्यत्वम्, आकाशं त्वनन्तत्वान्न नियताकारमिति अवगाह्यमेव तस्माद्यद् युगपदखिलजीवादिद्रव्याणामवगाहक्रियायाः साधारणं निमित्तकारणं तदाकाशं, ननु क्षित्यादय एवावगाहदायका भविष्यन्ति किमाकाशेन ? इति चेत् न, तदभावेऽपि विहङ्गमत्रिदशादीनामाकाशेऽवगाहदर्शनात्, पवनो भविष्यति ? इति चेत् न, तस्यातिप्रबलस्य जीवादिद्रव्यावगाहप्रतिबन्धकत्वात्, दृश्यन्ते हि बलीयसा पवनेन हस्तिनोऽपि गच्छन्तः प्रतिबध्यमानाः किं पुनस्तृणादयः, न च प्रतिबन्धकस्यावगाहनिमित्तत्वं संभवति, नाप्यालोकतमःपुण्यपापादयस्तन्निमित्तं भविष्यन्तीति वाच्यं, क्षित्यादीनामिव तेषामप्यव्यापकत्वेनावगाहकत्वात्, अतो नावगाहक्रियायां तेषां निमित्तत्वं, प्रतिबन्धककुड्याद्यभाव एवावगाहहेतुर्भविष्यति ? इति चेत् न, केवलस्याभावस्य सकलशक्तिविकलत्वेनावगाहाद्यसामर्थ्यात्, तस्मादवगाहसामर्थ्यमाकाशस्यैवावशिष्यते तथा च प्रयोगः—जीवादिद्रव्याणां युगपदवगाहः साधारणबाह्यनिमित्तापेक्षः युगपदवगाहत्वात्, एकसरोवर्त्तिमत्स्यादीनामवगाहवत्, तच्च क्षित्यादीनां निरासेन साधारणं निमित्तमाकाशमेवेति स्थितं, सम्प्रत्यादिपदसङ्गृहीतस्य कालस्य स्वरूपं किञ्चिदुच्यते, तत्र कल्पन्ते अस्य पदार्थस्य जातस्यैतावन्तो दिवसा इत्यादिस्वरूपेण पदार्थाः सङ्ख्यायन्तेनेनेति कालः, स च तात्त्विको जरत्पट्टशाटिकापाटनदृष्टान्तसिद्धः, परमसूक्ष्मोऽतीतानागतकोटिविनिर्मुक्तो वर्त्तमानैकसमयरूपः, समयस्य च निर्विभागत्वेन प्रदेशासम्भवादस्यास्तिकायत्वाभावः, तथा चोक्तं—कालं विनाऽस्ति काया इति, नन्वतीतानागत रूपतयाऽपि कालस्य श्रवणात्कथं वर्त्तमानैकसमयरूपता ? इति चेत् सत्यं, तस्यातीतानागतत्वयोर्नाशानुत्पादाभ्यामसत्त्वेनातात्त्विकत्वात्, कथं तर्हि तत्रातीतादिव्यवहारः ? इति चेत् न, विनष्टोत्पत्स्यमानपदार्थोपाधिवशेन कालेऽपि तद्व्यावहारोपपत्तेः, तथा हि नष्टो घट इत्यादौ घटस्वरूपनिवृत्तिरेवातीतत्वं

तदुपहितः कालोऽप्यतीतः, तथा भविष्यति घट इत्यादौ घटस्य प्रागभाव एव भविष्यता, तदुपहितः कालोऽपि भविषयन्निति व्यवह्रियते, एवं चानेकसमयसमूहरूपा आवलिका मुहूर्त्तादयोऽपि कालविशेषव्यवहारा एकज्ञानसङ्कलनोपाधिना वर्णेषु पटव्यवहारवत्सङ्गच्छन्त एव, स च कालो वर्त्तनापरिणामाद्यभिव्यङ्ग्यः तत्र पदार्थानां समयमात्रं स्वसत्तानुभूतिर्वर्त्तना, द्रव्यत्वानुगमेन प्रयोगविस्रसाप्रभवो द्रव्यविकारः परिणामः, तथा हि ऋतुविभागेन शीतवातातपादयस्तावदुपलभ्यन्ते, पादपेष्वपि च पल्लवप्रसवादयो नियतकाल एव प्रादुर्भवन्तो दृश्यन्ते, तदमीषां यन्नैयत्यं तेनावश्यं नियतहेतुजन्येन भवितव्यं, स च नियतो हेतुः काल इति, तथा च प्रयोगः—वृक्षेषु पल्लवादिपरिणामो बाह्यनिमित्तान्तरापेक्षः परिणामत्वात्, वस्त्रादिषु नीलादिपरिणामवत्, बाह्यं च निमित्तं काल इति स्थितं, तदेवं धर्म्मास्तिकायादीनां युक्तिसिद्धत्वेऽपि यत्सूत्रे आगमविहितत्वोपदर्शनं तदतीन्द्रियपदार्थेष्वाहत्य सिद्धान्त एव प्रमाणमिति न्यायप्रदर्शनार्थं, यद्येवं किं युक्त्युपवर्णनेन आगमादेव तत्सिद्धेः ? इति चेत् न ''जुत्तीए अविरूद्धो सयागमो'' इत्यादिवचनाद्युक्तिभिरूपगृहीतस्यैवागमस्यप्रामाण्याभ्युपगमात्, तथा च तदुपग्रहार्थं ता अपि दर्शिता इति न कश्चिद्विरोधः, तथा चान्यत्राप्युक्तम्—**आगमश्चोपपत्तिश्च सम्पूर्णं दृष्टिकारणम् ॥ अतीन्द्रियाणामर्थानां सद्भावप्रतिपत्तये ॥१॥** तस्माद्युक्तिभिरुपपन्न आगम एवैषां सत्त्वे गत्यादिकार्यसहकारित्वे च प्रमाणमिति गाथार्थः ॥८४॥

तदेवमजीवचतुष्कं व्याख्याय सम्प्रति पञ्चमं पुद्गलास्तिकायं व्याख्यातुमुपक्रमते—इह हि भिन्नानेकज्ञानमात्रात्मके जगति ग्राह्यग्राहकविभागविकलान्यपि ब्राह्यग्राह्यनीलाद्याकारायोगायात्तद्विभागभांजि जीवज्ञानान्येव सन्ति, न तु बाह्यो नीलादिरर्थ इति, सङ्गिरन्ते साकारज्ञानवादिनो योगाचारा उपन्यस्यंति च बाह्यार्थापलापे प्रमाणं, तथा हि यद्येन सह नियमेनोपलभ्यते तत्ततो न भिद्यते यथैकस्माच्चन्द्राद्द्वितीयश्चन्द्रः, ज्ञानेन सह नियमेनोपलभ्यते च नीलादिरिति, व्यापकविरूद्धोपलब्धिः, भेदस्य हि व्यापकः सहोपलम्भानियमः, नहि गौर्नियमेनाश्वेन सहोपलभ्यतेऽश्वो वा गवा तयोः परस्परं भेदात्, ततो नीलादेरर्थस्य ज्ञानेन सह नियमेनोपलम्भाद्भेदव्यापकस्य सहोपलम्भानियमस्य विरूद्धस्तन्नियमः तस्योपलब्धिः तयोरभेदं 'साधयति' भवति ॥१४२॥
हि व्यापकविरुद्धोपलब्धौ तद्व्याप्यस्यापि निवृत्तिर्वह्निविरुद्धजलोपलब्धौ धूमनिवृत्तिवदिति यदाह कीर्त्तिः—सहोपलम्भनियमाभेदो

नीलतद्धियोरिति, तस्मात् ज्ञानम् एव परमार्थसन्न बाह्योऽर्थः पुद्गलरूप इति, तन्निराकर्त्तुमाह–

**जइ पुग्गला न हुज्जा आगारो किं न होइ सव्वत्था। सुविणो वि अणुहविज्जइ दिणोवलद्धो फुडं अत्था ॥८५॥**

व्याख्या–यदीति पक्षान्तरेऽव्ययं प्रायशः सर्ववादिनां पुद्गलास्तित्वाभ्युपगमे न कस्यचित्तदसत्त्वाभ्युपगमः पक्षान्तरं, ततः पूर्यन्ते अपरापरपरमाण्वादिसङ्घटनेन स्थौल्यपरिणाममापाद्यन्ते, तद्विघटनेन च गलन्ति–ह्रसन्तीति विनिरुक्तविधिना पुद्गला मूर्त्तिमन्तो बाह्यार्थास्ते यदि न भवेयुर्भवदभिमतनानासाकारज्ञानात्मके जगति न स्युः यदीत्यस्य नित्यं तच्छब्दापेक्षत्वात्तदा इत्यर्थाद्गम्यते, तेन तदाऽऽकारो नीलाद्याकारः 'किं न भवति ?' किमिति न जायते 'सर्वत्र' देशकालादौ, अयमर्थः– अनाद्यविद्यामुषितवैशद्यं ज्ञानमेव स्वमाकारं बाह्यतया आरोप्येदं नीलमित्याद्याकारेण गृह्णाति, न तु वास्तवो नीलादिरर्थः कश्चिदस्तीति भवदभ्युपगमः, अविद्यासम्बन्ध एव च ज्ञानस्य बहिरारोपेण स्वकारग्रहणकारणम्, एवं च यथा तैमिरिकस्य केशान् अनवलम्ब्यैव सर्वत्र केशोडुकज्ञानमुपजायते, तथा शश्वदविद्योत्सङ्गसङ्गमलालनेन बाह्यनीलपीताद्याकारान् अनवगाहमानमपि ज्ञानं प्रसारितनिमीलिताक्षयोरविशेषेणेदं नीलमित्याद्याकारेण देशकालाद्यनियमेन जायेत, कारणसामग्र्यात्तत्सद्भावेऽपि वा कार्योत्पादानभ्युपगमे क्षिति जलतेजःप्रभृतिसामग्रीमध्यमध्यासीनमपि बीजं कथञ्चिदङ्कुरं न प्रसुवीत, चक्षुर्व्यापारोऽपि कारणम्? इति चेत् तत्किं ज्ञानाविद्याभ्यामतिरिक्तं चक्षुरपि किञ्चिदर्थान्तरमस्ति, भवतु वा तथाऽपि तमसि स्मर्यमाणेषु नीलादिषु तन्नीलमित्याद्याकारेण बाह्यतया स्मरणज्ञानं न स्यात्, भ्रान्ततया जागरस्वप्नज्ञानयोरविशेषेण च भवतां स्वप्ने इदं नीलमित्याद्याकारतया ज्ञानं न भवेत्, तत्र चक्षुर्व्यापाराभावात्, तस्मात्सत्स्वेव पुद्गलेषु नीलाद्याकारस्य देशकालनियमः सङ्गच्छते नान्यथेतिसुष्ठूक्तं, पुद्गलासत्त्वे आकारः किं न भवति सर्वत्रेति, एवं च सति यदुक्तं नीलधियोरभेद इत्यादि तत्र नीलादेर्ग्राह्यस्य किं परमार्थसतो ज्ञानेन सहाभेदो विवक्षितः, आहो अपरमार्थसतः ?, यदि परमार्थसतस्तदाऽप्यभेदः किं तादूप्यम्, उत परस्पराभावाभावो, व्यावर्त्तकधर्म्मायोगो वा ? एकदेशत्वं वा, न तावदाद्यस्तदा हि तत्ततो न भिद्यत इति न स्यात्, तत्तदित्येव स्यात्, तादूप्ये अवध्यवधिमद्भावाभावात् द्वितीयबुद्धिव्यपदेशयोरनुपपत्तेश्च, न हि घटः स्वस्मादेव न भिद्यत

इति वक्तुं शक्यं, मा भूतां द्वितीयबुद्धिव्यपदेशौ कथायामस्माकमप्येतदभिमतमेव, शास्त्रे त्वज्ञज्ञापनार्थं द्वयोपादानेऽपि न दोष इति चेत् न, तयोस्ताद्रूप्यस्यैवासिद्धेः, नीलादैर्ज्ञानादिच्छिन्नदेशत्वमूर्त्तत्वजडत्वभूक्षेपाङ्गुल्यादिनिर्देशयोग्यत्वहानोपादानाद्यर्थ–क्रियाक्षमत्वादिना ज्ञानस्य चैतद्विपर्ययेण सर्वैरेव भेदेन प्रतीयमानत्वात्, नापि द्वितीयः, आत्माश्रयप्रसङ्गात्, अभिन्नज्ञानार्थलक्षणप्रतियोगिनिरूपणेन हि तयोः परस्पराभावाऽभावो निरूप्यते, तयोः परस्पराभावाभावनिरूपणमेव च प्रतियोगिनोरभेदनिरूपेणं, तथा च परस्पराभावाभाव आत्मानमेवाश्रयेत्, नन्वात्माश्रयदोषाघ्राततया मा भूत् इतरेतराभावाभावोऽभेदस्तथाऽपि तत्प्रतीतिस्तावदस्ति, सा चौपजायमाना कारणान्तरमाक्षिपति, नाकारणं यतः कार्यमिति न्यायात् इति चेत् न, भेदव्यवहारहेतोरितरेतराभावस्यैव सम्भवेन तयोरभेदप्रतीतेर्व्याघातात्, पदार्थद्वयनिरूप्यो निस्त्रण हीतरेतराभावः, एकस्याधिकरणतया प्रतीतिः, इतरस्य तु प्रतियोगितया, इतरस्येतरस्मिन्नभाव इति व्युत्पादनात्, भवति हि नीलमेतन्न पीतं, नीले पीतं नास्ति, नीलं पीतात्मकं न भवतीति यावदुक्तं स्यात्, तथेहापि नीलमिदं न ज्ञानमित्यादिना क्रमेणाऽऽगोपाङ्गनमन्तर्मुखबहिर्मुखाकारतया भेदेन प्रतीयमानयोर्ज्ञानार्थयोः कथमभेदः सिध्येत् ? नापि तृतीयः, भिन्नदेशकालजात्यादीनां स्वप्रकाशत्वपरप्रकाश्यत्वादीनां च व्यावर्त्तकधर्म्माणां ज्ञानार्थयोः प्रत्यक्षेण ग्रहणात्, नापि चतुर्थः, तद्धि एकोपादानत्वं वा, एकाधिकरणत्वं वा, नाद्यः, ज्ञानस्यात्मोपादानत्वात् समनन्तरप्रत्ययोपादानत्वाद्वा, पटस्य च तन्तूपादानत्वात् तन्तूनां चांशूपादानत्वात्, नाऽपि द्वितीयः, ज्ञानस्य शरीराद्यधिकरणत्वात् अर्थस्य च पृथिव्याद्याधारत्वात्, अपि च नीलज्ञानेनात्मनं संवेदता पीताद्याकारेभ्यो विज्ञानेभ्यो व्यावृत्ततयाऽऽत्मा संवेद्यः, एवं हि तेनात्मा सम्यक् संविदितः स्यात्, तथा च यथा तेभ्यो व्यावृत्ततयाऽऽत्मा गृहीतस्तथा तद्विशेषणेभ्यः पीतादिभ्योऽपि बाह्येभ्यः, यथा चैत्रः स्वं मैत्राद्भेदेन गृह्णानस्तद्दण्डकुण्डलादिभ्योऽपि तथैव गृह्णाति, एवं च कथं ज्ञानार्थयोरभेदः स्यात् ? अथ परेण परस्यावेदनात्सुसंवेदनमात्रनिमग्नत्वात्सर्वसंवित्तीनां परस्परवार्त्तानभिज्ञतया क्व ज्ञानान्तरेभ्यो व्यावृत्तिग्रहो विवक्षितज्ञानस्य, तथा च कथं तद्विशेषणेभ्योऽपि ? इति चेत् न. पुरूषान्तरज्ञानेन पुरूषान्तरज्ञानस्य ग्रहणात् स्वज्ञानस्यापि स्मरणप्रत्यभिज्ञानादिनाऽनुसन्धानात्, अन्ततः सर्वज्ञज्ञानगोचरत्वाच्च,

तथा हि सर्वज्ञः प्राणिनां चेतांसि चेतयते न वा ? न चेत्सर्वज्ञताहानिः, अथ चेतयते सिद्धं तर्हि परेण परस्य वेदनं, योऽपि नियमेन सहोपलम्भो ज्ञानादभेदसाधनायोपात्तः स ज्ञानस्यापि भेदं साधयति, तथाहि परस्य विरुद्धनीलपीतहरिता–द्याकारसमूहावलम्बि ज्ञानं कदाचित्तावदुपलभ्यते, तच्च तान् आकारान्न गृह्णाति चेत्तदा निराकारं प्राप्नोति, गृह्णाति चेत् युगपज्ज्ञानाविरूद्धाकारग्रहणेन यावदाकारं ज्ञानस्यापि भेदप्रसङ्गात्, एवं च विजातीयानामर्थानां ज्ञानेन सह अभेदसौहार्द–साधनायोद्युञ्जानः सहोपलभ्भोऽत्यन्तसजातीयतंया सगोत्रं ज्ञानमपि भिन्दन् कथं स्वीकर्त्तव्यो भवेत् ? न च सहोपलम्भनियमाद्धेतोर्ज्ञानादर्थस्याभेदः शक्य उपपादयितुं, यथा हि ज्ञानेन सहोपलम्भनियमादर्थस्य ज्ञानात्मता प्रसाध्यते, तथाऽर्थेनापि सहोपलम्भनियमाज्ज्ञानस्यार्थात्मता प्रसङ्गः केन वार्यते ? नह्यर्थोपधानमन्तरेण निरालम्बनस्य ज्ञानस्य कदाचिदुपलम्भ उत्पादो वा सम्भवी, एवं च सहोपलम्भनियमस्य समत्वेन विनिगमनायां प्रमाणाभावादुभयोरप्युभयात्मकत्वं प्रसज्जेत्, तथा चोभाभ्यामपि परस्परार्थक्रियाणां साधनं बाधनं चापद्येत, तस्मात्प्रतिनियतोपलम्भसामग्रीसाहचर्यनियमात्सहोपलम्भोऽपि ज्ञानार्थयोर्भविष्यति, विरुद्धधर्म्मसंसर्ग्गनियमाद्भेदोऽपीति को विरोधः ? इत्यप्रयोजको हेतुः, भवतु वा ज्ञानार्थयोरभेदस्तथाऽपि तमस्तिरोहितो घटादिरालोकेन सह नियमेनोपलभ्यते, तस्माच्च भिद्यत इति भेदेऽपि विपक्षे गतत्वादनैकान्तिकोऽयं हेतुः एतेन यदुक्तं भेदस्य हि व्यापकः सहोपलम्भानियम इति तत्प्रत्युक्तं, स्वस्वकारणसामग्रीभेदस्य भावानां भेदनिबन्धनत्वेन सहोपलम्भानियमस्य तद्व्यापकत्वासिद्धेः पुत्रेण सहायातः पितेत्यादौ बहुलं लोके भेदएव सहशब्दप्रयोगदर्शनात्, साध्यविपर्ययेण व्याप्तत्वाद्विरुद्धोऽप्ययं हेतुः, अन्वयव्यतिरेकी च हेतुर्भवद्भिः साध्यसाधनायोपादीयते सर्वथा भेदास्फुरणे च क्वान्वयः ? कस्माच्च हेतोर्व्यतिरेको ग्रहीतव्यः, तदग्रहणाच्च सामर्थ्याभावेन कथं हेतुःस्वसाध्यं साधयेत ? अथ परप्रतिपादनार्थं हेतुप्रयोगः, परश्च विकल्पगोचरेणापि पक्षादीनां भेदेन प्रतिपादयितुं शक्यते ? इति चेत् न, सहि वास्तवोऽवास्तवो वा, सोऽपि विकल्पेन निश्चीयते न वा, यद्याद्यस्तदा वास्तवस्य भेदस्य विकल्पेन निश्चयात्कालात्ययापदिष्टो हेतुः, अथावास्तवो विकल्पेन निश्चीयते तन्न, अवास्तवेन परप्रत्यायनासिद्धेः, नहि मरीचिकास्वारोपितेन जलेन तृष्णजां काचिदर्थसिद्धिः, अथ वास्तवोऽपि विकल्पेन

न निश्चीयते तदा कथं तस्य विकल्पगोचरत्वं ? कथं चाविकल्पगोचरस्य ज्ञानात्मनस्तस्य सत्त्वनिश्चयः, विकल्पस्य वा तादृशस्य कथं विकल्पत्वं निश्चयरूपत्वा स्य ? इति, अथावास्तवोऽपि विकल्पेन न निश्चीयते, तदा तस्यावास्तत्वं ज्ञानानात्मकतया केन निश्चीयते ? कथं वा तस्यापि शशविषाणायनामस्य परप्रतिपादकता स्यात् ? चित्रज्ञाने च नीलपीतहरिताद्याकारान् संवेदयन् ज्ञानं किं क्रमेण संवेदयते यौगपद्येन वा ? न तावत्क्रमेण चित्राकाराप्रतिभासप्रसङ्गात्, क्षणिकत्वेन ज्ञानस्य तावत्कालमवस्थानाभावाच्च, नापि यौगपद्येन तद्धि नानाकारराननेकतया संवेदयेदेकतया वा ? नाद्यस्तदव्यतिरिक्ततया विरुद्धधर्म्माध्यासेन ज्ञानस्यापि नानात्वप्रसङ्गात्, न द्वितीयः, परस्परविरुद्धानामाकाराणामेकता प्रतीतेरनुपपत्तेः ततश्चित्रसंवेदनादपि नाभेदसिद्धिः, भवतु वा ज्ञानादर्थस्याभेदो, मा वा भूत्, परं य इमे इच्छाद्वेषप्रयत्नसुखदुःखहर्षादयोऽन्तर्मानसं सकलप्राणिभिरनुभूयन्ते, ते किं ज्ञानाद्भिद्यंते न वा ? उभयथाऽपि च ज्ञानेन सह नियमेनोपलभ्यन्ते न वा ?, यदि तावज्ज्ञानाद्भिद्यन्ते तेन च सह नोपलभ्यन्त इति पक्षस्तदा स्वसिद्धान्तव्याघातः, सर्वभावानामपि ज्ञानेन सहोपलम्भनियमेन तस्मादभेद इति हि वः सिद्धान्तः, अथ ज्ञानेन सहोपलभ्यन्ते ततो भिद्यन्ते चेति पक्षस्तदा इच्छादिभिरेवानेकान्तः सहोपलम्भेऽपि तेषां ततो भेदात्, अथ ज्ञानेन सह नोपलभ्यन्ते तस्माच्च न भिद्यन्ते तदा भागासिद्धो हेतुः, इच्छादीनां ज्ञानादभेदसाधनेऽपि सहोपलम्भाभावात्, अथ ज्ञानेन सहोपलभ्यन्ते तस्माच्च न भिद्यन्ते, यत्किल बाह्यानपि नीलादीनात्मसात्कर्त्तुमिष्टे, तज्ज्ञानं कथमान्तरान् शश्वत्सह संवसतिदुर्ललितान् इच्छादीनात्मना सहैकात्म्यसुखं नानुभावयिष्यति ? इति चेत् न प्रति पुरुषं हि जलादिज्ञानान्तरं तत्रेच्छा, ततः प्रयत्नस्ततस्तदुपादानं, ततः सौहित्यमित्याद्या अर्थक्रियाः क्रमेणोपलभ्यन्ते, ता एता इच्छादीनामेकान्तेन ज्ञानात्मकत्वे न भवेयुः, स्वरसप्रवृत्तप्रतिभासमात्रप्रवाहातिरिक्ताया अर्थक्रियाया भवन्मते ज्ञानस्यासम्भवात्, योऽप्यभेदसिद्धावेकस्माच्चन्द्राद्द्वितीयश्चन्द्र इति दृष्टान्तः, तत्रापि द्वितीयस्य चन्द्रस्यावास्तवस्यैव परमार्थसतश्चन्द्रादभेदः, दार्ष्टान्तिके तु नीलादेः परमार्थसत एव ज्ञानादभेदो विवक्षित इति वैषम्यं, तथाऽवधिभूतस्य चन्द्रस्य बाह्यतया पक्षनिक्षेपाद् दृष्टान्ताभावोऽप्यत्र, अथापरमार्थसतो नीलादेर्ज्ञानादभेदो विवक्षित इति चेत्, किमिदम् अपरमार्थसत्त्वमसत्त्वं वा, औपचारिकनीलादिशब्दविषयत्वं

वा, भ्रान्तिगोचरत्वं वा ? नाद्यः, असत्त्वं हि प्रागभावप्रध्वंसाभाववत्त्वं वा ? तस्मिन् देशे अविद्यमानत्वं वा ? अकिञ्चिद्रूपत्वं वा ? प्रागभावप्रध्वंसाभाववत्त्वमपि युगपद्वा क्रमेण वा ?, न प्रथमः, पृथक्कालभावित्वेन तयोस्तद्वत्त्वस्य यौगपद्यासम्भवात्, अथ क्रमेण तदा प्रागभाववतो नीलादेस्तदुत्तरकाले, प्रध्वंसाभाववतश्च तस्य तत्प्राक्काले परमार्थसत्त्वप्रसङ्गः, तथा च कालान्तरवर्त्तिनो नीलादेर्वर्तमानकालभाविना ज्ञानेनं कथं तादात्मयं स्याद्भिन्नकालत्वात्, तथात्वे वा नीलादेरपि वर्त्तमानत्वापत्तिः, तथा च भूतभाविनीलादिस्मरणादिवशात्तन्नीलमित्याद्याकारं यज्ज्ञानमुपजायते तन्न स्यात्, इदं नीलमित्याद्याकारमेव प्रसज्येत, अथ तस्मिन् देशेऽविद्यमानत्त्वमसत्त्वं, तन्न, तदा हि देशान्तरे नीलादेः सत्त्वप्रसङ्गः, न च देशान्तरस्थस्य नीलादेरेतद्देशभाविना ज्ञानेन तादात्म्यमुपपद्यते भिन्नदेशत्वात्, तथात्वे वा नीलादेरपि ज्ञानदेशत्वमापद्येत, न चेदमिष्टम्, अथाकिञ्चिद्रूपत्त्वमसत्त्वं तदपि न, तदा हि यथाऽविद्यारोपितादपि नीलादिदं नीलमिति नीलाकारं ज्ञानं संजायते, तथा तस्मादेवेदं पीतमिति पीताकारं कथं तन्न भवेत्, को ह्यकिञ्चिद्रूपतया नीलापीतयोर्विशेषः ? एवं च प्रतिभासनियमो न स्यात्, नापि द्वितीयः, मुख्याभावे उपचारानुपपत्तेः, गोशब्दो हि ककुदादिमदर्थगतजाड्यभारवहनादिगुणलक्षणद्वारेण वाहीकगतांस्तत्स्वरूपान् गुणाँल्लक्षयित्वा वाहीके उपचर्यते, तथा च गौर्वाहीक इति व्याहारव्यवहारप्रतीतयः प्रवर्त्तन्ते, क्वचिन्मुख्यस्य गोर्दर्शनादेव चैतासां वाहीके प्रवृत्तिः, न चात्र प्रत्यक्षोपलभ्यमाननीलादिरस्ति, सत्त्वे वा तस्यैव ज्ञानाद्भेदसिद्धेः सिद्धो बाह्यो नीलादिरर्थः, न च तद्गुणलक्षणद्वारादिनौपचारिकनीलादिशब्दविषयः कश्चिदर्थो विद्यते, यस्य ज्ञानेन तादात्म्यं स्यात्, नापि तृतीयः, भ्रान्तेरपि मुख्यासम्भवेऽनुपपत्तेः, वणिग्वीथ्याद्यनुभूतसत्यरजतो हि पुमान् मुक्ताकरतीरादौ भास्वरत्वशुक्लिमादि भाजं पुरः शुक्तिशकलमवलोक्य तद्गुणारोपेणेदं रजतमिति विपर्ययेति, नत्वन्यथा, न चेह मुख्यो नीलादिः क्वचिदुपलब्धः उपलब्धौ वा प्रागिव पारमार्थिकनीलादिसिद्धिः, न च तद्गुणाद्यारोपेण नीलादिभ्रान्तिगोचरः कश्चिदर्थोऽस्ति यस्य ज्ञानेन तादात्म्यं स्यात्, सत्त्वे वाऽभ्रान्तज्ञानतादात्म्यादर्थस्याप्य–भ्रान्तिगोचरतापत्तेः, स्यादेतत्परमार्थसता अपरमार्थसता वा नीलेन ज्ञानस्याभेदाभ्युपगमेऽमी दोषा अनुषज्ययेरन्, न त्वस्माकमयमभ्युपगमः किन्त्वनाद्यविद्यामर्थ्यात् ज्ञानमेव स्वमाकारं बहिरारोप्य नीलमिदम् इत्याद्याकारेण संवेदयते इति

चेत्, अथ कोऽयमाकारः स्वरूपं वा, सादृश्यं वा, संस्थानं वा ?, न प्रथमः, ज्ञानस्य स्वप्रकाशरूपतया नीलमहमित्येव संवेदनं स्यात् न तु नीलमिदमिति, अथेन्द्रजालिकीव लोकं ज्ञानमप्यविद्या भ्रमयति, तेन स्वस्य बाह्यताऽऽरोपेण तथासंवेदनं न विरुद्ध्यते इति चेत् न, सा ह्यविद्या संवृतिसती, परमार्थसती वा ? संवृतिसती चेत् न, अविचारितरमणीयतया वस्तुतस्तस्या असत्त्वेन ज्ञानव्यामोहनायोगात्, परमार्थसती चेत्, नन्वस्या बाधकप्रत्ययेन भवितव्यम्, अन्यत्र तथादर्शनात्, अविद्यापरनाम्नो हि मिथ्याज्ञानात्पुरोवर्त्तिरजतमेतत् इति निश्चित्य तज्जिघृक्षया प्रवर्त्तमानः पुरुषः पश्चात्प्रत्यासीदन् व्यावर्त्तकधर्मदर्शनात्सञ्जातबाधः प्राह–भ्रान्तोऽहं नेदं रजतं शुक्तिरेषेति, तथेहाप्यविद्यावशाज्ज्ञानेन बाह्यतया रोपितेऽपि स्वाकारे बाधकबलात् कदाचिन्नेदं नीलमित्यादि ज्ञानमुदियात् न चैतदस्ति, अथादिमत्त्वात्तत्र बाधकज्ञानोदयः, इयं त्वनादिरिति चेत्, तर्ह्येतस्याश्छायावत्सर्वदा साहचर्यात् ज्ञानस्य भ्रान्तत्वप्रसङ्गेनैव तत्त्वज्ञानानुत्पादापत्तेः, तथा च सार्वज्ञ्यहानेः परलोकानुष्ठानवैयर्थ्यप्रसङ्गः, भ्रान्ताभ्रान्तत्वविभागाभावेन च स्वप्नजागरावस्थयोरविशेषापत्तिः, बोध्यकर्तृकरणकर्म्मदेशकालादिप्रबन्धः कादाचित्कसंवादवान् ज्ञानावस्थाविशेषो हि स्वप्नः, कर्तृकरणादिप्रबन्धे कस्यचिदेवार्थस्य कादाचित्कबाधवांश्च जागरः, स्वप्नज्ञानस्य च जागरज्ञानं बाधकमिति लोकप्रतीतिसिद्धं, लोको हि स्वप्नोपलब्धान् अर्थान् जागरावस्थायां तथात्वेनापश्यन् तदर्थक्रियाश्च अनासादयन् स्वप्नज्ञानस्यासत्यतां प्रत्येति, जागरज्ञानस्य चार्थक्रियादिप्राप्तेः सत्यतां, यदि चानाद्यविद्याच्छादितत्वेन सर्वं ज्ञानं भ्रान्तमेवोदयते तदा कोऽनयोर्विशेषः स्यात्, किञ्चासौ ज्ञानरूपा अज्ञानरूपा वा ? नाद्यः, अविद्याक्षतेः, न द्वितीयः, ज्ञानादन्यस्य परमार्थसत्त्वानभ्युपगमात्, अभ्युपगमे वा ज्ञानाद्वैतसिद्धान्तव्याकोपात्, अथाकारः सादृश्यमिति चेत्, केन ज्ञानस्य सादृश्यम् ? अर्थेन ज्ञानान्तरेण वा, न प्रथमः, न खल्वर्थो ज्ञानं जनयति, स्वाकारार्पणेन सरूपयति च इत्यर्थाकारं ज्ञानम् इत्यर्थसादृश्यं ज्ञानस्य सौगतिकैरिव भवद्भिरभ्युपेयते, बाह्यार्थानभ्युपगमात्, न द्वितीयः, ज्ञानान्तरेण स्वसंवेद्यत्वादिना ज्ञानस्य सादृश्येऽपि न तस्य बहिरारोपेण कश्चिदुपयोगः, तदा हि मत्सादृश्यमिदम् इत्याकारेण ज्ञानस्य बहिः स्वग्रहणप्रसङ्गेन नीलम् इत्याद्याकारेण ग्रहणानुपपत्तेः, आकारः संस्थानमिति चेत् न, तदभावात् न हि नीलादेरिव ज्ञानस्य संस्थानं किञ्चिदुपलभ्यते, न च पूर्ववत्तेन

काचन विवक्षितसिद्धिः, किञ्च सर्वज्ञज्ञानेनानाद्यविद्याकलुषितानां संसारिसत्त्वचित्तानां सहोपलम्भनियमादभेदे सर्वसर्वज्ञतापत्तिः, सर्वज्ञस्य वाऽसर्वज्ञतापत्तिः, भेदे वा तैरेव व्यभिचारादनैकान्तिकोऽयं हेतुः, न चाभेद्यनीलादिसिद्धिमन्तरेणाभेदसाधकं प्रमाणमुत्थातुमर्हति, अन्यतरसम्बन्धिनोऽसिद्धेः, तथाहि अभेद्यं सिद्धं न वा ? न चेत्कस्य तत्प्रमाणमभेदं साधयेत्, सिद्धं चेत् स्वतः परतो वा ? स्वतश्चेत् कथमभेदसिद्धिः। परतश्चेत् परोऽपि सिद्धो न वा ? सिद्धोऽपि स्वतः परतो वा, स्वतश्चेत् कथं न साध्यविरुद्धभेदसिद्धिः, तां विना स्वपरविभागासिद्धेः, परतश्चेन्न, अत्रापि स्वतः परतो वा, परः सिद्ध इत्यादिक्रमेणानवस्थापातात्, न सिद्धश्चेत् न विवादविनिवृत्तेः, प्रतिपाद्यं परमन्तरेणाभेदसाधकप्रमाणोपन्यासवैयर्थ्यात्, अस्तु तर्हि प्रकाशमानत्वं हेतुः, तथा हि यत्प्रकाशं तज्ज्ञानं यथा स्वप्नदृष्टं, प्रकाशन्ते च नीलादय इति, न च दृष्टान्तस्य साध्यविकलता स्वप्नदृष्टस्यार्थप्रबन्धस्य जागरावस्थायां बाधकज्ञानोत्पादेनाभावसिद्ध प्रकाशमानत्वेन या ज्ञानत्वसिद्धेरिति चेत् न, किमिदं प्रकाशमानत्वं प्रकाशसम्बन्धः? इति चेत्, अथ कोऽयं सम्बन्धस्तादात्म्यं वा ? तदुत्पत्तिर्वा ? विषयविषयिभावो वा ? नाद्यः, अतीतानागतानामर्थानां भिन्नकालत्वात्, वर्त्तमानानामपि भिन्नदेशत्वात्,प्रकाशतादात्म्यानुपपत्तेः, नीलाकारोत्पादकाले च पीताकारमपि ज्ञानमुदियात्, नीलपीतयोरविशेषेण प्रकाशतादात्म्यात्, न द्वितीयः, प्रकाशादर्थस्यानुत्पाता, स्वस्वसामग्रीतः सर्वभावानामुत्पत्तेः, अमूर्त्तान्मूर्त्तानुत्पत्तेश्च उत्पादेऽपि वा भेदः स्यात्, जन्यजनकभावस्य धूमाग्न्योरिव भेदाश्रयत्वात्, तदभावेऽनुपपत्तेः, न तृतीयः, अर्थो विषयः प्रकाशो विषयी इत्यस्य विषयविषयिभावस्य भेद एवोपपत्तेः, अथ प्रकाशमानत्वं प्रकाशमात्रत्वं, न तु तत्सम्बन्ध इति चेत् ! तत्किं ज्ञानत्वं वा, प्रकाशाधीनप्रकाशत्वं वा ? स्वतः प्रकाशत्वं वा, तेजस्त्वं वा ? न प्रथमः, साध्यसाधनयोरविशेषेण हेतोः साध्याविशिष्टत्वप्रसङ्गात्,न द्वितीयः, अनभ्युपगमात्, नहि ज्ञानान्तराधीनप्रकाशं ज्ञानं भवता तस्य स्वप्रकाशत्वाभ्युपगमात्, तथा च ज्ञानत्वेन साध्यमाना नीलादयोऽपि स्वप्रकाशत्वात् ज्ञानवन्न प्रकाशाधीनप्रकाशा भवतुमर्हन्ति, न तृतीयः स्वतः प्रकाशत्वेऽस्मदादीनामिव नीलादीनामपि चैतन्यादिच्छाद्वेषप्रयत्नादयः प्रादुर्भवेयुः, तथा च हिताहितप्राप्तिपरिहारोपाय–परिज्ञाननिबन्धना हानोपादानादिव्यवहारास्तेषामपि प्रवर्त्तेरन्, न चतुर्थः, प्रतिबन्धासिद्धेः, नहि यत्तेजस्तज्ज्ञानमिति व्याप्तिः

क्वचित्सिद्धा, नीलादिषु तेजवास्सिद्धेश्चासिद्धो हेतुः, साधनविकलश्च दृष्टान्तः, अत एव न तेजस्त्वं ज्ञानत्वे प्रयोजकं, किं तर्हि स्व–प्रकाशकत्वं, तदसिद्धं ज्ञानस्येति चेन्न, स्वसंविदितत्वेन स्वप्रकाशकत्वस्य भवद्भिरप्यभ्युपगमात्, ननु स्वप्रकाशत्वमस्माभिरिष्यते ज्ञानस्य नतु स्वप्रकाशकत्वम् ? इति चेन्न, को ह्यनयोर्विशेषः ? एकत्र हि स्वतः प्रकाशते ज्ञानं नतु परेण प्रकाशत इत्यर्थः, अन्यत्र तु स्वं प्रकाशयति स्वयमेवेति फलतो नार्थभेदः कश्चित्, यदि परं भवतः स्वपक्षानुरागो विजृम्भते, परप्रकाशकत्वं तु देवदत्तादिज्ञानस्य यज्ञदत्तेन चेष्टानुमानादिना परिच्छेदात्सर्वजनानुभवसिद्धमेव, न च स्वपरप्रकाशकत्वं नीलादिषु विद्यते, तत्कथं तेषां ज्ञानत्वमुपपादयितुमुचितम् ? यद्येवं मा भून्नीलादीनां ज्ञानत्वं, स्वपरप्रकाशकत्वात्तु प्रदीपादीनां तदस्तु, एतावताऽप्यंशेनास्माकं समीहितसिद्धिरिति चेन्न, शब्दसाम्यमात्रेणानुमानाप्रवृत्तेः, वागादीनामपि गोशब्दवाच्यतामात्रेण विषाणितापत्तेः, अन्यद्धि ज्ञानस्य स्वपरप्रकाशकत्वम् अन्यच्च प्रदीपादीनां, ज्ञानं हि संशयविपर्ययाद्यबाधिततया प्रमाणप्रमितिप्रमेयप्रमातृभावेन यथासम्भवं स्वपरान् परिच्छिन्दन् स्वपरप्रकाशकं तदेव च प्रमाणमिति गीयते, यदाहुः **सिद्धसेनदिवाकरपादाः**–''प्रमाणं स्वपराभासं ज्ञानं बाधविवर्जितम् ।'' इति, प्रदीपादयस्त्वचेतना एव शुक्लभास्वरतयाऽऽत्मान मन्धतमसा व्यवहितान् नीलादींश्चार्थान् बाह्यप्रकाशान्तरनिरपेक्षतया द्रष्टृणां दर्शयन्तः स्वपरप्रकाशका इत्यभिधीयन्ते, तथा च कथं साम्यम् ? अथ यत्प्रकाशते यज्ज्ञाने परिस्फुरति, ज्ञानं यद्ग्राहकतया परिणमत इति यावदित्यर्थग्रहणपरिणामत्वं प्रकाशत्वं विवक्षितमिति चेत्, तदेतदनुमन्यामहे ज्ञानस्य न त्वर्थस्य नीलादेः, तस्य जडत्वेनार्थग्रहणपरिणामत्वाभावात्, अर्थग्राहकत्वपरिणामश्च ज्ञानस्य ग्राह्यग्राहकयोर्भेद एव युज्यत इति ग्राहकज्ञानाद्ग्राह्यस्य नीलादेर्भेदोऽभ्युपगन्तव्यः, यदपि दृष्टान्तस्य साध्यविकलतापरिहाराय स्वप्नदृष्टस्यार्थप्रबन्धस्येत्यादिलपितं, तत्रापि बाधकज्ञानं सत्यमसत्यं वा, सत्यं चेत्कथं तस्य सत्यताऽवसीयते स्वप्नदृष्टार्थस्य जाग्रदवस्थायामप्राप्तेः ? इति चेत्, एवं तर्हि यदर्थं दर्शयति प्रापयति च तत्सत्यं तथा च जाग्रदवस्थाभाविनो बाधविकलस्य ज्ञानस्य प्राप्तियोग्योपदर्शितार्थप्रापकत्वात्सत्यत्वमास्थेयं, नचैवं सत्युपदर्शितार्थप्रापकत्वाभावा–च्चन्द्रार्कतारकादिगोचरस्य ज्ञानस्यासत्यता प्रसज्यत इति वक्तव्यं, प्राप्तियोग्यत्वे प्रमातुरिच्छादौ च सति उपदर्शितमर्थमप्रापयत

एव ज्ञानस्यासत्यताऽभ्युपगमात्, तथा चार्थमप्राप्यतोऽपि चन्द्रादिज्ञानस्य सत्यत्वमेव विप्रकर्षादिना प्राप्तियोग्यत्वाभावेनापि तदर्थानां चन्द्रादीनामप्राप्त्युपपत्तेः, तस्माद्बाधकज्ञानस्य सत्यत्वमिच्छता बाह्यार्थसिद्धिरवश्यमभ्युपेया, अथासत्यं बाधकज्ञानम्, एवं तर्हि स्वप्नदृष्टास्यार्थजातस्य सत्त्वप्रसङ्गो दुर्वारः, न चेदमिष्टं, ज्ञानं विना किमन्यत्तर्हि स्वप्ने प्रकाशते ! इति चेत्, दिनाद्यनुभूतश्रुतानामेवार्थानामनुभवातिशयसंस्कारावेशात्तत्र प्रकाशनात्, अत एवानुभवस्वरूपस्मृतिविपर्ययात्मकत्वेन स्वप्नज्ञानस्यासत्यत्वं मनाग्मिद्धानुविद्धान्तःकरणस्य पुंसो दृष्टश्रुतानुभूतानामेवार्थाना स्मृतौ प्राप्तकालायामनुभवाभ्यासचिर-परिचयादिजनितसंस्कारोद्बोधात्साक्षादनुभूयमानतयेव तत्र प्रतिभासात्, न चैकान्तेन स्वप्नज्ञानस्यासत्यत्वं तद्दृष्टाना-मर्थानामदृष्टादिसामग्र्या जाग्रदवस्थायामजाकृपाणीयसंवाददर्शनात्, तथा च स्वप्नदृष्टस्यार्थस्य बाधकज्ञानोत्पादेनाभावसिद्ध्या ज्ञानत्वं यत्प्रत्यपादि तदसङ्गतं, जागरावस्थायां तत्राविसंवादेन साक्षादर्थप्राप्त्या ज्ञानत्वासिद्धेः, न च बाह्यार्थं विना स्वरूपेण ज्ञानस्य सत्यासत्यत्वविभागोऽपि घटामधिरोहति प्रमातॄणामुपदर्शितार्थप्राप्त्यप्राप्तिभ्यामेव ज्ञानस्य सत्यत्वासत्यत्वव्यवहृतेः, अपि च स्वप्नदृष्टोदाहरणेनासत्प्रकाशनशीलतया स्वप्नज्ञानस्येव विवक्षितज्ञानस्याप्यसन्नीलाद्युल्लेखितयाऽसत्यत्वमेवापद्येत, तदेवं प्रकाशमानत्वादपि हेतोर्न नीलादीनां ज्ञानत्वसिद्धिः, किञ्च ज्ञानशब्दो यदि कर्तृसाधनो यदि वा करणसाधन उभयथाऽपि स्वव्यतिरिक्तप्रकाश्यं परं कर्म्माक्षिपति, व्यवधानाव्यवधानाभ्यां कर्तृकरणव्यापारयोः कर्मविषयत्वात् कर्माभावे विषयाभावेन तयोर्वैफल्यापत्ते, तच्च प्रकाश्यं परं कर्म अर्थ इति व्यपदिश्यते, न चार्थाभावात्स्वस्यैव प्रकाश्यतया कर्म्मतेति वाच्यम्. अर्थो भवतु मा वा भूत् परः; परप्रकाशकता तज्ज्ञानस्य त्वयाऽप्यभ्युपगन्तव्या, ननु स्वप्रकाशकमेवज्ञानं कथं तस्य परज्ञानप्रकाशकतामभ्युपैति ? इति चेत् न, हिताहितप्रवृत्तिनिवृत्तिभ्यां प्रायशः परं ज्ञानस्य सर्वैरेव प्रतीतेः, तदप्रतीतौ तदनुजीविनां हानोपादानादिव्यवहाराभावान्निरीहं जगज्जायेत, भवतोऽपि परप्रतिपादनाय प्रयोगोपन्यासानुपपत्तेश्च, न्यायोऽप्युच्यते, यत्स्वप्रकाशकं तत्परमपि प्रकाशयति यथा सर्वज्ञज्ञानं स्वप्रकाशकं च विवादाध्यासितमिति, नन्वन्यथासिद्धोऽयं हेतुः सोपाधित्वात्, नहि स्वप्रकाशकत्वात्सर्वज्ञज्ञानं परप्रकाशकं किन्तु सर्वविषयत्वात्, विवादाध्यासितं तु ज्ञानं स्वप्रकाशकमपि भविष्यति सर्वविषयत्वाभावात्

पंचलिंगी ॥१५२॥

बृहद्वृत्तिः ५ लि.

परप्रकाशकमपि न भविष्यतीति चेत्, न, उपाधिलक्षणाभावात्, साधनाव्यापकत्वे सति साध्यव्यापकत्वम् इति हि तल्लक्षणं, ततश्चास्मदादिज्ञानेन व्यभिचारतो यत्स्वप्रकाशकं तत्सर्वविषयमिति व्याप्त्यभावेन साधनाव्यापकत्वे सत्यपि, यत्परप्रकाशकं तत्सर्वविषयमित्यस्मदादिज्ञानेनैव व्यभिचाराद्व्याप्त्यभावेन साध्यव्यापकत्वासिद्धेः, नन्वेतावता भवतु ज्ञानस्य परप्रकाशकत्वं तथाऽपि परमपि प्रकाशयन् सजातीयं ज्ञानमेव प्रकाशयति नतु विजातीयमर्थमपि, अत एव मयाऽर्थस्य ज्ञानताऽभ्युपेयते जडस्याजडेन प्रकाशायोगात्तातश्च तस्याप्रकाश्यतया सत्त्वमपि दुरुपपादमिति चेन्न, विजातीयाया अप्यनाद्यविद्यायाः सर्वज्ञज्ञानेन प्रकाशनात्, एवमर्थं जडमपि ज्ञानं प्रकाशयिष्यति, तत्प्रकाशितत्वाच्च तस्य सत्त्वमप्युपपत्स्यते इति को विरोधः, तदेवं सिद्धा बाह्यार्थापरनामानः पुद्गलास्ते च द्वेधा परमाणवः स्कन्धाश्च, तत्र स्थूलद्रव्यस्य मृत्पिण्डादेर्लगुडाद्यभिघाताद्यवयवक्रियाविभागादिना भज्यमानस्याणुतरतमादिभावाद् यतो नाणीयान् स परमाणुः, स च नित्यो निरवयवो वर्णादीनां च भूयस्त्वेऽप्येकवर्णरसगन्धः स्पर्शाष्टकमध्यादविरोधिस्पर्शद्वयभाग् अस्मदादीन्द्रियागोचरोऽपि द्व्यणुकादिकार्यद्रव्यानुमेयः, कारणं च द्व्यणुकादिस्कन्धानां, न तु द्व्यणुकादिवत्कस्यापि कार्यमपि यदाह—कारणमेव तदन्त्यं नित्यः सूक्ष्मश्च भवति परमाणुः, एकरसवर्णगन्धो द्विस्पर्शः कार्यलिङ्गश्च ॥१॥ स्कन्धाश्च द्व्यणुकादयोऽनन्ताणुकपर्यवसाना अनेकविधाः, ते च परिणामिकारणपरमाणुनिष्पाद्या विशिष्टैकपरिणामपरिणताः सावयवाश्च, परमाणव एव हि द्व्यणुकादिक्रमेण स्कन्धतया परिणमन्ते न तु परमाणुभ्यः पृथगुत्पद्य द्व्यणुकादयः समवायेन तेषु समवयन्ति, अत एवावयवेभ्यो नात्यन्तं व्यतिरिक्तोऽवयवीत्यभ्युपगम्यते, एकान्तभेदे ह्यवयविनोऽवयवा इति व्यपदेशः केन सम्बन्धेन प्रवर्त्तते, न तावत्तादात्म्येन भिन्नयोऽस्तदसम्भवात्, नापि तदुत्पत्त्याऽवयविनः अवयवानामनुत्पादात्, ननु मोत्पत्सत अवयविनोऽवयवास्तथाऽपि सम्बन्धस्य द्विष्ठतयाऽवयविनोऽवयवा इति वदन् अवयवानामवयवीत्यपि व्यपदेशादवयवेभ्योऽवयविनं उत्पादे तदुत्पत्तिः सम्बन्धो घटिष्यत इति चेन्न, धूमध्वजाद्धूमस्येवावयवेभ्योऽवयविनः पृथगुपलम्भप्रसङ्गात् नापि संयोगेन, अवयवावयविनोस्तदनभ्युपगात्, अभ्युपगमे वा कुण्डाद्बदरमिवावयवेभ्योऽवयवी कदाचित् पृथगुपलभ्येत, समवायेन इति चेत्, कोऽयं समवायः ? अयुतसिद्धयोराश्रयाश्रयिभाव इति चेत्, केयमयुतसिद्धिः ? अयुतयोरवयवाक्यविनोः ॥१५२॥

सिद्धिर्निष्पत्तिर्वा प्रतीतिर्वा, अयुतयोरित्यपि, किं द्वयोरपि सम्बन्धिनोरपृथग्देशकालयोः, उतान्यतरस्यापृथग्देशकालस्य ! न प्रथमः, तन्तूनां पटात् पृथग्देशत्वात् प्रथममेव चांशुभ्यो निष्पत्तेः, पटस्य च पश्चात्तन्तुभ्यश्च निष्पत्तेः, न द्वितीयः, पटात्पृथक् पश्चाच्च तन्तूनां प्रतीतेः, पटस्य च तन्तुभ्योऽपृथग्देशत्वेन पूर्वं चोपलम्भात्, पटे हि दृष्टे इह पटे तन्तव इत्येव प्रतीत्युदयात्, अथान्यतरस्यायुतस्य सिद्धिर्निष्पत्तिः प्रतीतिर्वा, तत्रापि न तावदवयवानां तन्तूनां निष्पत्तेः प्रतीतेर्वा पटात् पृथगेव, पूर्वोक्त न्यायेन पृथग्जनैरपप्यवगमात्, तथा चान्यतरस्य पटस्य तन्तुभ्योऽयुतसिद्धस्येति वक्तव्यं, न चैकस्याश्रयाश्रयिभावलक्षणः समवायः संभवति, तदेवं विकल्पचतुष्केऽप्ययुतसिद्धयोरित्यादिलक्षणानुपपत्त्या लक्ष्यस्य समवायस्याप्यनुपपत्तिः, अथ पटभावमापन्नास्तन्तवोऽपि पटादपृथग्भूता इत्ययुतसिद्धा अभिधीयन्ते, तथा च पटात्तन्तवोऽयुतसिद्धाः तन्तुभ्यश्च पट इत्युतसिद्धयोरित्यादिलक्षणमुपपत्स्यत इति चेत्, नन्वेवंविधस्यायुतसिद्धत्वस्य तन्तुपटयोरभेदमन्तरेणायोगात् सिद्धस्तयोरभेदः, तथा च तन्तव एव विशिष्टैकपरिणाममापन्नाः पट इति सामानाधिकरण्यमपि सङ्गच्छते, न चाभिन्नयोराश्रयाश्रयिभावस्तस्य द्विष्ठत्वादिति भूयोऽपि लक्षणासिद्धिरेव, अथ तन्तून् विहाय न पृथगाश्रयमाश्रयते पट इत्यपृथगाश्रयाश्रितत्वमयुतसिद्धत्वस्थीयत इति चेन्न, भिन्नयोर्हि तन्तुपटयोः समवायसम्बन्धात्परस्परोपसंश्लेषः साधयितुमुपक्रान्तः, स च तत्सम्बन्धात्प्रागप्ययुतसिद्धयोरित्यादि लक्ष्यते, तथा च किं तेन स्वरससंश्लिष्टयोरवयवावयविनोः संश्लेषविधानच्छद्मना विश्लेषापादकेन समवायेन, एवमप्यमास्थीयते चेत्तथाऽपीतरेतराश्रयप्रसङ्गः, अयुतसिद्धयोर्हि तयोः समवायसम्बन्धः तत्सम्बन्धाच्चायुतसिद्धिरिति, अथेह तन्तुषु पट इति प्रत्ययः सम्बन्धनिमित्तकोऽबाधितेहप्रत्यत्वादिह कुण्डे दधीतिप्रत्ययवत्, इत्यनुमानात्समवायसिद्धिरिति चेत् न, सम्बन्धः किं संयोगोऽभिमतः समवायो वा ? नाद्यः, तयोस्तदनभ्युपगमात्, न द्वितीयः, दृष्टान्तासिद्धया व्याप्त्यसिद्धेः, ननु मा भूद्व्याप्तिः पक्षधर्मताबलेन तु पारिशेष्यात्समवायसिद्धाविह तन्तुषु पट इतिप्रत्ययस्तन्निमित्तो भविष्यति ? इति चेन्न, हेतोरप्रयोजकत्वात्, नहीह कुण्डे दधीति प्रत्ययोऽबाधितेहप्रत्ययत्वात्सम्बन्धनिमित्तकः, अपि तु पृथगाश्रयाश्रितार्थगोचरतया इह तन्तुषु पट इति ॥१५३॥ प्रत्ययस्त्वबाधितेहप्रत्ययोऽपृथगाश्रयाश्रितार्थविषयतया सम्बन्धनिमित्तको न भविष्यतीति को विरोधः ? भवतु वोक्तहेतोरिह

तन्तुषु पट इति प्रत्ययः समवायसम्बन्धनिमित्तः, इह तन्तुपटादिषु समवायिषु समवाय इति प्रत्ययस्तु कुतस्त्यः ? समवायान्तरात् ! इति चेन्न तस्यैकत्वाभ्युपगमात् अनेकत्वाभ्युपगमे चानवस्थापातात्, तस्मात्समवायान्तरं विनाऽपीह समवायिषु समवाय इति प्रत्ययः स्वीकर्त्तव्यः, तथा च तेनैवाबाधितेहप्रत्ययत्वादिति हेतोरनैकान्तिकत्वान्न ततोऽपि समवायसिद्धिः, तदेवमेकान्तभेदे समवायेनापि सम्बन्धेनावयविनोऽवयवा इति व्यपदेशो न सङ्गच्छते, वृत्तिविकल्पानुपपत्तेरप्येकान्तभेदो न घटते, तथाहि भिन्नो भावः क्वचिद्वर्त्तमान एकदेशेन वा वर्त्तेत, यथा स्त्रक् सूत्रं पुष्पेषु, सर्वात्मना वा यथा नानाभाजनगतान्याम्रफलानि, अवयवी वाऽवयवेषु, न तावदेकदेशेन वर्त्तते, अवयवान् विना तस्यापरैकदेशायोगात्, योगे वाऽनवस्थाप्रसङ्गात्, नापि सर्वात्मनाऽवयवान्तरेष्ववृत्तिप्रसङ्गात्, न ह्येकत्रैव परिसमाप्तात्माऽन्यत्रापि वर्त्तत । इति, वृत्तौ वा यावदवयवमवयविप्राप्तेः, गोपालादीनामपि च सर्वात्मत्ववृत्तिप्रतीत्यभावात्, तन्त्वादिसञ्चयविशेषस्यैव तैरपि प्रतीतेः, कथं तेन वर्त्तेत ! न चैकदेशसर्वात्मभ्यां प्रकारान्तरमस्ति, ननु परमाणोः प्राच्यादिदिगवच्छेदेन परमाण्वन्तरैः संसृज्यमानस्यैकदेशसर्वात्मभ्यां विनाऽपि वृत्तिरस्ति, तदवयवावयविंनोरपि भविष्यतीति चेन्न, निरवयवपुद्गलानां परमाणूनां वृत्तेरसम्भवात्, तथाहि सावयवानां कुण्डबदरादीनां तन्तुपटादीनां वाऽऽधाराधये भावव्यवस्थापकः संयोगः, समवायो वा, भवता वृत्तिरभिधीयते, न च परमाणोः परमाण्वन्तरेण सहोत्तराधार्येण संयोगेऽप्याधारत्वमुपपद्यते, कुण्डं हि बदरस्य पततो गुरुत्वप्रतिबन्धेन स्थितिविदधदाधारो, बदरं वाऽऽधेयमित्युच्यते, नचाऽधस्तनः परमाणुरुपरितनस्य परमाणोः कुण्डबदरन्यायेन स्थितिमाधत्ते, तमन्तरेणापि तस्य स्वस्वभावादेव स्थित्यादेरप्रतीघातात्, सतोऽप्यधस्तनस्योपरितनस्थित्यादावकिञ्चित्करत्वेन संयोगमात्र एवोपयोगात्, तस्मात्परमाणूनां परस्परसंयोग एवास्ति न तु वृत्तिरिति न तद्दृष्टान्तेनावयवावयविनोः सा उपपादयितुं युक्ता, एकान्तभेदेन चावयवेभ्योऽवयव्युत्पादाभ्युपगमे रण्डाकरण्डावस्थितेभ्यस्तन्तुभ्यः प्रादुर्भूतस्य पटस्य तुलया मीयमानस्यावनमना-दिविशेषेणाभ्भकतन्तुगुरुत्वाद्गुरुत्वाधिक्यं प्रतीयेत, कारणगुरुत्वात् कार्यगुरुत्वस्याधिक्याभ्युपगमात्, न च कार्ये गुरुस्त्वामन्यन्नास्तीति वाच्यं, कारणगुणपूर्वकाः कार्ये गुणा इत्यभ्युपगमविलोपप्रसङ्गात्, न च पटादिलग्नरेणुकणनिकरगुरुत्ववत्सदपि

कार्यगुरुत्वमल्पत्वान्न प्रतीयत इति वक्तव्यं, रेणुकणनिकरगुरुत्वस्याल्पत्वेनाप्यप्रतीतेरुपपत्तेः, अवयवापेक्षया तु अवयविनोऽतिमहत्त्वात्तद्गुरुत्वोपलम्भः केन वार्येत ? अत एत यत्र रेणुकणानां भूयस्त्वं तत्रावयविनि तुलया मीयमाने तद्गुरुत्वातिरेकः प्रतीयत एव, तदेवमवयवेभ्योऽवयविनः कथञ्चिदभेदसिद्धौ सत्यपि प्रत्यक्षे न्यायोऽप्यभिधीयते, अवयवेभ्योऽवयवी कथञ्चिदभिन्नः द्रव्यत्वे सति पृथगाश्रयानाश्रितत्वात्, यः पुनर्यस्माद्भिन्नो नासौ द्रव्यत्वे सति पृथगाश्रयानाश्रितः, यथा घटात्पट इति व्यतिरेकी, पृथगाश्रयानाश्रितत्वेऽपि जातिगुणक्रियादिभिरवयवादिभ्य एकान्तभेदेन परेणाभ्युपगतैर्व्यभिचारो मा भूदिति द्रव्यत्वे सतीति हेतोर्विशेषणं, न चैकान्तेनाभेदोऽपि एकस्थूलतया प्रतिभासात्, आवरणशीतापनोदाद्यनेकार्थक्रियाकरणात्, एकदेशाकर्षणधारणाभ्यां समस्ताकर्षणधारणोपलम्भात्, तन्तवः पट इत्याद्यभिधानभेदात्, एभिस्तन्तुभिः पटो निष्पत्स्यत इत्यादिकार्यकारणभावव्यपदेशाच्चावयवेभ्योऽवयविनः कथञ्चिद्भेदोपपत्तेः, न च भेदाभेदौ परस्परविरुद्धौ कथमेकत्र सङ्गच्छेते इति वाच्यं, प्रत्यक्षाधिगतेऽर्थे पर्यनुयोगानवकाशात्, इतरथा भवतोऽपि धर्मिणि सर्वभ्रान्तं प्रकारे तु विपर्यय इति वचनादेकस्मिन्नेव विपर्ययज्ञाने भ्रान्ताभ्रान्तत्व लक्षणविरुद्धधर्मयोगव्युत्पादनविरोधात्, अत एवावयवेभ्यो भेदादेकत्वम् अभेदाच्चानेकत्वमवयविन उपपद्यते, एकान्तेनैकत्वे स्थूलस्य ग्रहणाग्रहण–कंपाकंप–रागारागाऽऽवरणानावरणादिभिर्विरुद्धधर्म्म–संसर्गेणावयविनो भेदप्रसङ्गात्, तथात्वेऽप्यभेदे विश्वास्याप्यभेदापत्तेः, एकत्वानेकत्वापगूढे वाऽवयविनि न विरुद्धधर्म्माध्यासस्सम्भवः, अवयवेभ्योऽभेदादेकै–कावयवरूपतयाऽनेकत्वे भेदाच्चैकपरिणामविशिष्टतयैकत्वे, कतिपयावयवानां दर्शनेन कम्पेन च, निखिलावयवानामदर्शनेनाकम्पेन च तस्य ग्रहणाग्रहणयोः कम्पाकम्पयोश्चोपपत्तेः, एवं रागारागादेरप्यनेकत्वैकत्वाभ्यामविरुद्धधर्मता बोद्धव्या, ननु ग्रहणाग्रहणादीनामविरोधापादनाय व्यवस्थापितयोरेकत्वानेकत्वयोरपि परस्परविरोधात्कथमेकत्र समावेशः ? इति चेत् न, अत्र प्रमाणोपपत्तेः, तथाहि विवादपदं स्कन्धोऽनेकोऽपि अवयवेभ्योऽभिन्नत्वात्, यः पुनरेकः सोऽवयवेभ्यो भिन्नो यथा स एवैकस्थूलपरिणामविशिष्ट इति, न चात्र हेतोरसिद्धिः दृष्टान्तस्य वा साध्यविकलता अवयवाभेदभेदयोः प्रागेव प्रसाधित्वात्, 
प्रत्यभिज्ञानस्य चैकस्यापि सोऽयमित्युल्लेखेन तदेदन्तांशाभ्यां स्मृत्यनुभवरूपतया त्वयाऽप्यनक्षरम् अनेकत्वाभ्युपगमात्,

एतेन यत्सत्तन्निरवयवं यथा विज्ञानं, संश्च विवादाध्यासितो नीलादिरित्यपि प्रत्युक्तं, तथाहि यदीदं स्वतन्त्रसाधनं तदा परमाणोः पक्षीकरणे सिद्धसाधनात्, मयाऽपि तस्य निरवयवत्वस्वीकारात्, स्थूलस्यावयविनः पक्षीकरणे आश्रयासिद्धेः, तस्य भवताऽनभ्युपगमात् अभ्युपगमे वाऽवयविसिद्ध्या हेतोर्बाधितविषयत्वात्, अथ प्रसङ्गोऽयं, स ह्येवं प्रवर्त्तते यदि सन्नीलादिः स्यात् निरवयवः स्यादिति, तत्र सत्त्वेन हेतुना यस्यावयवानां निषेधः स प्रसञ्जितस्ते प्रतीता न वा ? प्रतीताश्चेत् असति अवयविनि कस्य तेऽवयवाः ? इत्यवयवी स्वीकर्त्तव्यो भवेत्, तथा च सत्त्वान्नीलादेरवयवनिषेधप्रसञ्जनं कथं सिध्येत् ? न चेत्प्रतीताः कस्य निषेधं प्रसञ्जयितुमुद्यतोऽसि ? न चायं प्रसङ्गोऽपि सम्यक् विपर्ययापर्यवसानेनाभासत्वात्, न चैष नीलादिर्निरवयवस्तस्मान्न सन्निति हि विपर्ययः, तथा च सावयवत्वादसन्नीलादिरिति विपर्ययवाक्यार्थः, न च सावयवत्वं भवताऽभ्युपगम्यते, तथा चासिद्धमसिद्धेन साधयतः कस्ते प्रतिमल्लः ? अभ्युपगमे वा तेनैव नीलादेः सत्त्वसिद्धेः, न ह्यसति साध्यधर्मिणि साधनधर्मावस्थानसम्भवः, आश्रयासिद्धिप्रसङ्गात्, तस्मात्साध्यासत्त्वविपरीतसत्त्वव्याप्तत्वेन सावयवत्वादिति हेतुर्विरुद्धः, तस्मात्स्वतन्त्रसाधनप्रसङ्गपक्षाभ्यां न सत्त्वान्निरवयवत्वसिद्धिः, स्यादेतत्सर्वोऽप्यवयवावयविविचारः परमाणुसिद्धौ सिद्धिमश्नुवीत, स एव चाद्यापि सन्देहतुलामधिरोहति, तथाहि परमाणुरनेकदिग्वर्त्तिभिः परमाण्वन्तरैः संयुज्यमानः किमेकदेशेन संयुज्यते कार्त्स्न्येन वा ? नाद्यः, तस्यैकदेशाभावात्, भावे वा परमाणुत्वव्याहतेः, न द्वितीयः, परमाण्वन्तरैरसंयोगापातात्, न ह्येकस्मिन्नेव समाप्तसंयोगोऽन्येनापि संयुज्यत इति, अत एव यदि परमाणुर्वस्तुसन् स्यात्तदा षड्दिग्वर्त्तिभिः परमाणुभिः संयुज्येत, दृष्टा हि घटादयस्तादृग्भिर्द्रव्यैः संयुज्यमानास्तथा च तद्वदेव षडंशत्वं प्रसज्येतेति परमाणुनिराकरणाय षडंशत्वापादकस्तस्य युगपत्षट्कयोगः, कैश्चित् प्रसङ्गसाधनमुपन्यस्तं, तथा च पठन्ति–षट्केन युगपद्योगात्परमाणोः षडंशतेति, तस्मान्नास्ति परमाणुः, तदभावात्तत्पूर्वकोऽवयवावयविप्रपञ्चः प्रपञ्च इव लक्ष्यते, एवं च भूयोऽप्यविद्यासामर्थ्यान्नीलादिरूपतया बहिरारोपितस्वाकारं ज्ञानमात्रमेव विश्वम् ? इति चेत् उच्यते–यदिदं नीलाद्याकारं ज्ञानमुपजायते तत्किं साधारम् आहो निराधारम् ? निराधारं चेत्तदा शरीरावच्छेदमन्तरेणापि यत्र तत्र देशे काले वा जायेत, अथ साधारं कोऽस्याधारः ? इति वक्तव्यं, शरीरमिति चेत्, किं

तत् अर्थो, ज्ञानं वा ? बहिरारोपितज्ञानाकारो वा ? नाद्यः अनभ्युपगमात्, तथात्वे वा बाह्यार्थसिद्धेः, न द्वितीयः, अहमिति प्रत्ययस्य तत्रानुदयात्, गौरोऽहं स्थूलोऽहं सौभागिनेयोऽहम् इत्याद्युल्लेखेनाहं प्रत्ययस्य तत्र सम्भवात् ज्ञानत्वमस्तु इति चेत् न, लोकायतमतानुषङ्गप्रसङ्गात्, गौरत्वादिधर्माणां ज्ञानात्मादिष्वसम्भवेन तत्सहकृतस्य चैतन्यस्य शरीर एवोपलम्भेन कायाकारपरिणतानि भूतान्येव चेतयन्ते, न तु तदतिरिक्तः कश्चिच्चेतन इति शरीरचैतन्यवादश्चार्वाकाणामेव शोभते, नतु हानोपादानादिव्यवहारान्यथानुपपत्त्या चेतसि बाह्यार्थानुपगच्छतां वाचि पुनः कुतोऽप्यभिनिवेशात्सचराचरं विश्वं ज्ञानसञ्ज्ञया प्रलपतां भवतां, किञ्च शरीरचैतन्योपगमे लौकायतिकैरिवातिरिक्तज्ञाननिरासेन बाह्यार्थ एव त्वयाऽपि स्वीकृतो भवेत्, सोऽयं व्याघ्रभिया पलायमानस्य निर्भाग्यतया तन्मुख एव निपातः, न तृतीयः, शरीरं विना ज्ञानस्यानुत्पत्त्या शरीरतया तस्य स्वाकारारोपानुपपत्तेः, आरोपे वा, सति शरीरे ज्ञानोत्पत्त्या तेन शरीरतया बहिःस्वाकारारोपः तस्मिंश्च सति ज्ञानोत्पाद इति परस्पराश्रयप्रसङ्गात्, तस्माज्ज्ञानाद्वैतमिच्छताऽपि तदधिकरणं शरीरमवश्यमेषणीयं, तदुपगमे च तन्नान्तरीयकनिष्पत्तयो घटपटादयोऽप्येष्टव्याः, नच परमाणुद्व्यणुकादिपरिणामिकारणकलापं विना शरीरादिनिष्पत्तिरिति परमाण्वादयोऽप्यभ्युपेयाः, नन्वेवमपि परमाणोर्निराकारकः षट्कयोगो न समाहितः ? इति चेत्, अथ कोऽयं युगपत्षट्कयोगः ? किं षण्णां परमाणूनां मध्यपरमाणुना सह समानदेशत्वम्, आहो युगपत्सम्बन्धः ? सोऽपि संयोगः, समवायो वा ?, आद्यश्चेत् अत्यल्पमिदमुच्यते, कोटेरपि सूक्ष्मपरिणामभाजां तेषां समानदेशत्वस्वीकारात्, मूर्त्तानां समानदेशत्वं विरुध्यत इति चेत् न, अपवरकाद्यवच्छिन्ने नभोदेशे स्थूलावयविनामपि प्रभूतप्रदीपप्रभापवनादीनां तप्तायः पिण्डादिषु चायस्तेजः प्रभृतीनां समानदेशत्वेनावस्थितेरुपलम्भेन परमाणूनां तथात्वेऽविप्रतिपत्तेः, नच तेन परमाणोः षडंशतापत्तिः, षण्णामपि समानदेशत्वेन मध्यपरमाणुना सह षड्दिक्संयोगाभावात्, न द्वितीयः, नहि संयोगवादिनामप्यंशद्वारकः पदार्थानां संयोगः किन्तु स्वरूपद्वारकः, अंशद्वारा तदभ्युपगमे निरंशानामाकाशादीनां तदभावापत्तेः, एवं च यथा तेषां स्वरूपेण संयोगस्तथा परमाणोरपि परमाण्वन्तरैर्भविष्यति को विरोधः ?, न तृतीयः, वादिप्रतिवादिभ्यां तस्यानभ्युपगमात्, तन्न परमाणोः षडंशतापत्त्याऽभावसिद्धौ ज्ञानमात्रं जगदिति, एतेन मूर्त्तत्वच्छायावत्त्वादयोऽपि परमाणोः

सांशत्वप्रसाधका हेतवो निरस्ताः, तत्सिद्धौ धर्मिग्राहकप्रमाणबाधेनैषां कालात्ययापदेशात्, तदसिद्धादाश्रयासिद्धेः, यन्मूर्त्तं
तत्सावयवमित्यादि व्याप्त्यसिद्धेश्च, परमाण्वपह्नवे व्याप्तिविषयस्य घटादेरप्यपलापेन दृष्टान्तासिद्धेः,
छायाऽप्यधस्तनपरमाणोरुपरितनपरमाणुस्थितिमात्रनिबन्धना नतु तदवयवाधीनेति, ततोऽपि न सावयवत्वसिद्धिः, एवमपि
तदभ्युपगमेऽवयवावयविप्रसङ्गस्य क्वचिदप्यविश्रान्त्याऽनवस्था प्रसङ्गादिति, परमाणुसिद्धिः, तैश्च द्व्यणुकादिक्रमानियमेन
स्थूलावयव्यारभ्यते, परमाणुष्वेव सञ्चितेष्ववयविबुद्धिर्न तु तदारब्धः कश्चित्सोऽस्तीति चेत् न, सञ्चितानामपि
तेषामिन्द्रियग्राह्यत्वायोगात्, यदाहि त्रसरेणवोऽपि मिलिता अपि वातायनविवरनिपतित दिनकरालोकं विना न दर्शनपथमवतरन्ति,
तदा कैव कथा परमाणूनामैन्द्रियकत्वे महत्त्वं ह्यैन्द्रियकोपलब्धिकारणं, यदाह–महत्त्वादनेकद्रव्यत्वाद्रूपविशेषाच्चोपलब्धिरिति,
न च महत्त्वं तेषामस्ति परमाणुत्वविरोधात्, नापि समूह एव तेषां महत्त्वं, तथा सति विशकलितानामपि तेषां
समूहेनावस्थितानामैन्द्रियकत्वप्रसङ्गात्, विशिष्टोत्पादात्तद्भविष्यतीति चेत्, एकस्थूलपरिणामात् कोऽपरो विशिष्टोत्पादः,
तस्मादैन्द्रियकत्वान्यथाऽनुपपत्त्या तदारब्धोऽवयवी वा स्वीकर्त्तव्यः परिहर्त्तव्यं वैन्द्रियकत्वं परमाणूनामेकैकशो मेलकेन वा
तथैव तेषां प्रत्यक्षत्वानुपपत्तेरित्यवयवसिद्धिः, तदेवं बाह्यार्थमपह्नुवानाः साकारज्ञानवादिनः पुद्गलरूपबाह्यार्थसमर्थनेन गाथापूर्वार्द्धेन
निरस्ताः माध्यमकास्तु ज्ञानमात्रमप्यपलपन्तो जगतोऽप्यलीकतामातिष्ठन्ते, ते हि स्वप्नावलोकितानामर्थानां
जाग्रदवस्थायामनासादनादसत्त्वेन तत्प्रत्ययस्य निरालम्बनत्वं तावदुभयवादिसिद्धमतस्तद्दृष्टान्तावष्टम्भेन जाग्रत्प्रत्ययानामपि
निरालम्बनत्वं साधयाम इति मनसि कृत्वा तत्सिद्धये सर्वे प्रत्यया निरालम्बनाः प्रत्ययत्वात् स्वप्नप्रत्ययवदिति च
साधनमुपन्यस्यन्ति, तन्मतमुत्तरार्द्धेन निराकर्त्तुमाह–

'सुमिणेवीत्यादि' स्वप्नेऽपि स्वप्नप्रत्ययेऽपि आस्तां जागरप्रत्यये, अनुभूयते जाग्रदवस्थाभाविपदार्थानुभवजनित–
संस्कारादिमहिम्ना स्वप्नद्रष्ट्रा प्राणिना साक्षादिव प्रतीयते, दिनेति जागरावस्थोपलक्षणं, तेन जाग्रदवस्थायामुपलब्धः
प्रत्यक्षानुमानशब्दादिप्रमाणैः साक्षात्कारानुमितिश्रवणादिविषयतया परिच्छिन्नः 'स्फुटं' निश्चितं सकललोकप्रतीतिसिद्धमेतदिति

यावत्, अर्थो वस्तु घटपटादिः, जागरप्रत्ययस्तावत्प्रायः सन्तमेवार्थं प्रकाशकतयाऽवलम्बते, स्वप्नप्रत्ययोऽपि दिनोपलब्धं तमेव नान्यमित्यपेरर्थः, इयांस्तु विशेषः—जागरे तद्देशकालतयाऽर्थः प्रकाशते, स्वप्ने त्वतद्देशकालतया एतावतैव च स्वप्नार्थोऽसन्निति गीयते, न तु सर्वथाऽसत्त्वेन, एतदुक्तं भवति—यदि हि स्वप्नप्रत्ययः शशविषाणादिप्रत्यय इवात्यन्ताऽसन्तमर्थं विषयीकुर्यात्, तदाऽनुमन्येतापि तस्य निरालम्बनत्वं, न त्वेवमस्ति, जाग्रदवस्थानुभूतमेवार्थमालम्ब्य तस्योत्पत्तेः, अत एव स्वप्नकारणाभिधाय कमार्षम्—"**अणुहूअदिट्ठचिन्तिय सुअपगइविगारदेवयाणूगा । सुमिणस्स निमित्ताइं पुण्णं पावं च नाभावो ॥१॥**" नाभाव इति, नात्यन्तासन्नर्थः, स्वप्नकारणमित्यर्थः, न चानुपलब्धचरस्यापि चन्द्रमण्डलकवलानादेराकलनादनुपलब्धार्थगोचर–त्वमप्यस्ति स्वप्नप्रत्ययस्येति वाच्यम्, अन्यत्र पृथगुपलब्धयोरेव चन्द्रमण्डलकवलनयोः कुतश्चिद्वासनावेशात्सम्बद्धतयाऽऽरोप्य तत्रानुभवात्, एतेन सर्वे प्रत्यया निरालम्बना इत्यादि यदूक्तं तदपि प्रत्युक्तं, परप्रत्यायनार्थं हि वाक्यं प्रयुज्यते, वाक्यं चाकाङ्क्षायोग्यताऽऽसत्त्यादि विशेषणनिकुरुम्बकरम्बितमपि स्वार्थस्याप्रतिक्षेपकमर्थप्रतीतेः कारणं यदाह—आकाङ्क्षायोग्यसत्तिमत्तया प्रतिसंहितं, प्रमाणान्तराप्रतिहतं स्ववचनस्वक्रियास्वज्ञानव्याघातादिदोषरहितं स्वार्थप्रतिक्षेपकयुक्तेरनाक्षेपकं वाक्यमर्थप्रतीतेरङ्गमिति, साधनवाक्यं चेदं भवता प्रयुक्तं स्वार्थप्रतिक्षेपमाक्षिपति, तथा हि निषेध्यतया सिसाधयिषितमालम्बनं साधनप्रत्ययस्य द्विधा भवति, प्रतिपत्त्यनुबन्धि व्यापारानुबन्धि च, तत्राद्यं साधनमेव प्रतीयमानस्यैव साधनस्य साध्यसाधकत्वात्, न खलु सत्तामात्रावस्थिताद्धूमादग्निप्रतीतिर्जायते, द्वितीयं तु साध्यमालम्बनं साध्ये व्याप्रियमाणतया साधनप्रत्ययस्य साध्यप्रतीतिहेतुत्वात्, न ह्यग्नावव्याप्रियमाणाद्धूमप्रत्ययात्पर्वतेऽग्निमत्ताप्रतीतिः, तदेवं व्यवस्थिते सर्वप्रत्ययनिरालम्बनतावादो यदि प्रत्ययत्वादिति साधनप्रत्ययमप्यास्कन्दति, तदा कथं साधनार्थप्रतीतिः ? कथं वा तद्व्यापारानुबन्धिविषयरूपस्य निरालम्बनाः प्रत्यया इत्यस्य साध्यार्थस्यापि प्रतीतिः स्यात्, साधनप्रत्ययस्योभयथाऽपि निरालम्बनत्वेनाघ्रातत्वात्, अथ नास्कन्दति कथं तर्हि सर्वनिरालम्बनत्ववादो घटामियात्, साधनप्रत्ययस्य प्रत्ययत्वेऽपि सालम्बनत्वात्, तथा च प्रत्ययत्वादितिहेतोस्तेनैव व्यभिचारात्, एवं च स्वार्थस्य निरालम्बनत्वस्य च प्रतिक्षेपेण कथमस्माद्वाक्यात् साध्यं सिध्येत् ? किञ्च सर्वशब्देन स्वप्नप्रत्ययस्याप्याक्षेपेण

॥१५९॥

पक्षनिक्षेपाद्दृष्टान्ताभावः, अथ स्वप्नप्रत्ययस्य दृष्टान्तीकरणात्तद्व्यतिरिक्तानां जाग्रत्प्रत्ययानामेव सर्वशब्देन साकल्याभिधानं, तर्हि जाग्रत्प्रत्यया निरालम्बना इत्येव प्रतिज्ञायतां किमपक्षस्यापि पक्षतासन्देहापादकेन सर्वशब्देन, स्वप्नजाग्रतप्रत्ययाभ्यां विना जगति प्रत्ययान्तरस्याभावात्, योऽपि स्वप्नप्रत्ययवदिति दृष्टान्तस्तस्यापि निरालम्बनत्वं कथमवसितं जागरावस्थायां स्वप्नदृष्टानामर्थानामनासादनात्, अर्थक्रियाऽक्षमत्वाच्चासत्त्वावधारणेन, ? तत्प्रत्ययस्यासदर्थालम्बनत्वादिति चेत्, न तावत्स्वप्नार्थानां खरविषाणादीनामिवात्यन्तासत्त्वं येनात्यन्तासदर्थालम्बनत्वेन खरविषाणादिप्रत्ययस्येव तत्प्रत्ययस्यापि निरालम्बनत्वं स्यात्, जागरोपलब्धानामेवार्थानामनुभवाहित–संस्कारादिनिमित्तात् साक्षादनुभूयमानतयेव तत्र प्रतिभासात्, तदत्यन्तासत्त्वाभ्युपगमे च जागरितैरपि तेषां तज्जातीयानां वार्थानां वन्ध्यासुतादीनामिवानुपलम्भप्रसङ्गात्, न च स्वप्नार्थेभ्यो जागरार्थानां विजातीयत्वमिति वक्तव्यम्, अत्यन्तासदर्थालम्बनतया स्वप्नजागरावस्थयोरविशेषेण भवतामुभयावसरस्थोलभ्यानामप्य–र्थानां सजातीयत्वात्,न च स्वप्नार्थानां सर्वथाऽर्थक्रियावैकल्यं स्वाप्नानुभूतसीमन्तिनीकुचकुम्भपरीरम्भतद्विप्रलम्भजनितानाम् अमन्दानन्दाश्रुपुलककपोलविकासादीनां विषादवदनवैवर्ण्यादीनां चार्थक्रियाणां जागरेऽपि दर्शनात्, न च स्वप्नद्रष्टान्त्यन्ता–सत्कामिन्याद्यालम्बनभ्रान्तज्ञानजन्यत्वं तासामर्थक्रियाणां न तु कामिन्याद्यर्थजन्यत्वमिति वाच्यं, तथा सति वन्ध्यासुतजन्मादिप्रत्ययेभ्योऽपि हर्षाद्यर्थक्रियाणामुत्पादप्रसङ्गात्, अत एव जाग्रद्दशाभाविसप्रत्यूहरम्भोरूपसम्भोगसुखविमुखतया स्वनिघ्ननिर्विघ्नस्वप्नाधिगम्यकामिनीरतकामुकैः स्वप्नमहिमानमातन्वानैः कैश्चित्पठ्यते–''**सा मूर्त्तिः सरसोज्ज्वला समधुरा स्मेरो दृशां विभ्रमस्तल्लावण्यमकृत्रिमामृतमहोः ? सृष्टिः कथं तादृशी । स्वप्न ? त्वच्चरणौ नमामि करुणा भूयोऽपि संधीयतां तस्याः शिल्पविधौ प्रजापतिधुरां धातुं त्वमेव क्षमः ।।१।।**'' तस्मात्स्वप्नार्थानां तद्देशतया तत्कालतया वाऽनधिगमेनासत्त्वं वक्तव्यं, न चैतावता तत्प्रत्ययस्या सर्वथा निरालम्बनतोपपादयितुं शक्या, रिपुप्रध्वंसप्रेयसीविप्रयोगादिप्रत्ययाना–मवितथनिमित्ताभिज्ञदैवज्ञप्रतिज्ञातभावितनयजन्मप्रध्वंसादिप्रत्ययानां च हर्षशोकादिनबन्धानानां निरालम्बनतापत्तेः, अतीतानागतार्थालम्बनतया तत्प्रत्ययानामसदर्थालम्बनत्वाविशेषात्, तथा च हर्षशोकादिकारणत्वं तेषां न भवेत्, अन्ततो

भवत्पितृपितामहादीनां सम्प्रत्यसत्त्वेन तत्प्रत्ययस्यापि निरालम्बनत्वप्रसङ्गात्, नासन्नेव मत्पित्रादय इतीष्टमेवेदमिति चेन्न, भवज्जन्मनो निर्हेतुकतापातात्, आपद्यतां का नो हानिः ? इति चेन्न, भवतः शश्वत्सत्त्वस्यासत्त्वस्य वा प्राप्तेः, नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षयेति न्यायात्, अपि च येनैव प्रमाणेन जाग्रत्प्रत्यया गृहीतास्तेनैव तदर्थानां साक्षादनुभूयमानतयाऽर्थक्रियाकारितया च तत्प्रत्ययानां सालम्बनत्वं गृहीतं, तथा च हेतोर्धर्मिग्राहकप्रमाणबाधः, स्वप्नजागरप्रत्ययानां चोभयेषामपि सालम्बनत्वसिद्धौ साध्यनिरालम्बनत्वविपर्ययव्याप्तत्वेन विरुद्धताऽपि, भवतु वा निरालम्बनं स्वप्नप्रत्ययस्य तथाऽपि यदा स्वप्नदर्शनं तद्देशकालतयाऽर्थक्रियाक्षममर्थं जागरितः कश्चित् पुमान् पश्यति, प्राप्नोति च तदा का गतिः ? नहि त्वयाऽपि तत्र निरालम्बनत्वं वक्तुं शक्यं, तदर्थस्य तथैव प्राप्तेः, तथा च साध्यविकलो दृष्टान्तः, एवं च सति प्रयोगः—स्वप्नप्रत्ययाः सालम्बनाः, जागरोपलब्धस्यैवार्थस्य प्रकाशकत्वात्, सत्यस्वप्नप्रत्ययवत्, न च संशयविपर्ययप्रत्ययाभ्यां हेतोर्व्यभिचारः, विप्रकर्षादिकारणेनेन्द्रियापाटवादिना परस्परव्यावर्त्तकधर्मानुपलम्भाद् यथाक्रममुभयैककोट्युल्लेखेनानवधारणावधारणात्मकतया स्थाणुरजताद्यर्थान्तरप्रतिभासेनासत्यत्वेऽपि पुरोवर्त्त्यर्थालम्बत्वेन तयोः सालम्बनत्वसिद्धिः, सर्वथाऽर्थाप्रतिभासे तयोरुत्पादस्यैवाभावात्, तथा च ताभ्यां व्यभिचारशङ्कानवकाशात्, अपि च प्रतीयते येनार्थ इत्यादि प्रत्ययशब्दार्थविवेचनेनापि प्रत्ययानां सालम्बनत्वमेव सिध्यतीति, एतेन यदपि जगतोऽपलापाय सर्वं नास्ति ज्ञेयत्वात् मरीचिकाजलवदिति साधनमुपन्यस्यते, तदपि प्रतिक्षिप्तम्, अत्र तावत्प्रतिज्ञापदयोर्व्याघातः, सर्वपदेन हि प्रमाणप्रमेयरूपं जगदाक्षिप्यते, तच्चेत्कथं नास्ति तद्ग्राहकप्रमाणपरिच्छिन्नस्य विश्वस्य नितरां नास्तिता विरोधात्, नास्ति चेत् कथं सद्वाचकसर्वपदाभिधेयता नाम, प्रतिज्ञार्थश्च यदि प्रतिज्ञाहेतुराक्षिपेत्तदा कथमसद्भ्यां प्रतिज्ञाहेतुवचनाभ्यां सर्वनास्तित्व—ज्ञेयत्वलक्षणयोस्तदर्थयोः प्रतीतिर्जायेत ? कथं वाऽसतो हेतोः साध्यानुमितिः स्यात् ? न चेदाक्षिपेन्न तर्हि तयोर्नास्तिता, तथा च कथं प्रतिज्ञार्थः सङ्गच्छेत ? तथा च स्वार्थप्रतिक्षेपकत्वेन नास्मात्प्रतिज्ञादिवाक्याद्भवदभिमतसिद्धिः, हेतोश्च ज्ञेयत्वेऽपि सत्त्वाभ्युपगमात्, तेनैवानैकान्तिकत्वात्, ॥१६१॥
न च निषेधकं प्रमाणं निषेध्यस्य विश्वस्य सर्वथा सत्त्वं विना प्रवर्त्तितुमुत्सहते लब्धारूपस्य क्वचित्कस्यचिन्निषेधात् नहि सर्वदा

सर्वत्र धटस्यासत्त्वे नास्तीह भूतले धट इति व्यवहारो निषेधप्रमाणादुदेतुमर्हति, लोकव्यवहारसिद्धं विश्वमस्तीति चेत्, अथ कोऽयं लोकः ? को वा तद्व्यवहारः ? यदि परीक्षको लोकस्तद्व्यवहारस्तु विचारस्तत्सिद्धं चेद्विश्वं मन्येथाः, न तत्र निषेधकं प्रमाणं प्रवर्त्तितुं क्षमते, परीक्षकविचारोपपन्नस्य विश्वस्य यत्नशतेनापि निषेद्धुमशक्यत्वात्, अथ पामरादिर्लोकस्तद्व्य–वहारस्त्वविचारितरमणीयो बोधस्तत्सिद्धे तस्मिन्निषेधकं प्रमाणं प्रवर्त्स्यति, तस्याऽवास्तवत्वेन निराकर्त्तुं सुशक्यत्वादिति चेत्, ननु निषेधकमपि प्रमाणं पामरादिव्यवहारसिद्धं चेत्, न तेन विश्वनिषेधः कर्त्तुं शक्यः, प्रमाणाभासत्वेन तस्य विधिनिषेधयोरन्यतरस्मिन्नप्यसामर्थ्यात्, परीक्षकव्यवहारसिद्धं चेत्तत् किं विश्वाद्व्यतिरिक्तमव्यतिरिक्तं वा ? नाद्यः, विश्वव्यतिरिक्तस्य वास्तवस्य तस्याऽभावात्, भावे वा विश्वस्य वन्ध्यासुतस्येवात्यन्तासत्त्वेन विधिनिषेधव्यवहाराविषयत्वात्तस्य तत्र प्रवृत्त्ययोगात्, प्रवृत्तौ वा विश्वस्य क्वचिद्देशकालादौ सत्त्वाभ्युपगमप्रसङ्गात्, अपरथा निषेधासम्भवात्, एवमपि वा हठात् तद्व्यतिरिक्तत्वाभ्युपगमे निरधिकरणस्य तस्यानुपपत्त्या किमधिकरणेन तेन भवितव्यमिति वक्तव्यं, परीक्षका उत्पादकत्वादिना तदधिकरणमिति चेन्न, तेषां विश्वान्तर्भावात्, बहिर्भावे वा सकलप्रमाणप्रमेयप्रमातृवाचकतया जगति प्रतीतस्य विश्वशब्दस्य निखिलस्याभिधेयशून्यतया शशविषाणशब्दायमानतापत्तेः, तथा च कस्तदर्थं निषेधेत्, मूकीभावस्यैव सहृदयानां तत्र न्यायोपपन्नत्वात्, ? प्रमेयाद्येकदेशवाचकतयाऽपि विश्वशब्दस्य सार्थकता ? इति चेत् न, तदाहि विश्वैकदेशनिषेधे साद्ध्ये सर्वं नास्तीति प्रतिज्ञाया व्याघातापत्तेः, न द्वितीयः, निषेध्य निषेधकयोस्तादात्म्यानुपपत्तेः, तथात्वे वा निषेधकेन निषेध्यनिषधवन्निषेध्येनापि निषेधकनिषेधप्रसङ्गात्, विश्वाव्यतिरेके निषेधकस्याप्यसत्त्वप्रसक्तेः, निषेधकप्रमाणाव्यतिरेके वा विश्वस्यापि सत्त्वापत्तेश्च, मरीचिकाजलवदिति दृष्टान्तेऽपि येनैव बाधकप्रमाणेन जलस्यासत्त्वं गृहीतं तेनैव भौमोष्मसंवलितरविमरीचिनिचयरूपाया मरीचिकायाः सत्त्वमुपपादितं, तथा च साध्यविकलतयाऽसौ दृष्टान्ताभासः जलस्यासत्त्वेऽपि मरीचिकायाः सत्त्वात्, तदेवं निषेधकप्रमाणनिरासेन पुद्गलास्तिकायसहकृतं जगदस्तीति व्यवस्थितमिति गाथार्थः ॥८५॥ इह किल चार्वाकाः कायाकारपरिणतानि भूतान्येव सुखे दुःखे जनयन्ति चेतनतया संवेदयन्ते च न तु तयोरसाधारणकारणतयाऽभिमते

पुण्यपापे तदाश्रयतया परैरिष्टस्यात्मन एवाभावादिति, तयोरभावं प्रतिपद्यन्ते, नैयायिकादयस्तु सत्त्वाभ्युपगमेऽपि तयोरात्मगुणमाहुः, तदेतन्मतद्वयमपि सम्प्रति अपहस्तयितुं क्रमप्राप्ते पुण्यपापतत्त्वे उपपिपादयिषुराह–

**सुहपयडीओ पुण्णं असुहाओ हुंति पावरूपा उ । सुहिदुहिजणोववाओ इत्तुच्चिय जं समा भूया ॥८६॥**

**व्याख्या**–शुभाः–प्राणिनामैहिकामुष्मिकाभ्युदयहेतुतया कल्याण्यः, प्रक्रियन्ते–शुभाशुभापरिणामभाजा जीवेन प्रकर्षेणात्मसान्निवर्त्त्यन्त इति प्रकृतयः–सद्वेदनीयादीनि कर्म्माणि, ततः कर्मधारयः, ताः 'पुण्यं' पुण्यमिति धर्म इति व्यपदिश्यन्ते, ताश्च द्विचत्वारिंशत्सिद्धान्ते पठ्यन्ते यदाह–''**नरतिरिसुराउ मुच्चं सायं परघाय आयवुज्जोअं । तित्थुस्सासनिम्मेणं पणिंदिवइरु समचउरंसं ॥१॥ तसदस चउवण्णाई सुरमणुदुग पंचतणु उवंगतिगं । अगुरुलहुपढमखगई बायालीसंति सुहपयडी ॥२॥**'' विरत्यादिविहितानुष्ठानशुभात्मपरिणामरूपाः पुण्यप्रकृतिहेतवोऽपिच पुण्यमिति गीयन्ते, तथा अशुभाः–शुभविपरीतफलदानदुर्ललिततयाऽकल्याण्यः, पुनः प्रकृतयः पूर्ववाक्ये समस्तमपि प्रकृतिपदमिहाप्यनुषज्यते अर्थानुरोधात्, पापरूपाः पापमित्यधर्म इति व्यपदेशभाजः 'तुः' पुनरर्थः चाशुभपदात्पुरः सम्बन्धित एव, ताश्च द्व्यशीतिः, तदुक्तम्–''**थावरदसचउजाई अपढमसंठाणखगइसंघयणी । तिरिनिरयदुगुवघायं वण्णचऊ नाम चउतीसा ॥१॥ नरयाउ नीयमसायघाइपणयालसहियवासीई । असुहपयडी उ दोसुवि वण्णाइ चउक्कगहणेण ॥२॥**'' अविरत्यादिनिषिद्धानुष्ठाना–शुभाध्यवसायरूपाः पापप्रकृतिहेतवोऽपि पापमित्युच्यन्ते, तथाऽप्यनयोः स्वरूपं न व्यक्तमवबुध्यामह इति चेत् उच्यते–शुभवर्णगन्धरसस्पर्शगुणाः शुभविपाकाश्च प्रकृतयः पुण्यमित्युच्यन्ते, अशुभवर्णा हि गुणा अशुभविपाकाश्च ता एव पापमिति, यदाह महाभाष्यकारः–''**सोहणवण्णाइगुणं सुहाणुभावं च जं तयं पुण्णं । विवरीअमओ पावं न बायरं नाइसुहुमं च ॥१॥**'' तत्र 'न बायरं नाइसुहुमं'ति न पर्वतादिभावेन परिणतस्कन्धवत् उभयमपि स्थवीयः सूक्ष्मकर्म्मवर्गणाभिर्निष्पादितत्वात्, नापि परमाण्वादिवदणीय इत्यर्थः, तदेवंपुण्यपापयोः स्वरूपमुक्त्वा फलद्वारेण ते एव व्यञ्जयन्नाह–'सुखिनः–सातमनुभावुकस्य दुःखिनश्च–असातं वेदयमानस्य जनस्य जन्तुलोकस्य उपपातो–जन्म, स चेहात्मनो नित्यत्वेन प्रागभावावच्छिन्नप्रादुर्भावलक्षण–

जन्मानुपपत्त्या मनुष्यगत्यादिविशिष्टाभिरपूर्वाभिः शरीरेन्द्रियबुद्धिवेदना–भिरभिसम्बन्धः, अत्र हि जगति कश्चिदीश्वरः कश्चिद्दरिद्रः कश्चिदुल्लाघः कश्चिदामयावी कश्चित्पार्थिवोऽन्यश्च रङ्कः कश्चिद्विपश्चित् इतरश्च बालिश इत्यादिविभागेन बहुलमुपलभ्यते सुखी दुःखी चोत्पद्यमानो जीवलोकः स च'इत्तुच्चिय'त्ति 'अत एव' अस्मादेवात्मनः पुण्यपापप्रकृतिसम्बन्धादेव नत्वन्यस्माद्भूतपरिणामादेरपीत्यवधारणफलं, क्षेत्रकालादियोगेन हि विपच्यमाना एताः प्राणिनां सुखं दुःखं च सम्पादयन्ति, अथवा उपपाद उपपत्तिर्घटनेति यावत्, तेन सुखी दुःखी च जनः पुण्यपापयोगादेव घटते नान्यथेत्यर्थः, ननु दृष्टेभ्य एव भूतेभ्यः सुखाद्युपपत्तौ किमदृष्टादृष्टकल्पनया दृष्टात् कार्योपपत्तौ हि नाऽदृष्टं परिकल्प्यत इति न्यायात् इत्यत आह–'यतः' यस्माद्धेतोः 'समानि' साधारणानि 'भूतानि' पृथिव्यादीनि कायाकारपरिणतान्यपि, यदि हि भूतेभ्य एव सुखदुःखोत्पादोऽभ्युपेयेत तदा तेषां साधारणत्वेन कस्यचित्कदाचित्सुखं कस्यचिद्दुःखमिति विभागो नोपपद्येत, सर्वेषां सर्वदा सुखं दुःखं वा प्रसज्येत, अस्ति चायं विभागस्ततो भूतेभ्योऽतिरिक्तं किञ्चिदस्ति अनयोः कारणं, तच्चातीन्द्रियं पुण्यपापरूपम्, एतदुक्तं भवति–अस्ति तावत्प्रतिप्राणि सुखं दुःखं च स्वानुभवसिद्धं न चैतन्निर्निमित्तं भवितुमर्हति, तथाविधस्य हि परमाणुवत्सर्वदा सत्त्वं वन्ध्यासुतवद्वा नित्यमसत्त्वं प्रसज्येत, कदाचित्कत्वं न स्यात्, आकस्मिकत्वात्कादाचित्कत्वमिति चेत्किमिदमाकस्मिकत्वं ?, कारणनिरपेक्षा उत्पत्तिरिति चेत्, तर्हि सततोत्पत्तिप्रसङ्गः सामग्रीवैकल्यप्रतिबन्धयोरभावात्, तथा च कथं तयोः कादाचित्कत्वम्, अथ न कस्माच्चिद्भवत इति व्युत्पत्त्या कारणोत्पत्तिभ्यां विरहितत्वमाकस्मित्वमुच्यते, भूयोऽपि कथं तर्हि कादाचित्कत्वं ? तदाहि तयोर्नित्यत्वं वा स्यादत्यन्तासत्त्वं वा, भवतु नित्यत्वमिति चेन्न, तयोरुत्पादव्ययधर्म्मकत्वोपलम्भेन तद्बाधात्, अस्तु तर्हि अत्यन्तासत्त्वमिति चेन्न, अनुभवविरोधात्, सर्वैरपि तयोरध्यात्मं संवेदनात्, अथ कस्माच्चिदप्यन्यस्मान्न भवतः किन्तु स्वस्मादित्याकस्मिकत्वमिति चेत्, ननु तदपि स्वं किमसत् सद्वा ? असच्चेत्कथं तस्मादुत्पत्तिः ? असतः कस्यचिदुत्पत्त्यभावात्, सच्चेत् तर्हि किमुत्पत्त्या सत्त्वार्थमेवहि तस्या गवेशणात्, तस्य चोत्पत्तेः प्रागेव भावेन तस्या वैयर्थ्यात्, कार्यकारणभावस्योभयनिष्ठत्वेन वाऽत्र तदभावे तदनुपपत्तेरिति कथं स्वस्मादिति पक्षोऽपि साधीयान् स्यात् ? अथासम्भाव्योपस्थितत्वमाकस्मिकत्वं ? भवन्ति हि वक्तारो

लौकिका इदमस्माकं सम्प्रति व्यसनं कल्याणं वाऽकस्मादतर्कितमापतितमिति तयोरप्याकस्मिकत्वं तथेति चेत् न, हेतुनिरपेक्षतया यद्येतद्विवक्षितं तदा पूर्ववत्तयोः सततोत्पत्तिप्रसङ्गेनासम्भाव्यतानुपपत्तेः, तस्मात्सहेतुकत्वं तयोर्वक्तव्यं, तत्रापि न प्रसिद्धभूतहेतुकत्वं तेषां शश्वद्भावेन तद्धेतुकत्वे तयोरप्यसंभाव्योपस्थितत्वाभावेन कादाचित्कत्वासम्भवात् तस्माद्भूतातिरिक्तेनातीन्द्रियेण सुखादिकारणेन भवितव्यं, भवतु तर्ह्येकमेव किञ्चिद्भूतातिरिक्तं तत्कारणम्, अविलक्षणादपि कारणात्कार्यवैलक्षण्योत्पाददर्शनात्, यथा मार्त्तण्डमण्डलात्प्रकाशस्तापश्च तथेहाप्यकस्मादेव कुतश्चित्कारणात् सुखिदुःख्यादिभेदेन जगद्वैलक्षण्यमुपपत्स्यते ? इति चेत् न, तद्धि निरपेक्षं वा, सापेक्षं वा ? नाद्यः, युगपदेव सुखादिकार्योत्पादप्रसङ्गात्, अनपेक्षतया तस्य कालविलम्बायोगात्, न द्वितीयः, अपेक्षणीयं हि तस्य दृष्टं स्याददृष्टं वा ? न प्रथमः, दृष्टस्य भूतादेरपेक्षायां तस्य सदा सन्निहितत्वेन पूर्ववत्कार्ययौगपद्यापातात्, न द्वितीयः, भूतपञ्चकातिरिक्तस्य तदपेक्षणीयस्यान्यस्यादृष्टस्यानभ्युपगमात्, शक्तिभेदेनैकस्मादपि हेतोः कार्यवैचित्र्यं जनिष्यत इति चेत्तस्यासौ शक्तिभेदो नैसर्गिक औपाधिको वा ? आद्यश्चेत्, तस्य शश्वद्भावेन कार्यस्यापि तथात्वप्रसङ्गः, द्वितीयश्चेत् सोऽप्युपाधीनां युगपत्सम्पातेन यदि युगपद्भावी तदा पूर्ववत्प्रसङ्गः, क्रमभावी चेत्, ननूपाधीनां क्रमभावित्वं कुतस्त्यं ? तद्धेत्वन्तरादिति चेत्तस्यापि तदन्यस्माद्धेतोस्तदित्यनवस्था, तस्मादधिकप्रवाहभिया शक्तिभेदस्थाने कारणानेकत्वमेव क्रमिककार्यवैचित्र्यविधानचतुरमिष्यतां किमेकस्य शक्तिभेदकल्पनेन ? भवतु तर्हि तयोरन्योन्यसजातीयमेव किञ्चित्कारणद्वयमिति चेन्न, अन्यूनाधिकतया तस्यात्यन्तसाजात्ये सुखकारणमेव दुःखकारणमिति न तद्दुःखं किन्तु सुखमेव तत् स्यात्, सुखमपि वा दुःखमेव स्यात्, दुःखहेतुसजातीयेन जनितत्वात्, उभयमपि चोभयात्मकं भवेत्, शक्तिवैजात्यात्तयोः कार्यवैचित्र्यमिति चेन्न, विजातीयसामग्रीजन्यत्वेन हि शक्तिवैजात्यं, तथा च शक्त्यभिन्नात्मनोः सुखदुःखहेत्वोरपि कथमैकजात्यम्, एवमपि वा साजात्ये विश्वस्य वैश्वरूप्यव्याघातस्तस्माज्जगद्वैलक्षण्यस्य विचित्रं कारणमभ्युपेतव्यम्, एवं च सति प्रेक्षावत्प्रवृत्तेः साफल्यमप्युपपद्यते, तथाहि देवार्चनपात्रदानब्रह्मचर्यादिकर्मसु प्रवर्त्तमानाः प्रेक्षावन्तो दृश्यन्ते, यदि च भूतपरिणाममात्रनिबन्धनं सुखादिकं भवेत्, क एतेषु प्रवर्त्तेत, नहि निष्फले कर्मणि बालिशोऽपि प्रवर्त्तते किं पुनः प्रेक्षावन्तः, तदुक्तम्—''**प्रेक्षावतां यतो**

**वृत्तिर्व्याप्ताऽऽस्ते कार्यवत्तया । प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते ॥१॥''** नापि दुःखैकफले दुःखस्यापुरुषार्थत्वात्, तथात्वे वा जितं स्वोद्बन्धनादिप्रवर्त्तिष्णुभिर्जाल्मैः नानाविधदुःखमयसंसारहानार्थं हि महात्मनां प्रवृत्तिः, पुरुषार्थत्वे तु तस्यानायाससुलभतया बहुतमायाससाध्येषु तपस्यादिषु नित्यानन्दमयमुक्तिसुखोपादित्सया कः प्रयतेत ? यदाह—''**यस्य दुःखमुपादेयं तस्य हेयं किमुच्यताम् । हेयहीनस्य का मुक्तिः केन वाऽप्युदिश्यते ॥१॥** लाभपूजाख्यात्यर्थं तेषां प्रवृत्तिरिति चेन्न, ऐहिकलाभादिनिरभिलाषुकतया क्रमप्राप्तस्यापि साम्राज्यादेः परिहारेण तेषां प्रव्रज्यादिविधिश्रवणात्, ख्यात्यर्थं दानादेरपि प्रायो वैतालिकादिष्वेव दर्शनेन पात्रेषु दीनादिषु च प्रेक्षावतां तदर्थं तदनुपपत्तेः, दाम्भिकपाखण्डैस्तेषां विप्रलब्धत्वात्तथा प्रवृत्तिरिति चेन्न, सर्वेषां दाम्भिकत्वायोगात्, केषाञ्चित्तद्योगेऽपि तैश्च मुग्धानां प्रलम्भनेऽपि विमृश्यकारितया प्रेक्षावतां प्रायस्तस्य कर्त्तुमशक्यत्वात्. अन्यथा प्रेक्षावत्त्वहानिप्रसङ्गात्, तस्मात्प्रेक्षावत्प्रवृत्त्यन्यथाऽनुपपत्त्याऽपि जगन्नानात्वहेतुरवश्यमभ्युपेतव्यः, एवं च सदनुष्ठानप्रदर्शकानां धर्मशास्त्राणामपि सार्थकत्वोपपत्तिरिति, तर्हि कायाकारभूतसम्बद्ध एव ब्रह्मचर्यपात्रदानादिः प्राणिवधस्तैन्यादिश्च जगद्वैचित्र्यस्य हेतुस्तथा हि शीलादिमहिम्ना केषाञ्चिन्महासत्त्वानां तदात्वेनैव युद्धादौ विजयादिस्तस्करादीनां च चौर्यादिकं कुर्वतामेव दुर्विपाको दृश्यते, ततो दृष्टावेव तदुपपत्तौ किमदृष्टकल्पनया ? इति चेन्न, भवान्तरसम्भृताभ्यामेवध—र्माधर्माभ्यामुभयेषामपि तत्तत्फलोपपत्तेः, आधुनिकयोस्तु तयोस्तत्सहकारित्वमात्रेणैवोपयोगात्, पूर्णस्य च तत्फलस्यामुत्रैव प्रायो भोग्यत्वात्, कथमन्यथाऽतिनिःस्वतया जरत्कुटीरकमात्रस्याप्यभावेन सकलं वासरं भिक्षाटनेन श्रान्ततया नगरपरिसरभुवि पादपच्छायासु सुषुप्तानामातपत्रादिपार्थिवलक्ष्माधिवासनद्वारा राजाध्यक्षैर्योग्यतानुमित्या विनिद्रापितानां तथाविधप्रयत्नाभावेऽपि कौपीनवाससामपि राज्यलाभः कथं वा स्वजीवितमनोरथेन स्वविरोधिवधकाम्यया वा साधुसंनिधौ चौरेण स्थापितस्य लोप्त्रस्य राजपुरुषैर्दर्शनाच्चौरापराधेनापि साधोर्निग्रहः, श्रूयते च लोके चौरापराधेन माण्डव्यमुमिनिनिग्रहः, दृश्यन्ते च बहुलं पापीयांसोऽपि साम्राज्यामुदिसुखमुपभुञ्जानाः, धर्मपरायणा अपि च व्यसनशतोपतप्ताः, न चामीषां तदानीं ब्रह्मचर्यतपस्यादिर्जीववधचौर्यादिश्च यथाक्रममुपलभ्येते येन तावेव भूतसम्बद्धौ तेषां सुखदुःखहेतू कल्प्येताम्, यत्तु धूर्त्तमूलदेवादीनां पात्रदानान्तरमेव राज्यलाभः,

कालशौकरिकादीनां च तस्मिन्नेव जन्मनि नारकानुगुणयातनानुभवस्तत्तेषां शुभाशुभाध्यवसायप्रकर्षेण पात्रदानप्राणिवधादिजनितयोः पुण्यपापयोः परमकोटिप्राप्ततया तत्कालमेव वृत्तिलाभात्, नतु पात्रदानादेर्भूतसम्बद्धतया भौतिकशरीरविनाशेन कालान्तरभाविनी फले तथाऽदर्शनात्, एवं च यथा रसायनविषादीनां रसवीर्यविपाकादेरसाधारणतयाऽविलम्बितस्वकार्यविधानसामर्थ्यवशेन विद्यमानानामेव केषाञ्चित्तथाविधरसायनलेशाशनादेव जीवितलाभः, केषाञ्चित्तु बलीयसामेव तादृग्विषलवादनमात्रेण विपत्तिः, तथा मूलदेवकालशौकरिकादीनां धर्माधर्मयोरपीति न कश्चिद्विरोधः, तथा च पठन्ति—"**अत्युग्रपुण्यपापानामिहैव फलमाप्यते ।**" ननु मा भूत्पात्रदानादेर्भूतसम्बद्धत्वेन फलहेतुता किन्तु तज्जनितयोर्भूतसम्बद्धयोरेव धर्माधर्मयोस्तद्धेतुता भविष्यति किं तयोरात्मसम्बन्धकल्पनेन ? इति चेन्न, भूतानां साधारणत्वेनास्यैव पुरुषस्यैतेषु शरीरादिषु सुखदुःखोपभोगो नान्यस्येति प्रतिनियमाभावप्रसङ्गात्, ननु यस्य भूतैः कायाकारपरिणतैस्तपस्यादिना धर्माधर्मौ जन्येते तस्यैव तत्सम्बन्धात्तौ भोगं सम्पादयतो नान्यस्येति कथमनियमः ? इति चेन्न, यस्येति यच्छब्दनिर्देशस्य भूतातिरिक्तस्य भवताऽनभ्युपगमात्, अभ्युपगमे वा स एवात्मेति, तथा च यस्यात्मना यथा धर्माधर्मावर्जितौ तस्यं तज्जनितेषु शरीरादिषु तथैव भोगो नान्यस्य इत्यात्मसम्बन्धेनैव नियमसिद्धिः अन्यथाऽऽत्मसम्बद्धधर्मा धर्मानभ्युपगमे देवार्चनादेश्च फलहेतुत्वाभ्युपगमे तस्य विनश्वरत्वेन कालान्तरभाविनः फलस्यानुपपत्तिः प्रसज्येत, तथा च तदर्थस्य सदनुष्ठानस्य भस्मनि हुतकल्पता स्यात्, तस्मादात्मसम्बद्धौ क्षेत्रकालादिसहकार्यपेक्षया च फलोपभोगं यावदवस्थायिनौ जगद्वैचित्र्यकारणं तावभ्युपगन्तव्यौ, फलोपभोगेन तदपगमे च प्रेत्यभावः, शुक्लध्यानादिना सर्वथा तत्क्षये च मोक्षोऽपि सङ्गच्छते, अपरथा भूतानां नित्यतया शरीराद्यपायाऽभावेन तौ न भवेतामिति, अत्र च प्रयोगः—विवादाध्यासितं जगद्वैचित्र्यमात्मसम्बद्धपदार्थविशेषपूर्वकं वैचित्र्यत्वात् घटपटादिवैचित्र्यवत्, अत्र च दृष्टान्ते कुलालाद्यात्मसम्बद्धप्रयत्नरूपपदार्थविशेषपूर्वकत्वं, प्रकृतेः पुनरप्रयतमानस्यापि भोगदर्शनेन धर्माधर्मपूर्वकत्वं भावनीयमिति, तस्मात्साधूक्तं 'जं समाभूय'त्ति, अथवा यस्मात् समानि भूतानि चैतन्यादिस्वभावतया तुल्याः सर्वेऽप्यात्मानः ततस्तद्गतकारणवैचित्र्येणैव तेषां सुखिदुःख्यादिभेदेन वैचित्र्यं सङ्गच्छते नान्यथेत्यर्थः ॥ एतेन पुरुषभोक्तृवादिसांख्यैकदेशिमत—

मप्यपाकृतं वेदितव्यं, तथा ह्यकारणमकार्यः कूटस्थनित्यचैतन्यस्वभावः पुरुषः, आदिकारणमचेतना परिणामिनी च प्रकृतिः, तत्कार्यं च बुद्धिः सा च पुरुषस्य सुखादिभोगकरणशीलतया कृत्यध्यवसायव्यापारा तीर्थिकैरात्मधर्मत्वाभ्युपगतधर्माधर्मादिभाववती च, पुरुषस्तु सर्वथा पुष्करपलाशवन्निर्लेपो भोक्ता च, बुद्धिपुरुषयोस्तु परस्परं भेदाग्रहान्निष्क्रियेऽपि पुरुषे कर्तृत्वाभिमानो बुद्धितत्त्वे चाचेतनेऽपि चेतनत्वाभिमान इत्यादिकं हि तन्मतं, तत्र यदि कृत्यध्यवसायेन कर्त्री बुद्धिरिष्यते तदा य एवाहं चेतयामि स एव करोमीति कृतेश्चैतन्येन सामानाधिकरण्यं न स्यात् चैतन्यस्य पुरुषधर्मत्वात् कृतेश्च बुद्धिधर्मत्वात्, बुद्धिभेदाग्रहादात्मनि कर्तृत्वाभिमानाद्भ्रान्तिरियमिति चेत्, चेतन एव कर्त्ता तदुपधानाच्च बुधावकर्त्र्यामपि कर्तृत्वाभिमान इति ब्रुवाणः कश्चिद्वाचाटो दुर्निवारः स्यात्, तथा च कृत्यध्यवसायो वास्तवः कथं बुद्धेर्भवेत् ? बुद्धिनिष्पादितेन च सुखदुःखपरिणामेनात्मनः परिणामितया कौटस्थ्यमपि व्याहन्येत, न च बुद्ध्युपरागादात्मनो भोक्तृत्वमप्यतात्त्विकमिति वाच्यं, तस्य तत्र वास्तवतयाऽभ्युपगमात्, तदुक्तम्—सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः । सर्वं शब्दादिग्रामं प्रत्याश्रित्य य उपभोगः सुखाद्यनुभवस्तमित्यर्थः, अपि च धर्मादयो भावा बुद्धेः कुतस्त्याः ? प्रकृतेः स्वकारणादिति चेत् न, तस्यास्तदनभ्युपगमात्, अभ्युपगमे वा सैव बुद्धिरिति त्यपदिश्यतां, कृतं तस्याः प्रकृतिव्यपदेशेन, अथ स्वाभाविका बुद्धेर्धर्मादयस्तर्हि तत एवात्मनः सुखादिभोगसिद्धेः किं तदर्थेन ब्रह्मचर्यादिना कायक्लेशेन, अथ ब्रह्मचर्यादेरेव बुद्धौ तेषां जायमानत्वादागन्तवस्ते तत्रेति चेत्, तत्किमेतज्जन्मभाविनः प्राच्यजन्मभाविनो वा ? न प्रथमः, तदाहि ब्रह्मचर्यादिसमनन्तरमेवात्मनः सुखाद्युत्पादप्रसङ्गात्, धर्मादिभावाष्टकसमृद्धाया बुद्धेर्नित्यसंनिकर्षात्सुखाद्युत्पादसामर्थ्येन विलम्बायोगात्, भवत्वेवमेवेति चेत् न, प्राग्भवसञ्चिताभ्यामेव धर्माधर्माभ्यां प्रायः सुखादिलाभस्य प्रमाणोपपन्नतया सर्वतीर्थिकैरभ्युपगमात्, नापि द्वितीयः, बुद्धेरनित्यत्वाभ्युगमेनोपरमे तद्धर्माणां धर्माधर्मादीनामप्युपरमात्, नहि धर्मिण्यसति तद्धर्मावस्थानसम्भवः, तथा च सतीह जन्मनि किं कृतः पुरुषस्य सुखादिभोगः स्यादिति लाभमिच्छतो नीव्या अपि हानिः संवृत्ता, यदि च हितैषिणी बुद्धिः कथं पुरुषार्थं हिंसास्तैन्यादावधर्महेतौ प्रवर्त्तेत, पुरुषोपरागापन्नचैतन्यतया हि सा तथा प्रवर्त्तमाना पुरुषं नरकादिषु दुःखं भोजयेत्, धर्माधर्मयोः स्वर्गनरकादिफलत्वेन

प्रतिपादनात् यदाह–‘‘**धर्मेण गमनमूर्द्ध्वं गमनमधस्ताद्भवत्यधर्मेण ।**’’ पुरुषस्यान्तोपकारिणीबुद्धिस्तदुक्तम्–‘‘**नानाविधैरुपायैरुप-कारिण्यनुपकारिणः पुंस । गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥१॥**’’ तन्नैतस्यास्तं प्रत्यहितं कर्त्तुमुचितं, न च पुरुष एव हिंसादौ प्रवर्त्तते न बुद्धिरिति वक्तुं युक्तं, तस्य सर्वथा निष्क्रियत्वाभ्युपगमात्, अपि चानुभूयमानतया सुखदुःखयोस्तथात्वम् अन्यथा स्त्रक्चन्दनाङ्गनादिसंश्लेषात्सुषुप्तमूर्च्छितादीनामपि सुखित्वादिप्रसज्येत, एवं च सति सुखदुःखधर्मयोगेन बुद्धया तदनुभावुकया भवितव्यं, तथा चात्मा सुखाद्यनुभविता न स्यात्, न ह्येकेन सुखदुःखयोरुपभोगेऽन्यस्यापि तयोरेवोपभोगसम्भवः, तथा सति देवदत्तेन सुखादेरनुभवे यज्ञदत्तस्यापि तदनुभवापत्तेः, अथ बुद्धिः स्वयमनुभूय तज्जातीये सुखदुःखे पुरुषमनुभावयतीति चेत् न, बुद्धेः स्वयं साक्षात् सुखाद्यनुभवानभ्युपगमात्, पुरुषार्थमेव तस्याः सर्वथा प्रवृत्तेः, तस्मान्न बुद्ध्याश्रितौ धर्माधर्मावात्मनि सुखदुःखयोर्हेतू अपि त्वात्माश्रितावेवेति, तदेवं साङ्ख्यैकदेशिमतेऽपि नात्मनो धर्माद्यनाधारस्य सुखाद्युपभोगो घटामञ्चतीति स्थितम् । नैयायिकादयस्तु धर्माधर्मयोरात्मधर्मत्वमिच्छन्तोऽपि तद्गुणत्वमाचक्षते, तथा हि तेषां तत्साधकमनुमानं–पश्वादयो देवदत्तगुणाकृष्टा देवदत्तमुपसर्पन्ति तं प्रति नियमेनोपसर्प्पणवत्त्वात् ग्रासादिवत्, अत्र दृष्टान्ते ग्रासादेराकर्षणं प्रयत्नेनात्मगुणेन परेषां विवक्षितं, प्रकृते तु पश्वादीनां देवदत्तात्मगुणाभ्यां धर्माधर्माभ्यामित्युपसर्पणवत्त्वं हेतुः, पश्वादीनामाकर्षणहेतोरदृष्टस्य गुणत्वं साधयति, तदयुक्तं, लोके हि रज्ज्वादिना पश्वादेराकर्षणं संयोगादिद्वारा दृष्टम्, इह त्वदृष्टेन पश्वादीनामाकर्षणं केन सम्बन्धेनाभिमतं ? न तावत्संयोगेन द्रव्ययोरेव तस्य भवदभ्युपगमेन गुणद्रव्ययोस्तदसिद्धेः, नापि समवायेन परस्य तदसिद्धेः सिद्धावप्यन्यगुणस्यान्यत्रासमवायात्, समवाये वा देवदत्तधर्मसमवायेन यज्ञदत्तो दुःख्यपि सुखी स्यात्, शुक्लपटस्वरूपसमवायेन रक्तोऽपि पटः शुक्लो भवेत्, न च समवायद्वारा कस्यचित्केनाप्याकर्षणमस्ति, संयोगद्वारेणैव तद्दर्शनात्, ननु चैत्रोच्चारितेन शब्देन गुणेनाप्याकार्यमाणस्य मैत्रस्य श्रोत्रे समवायादाकर्षणं संभवति, शब्दश्रवणानन्तरं मैत्रस्य चैत्रसमीपागमनदर्शनात्, तथा चास्ति समवायद्वारा गुणेनाप्याकर्षणमिति चेत् न, शब्दस्य द्रव्यत्वेन गुणत्वासिद्धेः, तथाहि–शब्दो द्रव्यं स्पर्शवत्त्वाद्

घटवत्, न च स्पर्शवत्त्वमसिद्धं प्रतिघातकत्वेन कुड्यादिवत्तत्सिद्धेः, उपलभ्यते हि तीव्रवाद्यमानकांस्यपात्रादिसमुत्थेन शब्देन कर्णशष्कुल्युपगृहीतस्य श्रोत्रस्य बाधिर्यादिना प्रतीघातः, तथा च तस्य द्रव्यत्वसिद्ध्या द्रव्येणैव तेन मैत्रस्याकर्षणं न गुणेन, अत्र च बहुवक्तव्यमस्ति तच्चाप्रस्तुतत्वान्नोच्यत इति, अथ मा भूद्धर्माधर्मयोः साक्षात्संयोगः समवायो वा पश्वादिभिस्तथाऽपि सर्वगतेनात्मना संयुक्ताः पश्वादयस्तस्मिंश्च समवेतौ धर्माधर्मौ इत्यात्मसंयोगद्वारा ताभ्यां दवीयसामपि तेषामाकर्षणमुपपत्स्यत इति चेन्न, आत्मनो देहमात्रतया सर्वगतत्वानभ्युपगमेन पश्वादिभिः संयोगासिद्धेः, भवता कथञ्चित्तदभ्युपगमेऽपि देहावच्छेदं विनाऽऽत्मगुणानां वृत्त्यलाभेन धर्माधर्मयोरात्मसंयोगलक्षणद्वारस्याकाशसंयोगकल्पतया पश्वाकर्षणं प्रत्यकिञ्चित्करत्वात्, एवमपि वा वृत्तिलाभाभ्युपगमे देहावच्छिन्न इवात्मनि सर्वत्रापि ज्ञानेच्छासुखादयस्तद्गुणा उत्पद्येरन्, तथा च व्यापकतया त्रैलोक्यवर्त्तिपदार्थज्ञानेनात्मनोऽनायासेन सर्वज्ञता सर्वज्ञानानुभवेन च सुखदुःखयोरपि प्रकर्षसीमा साधिता स्यात्, तन्न धर्माधर्माभ्यां गुणाभ्यां पश्वादीनामाकर्षणं सङ्गच्छते, ननु तथाऽपि गन्धादिना गुणेनैव मधुकरादीनामाकर्षणं दृष्टं, तथा च पठन्ति— ''केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः ।'' तथा प्रकृतेऽपि कथञ्चिद्भविष्यतीति चेन्न, द्रव्यानाश्रितस्य गुणस्य गत्याद्यसम्भवेन तत्रापि गन्धसहकृतेन द्रव्यैणैवाकर्षणं, केवलं गन्धभागस्योत्कटतया तेन व्यवहारः, ननु ग्रासादेराकर्षणं प्रयत्नेन गुणेनैवोपलभ्यते तदिहाप्यदृष्टेन तादृशेष्टेनैव तद्भविष्यतीति चेत् न, गुणाकृष्टत्वे साध्येऽयस्कान्तेन समीपवर्त्तिनो लोहस्य तिलकनेत्राञ्जनादिना द्रव्यविशेषेण च दविष्ठस्याप्यङ्गनादेराकर्षणदर्शनाद्धेतोः सन्दिग्धविपक्षव्यावृत्तिकत्वेनानैकान्तिकत्वात्, गुणाकृष्टत्वस्य हि साध्यस्य द्रव्याकृष्टत्वे विपक्षेऽपि हेतोर्नियतोपसर्प्पणत्वस्य दर्शनेन किं प्रयत्नेनेव ग्रासादिरदृष्टेन गुणेन सताकृष्टाः पश्वादयो देवदत्तमुपसर्पन्ति, आहोश्विदञ्जनादिनेवाङ्गनादिर्द्रव्येण सतेति संदिह्यते, न चाञ्जनादौ सत्यपि कदाचित्केषाञ्चिदङ्गनाद्याकर्षणाभावान्न तस्य कारणत्वमिति साम्प्रतं, तथा सति प्रयत्ने सत्यपि कदाचित्केनापि ग्रासाद्यपसारणेन तदाकर्षणायोगात्तस्यापि कारणत्वं न स्यात्, अथादृष्टसहकृतमञ्जनादिकं कारणं न केवलं, तर्हि प्रयत्नोऽप्यदृष्टसहकृत एव कारणं न केवलम् इति तुल्यं, सकलकारणेष्वप्यदृष्टस्य सहकारित्वोपगमात्, अदृष्टस्यापि हि स्वफलजनने प्रतिबन्धकाभावादिसहकार्यन्तरापेक्षा किं पुनरशेषकारणानां, तथा हि यदा

कस्यचिददृष्टं तस्यैव बलीयसाऽदृष्टान्तरेण प्रतिबद्धशक्तिकं भवति, येन वा पुत्रादिना सह तददृष्टफलं भोक्तव्यं, तददृष्टमथापि न फलाभिमुखं सम्पद्यते, तदा प्रतिबन्धकादृष्टान्तराभावस्य पुत्राद्यदृष्टस्य च सहकारिणोऽभावात्सदपि तददृष्टं फलं न जनयति, न चैतावताऽपेक्षकस्याञ्जनादेरदृष्टस्य वा स्वस्वकार्यं प्रति कारणत्वं विरुध्यते, तथात्वे वा बीजादेरपि कस्यचित्कारणत्वं न स्यात्, सहकारिणं विना कुतोऽपि कार्यानुत्पादात्, नन्वदृष्टस्य द्रव्यत्वेऽप्यस्मत्पक्ष इव भवत्पक्षेऽपि पश्वादिभिः संयोगाद्यभाववात्कथमाकर्षणम् ? इति चेत् न, यथाञ्जनादेरङ्गनादिभिस्तथेहापि स्यात् को विरोधः? भवताऽपि चाप्राप्तस्यापि विपक्षादेरभिचारादिना हिंसाद्यभ्युपगमात्, अचिन्त्यो हि मणिमन्त्रौषध्यादिद्रव्याणां प्रभावातिशयः, अत एव शब्दस्य द्रव्यतया तद्रूपैर्मन्त्राक्षरैर्विप्रकृष्टानामपि भुजङ्गमादीनामाकर्षणमुपलभ्यते, द्रव्यत्वमेव चादृष्टस्योपपत्तिक्षमम् अन्यथा तस्यात्मविशेषगुणत्वे देहावच्छिन्नात्मव्यस्थितस्यैव तस्य विवक्षितार्थक्रियाकारित्वं स्यात्, प्रयत्नादीनामात्मविशेषगुणानां तथा दर्शनात् तस्माद्द्रव्यमदृष्टं, तथा च प्रयोगः धर्माधर्मौ द्रव्यम् आत्मनः पारवश्यकारणत्वात् सौवर्णायसनिगडादिवत्, पारवश्यं च हीनमातृगर्भादिस्थानप्राप्तिः, ननु भवत्वधर्मस्य पारतन्त्र्यकारणत्वं तत्फलस्य हीनगर्भादेः सर्वैरनीप्सिततया तस्य तदुपपत्तेः, न तु धर्म्मस्य तत्फलस्यानन्दादेः सर्वैरिष्टतया तस्य स्वातन्त्र्यहेतुत्वात्, तथा च भागासिद्धो हेतुरिति चेन्न, धर्मफलस्याप्युत्तममातृगर्भदेवाद्युत्पत्तिस्थानादेरू– त्तमसत्त्वानामनभिमतत्वात् यदुक्तम्–**जन्मापि किं न धीरस्य भूयो भूयस्त्रपाकरम् ।''** तथा च तद्धेतुतया धर्मस्यापि पारतन्त्र्यहेतुत्वमुपपद्यत एव, यदि वा महाकुलीनानामपि संवेगवतामपि योगिनामपि केषाञ्चित्तपस्विनां निकाचितावस्थतया विपच्यमानात्पुण्यकर्मणो भोगलिप्सयोत्प्रव्रजनदर्शनेन तस्यापि पारन्त्र्यहेतुत्वावसायात्, नन्दिषेणादीनां तथा श्रवणात्, कथमन्यथा तादृशो महासत्त्वास्तथा लोकोत्प्रासास्पदं कर्म समाचरेयुः, अथ गुणत्वेऽप्यदृष्टस्यात्मपारतन्त्र्यहेतुत्वे को दोषः ? इति चेन्न, गुणस्य द्रव्यपारतन्त्र्यहेतुत्वाभावात्, न खलु द्रव्यं गुणपरतन्त्रं, किं नाम गुणो द्रव्यपरतन्त्रः अन्यथा गुणाश्रयो द्रव्यमिति द्रव्यलक्षणक्षतिप्रसङ्गात्, द्रव्यं चात्मेति कथं तस्यादृष्टाख्यगुणपारतन्त्र्यं स्यात्, न च पुद्गलतया मूर्त्तेनादृष्टेनामूर्त्तस्यात्मनः सुखदुःखजननद्वारेणानुग्रहोपघातौ विरुध्येते इति वाच्यं, ब्राह्मीपिपीलिकाद्युपयोगादमूर्त्तस्यापि ज्ञानादेर्वृद्धिहानिभ्यामनुग्रहोपघात–

दर्शनेनाविरोधात्, ततः समीचीनदृष्टस्य द्रव्यत्वम्, एतेन यत्कैश्चिद्देवदत्तविशेषगुणप्रेरितभूतकार्याः शरीरादयः कार्यत्वे सति तद्भोगसाधनत्वात् गृहादिवत्, अत्र हि नित्यैर्मनःप्रभृतिभिर्हेतोर्व्यभिचारो माभूदिति कार्यत्वे सतीति विशेषणमित्यदृष्टस्य गुणत्वसाधनमुपन्यस्तं, तदपि प्रतिक्षिप्तम्, अङ्गनाद्यङ्गस्य भावस्य रिपुप्रध्वंसस्य चाभावस्य कार्यत्वे सति तद्भोगसाधनत्वे सत्यपि देवदत्ताद्दृष्टापूर्वकत्वायोगेन हेतोरनैकान्तिकत्वात्, सर्वप्राणिनां शरीराद्युत्पादप्रध्वंसयोः स्वस्वादृष्टसत्त्वहानिभ्यां जन्यत्वात्, अन्यथा एकस्य कस्यचिददृष्टसत्त्वेन तद्धान्या वा सर्वेषां शरीराद्युत्पादतत्प्रध्वंसप्रसङ्गात्, देवदत्तादृष्टसहकारित्वमात्रं तु तत्रापि न निवार्यते, तस्मादितोऽपि हेतोर्नादृष्टस्य गुणत्वसिद्धिः, अतो द्रव्यमेव पुण्यपापप्रकृतिरूपमदृष्टमिति व्यवस्थितमिति गाथार्थः ॥८६॥ साम्प्रतं क्रमप्राप्तमास्रवतत्त्वं प्रतिपिपादयिषुस्तत्स्वरूपं तत्कारणं च निरूपयन्नाह—

**सुहदुहरूवो नियमेण अत्थि तह आसवो भवत्थाण । सदणुट्ठाणा पढमो पाणवहाईहिं बीओ उ ॥८७॥**

**व्याख्या**—अस्ति आस्रव इति सम्बन्धः, तत्र आस्रवति—उपादत्ते बध्नाति अष्टविधं कर्म्म अनेनेति आस्रव—आत्मसरसि कर्माम्भसां प्रवेशमार्गः, स च सुखदुःखरूपः, सुखदुःखग्रहणं तत्कारणयोः शुभाशुभकर्मणोरुपलक्षणं, तत्र शुभकर्मणां मगोत्रादीनामुपादातस्य सद्वेदनीयशुभायुर्ना हेतुः—शुभाध्यवसायादिः शुभरूप आस्रवः शुभास्रव इत्यर्थः, अशुभकर्मणामसद्वेदनीय—मिथ्यात्वादीनामादानस्य कारणमशुभपरिणामादिरशुभरूपोऽशुभास्रव इत्यसौ द्विविधः, नियमेनावश्यम्भावेन 'अस्ति' विद्यते 'तथा' तेन प्रकारेण यथा जीवादयः प्रागभिहितस्वरूपास्तत्त्वं तथाऽयमपीति भावः, आस्रव उक्तशब्दार्थः, अयमर्थः—जीवस्य प्रतिक्षणं कर्मग्रहणव्यापृतस्वभावत्वादवश्यं केनचिद्धेतुना भाव्यं, निर्हेतुकस्य कार्यस्यानुत्पत्तेः, तथा च सति यस्तत्र हेतुः स आस्रवः 'भवस्थानां' संसारवर्त्तिनां शरीरिणां, न तु मुक्तानां, तेषां शुभाशुभकर्मादानहेतुरूपास्रवात्यन्तिकप्रक्षयेण मुक्तिप्राप्तेः कथमसौ स्यात्, तदेवं स्वरूपमुक्त्वा कारणमाह—सदनुष्ठानादर्हदर्चनवन्दनसर्वविरतितपः स्वाध्यायवीतरागप्रणिधानधर्म्मध्यानादेः प्रशस्तक्रियाकाण्डात् 'प्रथमः' पूर्वः शुभास्रव इत्यर्थः, जायत इति शेषः, प्राणिवधादिभ्यस्तु 'तुः' पुनरर्थो गाथान्तर्वर्त्ती इह योज्यते, तेन प्राणातिपातादादिशब्दान्मृषावादकषायादिभ्यश्चाप्रशस्तेभ्यः कर्मभ्यः पुनर्द्वितीयोऽशुभास्रवः, भवति हि यथाक्रमं

सत्कृत्यासत्कृत्याभ्यामसतोरपि शुभाशुभाध्यवसायादिरूपयोः शुभाशुभास्रवयोराविर्भावः, सतोश्च वृद्धिः, इह च शुभास्रवस्य हेतुसामान्योपादानेऽप्यशुभास्रवस्य यत्तद्विशेषोपादानं तत्प्राणिवधादीनामत्यन्तहेयताख्यापनार्थम्, अत्र चाव्रतेन्द्रियकषायक्रिया योगेभ्यो यथाक्रमं पञ्चपञ्चचतुष्पञ्चविंशतित्रिसङ्ख्येभ्यः प्रादुर्भवन्नशुभास्रवः कारणभेदात्कार्यकारणयोरभेदोपचाराच्च द्विचत्वारिंशद्भेदो यदाह–''**इंदिअकसायअव्वयकिरिया पण चउर पंच पणुवीसा । जोगा तिण्णेव भवे बायालं आसवो होइ ॥१॥**'' ननु शुभाशुभकर्मणामादानस्य बन्धस्य हेतुरास्रव इत्युक्तं तच्च न सङ्गच्छते,बन्धाभावे आस्रवासम्भवात्, न ह्यबद्धस्य कर्मबन्धहेत्वनुषङ्गो नाम, तथात्वे वा मुक्तानामपि तदनुषङ्गप्रसङ्गात्, अथाऽऽस्रवं विनाऽप्यस्ति बन्धः, कथं तर्हि तस्य बन्धहेतुत्वं ? नहि यदंभावेऽपि यद् भवति तत्तद्धेतुकं, तथा सत्यङ्कुरस्यापि शिलाशकलहेतुकत्वप्रसङ्गादतः कथमास्रवस्य बन्धहेतुत्वमिति चेत्तन्न, उभयोरप्यन्योन्यं कार्यकारणभावाभ्युपगमात्, एवं तर्हि बन्धाभावे नास्रवस्तदभावे च न बन्ध इति परस्पराश्रयप्रसङ्ग इति चेन्न, बन्धास्रवयोः कार्यकारणभावप्रवाहस्यानादितया यथा पूर्वमुत्तरोत्तरं प्रतिकारणत्वाभ्युपगमे तदनवकाशात्, यदि हि य एवास्रवो यस्य बन्धस्य कारणं स एव बन्धस्तस्यैवास्रवस्य कारणं स्यात्तदा स्यादन्योन्याश्रयदोषो न चैवमस्ति, इतरथा बीजाङ्कुरादी इत्यास्रवलक्षणं, तथाऽस्रवहेतुर्बन्ध इति बन्धस्यापि लक्षणप्रणयनं भवेत्, न चैवमस्ति, कषायाद्यनुविद्धस्य जीवस्य नूतनकर्म्म पुद्गलैः सह सम्बन्धो बन्ध इति तल्लक्षणश्रवणादिति चेन्न, आस्रवस्योत्पत्त्यनन्तरमेवाहत्य बन्धहेतुत्वात् शरीरस्य स्नेहभ्यङ्गाद्रेणुनिकरसंश्लेषवदात्मनः कषायेन्द्रियाद्यास्रावस्नेहलेपादक्षेपेण कर्मरेणुसम्बन्धश्रुतेः, न चैवं बन्धस्य साक्षादास्रवं प्रतिहेतुत्वं, न हि बद्धमात्रमेव कर्म्म स्वफलमास्रवरूपं जनयितुमलं, क्षेत्रकालादिसहकार्यापेक्षया उदयावस्थाप्राप्तस्यैव तस्यार्थक्रियाकरणसामर्थ्यात् तस्मात्परस्परं कारणत्वाविशेषेऽप्यनयोरास्रवहेतुर्बन्ध इति न बन्धस्य लक्षणं किन्तु यथोक्तमेव, तथा च शुभाशुभकर्मादानहेतुरास्रवइत्यास्रवस्यासाधारणं लक्षणं युक्तमुक्तमिति नानयोः समकक्षतेति गाथार्थः ॥८७॥

प्राणिवधादिभ्योऽशुभास्रव इत्युक्तं तत्र प्राकृतलोकविहितात्प्राणिवधादसौ भवति, वेदविहितात्तु तस्माच्छुभास्रव एवेति केचिन्मन्यन्ते तान् सम्प्रत्यनिष्टप्रसञ्जनेन निरसितुमाह–

**पाणवहाईहिन्तो सुहासवो किं न सोयरीयाण । कह हुज्ज आगमो जीवघायसंदंसगो सुद्धो ।।८८।।**

**व्याख्या**–पक्षान्तरद्योतकं यदीत्यव्ययमिह योज्यते अर्थानुरोधात्, तेन प्राणिवधादिभ्यः शुभास्रवो न भवतीति तावत्प्रायः सकलतीर्थ्यानामविप्रतिपत्तिसिद्धं, यदि पुनः प्राणिवधादिभ्यो जीवहिंसादिभ्योऽपि आदिशब्दात्तदुपदेशानुमत्यादिग्रहः शुभास्रव उक्तशब्दार्थोऽभ्युपगम्येत, तदा किम् ? इत्याक्षेपे शौकारिकाणां सौनिकानामपि 'किमिति' कुतो हेतोः 'न' नैवासौ इष्यत इति शेषः, तेषामपि नित्यं हिंसाप्रसक्तत्वाद्विशेषेणासौ प्रसज्येत न चेदमिष्टं, ननु सौनिकानां पिशितादिलोलतया प्रवृत्तेर्न तद्धिंसायाः शुभास्रवत्वं, यागादिकारिणां तु वेदविहितत्वात्प्रवृत्तेस्तस्यास्तद् भविष्यति, अत एव तेषां ततः स्वर्गादिमहाभ्युदयसिद्धिरित्यत आह–'कहे' त्यादि,कथमित्यत्रानुस्वारलोपः प्राकृतत्वात्, 'कथं' केन प्रकारेण न कथञ्चिदित्यर्थः 'भवेत्' स्यात् 'आगमः' सिद्धान्तस्त्रयीलक्षणः 'जीवघातसन्दर्शकः' प्राणिहिंसाप्रतिपादक इति हेतुगर्भं विशेषणं 'शुद्धः' आदिमध्यावसानलक्षणत्रिकोट्यां परस्परविरोधादिवचनदोषकलङ्कवर्जितः हिंसोपदेशकागमानां संसारनिबन्धनतया प्रायः सर्वैरेवाऽविगानेनाऽप्रामाण्योपगमात्कथं शुद्धता स्यात् ? इत्यर्थः, ननु वैदिकहिंसाया अशुभास्रवत्वं कुतः सिद्धं येन तत्प्रतिपादकस्य वेदस्याशुद्धता प्रसाध्यते ? इति चेत् प्रमाणादिति ब्रूमः, तथाहि यज्ञान्तःपातिनी हिंसा पापहेतुः हिंसात्वादितरहिंसावत्, न चास्या हिंसात्वमसिद्धं प्राणवियोजनात्मिकायास्तस्याश्छागादीना यागेऽपि सर्वैरेव प्रतीतेः, ननु प्रकृतहिंसा अहिंसा वेदविहितत्वात् सन्ध्यावन्दनादिवदिति, अनेनानुमानेनाहिंसात्वसिद्ध्या हिंसात्वनिषेधेन कथमस्याः पापहेतुत्वं सिध्येत् ? इति चेन्न, विकल्पानुपपत्तेः, किमिदमहिंसात्वं किं हिंसानिषेधमात्रं, हिंसासदृशपदार्थान्तरत्वं वा, हिंसाफलासाधकत्वं वा, हिंसाशब्दावाच्यत्वं वा ? न प्रथमः, उष्णत्वग्राहिणा वह्नावनुष्णत्वानुमानवच्छागादिप्राणवियोजनरूपहिंसात्वग्रादिणा प्रत्यक्षेणाऽहिंसात्वानुमानस्य बाधेन हेतोः कालात्ययापदिष्टत्वात्, न द्वितीयः, अनभ्युपगमात्, अब्राह्मण इत्यादौ ब्राह्मणनिषेधेन वर्णत्वादिना तत्सदृशक्षत्रियादिवद्धिंसासदृशं पदार्थान्तरं पापहेतुतयाऽलीकस्तेयादिकं भवेत्, न चात्र हिंसात्वनिषेधेन प्रकृतहिंसाया अलीकादिपदार्थान्तररूपत्वं भवताऽभ्युपगम्यते, न तृतीयः, श्येनेनाभिचरन् यजेतेत्यादिनाऽभिचारप्रयोजनश्येनादियागान्तः पातिन्या हिंसाया वेदविहितत्वेऽपि हिंसाफलसाधकतया

हेतोरनैकान्तिकत्वात्, न च साऽपि धर्महेतुरिति वाच्यम्, अभिचारजनितप्रतिपक्षादिहिंसाया अभ्युदयादिफलधर्महेतुत्वाभावे तीर्थिकानामविप्रतिपत्तेः, न चान्यफलोऽपि धर्मोऽभ्युपेयते येन तद्धेतुत्वमभिचारहिंसायाः कल्प्येत, यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म इति कणादमुनिवचनात्, नापि चतुर्थो, व्याघातात्, यागान्तःपातिनी हिंसेत्यनेन हिंसाशब्दवाच्यत्वमभ्युपगम्या हिंसेत्यनेन साध्यनिर्देशेन तस्यास्तन्निषेधात्, अग्नीषोमीयं पशुमालभेतेत्यादिना केवलयागच्छागादिवधाभिधानप्रयोगार्हैरालम्भादिशब्दैर–भिधानाच्च अपिच '**न हिंस्यात् सर्वभूतानी**'त्यनेन हिंसानिषेधकेन वेदवाक्यान्तरेण बाधितत्वात्, प्रकृतहिंसाया अहिंसात्वसाधनमागमविरुद्धत्वान्न साधीयः स्यात्, एतदौत्सर्गिको हिंसानिषेध आपवादिकस्तु यागादौ तद्विधिर्न चोत्सर्गेणापवादो बाध्यते, अपवादविषयं परिहृत्योत्सर्गस्य प्रवृत्तेः, एवं च यागादन्यत्र हिंसानिषेधवाक्यं चरितार्थम्, यागे तु हिंसावाक्यार्थान्यथाऽनुपपत्त्या तद्विधिरस्तु, यथा भवतामौत्सर्गिकौ भावस्तव आपवादिकस्तु द्रव्यस्तवः पृथिव्यादिभूतबाधकोऽपि भगवद्भिरनुज्ञातः, न चासौ न धर्म्महेतुस्तथेहापि सर्वं समानमिति चेत्, सत्यं, द्रव्यस्तवस्य धर्महेतुत्वेऽपि तज्जनितशुभाध्यवसायांशस्यैव भगवतो बहुमतत्वात् तस्यैव च मुक्त्यङ्गतया तेन प्रतिपादनात्, कथं तर्हि एतावान् जिनभवनादिलक्षणस्तदारम्भः ? इति चेन्न, असाधारणं शुभालम्बनं विना शुभभावस्यानुदयेन तत्कारणतया भावस्तवासमर्थानां गृहीणामेव तदनुज्ञानात्, यदाह–''**जो चेव भावलेसो सो चेव य भगवओ वहुमओ उ । न तओ विणेयरेणं**''ति न ततो भावलेश इतरेण द्रव्यस्तवेन विना स्यादित्यर्थः, नतु भावस्तव इव स्वरसेनैव द्रव्यस्तवो भगवतोऽभिमतः षड्जीवनिकायसंयमस्यैवानन्तर्येणात्यन्तिकमुक्ति–सुखसाधकतमतया तस्येष्टत्वात्, आह च–''छज्जीवहियं जिणा विंति'' **न च सांसारिकसुखलिप्सया जैनगृहिणां द्रव्यस्तवेऽपि प्रवृत्तिः, किन्तु तन्निरपेक्षतया कृषीवलानां कृषौ तुषबुसादिनिःस्पृहतया कणमनोरथेनेव नित्यानन्दमयनिःश्रेयसाभिलाषेणैव तेषां तत्र प्रवृत्तेः**, अन्तरा भविष्णोर्नरसुरादिसुखस्य पलालस्येव सम्पातायातत्वेन गौणतया तैरध्यवसानात् तदुक्तम्–''**जिणधम्मो मोक्खफलो सासयसोक्खो जिणेहि पन्नत्तो । नरसुरसुहाइं अणुसंगियाइं इह किसिपलालं वा ॥१॥**'' अर्हद्बिम्बविलोकनादिना सञ्जातचरणपरिणामा भव्यसत्त्वा विरतिस्वीकारेण मुक्तिमवाप्याभवं पृथिव्यादीन् रक्षिष्यन्तीत्यध्यवसायेन च तेषां तत्र

प्रवृत्तिदर्शनादीर्यासमितस्य मुनेः सोपयोगं पथि गच्छतः कथञ्चित्पादाभिहतपिपीलिकाबाधवत् पृथिव्यादिबाधस्तत्र भवन्नपि न तत्त्वतः पापहेतुर्विशुद्धाशयतया परिणामसुन्दरत्वात्, एवं चौत्सर्गिकभावस्तवप्रेप्सयैव गृहिणां प्रवृत्तेरापवादिकोऽपि द्रव्यस्तवः समीचीन एव, न चैवमापवादिक्यामपि यागादिहिंसायामेवंविधाभिप्रायेण भवता प्रवृत्तिरुपलभ्यते **'चित्रया यजेत पशुकामः' 'अग्नीषोमीयं पशुमालभेत स्वर्गकाम'**, इत्यादिवेदवचनादैहिकामुष्मिकपशुस्वर्गादिकामनयैव, न हिंस्यात् इत्याद्यौत्सर्गिकहिंसानिषेधवाक्यार्थनिरपेक्षतया हठेनैव यागे गवादिहिंसाप्रवृत्त्या परमनिर्घृणताया एवाभिव्यञ्जनात्, कामनापूर्विका च हिंसाऽन्यहिंसावद्दुःखवेदनीयफलसाधिकैव सर्वशास्त्रेषु गीयते, उत्सर्गानुगुण्येन च प्रवर्त्तमानोऽपवाद आत्मानमश्नुते, यथा जैनानां तेषां हि भावस्तवरूपोत्सर्गविधिहेतुतयाऽकामनापूर्वकत्वेन च द्रव्यस्तवरूपस्याऽपवादविधेः प्रवृत्त्याऽपवादोपपत्तेः, द्वयोरपि चानयोरकामनापूर्वकत्वेनानान्तर्यपारम्पर्याभ्या मोक्षफलतया च प्रायः परस्परानुगमात्, अन्योन्यानुगतयोरेव वाऽनयोस्तथात्वात्, न चैवं भवत्पक्षेऽपि, तत्र हि यज्ञादिहिंसाविधेरापवादिकस्य कामनापूर्वकतया न हिंस्यादित्यादेश्चोत्स–र्गविधेरकामनापुरस्सरतया उभयोरपि परस्परस्वातन्त्र्येण प्रवृत्त्याऽन्योन्यानुगमायोगात्, तथा च कथमपवादविधेरुत्सर्गानुगुण्यं स्यात्, येनानयोरुत्सर्गापवादविधिभावः कल्प्येत, न चास्माकमपि प्रकृतहिंसायाः कामनापूर्वकत्वं नास्तीति वाच्यं, सर्वत्र यज्ञादिविधिषु कामाभिलाषश्रुतेः, तां विनाऽहिंसाविधाविव तदुपादानं न स्यात्, यदप्यपवादविषयं परिहृत्येत्युद्युक्तं तत्राप्युत्सर्गविधिस्तावत्सामान्यरूपतया प्राप्तौ सत्यामपवादविषयेऽपि प्रवर्त्तमानोऽपवादविधिना स्वविषयादन्यत्र नियम्यत इति वस्तुस्थितिः, न चेह तथाऽस्ति कामनापूर्वकतया सर्वथाऽपायनिमित्तत्वेनोत्सर्गविधिप्रतिकूलतया प्रकृतहिंसाया अपवादविषयत्वाभावेनोत्सर्गविधेस्तत्र प्राप्तेरेवाभावात्, तथा च कथं तत्परिहारेणोत्सर्गविधेर्न हिंस्यादित्यादेर्यागादन्यत्र चरित्रार्थताभिधानं भवतः शोभेत, भवतु वा कथञ्चिदपवादविषयत्वमस्यास्तथाऽपि शास्त्रान्तरविषयत्वादस्य न्यायस्य न धर्मशास्त्रेऽधिकारः, तत्र ह्यस्मदुक्त एव प्रकार उत्सर्गापवादविध्योर्न्याय्यः, किञ्च यदि न हिंस्यादित्यादेरुत्सर्गविधेरनायाससाध्यात्स्वर्गादिफलं न सिध्येत् ।।१७६।।
तदा क्लेशसाध्ये यागादिहिंसाकर्मण्यपि प्रवृत्तिरभ्यनुज्ञायेत, सुसाध्याद्धि कर्मणः साध्यासिद्धौ दुःसाध्येऽपि तस्मिन् पुंसां

पंचलिंगी ।।१७७।।

प्रवृतिदर्शनात्, न चैवमिहास्ति सर्वतीर्थ्यैरेव स्वशास्त्रेऽप्यैहिकामुष्मिकाभ्युदयावन्ध्यनिमित्तत्वेनास्याः प्रसाधनात्, “**सर्वे वेदा न तत्कुर्युः सर्वे यज्ञाश्च भारत । सर्वतीर्थाभिषेकाश्च यत्कुर्यात् प्राणिनां दया ।।१।।**” इत्यादिना व्यासमुनिनाऽपि च सर्वधर्मसाधनेभ्योऽहिंसाया एव गरीयस्त्वेन प्रतिपादनात्, तदेवमुत्सर्गविधेरप्यभिमतसिद्धौ संभवन्त्यां प्रयत्नेन प्रकृतहिंसायां प्रवृत्तिर्नूनं स्ववर्णसुलभं गाद्धर्यमेवाभिव्यनक्ति, तस्मादुक्तन्यायेसु भेदप्रदर्शनान्न भवदस्मदभिमतयोरूत्सर्गापवादविध्योः समतेति, ननु तथाऽपि यथा निःसर्गेण प्राणप्रहाणकरणमपि विषं तादृग्मन्त्रसंस्कृतमारोग्यादिनिमित्तं भवति, तथा स्वरसतोऽपायहेतुरपि हिंसा यागादौ वैदिमन्त्रसंस्कृता स्वर्गादिनिबन्धनं सम्पत्स्यत इति चेत्, संस्कारो ह्यत्रापूर्वोत्पादो विवक्षितः स च किं हिंसाया उत तद्द्वारेण छागादेः, आहो हिंसाकर्त्रात्मनः ? नाद्यःप्राणवियोजनात्मिकायास्तस्या अभावरूपत्वेनाचैतन्येन वाऽपूर्वसमुत्पादाभावात्, भावरूपे चेतन एव च तदभ्युपगमात्, न च हिंसायास्तदभ्युपगमेऽपि काचिदिष्टसिद्धिः, तस्यास्तज्जन्यफलानवाप्तेः, न द्वितीयः, अनभ्युपगमात् न हि पुरुषकृताद्यागादेश्छागादावपूर्वोत्पादो भवद्भिरभ्युपेयते, पुंस्येव तदभ्युपगमात्, यदाह—“**संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः**” । कथञ्चिदन्य कृतादपि शुभकर्म्मणोऽन्यस्य तदनुमोदनादिद्वारेणापूर्वोत्पत्तिरिष्यते, न च प्रकृतहिंसायाः शुभकर्मतेत्यावेदितत्वात्, भवदभ्युपगमेन तस्यास्तथात्वेऽपि छागादेः पशुतयाऽज्ञानबाहुल्यात्, मृत्युमहाभयविह्वलत्वाच्च, न तदनुमोदनादिसम्भवस्तत्कथं तदुत्पादस्तत्र सङ्गच्छेत, न चानुमोदनयाऽन्यस्यापि शुभापूर्वोत्पाद इति स्वदर्शनश्रद्धालुतामात्रमिति वाच्यं—“**निहन्ता चानुमन्ता च विशस्ता क्रयविक्रयी । संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ।।१।।**” इत्यादिना हिंसानुमन्तुर्घातकव्यपदेशेन तदनुमतिजन्यपापसंश्लेषवदहिंसानुमन्तुरपि तदनुमतिप्रभवपुण्यसंश्लेषस्य समानन्यायतया मनुमुनेरप्यभिप्रायविषयत्वात्, न तृतीयः, तदा ह्यभिचारार्थादपि श्येनयज्ञादेस्तत्कर्त्तुरभ्युदयफलापूर्वोत्पादप्रसङ्गात्, वेदमन्त्रप्रयोगाविशेषात्, अस्त्येव तत्रापि तदुत्पादः कथमन्यथाऽभ्युदयाभ्यधिकविपक्षादिप्रतिक्षेप इति चेन्न, प्राग्भवीयादेवापूर्वात्तदुपपत्तेः, प्राच्यजन्मसञ्चितस्यैवापूर्वस्येह जन्मनि प्रायो भोगहेतुत्वेन श्रुतेः, यदाह—“**यथा यथा पूर्वकृतस्य कर्मणः फलं निधानस्थमिवावतिष्ठते। तथा तथा तत्प्रतिपादनोद्यता प्रदीपहस्तेव मतिः प्रवर्त्तते ।।१।।**” यद्येवं श्येनादियज्ञात् प्रागपि

बृहद्वृत्तिः ५ लि.

।।१७७।।

पंचलिंगी ॥१७८॥

तत्फलोत्पादप्रसङ्गः, नियमेन तु तदनन्तरं जायमानोऽसौ तदुत्थापूर्वस्य स्वात्मनि कारणत्वं निश्चाययतीति चेत् न,सहकारिसमव– धानाभावादपूर्वे सत्यपि फलानुत्पादोपपत्तेः, नहि समर्थमपि बीजं यावन्न क्षितिजलतेजः प्रभृतिसहकारिचक्रमध्यमध्यास्ते तावदङ्कुरं जनयितुमलं, कुशूलनिहितादपि तस्मात्तदुत्पत्तिप्रसङ्गात्, तथेहापि श्येनादिलक्षणसहकारिसन्निधावेव प्राच्यापूर्वात्फलोत्पादः, अथ श्येनादेः क्रियात्वेनोत्पन्नप्रध्वंसित्वात्सहकारित्वानुपपत्त्या, तज्जन्याऽदृष्टस्यैव तत्र हेतुतेति चेन्न, क्रियाया अभावस्यापि सहकारित्वाविरोधात्, अभ्युपगम्यन्ते हि भवताऽपि श्यामरूपाद्यभावसहकारिसापेक्षादग्निसंयोगात्पाकजा घटादिषु रूपादयः, न चाभावस्य निरूपाख्यतया कारणत्वमात्रमपि नास्तीति वाच्यं, तस्य तथाऽनभ्युपगमात्, तथात्वे वा वैरितनयप्रागभावप्रध्वंसयोः सर्वानुभवसिद्धं प्रमोदादिकारणत्वं न स्यात्, श्येनादेः शुभापूर्वोत्पादाभ्युपगमे च फलव्यभिचारो न स्यात्, कर्मकर्तृसाधनवैगुण्यात्तद्व्यभिचार इति चेन्न, तत्साद्गुण्येऽपि कदाचिद्व्यभिचारोपलब्धेः, तदसौ प्राच्यापूर्वाभावं वा बलीयसा प्रतिकूलादृष्टान्तरेण सतोऽपि तस्य शक्तिप्रतिबन्धं वा गमयति, अशुभापूर्वोत्पादश्च श्येनादेर्भवन्न निषिध्यते, स च कालान्तरभाविने दुःखवेदनीयफलाय कल्पते, न च पुण्योत्पादवत्पापोत्पादोऽपि ततो न स्यादिति वक्तव्यम्, अभिचारात्तदुत्पादस्य सर्वैरेवेष्टत्वात्, तन्न हिंसाकर्त्रात्मनोऽपि वैदिकमन्त्राच्छुभापूर्वोत्पादः, अथ संस्कारः शक्त्याधानं विवक्षितं, तदपि किं हिंसाया उत च्छागादेराहो हिंस्रात्मन इति पूर्वविकल्पान्नातिवर्त्तते, तत्र न तावद्धिंसायास्तस्याः प्राणव्यपरोपणात्मिकाया अभावरूपतया शक्त्याधानस्याशक्यत्वात्, नापि छागादेः, तस्य हि शरीरे वा शक्त्याधानमात्मनि वा ? नाद्यः, तदानीं तच्छरीरस्य विनश्यत्तया शक्त्याधानस्य तत्राकिञ्चित्करत्वात्, न खलु लाक्षारसावसेकेन सद्यश्छेद्ये बीजपूरविटपिनि शक्तिराधीयमाना क्वचिदुपयुज्यते, कालान्तरेण तत्कुसुमारुणिमानापादनात्, न द्वितीयः, तत्रापि तस्याकिञ्चित्करत्वादेव, स्वर्गप्रापकत्वेन तत्र तस्य किञ्चित्करत्वमिति चेन्न, अपूर्वस्यैव तत्प्राप्तौ सर्ववादिभिः सामर्थ्योपगमात्, तस्य च यागकर्तृसमवेतत्वाभ्युपगमेन छागादावयोगात्, नापि हिंस्रात्मनः शक्त्याधानेऽपि ततः स्वर्गफलासिद्धेः, पुण्यस्यैव तत्साधनपटीयस्त्वात्, प्रकृतहिंसायाश्च पापहेतुत्वेनासकृदावेदितत्वात्, तथा च तदात्मनि पापस्य समवायात् कथं स्वर्गः सिध्येत्, एतेन यागे हन्यमानानां छागादीनां स्वर्गप्राप्तेर्न तद्ध्वंसा पापनिमित्तमित्यपि

बृहद्वृत्तिः ५ लि.

॥१७८॥

प्रत्युक्तं, तथा हि किं वैदिकमन्त्रसंस्कृतेतरोप करणसहकृतश्छागादिवध एव यागः, आहो मन्त्रसंस्कृतेतरोपकरणकलापः, छागवधस्तु तद्बहिर्भूतः, नाद्यः, तदा हि यागात् कस्य स्वर्गो भवेत्, हन्यमानस्य छागादेर्याग एवान्तर्भावात्, न द्वितीयः, एवं हि प्रकृतच्छागवदितरेषामपि वध्यमानानां छागादीनां स्वर्गप्राप्तिप्रसङ्गात् यागसामग्र्या बहिर्भावाविशेषात्, मन्त्रसंस्कारात्प्रकृतच्छा-गादेस्तत्प्राप्तिरिति चेन्न, मन्त्रसंस्कारस्य तत्प्राप्तिप्रयोजकत्वाभ्युपगमे परेऽपि तेन संस्क्रियन्तां परार्थसाधनप्रवणत्वात्सत्पुरुषप्रवृत्तेः कुयोनिपङ्कादुद्धरणेन तेषां स्वर्गसौधाधिरोपणस्य च परार्थत्वात्, न चैतद्भवदभिमतयागात्सिध्यति, तस्माद्यागाच्छागादेः स्वर्ग इत्यसदेतत्, एवमनभ्युपगमे तु संसारमोचकादिप्रणीताऽपि हिंसा स्वर्गहेतुः स्यात्, तदागमानामप्रामाण्यान्न तदुक्ता हिंसा तद्धेतुरिति चेत्, ननु वेदस्य कुतः प्रामाण्यम् ? इति वक्तव्यम्, अपौरुषेयत्वादिति चेत्, किमिदमपौरुषेयत्वं ? प्रसज्यप्रतिषेधरूपं पर्युदासरूपं वा, न प्रथमः, कर्तृपुरुषाभावनिश्चायकप्रमाणाभावात्, तथा हि न प्रत्यक्षेण तदभावो निश्चीयते, इन्द्रियसदर्थसंनिकर्षाद्धि प्रत्यक्षं जायते, न च चिरकालातीतेषु पुरुषेष्वस्मदादीन्द्रियसंनिकर्षोऽस्ति येन तत्प्रत्यक्षतया तद्वाक्यरचनायां कर्तृसद्भावं, वेदे च तदनुपलम्भेन तदभावं प्रतिपद्येमहि, नानुमानेन तदभावात्, वेदा अपौरुषेया अदृश्यकर्तृकत्वादाकाशवदिति तदस्तीति चेन्न, अदृश्येति किमदृश्यमानत्वं विवक्षितं, दर्शनायोग्यत्वं वा, नाद्यः, तदा हि विद्यमानस्यैव कर्तृर्देशान्तरव्यवधानेनास्मदादीनामद-दृश्यतया तत्काव्यस्याप्यपौरुषेयत्वप्रसङ्गात्, न चाऽऽकाशमप्यदृश्यकर्तृकत्वादपौरुषेयत्वमपि तु अकर्तृकत्वादेवेत्यसमर्थविशेषणश्च हेतुः, न द्वितीयः, तद्धि प्रध्वस्तघटवत्कालान्तरव्यवधानेन वा शशविषाणवदत्यन्तासत्त्वेन वा ? न प्रथमः, कालव्यवधानेन दर्शनायोग्यकर्तृकत्वस्य जीर्णकूपारामादिषु पौरुषेयत्वेन व्याप्तत्वाद्धेतोर्विरुद्धताप्रसङ्गाद्, अन्यथा भारतादीनापम्यपौरुषेयत्वापातात्, न द्वितीयः, तद्धि सर्वथा कर्त्रभावरूपमेव, एवं चाकर्तृकत्वादकर्तृका वेदा इत्यर्थः स्यात्, तथा च साध्याविशिष्टो हेतुः, नाप्यागमेन सिद्धप्रामाण्याद्धि तस्मादपौरुषेयत्वं सिध्येत्, न चापौरुषेयत्वसिद्धं विना तस्य प्रामाण्यसिद्धिरिति परस्पराश्रयप्रसङ्गात्, ननु पुरुषाणां रागादिमत्त्वेन तद्वचनस्यानृतत्वशङ्कया न ततः प्रेक्षावतामैकमत्येन सदनुष्ठाने प्रवृत्तिः स्यात्, अस्ति चासौ, ततस्तत्प्रवृत्त्यन्यथानुपपत्त्या वेदस्यापौरुषेयत्वावसाय इति चेन्न, ननु किमज्ञाताद्वेदार्थात्तदुक्तानुष्ठाने प्रवृत्तिर्ज्ञाताद्वा, नाद्यः

हिताहितप्राप्तिपरिहारोपायपरिज्ञानमन्तरेण प्रेक्षावत्प्रवृत्त्यनुपपत्तेः, तदुपायश्च वेदार्थस्तदज्ञानात्कथं तत्र प्रवर्त्तेरन् हितैषिणः, न खलु बुभुक्षुरपि क्षुद्दुःखनिवृत्तिसाधनं ममेदमित्यज्ञात्वैव तन्निवृत्तये भोजनादौ प्रवर्त्तते तदसाधनेऽपि प्रवृत्तिप्रसङ्गात्, न द्वितीयः, वेदार्थज्ञानोपायाभावात्, पूर्वपूर्वोपाध्यायव्याख्यानात्तज्ज्ञानमिति चेन्न, तेषामपि रागादिमत्तया विप्रलिप्साऽनाभोगादिना विपर्ययेणापि व्याख्यानसम्भवात्कथं तदर्थनिश्चयः स्यात्, तस्मान्न प्रसज्यप्रतिषेधरूपमपौरुषेयत्वं सङ्गतिमियर्ति, न द्वितीयः, अनभ्युपगमात्, न ह्याकारत इतरपुरुषसदृशेन सर्वज्ञेन केनचिन्निर्मिता वेदा इति सर्वज्ञमपह्नुवानैर्मीमांसकैरभ्युपगम्यते, एवं च प्रसज्यपर्युदासरूपाभ्यां नञर्थाभ्यामपौरुषेयत्वस्यानवधारणान्न ततो वेदप्रामाण्यसिद्धिः, ननु गृहीतसम्बन्धो हि शब्दः स्वार्थं प्रतिपादयति, अन्यथाऽनवगतसङ्केतस्यापि गोशब्दश्रवणात्ककुदादिमदर्थप्रतीति प्रसङ्गात्, न च शब्दस्योच्चरितप्रध्वंसित्वेन समयग्रहः कर्त्तुं शक्यते, तथात्वेऽप्यसकृदुच्चारणात्समयोग्रहीष्यत इति चेन्न, सद्यो विनष्टत्वेन पूर्वस्य पुनरुच्चारणासम्भवात्, अन्यस्यापूर्वस्यैवेदानीं श्रवणविवरमध्यासीनस्य श्रवणात्, तथा च न शब्दस्याभिधाव्यापारावगमः, समयव्यपेक्षा हि शब्दस्यार्थप्रत्यायनशक्तिरभिधा, तदनवगमाच्च कथं तेन परः प्रत्याय्येत, स्वयमगृहीतसमयेन परप्रत्यायनस्याशक्यत्वात्, वाक्यप्रयोगस्य च तदर्थत्वात् तस्मान्नालिकेरद्वीपवासिन आर्यावर्त्तमागतस्य धूमादग्निप्रतिपत्तिवदगृहीतसम्बन्धाच्छब्दार्थप्रति–पत्तेरनुपपत्तेर्नित्यः शब्दः, तथा च शब्दमयत्वाद्वेदवचः प्रपञ्चोऽपि नित्यः, तथात्वे च तत्रापि तस्यैव पुनरुच्चारणादिना सम्बन्धग्रहः सुशक्य इति चेन्न, विनश्वरस्यापि शब्दस्य मेघादेरिव सम्बन्धग्रहसम्भवात् अन्यथा मेघादेरपि वर्षाद्यनुमानाभावप्रसङ्गात्, तथा ह्येते दूराद्दृश्यमाना मेघा वृष्टिमन्तो गम्भीरस्तनितसौदामिनीमत्त्वात् प्रागुपलब्धतादृगमेघवदित्यत्र हि सम्बन्धग्रहणसमये यस्या मेघव्यक्तेर्वर्षेण सह सम्बन्धो ग्रहीतुमारब्धस्तस्या आशुतरविनाशितयाऽन्यस्याः सम्बन्धो गृहीतः, तथाऽनुमानकालेऽपि यन्मेघव्यक्तिदर्शनेन सम्बन्धं स्मृतवाननुमाता तस्यास्तदैव प्रध्वंसादपरया वर्षमनुमिनोति, एवं च यद्याशुविनाशितया मेघव्यक्तेः सम्बन्धग्रहो नेष्यते तदाऽनुमानकालेऽपि प्रागननुभूतत्वेन सम्बन्धस्य स्मरणाभावात् वर्षानुमानं न स्यात्, अस्ति चेदं, न च तत्सम्बन्धादिग्रहं विना संभवति, अगृहीतसम्बन्धाल्लिङ्गाल्लिङ्गिज्ञानानुदयात्, तस्मादस्थिराणामपि सम्बन्धग्रहोऽभ्युपेयः, न

च मेघस्य नास्त्याशुविनाशित्वमिति वाच्यं, यत्सत्तत्क्षणिकं यथा जलधर इत्यादिना क्षणभङ्गसाधने सौगतैरुभयवादिसिद्धतया जलधरस्य व्याप्त्यंशत्वेनोपन्यासात्, न च तत्र मेघवर्षसामान्ययोः स्थिरत्वेन सम्बन्धग्रह इति वाच्यं, प्रकृतेऽपि शब्दाभिधेयसामान्ययोस्तद्ग्रहस्य दुर्निवारत्वात्, सामान्यस्यार्थक्रियाद्यक्षमत्वात्तत्सम्बन्धग्रहेऽपि न कश्चिदुपयोग इति चेन्न, 'निर्विशेषं न सामान्यं भवेच्छशविषाणवत्' इति न्यायेन विशेषनान्तरीयकत्वात् सामान्यस्य तदुपगृहीतयोर्व्यक्त्योरेव सम्बन्धग्रहाभ्युपगमात् अन्यथा भवत्पक्षेऽप्यस्य दोषस्य समानत्वात्, समानं चैतत्सर्वं प्रसिद्धानुमानेऽपि, अन्यथा तत्रापि प्रतिक्षणमुपजायमानाया अपरापरधूमव्यक्तेः सम्बन्धग्रहणतत्स्मरणाद्यभावादग्न्यनुमानं न स्यात्, ननु स एवायं शब्द इत्यादिप्रत्यभिज्ञानमेव पूर्वापरकालभाविनोः शब्दयोरेकत्वं गृह्णाच्छब्दस्य नित्यत्वमवगमयतीति चेत् न, पूर्वापरशब्दगतशब्द– त्वसामान्यविषयतयैव चरितार्थत्वेनास्य प्रत्यभिज्ञानस्य लूनपुनर्जातकेशादिष्विवैकव्यक्तिविषयतया भ्रान्तत्वात्, अत एव प्रदीपादिषु सैवेयं प्रदीपज्वालेत्याद्याकारायाः प्रत्यभिज्ञाया एकज्वाला व्यक्तिविषयताऽभ्युगमे भ्रान्ततैव, ननु लूनपुनर्जातकेशादीनामन्तरा विच्छेदेनानुपलम्भात्तत्प्रत्यभिज्ञाया भवतु भ्रान्तत्वं, प्रदीपज्वालादेस्तु नैरन्तर्येण प्रतिभासात्तद्गतायास्तस्याः कथं तथात्वम् ? इति चेन्न, तैलवर्त्त्यादिक्षयेणानुमानाज्ज्वालादिव्यक्तिभेदसिद्धौ तदेकत्वग्राहिकायास्तस्या भ्रान्तत्वोपपत्तेः, तस्मात्सामान्यगोचरमेव शब्दगतं प्रत्यभिज्ञानं, न च शब्दगतं सामान्यं नास्तीति वाच्यं, शब्दोऽयं शब्दोऽयमित्याद्यनुगताकारप्रत्ययस्य सामान्यं विनाऽनुपपत्तेः, श्रावणत्वहेतुकोऽयमनुगतप्रत्यय इति चेन्न, चाक्षुषत्वादिनिबन्धनो रूपादिष्वप्यनुगतप्रत्यय इत्यपि कल्प्येत, तथा च तत्रापि रूपत्वादिसामान्याभावप्रसङ्गः, प्रसज्यतां का नो हानिरिति चेन्न, पीतसितनीलत्वादिष्वेकाकारप्रत्ययापातात्, भिन्नाकारतया नीलादीनां सर्वैरपि प्रतीतेः कथमेवम् ? इति चेत्, कथं पुनरेषां भिन्नाकारता विलक्षणसामग्रीजन्यत्वात् ? इति चेन्न, भवतु सामग्रीवैलक्षण्यादेषां भेदस्तथाऽपि चाक्षुषत्वमात्रनिमित्तकोऽनुगतप्रत्यय एकाकारो भवन्नेषां केन वार्येत ? भवत्येव रूपं रूपमित्याद्येकाकारोऽनुगतप्रत्ययो नीलादिष्विति चेन्न, नीलेऽपि पीताद्याकारानुगतप्रतीत्यापत्तेः चाक्षुषत्वाविशेषात्, ननु रूपस्य वैचित्र्याद्रूपत्वनीलत्वादिसामान्यनिबन्धन एवानुगतप्रत्ययो भवतु शब्दस्य तु तदभावात्, श्रावणत्वहेतुक एवासावास्तामिति

चेन्न, शब्दस्यापि तीव्रमन्दादिभेदेन ककारगकारादिभेदेन च वैचित्र्योपपत्तेः, तथा च श्रावणत्वमात्रहेतुकत्वे सर्वेष्वप्येषु तीव्र इत्येव वा मन्द इत्येव वेत्यादिरूपेण तथा ककारादिष्वपि ककार इत्येव वा गकार इत्येव वेत्यादिक्रमेणैकाकार एवासौ प्रसज्येत, न चैतदस्ति, तस्माच्छब्दत्वकत्वगत्वादिनिमित्त एव शब्देऽनुगतप्रत्ययः, स्यादेतत् कुतः पुनः शब्दगोचरप्रत्यभिज्ञाया भ्रान्तत्वम्, उच्चारणानन्तरमनुपलम्भादिति न युक्तं नित्यत्वेऽपि व्यञ्जकाभावादेव प्रदीपाभावादन्धकारान्तरितस्य घटस्येव तत्सम्भवात्, अत एव व्यञ्जकधर्म्मानुविधानादेकस्वरूपस्यापि शब्दस्य तीव्रमन्दादि भेद उपपद्यत इति चेन्न, विकल्पानुपपत्तेः, तथा हि किं श्रोत्रं शब्दस्य व्यञ्जकम् उत वायवीयाध्वनयः ? आहो ताल्वादिसंयोगः ? अभिव्यक्तिरपि किं ज्ञप्तिरुतावरणापसारणं ? नाद्यः, ज्ञप्तिहेतोः श्रोत्रस्य सन्निहितत्वेन सदा शब्दोपलम्भप्रसङ्गात्, आवरणापसारणरूपायाश्चाभिव्यक्तेः श्रोत्रेणाशक्यत्वात्, तथाविधा वायव एव हि शब्दस्यावारकाः स्युः, न च ते भवन्मते निष्क्रियामूर्त्तेन श्रोत्रेणापसारयितुं शक्यन्ते, न द्वितीयः, ज्ञाताः शब्दमभिव्यंजन्ति सत्तामात्रेण वा ? न प्रथमः, तज्ज्ञानं हि श्रोत्रेण स्यात्, न च तेन व्यञ्जका ध्वनयः, प्रतीयन्ते, वक्तृवक्त्रोच्चारितस्य शब्दस्यैव तेन प्रतीतेरुभयानुभवाभावात्, नापि तैः शब्दोऽभिव्यज्यते श्रोत्रेणैव तस्य ज्ञप्तेः न द्वितीयः, सत्तामात्रावस्थितैरपि तैश्चक्षुरादिभिरिव शब्दज्ञप्तेरयोगात् श्रोत्रेणैव तस्य प्रतीतेरित्युक्तत्वात्, अथ मा भूच्छब्दस्य ज्ञप्तिरभिव्यक्तिः किन्त्वावरणापसारणरूपा सा तैर्भविष्यतीति चेत् न, सर्वगतस्यामूर्त्तस्य शब्दस्याकाशादेरिवावरणासम्भवात्, सम्भवे वा व्यञ्जकैर्ध्वनिभिस्तादृग् वायुरूपावरणापसारणात्सर्वत्र सर्वैरपि यौगपद्येन शब्दः श्रूयेत, न तृतीयः तस्य शब्दजनकत्वेनाभिव्यञ्जकत्वायोगात्, तथा हि न तावत्तस्य ज्ञापकत्वमभिव्यञ्जकत्वं, तदा हि बधिरस्यापि वक्तुरपरेषां च तादृशां शब्दश्रवणप्रसङ्गात्, तथा च बधिराभावापत्तिः, नाप्यावरणापसारकत्वं, प्राग्वत् सर्वैरपि तच्छ्रुत्यापत्तेः तस्माज्जनकत्वमेव तस्य, अस्ति च जनकाभिव्यञ्जकयोर्महान् विशेषः, यस्मिन् सति हि नियमेन पदार्थोपलंभो जायते तत्तस्य व्यञ्जकं यथा प्रदीपो घटादेः घटाद्यभावे प्रदीपे सत्यपि तदुपलम्भाभावात्, यस्मिंश्च सहकारिसाकल्यवति सति अवश्यं वस्तूपलम्भो भवति तत्तस्य जनकं, यथा बीजमङ्कुरस्य, न चेह ताल्वादिसंयोगस्य शब्दोपलब्धौ कदाचिद्व्यभिचारो येनासौ व्यञ्जकतया कल्प्येत, न चैडमूकादिभिर्व्यभिचारः, तेषां तादृक् तत्संयोगायोगात्,

इतरथा भवत्पक्षेऽपि तेषां तत्संयोगेऽपि तदभिव्यक्त्यभावेन व्यभिचारप्रसङ्गात्, यदपि व्यञ्जकधर्मानुविधानाच्छब्दे तीव्रादिभेदोपपादनं तदपि न सम्यग् यतो व्यञ्जकतया विकल्पितानां श्रोत्रादीनां त्रयाणां मध्यान्न तावच्छ्रोत्रस्य तीव्रत्वादयो धर्माः सन्ति येन तदनुविधानाच्छब्देऽपि तद्भेद उपपद्येत, प्रत्युतास्मच्छ्रवणमूलोपघातकोऽनेन वक्त्रा तीव्रः शब्द उच्चारित इत्याकारेण श्रोतॄणां प्रतिसन्धानाद्व्यङ्ग्यशब्दधर्मतयैव तीव्रत्वादेः प्रतीतिर्न तु व्यञ्जकश्रवणधर्म्मतया तद्धर्मत्वे हि तदुपघातो न स्यात् सहभुवां धर्म्माणां रूपादीनामिव स्वधर्मिणां प्रत्युपघातकत्वायोगात्, नापि वायवीयध्वनिधर्म्मानुविधानात्तीव्रादिभेदः, ध्वनीनामेव तावत्प्रतीतिर्नास्ति किं पुनस्तद्धर्म्माणां येन तदनुविधानात्तीव्रत्वादिः शब्दे कल्प्येत, भवन्तु वा यथा कथञ्चित्तद्धर्म्मास्तथाऽपि तदनुविधानव्यङ्ग्यस्य न सङ्गच्छते, न खलु सूर्यचन्द्रादेः प्रकाशकत्वाह्लादकत्वादीन् धर्मान् व्यङ्ग्या घटपटादयोऽनुविदधति तथात्वे तेषामपि प्रकाशकत्वादिप्रतिभासप्रसङ्गात्, ताल्वादिसंयोगस्य तूक्तन्यायेन जनकत्वमेव न व्यञ्जकत्वं. तथा च तीव्रमन्दकोष्टापवनप्रयत्नादिसामग्रीजन्मनस्ताल्वादिसंयोगाच्छब्दे तीव्रादिभेदोपपत्तिः, तदेवं सामान्येन वर्णात्मकशब्दानामनित्यत्व–सिद्ध्या वेदवचसामपि तत्सिद्धिरुपपन्ना, न हि लौकिकवचनेभ्यो मात्रयाऽपि तद्वचसां भेदमुपलभेमहि येन पुरुषाशक्यनिर्माणत्वादिना हेतुजालेन तेषामपौरुषेयत्वमातिष्ठेमहि, अस्तु तर्ह्यस्मर्यमाणकर्तृकत्वादाकाशवदिति वेदाऽपौरुषेयत्वे साधनमिति चेत्, कथं पुनः कर्त्तृरस्मरणं ? किमभावात् ? आहो अनुभवायोगात् ? उत्त तथाविधावधानाभावात् ? नाद्यः, केन पुनः प्रमाणेन कर्त्तृरभावो निरणायि, किं प्रत्यक्षेण उतान्येन ? न प्रथमः, कर्त्तुर्देशकालव्यवधानादिनाऽप्यनुपलम्भसम्भवेनास्मदादिप्रत्यक्षस्य चेन्द्रियसन्निकृष्टार्थग्राहकत्वेन तदभावग्रहणाप्रवृत्तेः, प्रवृत्तौ वा सौगताद्यागमेष्वपि तदभावग्रहात्तेपामप्यपौरुषेयत्वापातात्, न द्वितीयः, तेनैव साध्यसिद्धौ किमस्य प्रकृतानुमानस्योपन्यासेन, किञ्च यद्यभावत्कर्त्तृरस्मरणं तदाऽकर्त्तृकत्वादिति हेत्वर्थः स्यात्, तथा च गोमात्रनिषेधेन तद्विशेषशावलेयपिण्डवत्कर्त्तृमात्रनिषेधेन तद्विशेषस्य पुरुषस्यापि निषेधः सिद्ध एव, एवं च प्रतिज्ञार्थस्य हेत्वर्थेनाक्षिप्तत्वात्, यदि तां त्यक्ष्यसि तदा प्रतिज्ञाहानिर्निग्रहस्थानं **'स्वीकृतोक्तत्यागः प्रतिज्ञाहानिरिति'** तल्लक्षणात्, न चेत्तदा साध्याविशिष्टो हेतुः, अथ तद्विया वेदा नित्या इत्यादिप्रतिज्ञां कुरुषे तथाऽपि **प्रतिज्ञान्तरं निग्रहस्थानमेव,** ॥१८३॥

न द्वितीयः, अनुभवाभावेन कर्त्तुरस्मरणस्य भारतादिष्वपि समानत्वात्, न ह्यस्मदादिभिस्तत्कर्त्तारो व्यासादयोऽनुभूता येन स्मर्येरन्, तृतीये तु सिद्धसाधनम् अवधानाद्यभावेन सतोऽप्यनुभूतस्यापि कर्त्तुरस्मरणोपपत्तेः, न चैतावताऽपौरुषेयत्वसिद्धिः अतिप्रसङ्गात्, साधनविकलश्चाकाशदृष्टान्तः, न ह्याकाशमस्मर्यमाणकर्त्तृकत्वादपौरुषेयं किन्त्वकर्तृकत्वात्, तथा च वेदेऽपि देशकालव्यधानादिना कर्त्तुरस्मरणस्यान्यथाऽप्युपपत्त्या व्याप्तेरनिश्चयादन्यथासिद्धो हेतुः तदेवमपौरुषेयत्वासिद्ध्या तेन यद्वेदस्य प्रामाण्यं सिसाधयिषितं परेण तन्न सङ्गतिमियर्त्ति, अपि च पुरुषगुणदोषनिबन्धनो वचसां प्रामाण्याऽप्रामाण्यव्यवहारो लोक उपलभ्यते, ततो यदि वेदस्य दोषवत्कर्तृपुरुषव्यावृत्त्या प्रामाण्यमभ्युपेयते तदा गुणवत्कर्तृव्यावृत्त्याऽप्रामाण्यमपि शङ्क्येत, तथा च तदुक्तेषु कुशलकर्मसु नानुष्ठातारो निर्विचिकित्साः प्रवर्त्तेरन्, ततो जगति सकलोऽपि धर्मव्यवहार उच्छिद्येत, ईश्वरकर्तृकत्वात्तत्प्रामाण्यमिति चेत् न, तस्य त्वयाऽनभ्युपगमात् निराकरिष्यमाणत्वाच्च, तदेवं वेदप्रामाण्यसाधनाय परेणोपन्यस्तस्यापौरुषेयत्वादेरसिद्ध्या तदुक्तहिंसाया लौकिकहिंसातुल्यत्वेन तत्प्रदर्शकस्य तस्याप्रामाण्यमुपपन्नं, तथा च प्रयोगः वेदाः प्रमाणत्वेन न व्यवहर्त्तव्याः हिंसोपदेशकत्वात् संसारमोचकागमवदितिगाथार्थः ॥८८॥ तदेवं जीववधातोपदेशकागमाप्रामाण्यप्रदर्शनेन तद्रक्षाप्रसाधकस्य तस्य प्रामाण्यं सूत्रकृता प्रतिपिपादयिषितं तच्च सर्वज्ञोपदेशरूपस्यैव तस्य सङ्गच्छते, असर्वज्ञोपदेशस्य मिथ्याज्ञानविप्रलिप्सादिहेतुकतयाऽप्रामाण्याघ्रातत्वादिति सम्प्रति सर्वज्ञं तद्वचनस्य च प्रामाण्यमुपपत्तिभिः साधयितुं गाथायुगलमाह—

**एत्तो च्चिय अत्थि फुडं सव्वन्नू विगयदोससब्भावो । कह सग्गमुक्खयोगो दाणतवो विणयमाईणं ॥८९॥**

**जइ हुज्ज न तव्वयणं पमाणमेयम्मि हंदि वत्थुम्मि । जुत्तीहिं तस्स साहणमणत्थयं किं न भे भवइ ॥९०॥**

**व्याख्या**—यत एव हिंसोपदेशक आगमो न प्रमाणं तद्रक्षोपदेशक एवासौ प्रमाणम् 'अत एव' अस्मादेव हेतोः 'अस्ति' विद्यते 'स्फुटं' प्रमाणोपपन्नतया प्रव्यक्तमिति क्रियाविशेषं 'सर्वं' सकलम् अनन्तगुणपर्यायावरुद्धभूतभवद्भविष्यत्स्वरूप—पदार्थजातानुगतं लोकं तद्विपरीतं चालोकं केवलज्ञानावलोकेन जानाति यथावत्परिच्छिनत्तीति सर्वज्ञः, अस्तीति वर्त्तमाननिर्देशः

सदा सर्वज्ञसद्भावप्रदर्शनार्थो न कश्चित्स कालोऽस्ति यत्र मनुष्यलोके सर्वज्ञो नास्ति, कदाचिद्विवक्षितदेशे तदसत्त्वेऽपि देशान्तरे तस्यावश्यं भावात्, स च कैश्चिदङ्गनादिपरिग्रहलिङ्गेनानुमेयरागादिरपि तत्तयाऽभ्युपगम्यते, तदपोहार्थं हेतुगर्भविशेषमाह– 'विगतदोषसद्भावः' विगतो–मोहनीयक्षयेण सर्वथा क्षीणो दोषाणां–रागद्वेषादीनां सद्भावः–सत्त्वं यस्य स तथा, अयमर्थः– मोहनीयविकारत्वाद्रागादीनां तदुदये तेषामप्युदयस्तत्क्षये च तत्क्षयः, यदुक्तम्–"**वीतरागा जिनाः सर्वे मोहनीयनिवृत्तितः । तद्भेदा हि यतः-प्रोक्ताः सर्वे रागादयो मलाः ॥१॥**" परैरप्युक्तम्–"तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ।" इति, तथा च मोहनीयक्षयाद्रागादिक्षयः, तदनन्तरक्षणे च ज्ञानावरणादिक्षयाल्लोकालोकावभासनकेवलज्ञानोत्पादेन सर्वज्ञव्यपदेशः, एवं च कथं रागादिमतः सर्वज्ञता स्यात् ? तस्माद्यतो विगतदोषसद्भावस्ततः सर्वज्ञ इति हेतुहेतुमद्भावेन विशेषणं योज्यम्, अथवा सद्भावः–सत्ता दोषाणामनुदयावस्थतया स्थाप्यता तेनायमर्थो–न खलु विगतदोष इत्येतावतैव सर्वज्ञस्तथात्वे उपशान्तमोहस्याप्यनुदयमात्रेण दोषविगमात्तत्ताप्रसङ्गात्, किं नाम यतः सत्तातोऽपि विगतदोषोऽतः सर्वज्ञ साम्प्रतं तत्कर्तृकत्वेनागमस्य प्रामाण्यं विपक्षेऽनिष्टप्रसङ्गापादनेन सार्द्धगाथयाऽऽह–

'कहेत्यादि' अनुस्वारलोपोऽत्र प्राकृतत्वात्, तेन 'कथं' केन प्रकारेण न कथञ्चिदित्यर्थः, स्वर्गो–देवलोकः, मोक्षो–ऽपवर्गः, ताभ्यां योगः साध्यसाधनभावलक्षणः सम्बन्धः, उपलक्षणं चैतत्–नरकादियोगस्य भवेदितिशेषः, दानं–पात्रेषु न्यायात्तस्ववित्तवितरणं, तपः–अनशनादि, विनयो–गुर्वादिषु यथायथमभ्युत्थानादिः, आदिग्रहणाद्ब्रह्मचर्यादिग्रहः, ततो द्वन्द्वगर्भो बहुव्रीहिः, तदादीनां कुशलानुष्ठानानां हिंसाचौर्यादीनां च यदीति पक्षान्तरे 'न भवेत्' न स्यात्, तत्पदेन सर्वज्ञपरामर्शः 'तस्य' सर्वज्ञस्य 'वचनम्' आगमः 'प्रमाणं' सम्यग्निश्चायकम्, 'एतस्मिन्' अनन्तरप्रदर्शिततया प्रत्यक्षे हन्दीत्युपदर्शने 'वस्तुनि' स्वर्गादेर्दानादीनां च यथाक्रमं साध्यसाधनभावलक्षणे अर्थे, एतदुक्तं भवति–अस्ति तावत्प्रायः सर्ववादिसिद्धः स्वर्गापवर्गादेरहिंसापात्रदानादीनां च कार्यकारणभावः, न चासौ बीजाङ्कुरयोरिव प्रत्यक्षेणावसातुं शक्यते, ॥१८५॥
अस्मदादिप्रत्यक्षस्येन्द्रियार्थसन्निकर्षजत्वेन दानादीनामैन्द्रियकत्वेऽप्यन्यतरस्य सम्बन्धिनः स्वर्गादेरतीन्द्रियत्वात्तत्सन्निकर्षाभावेन

तत्र तस्याऽप्रवृत्तेः, नाप्यनुमानेन तदभावात्, ननु प्रेक्षावतां दानादिषु प्रवृत्तिः फलवती तत्प्रवृत्तित्वात्कर्षकवणिगादिप्रवृत्त्यनुमाने— नैहिकफलनिरपेक्षतया तेषां दानादिप्रवृत्तेः फलवत्त्वेन कार्यकारणभावोऽवसीयत इति चेत्, अवसीयतां नाम तत्तु प्रवृत्तेः फलवत्त्वं किं स्वर्गादिफलेन आहो नरकादिफलेन ? इति संदिह्यते हिंसादिप्रवृत्तेरपि कैश्चित्स्वर्गादिफलत्वेनोपदेशात्, तद्वाद्दानादेरपि नरकादिफलत्वमपि कश्चित्सम्भावयेत्, तथा च सन्दिहाना न स्वर्गाद्यर्थिनो दानादिषु प्रवर्त्तेरन्, तस्मात्प्रत्यक्षानुमानाभ्यां हेतुफलभावानिश्चयाद् दानाद्येव स्वर्गादि साधनं न हिंसादीति विनिगमनायां सर्वज्ञागम इव प्रमाणं यदाह—''**न मानमागमादन्यत् मुमुक्षूणां हि विद्यते । मोक्षमार्गे ततस्तत्र यतितव्यं मनीषिभिः ॥१॥**'' अस्मद्गुरवोऽप्याहुः—''**नो पिच्छामो सव्वण्णुणो सयं न मणपज्जवजिणाई । न य चोद्दसदस पुव्विप्पमुहे पि सुअसुअहरेवि ॥१॥ एवंपि अम्हसरणं ताणं चक्खू गईपईवो य । भयवं ! सिद्धंतो च्चिअ अविरुद्धो इट्ठदिट्ठेहिं ॥२॥**'' तदनभ्युपगमे हिताहितोपायं सम्यगजानानाः स्वर्गाद्यर्थिनः कदाचिद्धिंसादिष्वपि प्रवर्त्तेरन्, न च प्रवृत्तावपि ततो वाञ्छितमश्नवीरन्, अनुपायादुपेयासिद्धेः, न जातु क्षीरावसिक्तमपि पिचुमन्दबीजं पत्रपुष्पाद्युत्पादक्रमेण माकन्दफलाय कल्पते, तस्मादागम एव स्वर्गादियोगे दानादीनां प्रमाणम्, अत्रैवार्थे उपपत्त्यन्तरमाह—युक्तिभिरनुमानादिप्रमाणोपपत्तिभिस्तस्येति सर्वज्ञस्य साधनं मीमांसकाद्युपन्यस्तसर्वज्ञनिराकारकप्रमाणप्रतिक्षेपेण प्रतिष्ठापनम् 'अनर्थकं' निष्प्रयोजनं, किम् इत्याक्षेपे कथं न 'भे' भवतां 'सर्वज्ञवादिनां' नैयायिकानां 'भवति' प्रसज्यते अपि तु निरर्थकं प्राप्नोतीत्यर्थः, अयमर्थः—आगमप्रामाण्येन हि प्रायः सर्वतीर्थ्यानां स्वर्गादेर्दानादीनां च कार्यकारणभावनिश्चयः, न च वीतरागं सर्वज्ञं प्रणेतारं विना तत्प्रामाण्यसम्भवः रागादिमद्वचनस्यानृतादित्वेनाप्रामाण्यशङ्कास्पदत्वादपौरुषेयस्य च तस्य प्रागुपदर्शितन्यायेनासम्भवात् इत्यागमप्रामाण्यान्यथानुपपत्त्या सर्वज्ञः साध्यते, यदि च सर्वज्ञपूर्वकत्वं विनाऽपि स्वकल्पनया आगमप्रामाण्याभ्युपगमेन कार्यकारणभावनिश्चयः स्यात्, तदा किमजागलस्तनकल्पेन साधितेन तेन, तस्मादत्रार्थे तत्प्रामाण्यमवश्याभ्युपेयम्, अत्र मीमांसकाः प्रत्यवतिष्ठन्ते, सर्वज्ञसिद्धौ हि तदागमप्रामाण्यं युज्यते, स एव वाऽद्यापि न सिध्यति तद्ग्राहकप्रमाणाभावात्, तथा हि न प्रत्यक्षेण सर्वज्ञो निश्चेतुं शक्यते अर्थस्येन्द्रियसन्निकर्षेण तस्योत्पादात्, सर्वज्ञस्य

चाऽतीन्द्रियत्वेन तत्सन्निकर्षाभावात् कथमसौ गृह्येत, चक्षुरादीनां सम्बद्धप्रतिनियतार्थग्राहकत्वेन तद्ग्रहणे व्यापाराभावात्, 'सम्बद्धं वर्त्तमानं च गृह्यते चक्षुरादिभिरितिवचनात्, नाप्यनुमानेन प्रतिबन्धासिद्धेः धर्मिणोऽसिद्धौ हेतोराश्रयासिद्धेः, कथं साध्येन प्रतिबन्धः सिध्येत्, न चाऽप्रतिबद्धो हेतुर्गमको नाम अतिप्रसङ्गात्, सिद्धौ वा धर्मिणः किं हेतूपादानेन तमन्तरेणापि प्रागेव साध्यसिद्धेः, ननु भवन्तु सर्वज्ञपक्षीकरणे आश्रयासिद्ध्यादयो दोषाः, पदार्थपक्षीकरणे तु क्वामीषामवकाशः ? तथा हि स्वर्गापूर्वदेवतादयः पदार्थाः कस्याचित्प्रत्यक्षाः प्रमेयत्वात्, घटादिवदित्यनुमानात् पक्षधर्मताबलेन सर्वज्ञसिद्धिरिति चेन्न, अन्यथासिद्धेः, न हि घटादीनां प्रमेयत्वेन प्रत्यक्षत्वं किन्तु योग्यत्वे सतीन्द्रियसन्निकर्णवत्त्वेन, अन्यथाऽतीताऽनागतादीनामपि प्रमेयत्वेन तथा प्रसङ्गात्, तस्मात् प्रमेयत्वेऽपि स्वर्गादीनामिन्द्रियसन्निकर्षाभावात् प्रत्यक्षत्वं न भविष्यतीत्यनुमानादपि न तत्सिद्धिः, नापि शब्दात्, स हि किं तेनैव प्रणीतस्तत्साधकः, अन्येन वा ? यदाऽपि तेनैव तदाऽपि किमसर्वज्ञदशावर्त्तिना, उत तद्विपरीतेन ? नाद्यः, तत्प्रणीतागमस्याप्रामाण्येन ततस्तस्यासिद्धेः, न द्वितीयः, सति सर्वज्ञत्वे तेन तत् प्रणयनं तस्माच्च तत्प्रामाण्यं तस्माच्चा सर्वज्ञसिद्धिरिति चक्रकदोषप्रसङ्गात्, अथाऽन्येनेतिपक्षः न, तस्यापि रागादिमत्तया तत्प्रणीतस्य तस्याप्रामाण्येन तत्साधकत्वायोगात्, नाप्युपमानात्, गोसदृशो गवय इत्याद्यगृहीतसमयसञ्ज्ञासमभिव्याहृतातिदेशवाक्यश्रवणानन्तरं तादृक्पिण्डदर्शनात् सञ्ज्ञास्मरणसहकृतं समयग्राहकं यत्साधर्म्यज्ञानमुत्पद्यते तत् हि उपमानं, न चेहातिदेश्यगोपिण्डस्थानीयः कश्चिदुपलभ्यते येनैतत्सदृशः सर्वज्ञ इति श्रुतकृतसमयसर्वज्ञसञ्ज्ञोपहितातिदेशवाक्यस्योपमातुस्तादृक्पुरुषविशेषदर्शनेन साधर्म्यज्ञानात्समयग्रहणं स्यात्, उपमानोपमेययोरुभयोरप्यतीन्द्रियत्वेनोपमानविषयस्यैवाभावात्, कथं तस्मादपि तत्सिद्धिः । नाप्यर्थापत्तितः, सा हि दृष्टः श्रुतो वाऽर्थोऽन्यथानोपपद्यत इत्यर्थान्तरकल्पना, यथा जीवतो देवदत्तस्य प्रत्यक्षानुपलम्भाद्गृहा-भावदर्शनमन्यथा नोपपद्यत इत्यर्थान्तरस्य बहिर्भावस्यादृष्टस्य कल्पना यथोक्तम्–''**प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवन् । अदृष्टं कल्पयेदर्थं, साऽर्थापत्तिरुदाहृता ॥१॥**'' न चात्र सर्वज्ञं विना दृष्टादिः कश्चिदर्थो नोपपद्यते येनासौ तदुपपत्तये साध्येत, अभावप्रमाणेन तु तस्याभाव एव साध्यत इति सर्वज्ञवादः परेषां न सङ्गत इति चेन्न, यत्तावदुक्तमतीन्द्रियेऽर्थे

इन्द्रियव्यापाराभावान्न प्रत्यक्षेण सर्वज्ञः साक्षात्क्रियत इति तदाधुनिकप्रत्यक्षापेक्षया सिद्धसाधनं, यत्पुनरुक्तं सम्बद्धं वर्त्तमानं चेत्यादि तत्र किं संबद्धं गृह्यत एव, उत संबद्धमेव गृह्यते, नाद्यः, अनवहितचेतसेन्द्रियसम्बद्धस्यापि योग्यस्याप्यर्थस्याग्रहणात्, न द्वितीयः, तादृगञ्जनादिसंस्कृतचक्षुषा व्यवहितस्यापि भूनिखातनिध्यादेर्दर्शनात्, अथ स्फटिकाभ्रपटलादिव्यवहितस्येवार्थस्य संस्कारकद्रव्यमहिम्ना कथञ्चित्तत्राप्यस्तीन्द्रियसम्बन्धोऽन्यथाऽन्धस्यापि संस्कृतलोचनस्य तद्दर्शनप्रसङ्गादिति चेन्न, भवत्वसौ यत्र विस्फारिताक्षो द्रष्टा निध्यादिकं पश्यति, यत्र तु तादृगपि निबिडपट्टपिहिततनयनस्तदीक्षते तत्र का गतिः ? दृश्यं प्रत्यन्धपिहिताक्षयोरुभयोरपीन्द्रियसम्बन्धाभावाविशेषात् अथात्रापि भूम्यादिवदेव व्यवधायकेनापि पट्टादिना संस्कारकसचिवतया चक्षुषो दर्शनशक्तेरप्रतीघातेन कथञ्चित्सम्बन्धान्निध्यादिदर्शनं भविष्यतीति चेत्तर्हि मन्त्राद्युपगृहीतकुमारितकादिनयनेनेन्द्रिय–सम्बन्धाभावेऽपि देशकालविप्रकृष्टानामर्थानां प्रदीपादौ प्रत्यक्षेण ग्रहणादिति परिहारोऽस्तु, नापि वर्त्तमानमेव गृह्यते प्रत्यभिज्ञानप्रत्यक्षेण स एवायं यो मया प्राग् दृष्ट इत्याकारेणातीतावस्थाविशिष्टस्याप्यर्थस्य ग्रहणात्, एवमनभ्युपगमे प्रत्यभिज्ञानाभावप्रसङ्गात्, न च विशेष्यस्यैव तत्र ग्रहणं न विशेषणस्येति साम्प्रतं, विशेषणग्रहणं विना विशेष्यबुद्धेरनुदयात्, न हि कुण्डलाग्रहणे कुण्डलीति बुद्धिः, यत्पुनः स्वर्गापूर्वेत्यादिप्रयोगेऽन्यथासिद्ध्युद्भावनं तदपि न युक्तम्, औपपाधिकसम्बंधवान् हि हेतुरन्यथासिद्ध उच्यते, न चेन्द्रियसंनिकर्षवत्त्वस्योपाधित्वं युज्यते तल्लक्षणायोगात्, इन्द्रियसन्निकर्षवत्त्वं हि यथा साधनं प्रमेयत्वं न व्याप्नोति, तथा साध्यमपि कस्यचित् प्रत्यक्षत्वं न व्याप्नोति, नहि यत्प्रत्यक्षं तदिन्द्रियसन्निकर्षवदिति व्याप्तिरस्ति, अङ्गुष्ठादिविद्यासंस्कृतलोचन–स्येन्द्रियसन्निकर्षाभावेऽप्यतद्देशातत्कालानामप्यर्थानां प्रत्यक्षत्वात्, श्वो मे भ्राताऽऽगन्तेत्यादि प्रातिभज्ञानवतोऽपि च तत्सन्निकर्ष विनाऽपि भ्रात्रागमनाद्यर्थस्य प्रत्यक्षत्वात्, साध्यव्यापका चोपाधिर्गीयते, तस्मात् प्रमेयत्वस्य हेतोः कस्यचित्प्रत्यक्षत्वे साध्ये इन्द्रियसन्निकर्षवत्त्वं नोपाधिः ननु प्रमेयत्वेऽपि स्वर्गादीनां कस्यचित् प्रत्यक्षत्वं न भविष्यति विपर्यये बाधकाभावात्, नहि? प्रमेयत्वकस्यचित्प्रत्यक्षत्वयोर्व्याप्यव्यापकभाव इति चेत् न, विकल्पानुपपत्तेः, तथा हि किमिदं 
प्रमेयत्वं किं साक्षात्कारिप्रभाविषयत्वम् ? आहो शाब्दप्रमाविषयत्वम् उतानुमितिप्रमाविषयत्वं ? न प्रथमः, व्याघातात्, को हि

न्यायविदुरः साक्षात्कारिप्रमाविषयाश्च स्वर्गादयो नच कस्यचित्प्रत्यक्षा इति वक्तुमर्हति, न द्वितीयः, शाब्दप्रमाविषयाणामपि रूपादीनां चाक्षुषादिप्रमागोचरत्वात्, न तृतीयः, किं कतिपयानामेवानुमितिविषयत्वं सर्वेषां वा ? नाद्यः, कतिपयास्मदाद्यनुमिति–विषयत्वेऽपि पर्वताऽग्न्यादेः केषाञ्चित् प्रत्यक्षत्वात्, न द्वितीयः, तथात्वे स्वर्गादीनां प्रमेयत्वव्याकोपात्, प्रमीयते–यथावन्निखिलगुणपर्यायादिमत्तया सकलपदार्थान्तरव्यावृत्ततया च परिच्छिद्यत इति प्रमेयमिति व्युत्पत्तेः, न च सर्वानुमितिविषयत्वे स्वर्गादेर्यथावत्परिच्छेद्यत्वं संभवः, अनुमानेन सामान्यरूपतयैव पदार्थानां परिच्छेदात्, न हि चक्षुरादिनेव धूमदर्शनेनापि तार्णाद्यशेषविशेषवत्तया वह्नेः प्रतीतिः, एव रूपं च प्रमेयत्वं तत्तात्पर्यवृत्त्या साध्यं, ‘‘**सर्वज्ञत्वं च दूरं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु । प्रमाणं दूरदर्शी चेदेतद्गृध्रानुपास्महे ॥१॥**’’ इत्यादि सोत्प्रासं वचः सर्वज्ञवादिनः प्रति व्याहरद्भिर्मीमांसकैरप्यनक्षरं स्वीकृतमेव, अत्र ह्यात्मादितत्त्वस्य प्रमेयत्वरूपं साक्षाद्दर्शनं मुमुक्षूणां विधेयतयोपदिष्टं, न चैतदात्मादेस्त्रैलोक्यवर्त्तिसकलपदार्थव्यावृत्तता साक्षात्कारं विना, सोऽपि च न निःशेषपदार्थप्रत्यक्षतामन्तरेणोदेतुमर्हति, न च सकलार्थसार्थानां यथावत्संवेदनं विनाऽन्यत्सर्वज्ञत्वं नाम, सर्वानुमेयत्वाभ्युपगमे च स्वर्वादीनामौपचारिकमेव प्रमेयत्वं स्यात्, अस्त्वौपचारिकमेव तदिति चेत् न, मुख्याभावे क्वचिदपि तस्याप्रवृत्तेः, ननु घटादिष्वस्मदादिप्रत्यक्षेण मुख्यप्रमेयत्वग्रहणात् स्वर्गादिष्वौपचारिकमपि तदुपपत्स्यते, तथा च न तेन साध्यस्य कस्यचित्प्रत्यक्षत्वस्य सिद्धिः, वास्तवेनैव तेन तस्य संभावनाविषयत्वादिति चेन्न, असर्ववित्प्रत्यक्षेणैकस्यापि वस्तुनः सकलधर्मवत्तया वास्तवप्रमेयत्वस्य ग्रहीतुमशक्यरूपत्वात्, नन्वेवं रूपस्य प्रमेयत्वस्य घटादावस्मदादीनामसिद्धत्वात्, दृष्टान्तस्य साधनविकलत्वापादकतया कथमस्य हेतुत्वम् ? इति चेन्न, सामान्यरूपतया सिद्धत्वात्, तस्यैव च सर्वानुमानेषु व्याप्तिविषयतया हेतुत्वेनोपन्यासात्, अन्यथा यदा वैशेषिकादिर्मीमांसकं प्रति विशेषस्य शब्दवाच्यतां साधयन् ब्रूते विशेषोऽभिधेयः प्रमेयत्वात् सामान्यविशेषवदिति, तदा प्रमेयत्वाद्विशेषाभिधेयता न सिध्येत्, अन्यद्धि दृष्टान्तधर्मिण्यतीन्द्रिये कर्मत्वादौ प्रमेयत्वम्, अन्यच्च साध्यधर्मिणि ऐन्द्रियके गवादौ विशेषे, यदि चात्र 
प्रमेयत्वसामान्यस्य हेतुत्वं तदा प्रकृतेऽपि तत्समानम्, अपि च साध्यगतात्प्रमेयत्वा् दृष्टान्तगतस्य प्रमेयत्वस्यान्याद्दृशदर्शनेन

दृष्टान्ते हेतोरसिद्धत्वाद्यापादनेन प्रत्यवस्थाने भवतः वर्णावर्ण्यसमयोरन्यतरापातात्, तथाहि साध्यगतस्य प्रमेयत्वस्य यदि हेतुत्वमभिमतं तदा पक्षवद्दृष्टान्तोऽपि साध्यः स्यादितिवर्ण्यसमः, दृष्टान्तगतस्य वा तस्य चैद्धेतुत्वं विवक्षितं तदा दृष्टान्तवत्पक्षोऽप्यसाध्यः स्यादित्यवर्ण्यसमः, तस्मात्साध्यदृष्टान्तयोः प्रमेयत्वस्यान्यादृशत्वेऽपि प्रमेयत्वसामान्यस्य हेतुत्वे न कश्चिद्दोषः, तदेवं प्रमेयत्वस्य कस्यचित्प्रत्यक्षत्वेनानौपाधिकसम्बन्धसिद्धेर्यदि स्वर्गादयः कस्यचित्प्रयक्षा न भवेयुस्तदा प्रमेया अपि न स्युरिति तर्कसहायेन तेन तेषां कस्यचित् प्रत्यक्षत्वसिद्ध्या सर्वज्ञसिद्धिः, यस्यैव ते प्रत्यक्षास्तस्यैव सर्वज्ञशब्दवाच्यत्वात्, अपि च यथाऽस्मदादीनामतीन्द्रियार्थदर्शनाभावेऽपि कुतश्चिन्निमित्तादुद्बुद्धप्राग्भवीयसंस्कारणां जातिस्मरादीनां तद्दर्शनं, तथा योगजधर्मानुग्रहाच्छुक्लध्यानोदयेन सकलावरणविगमादभिव्यक्तनैसर्गिकनित्यज्ञानः कश्चिद्देशकालस्वभावव्यवहितानपि पदार्थान् द्रक्ष्यति को विरोधः, जातिस्मरादीनां च भवताऽप्यभ्युपगमात्, यदपि शब्दादपि न तत्सिद्धिरिति प्रत्यपादि, तदपि न सम्यक् केयं, सिद्धिर्यन्निपेधः सर्वज्ञस्याऽऽपाद्यते, किं निष्पत्तिः प्रतीतिर्वा ? नाद्यः, शब्दप्रतिपादितयमनियमादियोगाभ्यासासादितपरम-समाधेर्योगिनो घातिकर्मचतुष्कक्षयेण सर्वज्ञत्वनिष्पत्तेः, न द्वितीयः, शब्दं विना सर्वज्ञविरहिण्यधुनातनकाले एवं धर्मकः सर्वज्ञ इति प्रतीतेरनुपपत्तेः तस्मादुभयथाऽपि शब्दात्सर्वज्ञसिद्धिः, न च चक्रकादिदोषप्रसङ्गः, स्वप्रणीतादन्यप्रणीताद्वा शब्दात्सिद्ध्य-भ्युपगमेऽसौ स्यात्, न चैवमत्र पूर्वपूर्वतरसर्वज्ञविरचितागमादुत्तरोत्तरेषां तत्तत्कुशलक्रियाक्रमेण सर्वज्ञत्वसिद्धेरभ्युपगमात्, न चैवमनवस्थापातः, सर्वज्ञानां तदागमानां च बीजाङ्कुरवदनादित्वाभ्युपगमात्, नाप्युपमानात्तदसिद्धिः, न खल्वगृहीतसमयसञ्ज्ञादिविशेषणान्वितं साधर्म्यज्ञानमेवोपमानं, येनातिदेश्याभावेनोपमानात्तत्सिद्धिर्न स्यात्, यावता यदा केनचित्कुतश्चित्सर्वज्ञप्रवादं निशम्य श्रुतपारदृश्वा स्वीकृतागमप्रामाण्यः कश्चित्क्वचित् कीदृक् सर्वज्ञः ? इति पृष्टः प्राह–कथमहं समूलकाषंकपितरागादिदोषजालं ज्ञानादिभिर्गुणैः सर्वातिशायिनं भूतभविष्यद्वर्त्तमानसमस्तवस्तुसाक्षात्कारदीक्षितं सत्तमं निखिलमनुजानां सर्वज्ञं वर्णयितुं शक्नोमीति, एतदाकर्ण्य प्रष्टा कदाचिद्देशान्तरं गतस्तादृशमेव इतरविलक्षणं पुरुषमवलोक्य नूनमसौ सर्वज्ञ इति प्रत्येति, तदा वैधर्म्यज्ञानमेव तस्योपमानं तस्मादेवाकृतसमयसर्वज्ञसञ्ज्ञासञ्ज्ञिसम्बन्धप्रतिपत्तेः, अन्यत्रैवं

न दृष्टमिति चेन्न, यदा हि कीदृक् करभः ? इति दाक्षिणात्येनानुयुक्त उदीच्यः करभं निन्दन् धिक् करभं लम्बग्रीवं दीर्घजङ्घं कठोरकण्ठकाशिनमपशदं पशूनामित्यादि ब्रूते, तन्निशम्य च दाक्षिणात्य उत्तरापथं गतस्तादृशं पिण्डं निरीक्ष्य नूनमयं करभ इति निश्चिनोति, तदा वैधर्म्यज्ञाननैवास्य करभसञ्ज्ञासमयग्रह इत्यादिवैधर्म्योपमानोदाहरणस्यान्यत्रापि दर्शनात्, साधर्म्यग्रहणस्य च धर्ममात्रोपलक्षणत्वेन नाव्याप्तिर्लक्षणदोषः, ननु तादृक्पुरुषविशेषस्य क्वचिदप्यनुपलम्भात् कथं वैधर्म्योपमानादपि तत्सिद्धिः ? इति चेन्न, किं सर्वेषामनुपलम्भो भवतो वा ? नाद्यः, तस्य सन्दिग्धत्वात्, न द्वितीयः, तस्यानुपलब्धपितृकेण भवतैव व्यभिचारात्, तथा च पठ्यते–"**सर्वादृष्टेश्च सन्देहात्, स्वादृष्टेर्व्यभिचारतः**" इति, यद्वाऽतिदेश्याभावेनोपमानोपमेयभावा–भावान्नोपमानात्तत्सिद्धिरिति यदुक्तं–**तत्तस्य भूषणमेव न दूषणं** यतः-"**अनन्यसाधारणगौरवश्रीर्न केवलं मेरुरिवात्र मेरुः । यावत्तमप्यन्वहमुद्वहन्ती वसुन्धरा भाति वसुन्धरेव ॥१॥**" इत्यादिवत्सर्वातिशायित्वेन सकलोपमानातिवृत्ततया तस्य भगवतोऽनन्वयालङ्कारविषयत्वात्, यदपि नार्थापत्तितस्तत्सिद्धिरित्यादि तदप्ययुक्तं, सर्वज्ञं विनाऽऽगमप्रामाण्यलक्षणोऽर्थो नोपपद्येत, तथा च तदुक्तक्रियास्वनाश्वासेन कस्यचित्तत्राप्रवृत्त्याऽन्धमूकं जगत् स्यात्, न चापौरुषेयत्वात्तत्प्रामाण्यमुत्पत्स्यत इति वाच्यं, तस्य प्रागेवापास्तत्वात्, तस्मात्तत्प्रामाण्यन्यथाऽनुपपत्त्या, तत्सिदद्धिरुपपन्ना यदि वा निर्विषयत्वान्नार्थोपत्तिः प्रमाणं तेन न तदधीने सर्वज्ञसिद्द्ध्यसिद्धी चिन्तामर्हतः, तथा हि विरुद्धयोः प्रमाणयोः स्वस्वविषयस्थापनेनाविरोधापादक–तयाऽर्थापत्तेः प्रामाण्यमिष्यते तद्वादिभिः यथा जीवतश्चैत्रस्य तावदभावप्रमाणेन गृहेऽभावो गृह्यते, अनुमानेन तु जीवन् क्वचिदस्तीत्यनिर्द्धारितविषयतयाप्रवर्त्तमानेन तत्र चैत्रस्य सत्त्वमप्युपनीयते, तदनयोः प्रमाणयोः सत्त्वासत्त्वलक्षणविरुद्धार्थोप–स्थापकतयैकस्मिन् विषये प्रवर्त्तमानयोर्विरोधोऽर्थापत्त्याऽनुमानस्य बहिर्भावलक्षणविषयान्तरव्यवस्थापनेनापास्यत इति जैमिनीया अर्थापत्तेः प्रामाण्यं वर्णयन्ति, तदेतदयुक्तं, कथं प्रमाणयोर्विरोधः समसमयतया तुल्यबलत्वेनैकस्मिन् विषये विरुद्धधर्मोपनायकत्वादिति चेन्न, जीवंश्चैत्रो गृहे नास्तीति गृहाभावग्राहकस्य प्रमाणस्य प्रवृत्त्यनन्तरं जीवता क्वचिद्भाव्यमिति सामान्यविषयतया गृहसत्त्वोपनायकस्यानुमानस्य प्रवृत्तेः, समसमयत्वाभावात्, तथा च नैश्चयिकतया गृहाभावनिश्चायकेन

प्राक् प्रवृत्तेन चाऽभावप्रमाणेन संदिग्धं गृहसत्त्वमुपनयतः पश्चात्प्रवृत्तस्य चानुमानस्य कथं विरोधः ? तुल्यबलयोरेव तद्भावात्, निश्चायकत्वेन चाभावप्रमाणस्य बलीयस्त्वात्, अनुमानस्य च तैनेव स्वविषयत्याजनेन बहिरेव व्यवस्थापितत्वात्, न च तदुपनीतयोः सत्त्वासत्त्वयोर्धर्मयोरपि विरोधः यथा क्रमं सन्दिग्धनिश्चिततया तयोस्तदसम्भवात्, एवं चानयोर्विरोधाभावात् कथं तदविरोधापादनेनार्थापत्तेः साफल्यं स्यात्, अथ महाविषयत्वेनाव्याहतप्रवृत्तितयाऽनुमानमभावप्रमाणविषयमपि व्याप्नोति, न चैकस्मिन् धर्मिणि विरुद्धधर्म्मसंसर्गः संभवति, ततोऽर्थापत्त्या प्रतिनियतविषयव्यवस्थापनेन तयोरविरोध आपाद्यत एवेति तस्याः सार्थकत्वमिति चेन्न, बहिःसत्त्वग्रहे सावकाशतया गृहसत्त्वोपनाकस्यानुमानस्य गृहासत्त्वग्रहं विना निरवकाशत्वेन बलवत्तयाऽभावप्रमाणेन बाधात्, सावकाशानवकाशयोरनवकाशो विधिर्बलीयानिति न्यायात्, एवं च निर्विषयत्वादर्थापत्तेः क्वार्थवत्त्वं? भवतु वा कथञ्चित् तथाऽप्यनुमानलक्षणेनाघ्रातत्वादनुमानमेवेयं, तथा हि—साध्याविनाभाविनो लिङ्गात्साध्यनिश्चायकमनुमान-मित्यनुमानस्य, दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यर्थान्तरकल्पनेति चाऽर्थापत्तेर्लक्षणम्, अत्र चाविनाभावान्यथानुपपत्तिशब्द-योरर्थान्तरस्यापि चार्थापत्तिकल्पनीयस्य साध्यत्वात्साध्यार्थान्तरशब्दयोरपि पर्यायत्वेनानुमानलक्षणादर्थापत्तिलक्षणस्याभेद इत्यनुमानादर्थापत्तेरभेदः, एवं च जीवतश्चैत्रस्य दृष्टो गृहाभावो लिङ्गं, स चान्यथा बहिर्भावलिङ्गिनं विनाऽनुपपद्यमानोऽर्थान्तरं बहिर्भावं कल्पयति—गमयतीति जीवतो गृहाभावेन लिङ्गेनान्यथाऽनुपपद्यमानेन व्याप्तिग्रहपुरस्सरं बहिर्भावकल्पनमनुमानमेव, तथा च प्रयोगः—जीवंश्चैत्रो बहिरस्ति जीवनवत्त्वे सति गृहेऽनुपलभ्यमानत्वादहमिव, अत्र चानुमाता गृहबहिरवस्थितः सकलं गृहमवलोकयन्नात्मानमुदाहरणीकरोति, जीवतो गृहाभावबहिर्भावयोश्च कृतकत्वानित्यत्ववत्समव्याप्तिकत्वाद्विपर्ययेणापि प्रयोगो द्रष्टव्यः, अत एव लिङ्गवचनस्य हेतोरन्यथाऽनुपपत्तिमेव लक्षणं पूर्वसूरयः प्राहुः, अन्यथाऽनुपपन्नत्वं हेतोर्लक्षणमीरितं तथा—

**“अन्यथाऽनुपपन्नत्वं, यत्र तत्र त्रयेण किम् । नान्यथाऽनुपपन्नत्वं, यत्र तत्र त्रयेण किम् ॥१॥”** प्रसिद्धानुमानेऽपि च दृष्टः श्रुतो वा पर्वतादौ धूमोऽग्निं विनाऽनुपपद्यमानोऽर्थान्तरमग्निं कल्यतीत्यर्थापत्तिलक्षणस्यानुमानलक्षणादभेदप्रतीतेर्नार्थापत्तिः पृथक्प्रमाणं, तदेवमनुमानादिभिः प्रमाणैः सर्वज्ञसिद्धेस्तदभावसाधनमभावप्रमाणं परस्य निरवकाशमेव, ननु विवादाध्यासितः

पुरुषः सर्वज्ञो न भवति वक्तृत्वाद्, रथ्यपुरुषवदित्यनुमानात् सर्वज्ञाभावः सेत्स्यतीति चेन्न, विवादाध्यासितः पुरुषः सिद्धो नवा? सिद्धश्चेत्तदा तस्य सर्वज्ञत्वेनैव सिद्धेः, परमाणुः सावयवो मूर्त्तत्वादितिवद्धर्मिग्राहकप्रमाणबाधः, न चेत्सिद्धस्तदाऽऽश्रयासिद्धो हेतुः, तथा सर्वज्ञो न भवतीति साध्ये किं सर्वज्ञतायाः प्रागभावो विवक्षितः ? आहो प्रध्वंसः ? उतान्योन्याभावः ? अत्यन्ताऽभावो वा ? नाद्यः, गर्भादिषु सर्वज्ञतायाः प्रागभावस्यास्माभिरप्यभ्युपगमात्, कालान्तरे तत्सिद्धिप्रसङ्गाच्च, न द्वितीयः, ज्ञानावरणकर्मविगमजन्मनः शश्वत्सकलपदार्थावभासिनित्यज्ञानवत्तालक्षणायास्तस्याः प्रध्वंसासिद्धेः, न तृतीयः, तस्य प्रतियोगिनिरूपणाधीननिरूपणतया प्रतियोगिसर्वज्ञानभ्युपगमे तदात्मकतानिषेधस्य विवादाध्यासिते कर्त्तुमशक्यत्वात्, न खलु घटः पटो न भवतीत्यादौ पटाप्रतीतौ तत्तादात्म्यनिषेधो घटे कथञ्चित्सङ्गच्छते, प्रतियोगिसर्वज्ञनिरूपणे वा सिद्धं नः समीहितं, न चतुर्थः, सह्यसर्वज्ञत्ववक्तृत्वयोः कार्यकारणभावाद्वा, तादात्म्याद्वा, सपक्षे भूयो दर्शनाद्वा, न प्रथमः सहि धूमाग्न्योरिव तयोरन्वयव्यतिरेकाभ्यामवसीयेत, न चात्राग्नेररिव धूमोऽसर्वज्ञत्वस्यान्वयव्यतिरेकावनुविधत्ते वक्तृत्वं, विवक्षापूर्वकताल्वादिसंयोगा–न्वयव्यतिरेकानुविधायित्वा, न चोत्स्वप्नायितोन्मदादिमतां विवक्षां विनाऽपि वक्तृत्वदर्शनात् न तदनुविधायित्वं तस्येति वाच्यं, जागरावस्थाभाव्यभ्यासतज्जनितसंस्कारपाटवादिनाऽस्पष्टप्रतिभासतया ज्ञानविवक्षाप्रयत्नानां तेषामपि सम्भवात्, अन्यथा प्रयत्नं विना कोष्ठ्यवायुताल्वादिसंयोगाभावेन वर्णाद्युच्चारणानुपपत्तेः, ज्ञानादीनां च यथोत्तरं पूर्वस्य पूर्वस्य कार्यकारणभावनियमात्, उत्स्वप्नादिष्वस्पष्टज्ञानाद्यनभ्युपगमे च पूर्वाभ्यस्तानामेव वर्णानामुच्चारणनियमाभावप्रसङ्गात्, तन्नान्वयेनासर्वज्ञत्ववक्तृत्वयोः कार्यकारणभावावसायः, व्यतिरेकस्तु सर्वज्ञानभ्युपगमे न संभवत्येवेति कथं ततस्तदवसायः स्यात् ?, न द्वितीयः, वृक्षत्वशिंशपात्वयोरिवासर्वज्ञत्ववचनकर्तृत्वयोस्तादात्म्याप्रतीतेः, तयोः प्रतिनियतसामग्रीप्रभवत्वात्, न तृतीयः सहस्रशः सवत्सगवीदर्शनेऽपि व्यभिचारोपलम्भात् अन्यथा वज्रं–लोहलेख्यं पार्थिवत्वादित्यनुमानं सिद्धिमासादयेत्, भूयोदर्शनाविशेषात्, तस्मात्सर्वज्ञात्यन्ताभावोऽपि साध्यार्थो न सङ्गच्छते, वक्तृत्वादिति च हेतोः, किं भूतभविष्यदादिगोचराविसंवादिवचनकर्तृत्वं वक्तृत्वमभिमतं तद्विपरीतं वा, आद्ये एवंरूपवक्तृत्वस्य सर्वज्ञताव्याप्तत्वाद्विरुद्धो हेतुः, द्वितीये सिद्धसाधनं विसंवादिवचोवक्तृरसर्वज्ञत्वेन

सर्वैरपीष्टत्वात्, रथ्यापुरुषवदिति दृष्टान्तोऽपि व्याप्त्यनिश्चयादन्यथासिद्धो हेतुः, नहि रथ्यापुरुषो वक्तृत्वादसर्वज्ञः किन्तु रागादिमत्त्वात्, प्रकृतश्च पुरुषो वक्तृत्वेऽपि रागादिमत्वाभावात्सर्वज्ञोऽपि भविष्यति को दोषः ? न च यो वक्ता स रागादिमानिति साधनव्यापकत्वान्नास्योपाधित्वमिति वक्तव्यं, तथात्वे भवद्गुरोर्जैमिनेरपि रागादिमत्त्वापत्तेः, आपद्यतामिति चेन्न, तथात्वे हि तत्कृतवेदव्याख्यायामनाश्वासेन तदुक्तक्रियाकाण्डे भवतां प्रवृत्त्यनुपपत्तेः, तथा चानिर्मोक्षप्रसङ्गः, किञ्च किमयं हेतुरन्वयी, अन्वयव्यतिरेकी वा ? न प्रथमः, भवदभिप्रायेणासद्विपक्षत्वेऽप्युक्तन्यायेनाप्रयोजकतया सपक्षेऽन्वयानिश्चयात्, न द्वितीयः, विपक्षस्य सर्वज्ञस्यात्यन्ता–सत्वाभ्युपगमेन भवतः शशविषाणादिवत्तस्माद् व्यतिरेकासिद्धेः, तन्न वक्तृत्वाद्धेतोः सर्वज्ञाभावसिद्धिः, एवं च तदभावसाधकप्रमाणव्युदासेन सिद्धः सर्वज्ञः, तज्ज्ञानं च न चक्षुरादिजन्यं सर्वविषयत्वात्, चक्षुरादीनां च प्रतिनियतरूपादिग्राहकत्वेन तदसिद्धेः, मन्त्रादिसंस्कारादस्मदादिचक्षुरादीनां व्यवहिताद्यर्थग्रहणवदचिन्त्यपुण्यसम्भारात्सर्वज्ञचक्षुरादीनां कथञ्चित्सर्वग्राहकत्वाभ्युपगमेऽपि तेषामनित्यत्वेन विनाशे तज्जन्यसर्वविषयज्ञानस्यापि तत्प्रसङ्गात्, न चैतदेवं शरीरेन्द्रियादिनिर्मुक्तानां मुक्तानामपि तस्येष्यमाणत्वात्, नापि लैङ्गिकं तत् तादृग्लिङ्गाभावात्, भावे वा क्रमयौगपद्यविकल्पानुपपत्तेः क्रमेण तावत्पदार्थाना–मानन्त्येन लिङ्गात्तदनुमितेः कर्त्तुमशक्यत्वात्, यौगपद्येन च तदनुमित्यभ्युगमे आनुमानिकज्ञानस्य सामान्यमात्रगोचरत्वेन तद्रूपस्य सर्वज्ञज्ञानस्यापि निखिलपदार्थधर्मग्राहकत्वं न स्यात् अनुमानस्यैवं स्वभावत्वात्, भावनाभ्यासात्तु सर्वज्ञलैङ्गिकज्ञानस्य सकलधर्मग्रहणाङ्गीकारे सञ्ज्ञाऽन्तरेण तस्य साक्षात्कारित्वमभ्युपगतं भवेत्, नापि शाब्दं तत् तदा ह्यभिलाप्यानां भावानामनन्ततमभागस्यैव तेन ग्रहणं स्यात्, तस्यैव श्रुतनिबन्धेन तज्जन्यतज्ज्ञानविषयत्वात्, तथा चोक्तम्–''**पण्णवणिज्जा भावा अणंतभागो उ अणभिलप्पाणं । पन्नवणिज्जाणं पुण अणंतभागो सुयनिबद्धो ।।१।।**''

नन्वनभिलाप्यानामभिलाप्यानामप्यनन्तानां तेषां श्रुतानिबन्धेन तदविषयत्वात्, तदग्रहणाभ्युपगमे वा सर्वज्ञत्वहानेः तस्मादिन्द्रियलिङ्गशब्दजन्यं तज्ज्ञानं नित्यं सर्वविषयं नैश्चयिकप्रत्यक्षं वाऽभ्युपगन्तव्यं, नन्वेवमात्मनो नित्यज्ञानरूपत्वेनास्मदादिज्ञानस्यापि नित्यत्वाविशेषात्सर्वविषयत्वप्रसङ्ग इति चेन्न, तदावरणापगमानपगमाभ्यां विशेषात्, दृश्यते

हि पटलाद्यावरणानावरणाभ्यां चक्षुषः स्वविषयग्रहणं प्रति विशेषस्तद्वदिहापि भविष्यति, अमूर्त्तेनावारककर्मणा कथममूर्त्तस्य ज्ञानस्यावरणं ? तथात्वे वाऽऽकाशेनापि तस्यावरणं स्यात् ? इति चेन्न, कर्म्मणः पौद्गलिकत्वेनामूर्त्तत्वासिद्धेः, तथा च प्रयोगः— सर्वविषयग्राहकज्ञानस्वभावस्यात्मनः स्वविषयाग्रहं विशिष्टावारकद्रव्यसम्बन्धपूर्वकं तत्स्वभावस्य सतस्तस्य स्वविषयाग्रहणत्वात्, यदेवं तदेवं यथा स्वविषयग्रणणस्वभावस्य चक्षुणस्तदग्रहणं पटलाद्यावारकद्रव्यसम्बन्धपूर्वकं तथा चेदं तस्मात्तथेति, यच्च तदावारकं द्रव्यं तज्ज्ञानावरणं कर्मेति, तथाऽपि मूर्त्तेनापि कथं तस्यावरणं ? वस्त्रशरीराद्यावरणेऽपि ज्ञानानुदयप्रसङ्गादिति चेन्न विषोपयोगेन मूर्च्छितस्य चैतन्यहानोपलब्धेः, वस्त्रादेस्तु बाह्यतया साक्षादात्माऽसम्बन्धेन शरीरादेश्च साक्षात्तत्सम्बन्धेऽपि ज्ञानाभिव्यक्तिकारणतया तदावारकत्वायोगात्, तथाऽपि कथमनादिसहचारिणस्तस्यात्यन्तिको विगम इति चेन्न, तादृग्भावनाप्रबन्धात्काञ्चनमलस्येव वह्नयादिसंयोगात्तस्य तदुपपत्तेः, नहि प्रवाहतोऽनाद्यपि तन्नित्यं निर्हेतुकं येन तस्य विगमो न भवेत्, विगतमपि वा हेतुमन्तरेणापि पुनः प्रादुर्भवेत्,तद्धेतूनां मिथ्याज्ञानरागादीनां तन्निरासहेतूनां च सम्यग्ज्ञान— वैराग्यादीनामविगानेन सर्ववादिनां प्रसिद्धेः, तथा च सम्यग्ज्ञानाद्यभ्यासान्मिथ्याज्ञानाद्यपगमेन ज्ञानावरणादिप्रध्वंसात्परमप्रकर्षप्राप्तं लोकालोकावभासकं केवलज्ञानमभ्युदेति,नन्वभ्यासादिनाऽपि कथं सर्वज्ञज्ञानस्य परमप्रकर्षावाप्तिर्लङ्घनादावभ्यासादपि तथाऽनुपलम्भात्, न खलु सुशिक्षितोऽपि कश्चित्सकलमपि गगनमण्डलं लङ्घयितुमलमिति चेन्न, न खल्वभ्यासात्तज्ज्ञानस्य परमप्रकर्षः किन्तु मानससम्यग्ज्ञानध्यानाभ्यासातिशयात्क्रमेण ज्ञानावरणादिप्रध्वंसेन प्रबलपवनयोगाद् घनपटलाद्यावरणापगमेन सूर्यमण्डलमिव सदेव तदभिव्यज्यते, ननु मानसचाक्षुषादिज्ञानवदसदुत्पद्यते अत एव स्वभावतः सकलार्थग्राहिनित्यज्ञानवतोऽप्यात्मनः संसार्यवस्थायां नियतार्थग्राहकानित्यज्ञानोत्पादस्तदावरणक्षयोपशमशरीरन्द्रियादिसम्बन्धनिबन्धन एव, कुतः पुनः स्वरूपेणात्मनो नित्यज्ञानसिद्धिरिति चेत्तत्स्वभावत्वात्, तथा च प्रयोगः—आत्मा स्वरूपेण शश्वज्ज्ञानवान् तत्स्वभावत्वात्, यो यत्स्वभावः स शश्वत्तद्वान् यथोष्णस्वभावो वह्निः शश्वदौष्ण्यवान्, ज्ञानस्वभावश्चात्मा तस्मात्सोऽपि शश्वत्तद्वानिति, न च कथं स्वेनैव स्वभावेनासौ तद्वानिति वाच्यम्, आत्मनः कथञ्चिज्ज्ञानस्य भेदात्तद्वत्तोपपत्तेः, आवरणयोगात्तु संसार्यात्मनां सदपि तत्तथा न प्रकाशते, न

चात्मनस्तत्स्वभावत्वमसिद्धमिति वाच्यम्, अतत्स्वभावत्वं ह्यात्मनो ज्ञानस्यानात्मधर्मत्वात्स्यात् आत्मनोऽत्यन्तभेदाद्वा ? न प्रथमः ज्ञानस्याचेतनधर्मतया प्रायः कैश्चिदप्यनभ्युपगमात्, अभ्युपगमे वा अहं जानामीत्यात्मवाचिनाऽहंशब्देन ज्ञानस्य सामानाधिकरण्यानुपपत्तेः, न द्वितीयः, तथात्वे ह्यात्मानो रूपादिभिरिव ज्ञानेनासम्बन्धापातात् अनभ्युपगमाच्च, नहि मीमांसकैरस्माभिर्वा गुणगुणिनोरत्यन्तभेद इष्यते, तयोर्भेदाभ्दाङ्गीकारात्, तथाचाभेदाभ्युपगमे कथं न तत्स्वभावत्वमात्मनः सिद्धचेद्, येऽपि च तयोरत्यन्तं भेदमिच्छन्ति तेषामपि कथमात्मना ज्ञानस्य सम्बन्धः भेदाविशेषाद्रूपादीनामपि तत्सम्बन्धप्रसङ्गात्, भेदाविशेषेऽपि समवायात्, ज्ञानस्यैव तत्सम्बन्धो न रूपादीनामिति चेत् न, तस्यापाकृतत्वात् आस्तां वा तथाऽप्यसौ ज्ञानस्यात्मना शश्वद्वा स्यात् कदाचिद्वा, नाद्यः, सुषुप्तावस्थायां ज्ञानस्य प्रध्वंसेन भवता तदभावाभ्युपगमात्, भावे वा सुषुप्तत्वासम्भवात्, न द्वितीयः, समवायस्य नित्यत्वाभ्युपगमात्, अनभ्युपगमे द्रव्यस्य गुणसमवायं विना निर्गुणत्वापत्तेः, कदाचिदेकतरस्य सम्बन्धिनो ज्ञानस्योत्पादात् कादाचित्कत्वं तस्येति चेन्न, ज्ञानोत्पदात्प्राक् सुषुप्तादावात्मनो द्रव्यत्वाभावप्रसङ्गात्, निर्गुणस्य द्रव्यस्य कदाचिदप्यसम्भवात्, यदाह–''**द्रव्यं पर्यायवियुतं, पर्याया द्रव्यवर्जिताः । क्व कदा केन किं रूपा दृष्टा मानेन केन वा ॥१॥**''न च ज्ञानाभावेऽपि धर्माधर्मादिविशेषगुणवत्तया तदानीं तस्य द्रव्यत्वं भविष्यतीति वाच्यं, धर्मादीनां बुद्धिमदात्मपूर्वकत्वेन बुद्धिमत्त्वाभावे तेषामप्यभावप्रसङ्गेन तद्वत्तयाऽपि तस्य तदानीं द्रव्यत्वासिद्धेः, व्यापकव्यावृत्तौ व्याप्यव्यावृत्तेः सर्ववादिसिद्धत्वात्, सामान्यगुणैर्गुणवत्त्वेन तदानीमपि द्रव्यत्वसिद्धयभ्युपगमे वा तस्य दिक्कालसमानतापत्तेः, न चैवमस्त्वितिवाच्यं, तदानीमपि श्वासादिमत्तया तद्वैलक्षण्येन भवताऽपि तस्याभ्युपगमात् तस्मादात्मनि स्वभावसम्बद्धमेव ज्ञानमभ्युपेतव्यम्, एतेन यावद्द्रव्यभावित्वमपि ज्ञानस्य निरस्तं मन्तव्यं, तथात्वेहि स्वभावसम्बन्धानुपपत्तेः, मोपपादि किं नश्छिन्नं यावद्द्रव्यभावित्वे हि ज्ञानस्य सुषुप्तमूर्च्छितात्द्यवस्थानुपपत्तिप्रसङ्गात्, अचेतयन्नेव हि सुषुप्तो मूर्च्छितो वेति व्यपदिश्यते तस्मात्सुषुप्ताद्यवस्थायां ज्ञानोत्पादाभावेन न यावद्द्रव्यभावित्वं तस्येति चेत् न, तत्राप्यस्फुटाभतया ज्ञानोत्पादाभ्युपगमात्, अन्यथा जागराद्यवस्थायामाद्यज्ञानस्याकर्तृकत्वेनानुत्पादापत्तेः, ज्ञानं ह्यात्मकर्तृकमिष्यते, ज्ञानचिकीर्षाप्रयत्नादिशालिनश्चात्मनःकर्तृत्वं

गीयते, न च सुषुप्ताद्यवस्थायां भवता ज्ञानमभ्युपगम्यते,येन जागराद्यवस्थायामाद्यज्ञानं प्रत्यात्मनः कर्तृत्वं स्यात्, तथा च तदभावादुत्तरोत्तरज्ञानाभावेन निरीहं जगत् जायेत, सुषुप्ताद्यवस्थस्य ज्ञानानभ्युपगमे च सुप्तस्यापि स्वप्नज्ञानाभावप्रसङ्गात्, उभयोरपि अवस्थयोरविशेषात्, सुषुप्तादेरात्ममनःसंयोगाभावात् स्वप्नज्ञानसंभवेन सुप्तादेश्च तद्भावात् तत्संभवेन तयोर्विशेष इति चेत्, ननु सुषुप्तस्याऽऽत्ममनःसंयोगाभावः कुतस्त्यो येन तस्य स्वप्नज्ञानानुत्पादः, तदानीं हृत्पुण्डरीकोदरे निरिन्द्रियात्मप्रदेशे मनसो विलीनत्वात् शरीरावच्छिन्नेनात्मना संयोगाभाव इति चेत्, एवं तर्हि सुषुप्तस्य प्राणापानादिक्रियाणामपि अनुत्पादप्रसङ्गः, आत्ममनःसंयोगाभावात् प्रयत्नानुत्पादेन तदनुपपत्तेः, तस्मात् सुषुप्ताद्यवस्थायामपि प्राणापानादिदर्शनात् अस्फुटप्रतिभासतया ज्ञानादिसंभवात्, यावद् द्रव्यभावित्वं तस्येति । नन्वेवं सति सुखदुःखादीनामपि तद्विशेषगुणानां यावद् द्रव्यभावित्वेन सततमुत्पादः प्रसज्जेत, तथा च एकस्मिन्नेकदैव अयं सुखी दुःखी इत्यादि व्यवहारादयः प्रवर्त्तेरन्ः ? इति चेन्न, तेषां ज्ञानभेदत्वेन स्वसंवेद्यतयैव सुखादिव्यवहारादिकारणत्वात्, सुषुप्ताद्यवस्थायां तु प्रबलतरानुभवाभावात् तेषां न संवेद्यता, अत एव दुःखाभावस्यापि वेद्यतयैव पुरुषार्थता प्रवादो न स्वरूपेण, किं पुनर्विधिरूपतयाऽऽह्लादैकस्वभावतया च सकलपुरुषार्थमूर्द्धाभिषिक्तस्य सुखस्य, इतरथा स्रक्चन्दनाद्यहिकण्टकादिसामग्रीसन्निकर्षात् सुषुप्तमूर्च्छितादेरपि अहं सुखी इत्याद्यनुभवप्रसङ्गात्, तस्मात् यावद् द्रव्यभावित्वेपि सुखादीनां तत्तत्स्वकारणकलापेन उत्पादात् न शश्वत् तत्संवेदनापत्तिः । ननु तथापि यावद् द्रव्यभावित्वे ज्ञानस्य नीलं पश्यतः स्मरतो वा पुरुषस्य नीलज्ञानानुपरमेण विषयान्तरसंचारो न स्यात् ? इति चेत् न, नहि विवक्षितव्यक्तिरूपतया यावद् द्रव्यभावित्वं ब्रूमः, किन्तु सामान्यरूपतया, यथा ज्ञानजातीयं विना आत्मद्रव्यं कदाचिन्नास्ति ? नतु नीलज्ञानव्यक्तिनान्तरीयक आत्मा इत्युपगमो येन पीतादिविषयान्तरसंचाराभावो नोत्पद्येत, तस्मान्नासौ क्षणोऽस्ति यत्र तत्तदिन्द्रियार्थात्ममनःसंयोगाद् आत्मनि ज्ञानं नोत्पद्यते, सुषुप्तादीनां तु प्रबलमिद्धाद्युपहतान्तःकरणतया न स्पष्टत्वेन तदनुभवः, यद्येवं शब्दस्यापि आकाशविशेषगुणत्वेन ज्ञानवद् यावद् द्रव्यभावित्वप्रसङ्गः ? न चैवमस्ति सत्येव आश्रये शब्दस्य प्रध्वंसोपलम्भात् ? इति चेत् ॥१९७॥
न, शब्दस्य द्रव्यत्वेन आकाशगुणत्वासिद्धेः, यथा चैतत् तथा प्रागेव उपपादितं, तदेवम् उक्तन्यायेन आत्मनो ज्ञानस्य भेदाभावेन

कथंचित् तादात्म्यान्न तत्स्वभावत्वं हेतुरसिद्धः, एवमपि असिद्धौ आत्मनोऽपि असिद्धिप्रसङ्गात्, स्वभावाभावे भावस्यापि असत्त्वात्,तस्माच्छश्वज्ज्ञानवान् आत्मा, केवलं संसार्यवस्थायां प्रतिनियतेन्द्रियाद्युपाधिसम्बन्धात् प्रबलज्ञानावरणविगमाऽभावाच्च तज्ज्ञानं न सर्वविषयं, जीवन्मुक्ताद्यवस्थायां च सकलावरणविध्वंसात् सर्वविषयम् । ननु संसार्यवस्थायां प्रबलावरणतिमिरतिरोहितत्वाद् आत्मनश्चक्षुप इव प्रतिनियतविषयमपि ज्ञानं न प्राप्नोतीति चेत् ? न, निबिडजलदपटलीविलुप्तसूर्यचन्द्राल्पप्रकाशवत् तदुपपत्तेः, चक्षुषो हि अल्पविषयत्वेन अल्पत्वात् तिमिरादिना तदावरणेन तज्जन्यज्ञानस्य प्रतिबन्धो युज्यते, आत्मनस्तु महाविषयत्वेन महत्त्वात् भानुमण्डलवद् दीप्रप्रकाशमयत्वात् च कर्मपुद्गलैस्तदावरणेऽपि तज्ज्ञानस्य न सर्वथा प्रतिबन्धः, तदंशानां कियताम् अतिरोधानेन इन्द्रियादिद्वाराप्रतिभासात्, एवमनभ्युपगमे जीवस्य अभावापत्तेः, तथा च आगमः–"**सव्वजीवाणं पि अक्खरस्स अणंतभागो निच्चुग्घाडिओ, । जइ पुण सोऽपि आवरिज्जा तेणं जीवो अजीवत्तणं पावेज्जा**" इत्यादि, 'अक्खरस्सत्ति' अक्षरस्य केवलज्ञानस्येत्यर्थः, यथा वा अपवरकान्तःस्थस्य प्रदीपमण्डलस्य वातायनविवरैर्विनिःसृत्वराः प्रभाङ्कुरा बहिरपि किंचित् प्रकाशयन्ति, तथा केवलज्ञानमयस्य आत्मपिण्डस्य इन्द्रियजालद्वारेण निर्गत्वरा ज्ञानाङ्कुराः प्रतिनियतान् बहिरर्थानपि गोचरयन्तीति किमनुपपन्नम् । यत्तूक्तं ध्यानाद्यभ्यासादपि कथं तज्ज्ञानस्य परमप्रकर्षो लंघनादेस्तथानुपलब्धेरिति, तदपि असङ्गतं, लंघनं हि औदारिकशरीरादिसहकृतप्रयत्नजन्यं तच्चात्यभ्यस्यमानम् ऊरुजंघादिभङ्गापादनेन स्वाश्रयव्याघातायैव प्रभवतीति कथम् अभ्यासात्तस्य परमप्रकर्षो भवेत्, तज्ज्ञानं तु शश्वत् स्वरसत एव परमकोटिमध्यासीनमपि आवरणयोगाद् इयच्चिरं न तथा प्रतिभातं संप्रति तु ध्यानादिसहकारिसाकल्याद् आवरणक्षयेण आधारद्रव्यस्य च नित्यत्वेन तथाभिव्यक्तिमासादयतीति विषमो दृष्टान्तः । ननु तज्ज्ञानं सर्वगोचरमपि किं क्रमेण पदार्थान् साक्षात् कुर्यात्, यौगपद्येन वा ? नाद्यः, तद्धि सकलार्थसाक्षात्कारसमर्थं न वा ? समर्थं चेद् युगपदेव साक्षात् कुर्वीत समर्थस्य कालक्षेपायोगात्, न चेत् समर्थं तदा क्रमेणापि न साक्षात् कुर्यात् अस्मदादिज्ञानवत्, न च इन्द्रियज्ञानस्येव तस्य शरीरेन्द्रियादिसहकारिसापेक्षतया क्रमेण प्रवृतिः, तन्निरपेक्षतयैव तस्य प्रवृत्तिरभ्युपगमात्, किं च क्रमेण तत्प्रवृत्तिरभ्युपगमे पदार्थानामानन्त्यात् कतिपयपदार्थग्रहणेनैव आयुषः पर्यवसानात् न

सर्वार्थविषयता स्यात्, न द्वितीयः, प्रथमक्षणे एव युगपत् सकलपदार्थग्रहणे द्वितीयादिक्षणेषु गृहीतग्राहितया तस्य अप्रामाण्यापत्तेः, **'अनधिगतार्थगन्तृप्रमाणमिति'** वचनात्, प्रथमक्षणे एव सर्वार्थग्रहणात् क्षणान्तरे ज्ञेयाभावेन निर्विषयतया तज्ज्ञानस्य अज्ञानत्वप्रसङ्गाच्चेति चेत् न, यत्तावत् क्रमग्रहणपक्षे दूषणमुक्तं तदयुक्तम्, अनभ्युपगमात् नहि क्रमवत् सहकारिसापेक्षतया तस्य क्रमेण सर्वार्थसाक्षात्कारित्वम् अस्माभिरभ्युपेयते, ध्यानघातिकर्मक्षयाद्यभिव्यञ्जककारणकलापाद् युगपदेव निःशेषपदार्थनिस्तुषनिर्भासनसमर्थस्यैव तस्याविर्भावाभ्युपगमाद्, यौगपद्येनैव तेन सर्वार्थग्रहणं, यदपि युगपद्ग्रहणे द्वितीयादिक्षणेषु तस्य अप्रमाण्यप्रसञ्जनं तदपि न सम्यक्, तदाहि धारावाहिज्ञानानामप्रामाण्यप्रसङ्गात्, गृहीतग्राहित्वाविशेषात्, अथ तत्र प्रथम ज्ञानगृहीतधर्मेभ्योऽगृहीतधर्मान्तरवत्तया वस्तुनो ग्रहणेन अनधिगतार्थगन्तृतया प्रामाण्यमिष्यते, इह तु प्रथमक्षणे एव अशेषविशेषवत्तया सकलपदार्थानां ग्रहणात् द्वितीयादिक्षणेषु ग्राह्यधर्मान्तराभावेन अधिगतार्थाधिगन्तृत्वेन कथं तत् इतिचेत् ? यत्र तर्हि धारावाहिज्ञानेषु पूर्वज्ञानगृहीतधर्मेभ्योऽन्यूनानधिकधर्मवत्तया द्वितीयादिज्ञानैरपि वस्तुनो ग्रहणं, तत्र का गतिः, तस्मान्न गृहीतग्राहितया ज्ञानस्य अप्रामाण्यं, किन्तु अभूतार्थोपधानेन बाधकज्ञानगोचरतया, अपि च गृहीतग्राहित्वमपि तज्ज्ञानस्य नास्ति, यत्रहि पूर्वज्ञानगृहीतधर्मविशिष्टस्यैव वस्तुनो द्वितीयादिज्ञानैरपि ग्रहणं, तत्र द्वितीयादिज्ञानानां गृहीतग्राहिता, इह तु **''अह सव्वदव्वपरिणामभावविण्णत्तिकारणमणंतं सासयमप्पडिवाई एगविहं केवलं नाण''** मित्यार्षप्रामाण्यादेकस्यैव तज्ज्ञानस्य सततमेव सकलधर्मवत्तया समस्तार्थप्रतिभासनत्वेन कथं सा भवेत्, क्षणभेदेन एकस्यापि तस्य नानात्वात् सा भविष्यति इति चेन्न, एवं हि क्षणभङ्गाऽभ्युपगमेन दत्तः स्वहस्तः सौगतानां स्यात्, किं च किं सर्वेषामनधिगतत्वं, प्रमातुर्वा, न प्रथमः, क्वचित्कदाचित्केनचित् सर्वस्यैव ग्रहणायोगस्य अर्थस्य अधिगमात् इतरथाऽधुनापि नाधिगम्येत, नह्यनादौ संसारे यन्नाधिगतं तदधिगम्यते इति संभवति,न च सर्वानधिगतोऽयमर्थ इति असर्वविदा ज्ञातुं शक्यते, न द्वितीयः, तस्यापि सर्वथाऽनधिगतत्वासिद्धेः, यदि नेह जन्मनि तदा जन्मान्तरेऽपि तदधिगमस्य संभवात्, अन्ततः प्रमातृप्रत्यभिज्ञानस्यापि अधिगतार्थगन्तृत्वेन अप्रामाण्यापातात्, न च तस्यापि कैश्चित् स्मृतेरिव अप्रामाण्यमभ्युपेयते भवता, तस्मान्न भवदुक्तप्रमाणलक्षणेन तज्ज्ञानस्याप्रामाण्यसिद्धिः, उक्तन्यायेन

तस्यैव असिद्धेः, यदपि प्रथमक्षण एव सर्वार्थग्रहणाद् इत्यादि, तदप्यसमीचीनं, प्रथमक्षणवत् क्षणान्तरेऽपि पदार्थानां सत्त्वात्, तज्ज्ञानज्ञेयतायाः संभवेन तदज्ञानत्वप्रसञ्जनानुपपत्तेः, देशकालाद्यनपेक्षतया निखिलार्थग्राहकत्वेन प्रमाणोपपन्नानां तज्ज्ञानादिभावानां नियोगपर्यनुयोगागोचरत्वात्, अन्यथा उदयगिरिशिखरमधिरोहता भास्वता प्रथमक्षण एव पदार्थानां प्रकाशनात् क्षणान्तरे प्रकाश्याभावेन तस्यापि अभास्वत्त्वप्रसङ्गस्य दुर्वारत्वापत्तेः, ननु एकस्मिन् ज्ञाने विरुद्धानां छायातपादीनां प्रतिभासासंभवात् संभवे वा विरोधप्रसङ्गात्, तथा च तदप्रतिभासे कथं तज्ज्ञानस्य सर्वविषयत्वमिति चेन्न, नहि तज्ज्ञानाप्रतिभासप्रतिभासाधीनौ भावानां विरोधाविरोधौ येन एवं नोद्येत, किं नाम ! तथाविधस्वस्वकारणसमवधानाधीनौ, तथा च परस्परविरोधेऽपि तेषां तज्ज्ञानप्रतिभासे को विरोधः, अस्मदादिज्ञानेऽपि युगपद् विरुद्धार्थप्रतिभासस्यापि अनुभवसिद्धत्वेन तज्ज्ञाने तथा तत्प्रतिभासस्य दुर्निषेधत्वात्, ननु अतीतादीनामर्थानां कथं तज्ज्ञानेन ग्रहणं तदानीं तेषामसत्त्वात् ? एवमपि वा वर्तमानकालभाविना तेन स्वसमानसमयतया तेषां ग्रहणमभ्युपगमे तस्य विपर्ययरूपतापत्तेः, असतां सत्त्वेन ग्रहणादिति चेन्न, अनभ्युपगमात्, यदिह तज्ज्ञानमतीताद्यर्थान् स्वसमानकालतया गृह्णीयात् तदा स्यात् तस्य विपर्ययत्वं, नचैवम् अभ्युपगम्यते अपितु अतीतादिकालसम्बन्धितया एव तेषां तेन ग्रहणं, तथा च कथं विपर्ययता, शुक्तिकादौ अतद्देशकालस्य रजतादेः स्वसमानदेशकालतया ग्रहणेन रजतज्ञानादेर्विपर्ययत्वदर्शनात्, एवमनभ्युपगमेऽतीतादिविषयस्य सत्यस्वप्नज्ञानाचूडामणिज्ञानादेरपि असत्यत्वप्रसङ्गात्, स्वतुल्यदेशकालतया तेनापि अतीतादेर्ग्रहणात्, अत एव अस्मदादीनामपि स्तम्भाद्यभावज्ञानस्य स्वदेशकालादौ तदभावं गृह्णत एव प्रामाण्यम्, अन्यथा स्तम्भादिना मस्तकाद्यभिघातभिया निःशङ्कं पथि संचारो न स्यात्, तस्मात् स्वकालेऽपि असदसत्त्वेनैव गृह्णतस्तज्ज्ञानस्य अस्मदादिज्ञानस्य वा नाप्रामाण्यम् । ननु सिद्ध्यतु एवमव्याहतसर्वविषयज्ञानवान् सर्वज्ञस्तथापि तस्य वीतरागत्वं कथं सिद्ध्येत्, परात्मस्थरागादिसाक्षात्कारात् तस्यापि रागादिमत्त्वसंभवादितिचेत् न, नहि परसंगरागाद्यनुभवात् रागादिमत्त्वं, किन्तु स्वात्मसम्बद्धरागाद्यनुभवाद् रागादिमत्त्वं, किं तत्संवेदनात्, इतरथा दम्पत्योः कथं चिन्निर्भरसंभोगभङ्गिदर्शनात् कस्यचिन्महामुनेर्ब्रह्मचारिणोऽपि ब्रह्मचर्यभङ्गेन प्रायश्चित्तापत्तेः, वराङ्गनावर्गसंगमाभावात् तत्र संभोगव्यवहाराभावश्चेत्, सोऽत्रापि

समानोऽन्यत्र मनोदोषात्, तस्मात् सर्वज्ञवीतरागत्वयोः समव्याप्तिकत्वेन परस्परसाध्यसाधनतया उभयोरपि सिद्धिः, न वीतरागत्वेऽपि् विप्रतिपत्तिः कर्तुमुचिता । नन्वेवमपि परकीयसाधननिराकरणमात्रेण दृढतरसाधकप्रमाणं विना नाद्यापि तत्सिद्धिर्द्रढीयसी ! इति चेत् न्, तत्सद्भावात्, तथाहि नष्टमुष्ट्यादिविषयोऽविसंवाद्यलिङ्गानुपदेशपूर्वक उपदेशविशेषः, कस्यचित् तत्साक्षात्कारविशिष्टज्ञानप्रभवः, तथाविधोपदेशविशेषत्वात्, यो य एवं स तत्साक्षात्कारिविशिष्टज्ञानप्रभवो, यथा अस्मदादेर्जलशैत्य–माधुर्याद्युपदेशविशेषः तत्साक्षात्कारिज्ञानप्रभवः, तथाचायं तस्मात् तथेति, न चात्र पक्षविशेषणमविसंवादित्वमसिद्धं, चूडामण्यादिग्रन्थोपदिष्टानां नष्टमुष्ट्यादीनां तथैव प्रत्यक्षादिना संवाददर्शनात्, कदाचित् विसंवादोऽपि दृश्यत इति चेन्न, सम्यक्शास्त्रापरिज्ञानविस्मरणादिभिरेव तस्योपपत्तेः, न चैतावता तस्य विसंवादित्वं, तथात्वे वा प्रायः संवादिनोऽक्षजप्रत्यक्षस्यापि क्वचित् सामग्रीवैकल्याद् विपर्ययादिरूपतया विसंवादित्वेन सर्वत्र तथा प्रसङ्गात्, तस्मात् सम्यक् तद्विदसमविसंवाददर्शनात् सिद्धमेतद्विशेषणम् । ननु अयमुपदेशविशेषो लिङ्गपूर्वको भविष्यति, तत्प्रतिपाद्या हि ग्रहोपरागाद्या अतीन्द्रियार्था लिङ्गैरनुमाय तेन तत्र निबद्धास्ततस्तत्पूर्वकत्वमेव तस्येति चेन्न, तेहि अतीन्द्रियार्थास्तेन कदाचित् साक्षात् कृता न वा ? आद्यश्चेत् तर्हि तत एव तदुपदेशविशेषस्य साक्षात्कारिज्ञानपूर्वकत्वं सिद्धेः, किं लिङ्गपूर्वकत्वकल्पनेन, द्वितीयश्चेत्, कथं तर्हि लिङ्गतोऽपि तत्प्रतिपत्तिः, नहि क्वचिदपि अदृष्टे लिङ्गिनि लिङ्गदर्शनादपि तदनुमानं, नालिकेरद्विपवासिनोऽपि धूमदर्शनाद् अग्न्यनुमानप्रसङ्गात्, सर्वथा लिंग्यनवधारणे चैतदस्यैव लिङ्गं नान्यस्येति नियन्तुमशक्यत्वात्, अन्यथा श्रवणात् स्वर्गापूर्वादिवत् तदवधारणं भविष्यति, तथा च स्वर्गादेः प्रेक्षावत्प्रवृत्तिलक्षणसामान्यतो दृष्टलिङ्गपूर्वकत्वमिव तेषामपि तादृग्लिङ्गपूर्वकत्वं सेत्स्यति ? इति चेन्न, अन्यतः किम् आप्तात्, तद्विपरीताद्वा, आद्यश्चेत्, सिद्धं नः समीहितं साक्षात्कृतकर्मणः क्षीणदोषस्य च पुरुषविशेषस्य आप्तशब्देनाभिधानात्, तथाच साक्षात्कारिज्ञानवत्तयैव तत्सिद्ध्या अतीन्द्रियार्थानां साक्षात्कारिज्ञानविशेषत्वोपपत्तेः किमत्र उपदेशविशेषस्य लिङ्गप्रभवत्वकल्पनया, द्वितीयाच्चेन्न, तस्य विप्रलम्भकत्वादिना तस्मात् श्रवणेऽपि तदवधारणानुपपत्त्या तदसिद्धेः, लिङ्गस्य आश्रयासिद्धिप्रसङ्गात्, तथाच कथं लिङ्गपूर्वकत्वमुपदेशविशेषस्यं भवेत्, अपि च लिङ्गस्य सामान्यमात्रानुमापकतया तत्पूर्वकत्वाभ्युपगमे

तेन सामान्यरूपतया एव ग्रहोपरागाद्यतीन्द्रियार्थानां परिच्छेदः स्यात्, न तु दिग्वेलापरिणामफलादिप्रतिनियमेन विशेषरूपतया तस्मादुपदेशविशेषप्रणायकस्य अलिङ्गम्, अतीन्द्रियार्थगोचरज्ञानमभ्युपेतव्यमिति नालिङ्गपूर्वकत्वविशेषणानुपपत्तिः, ननु पूर्वपूर्वतरपुरुषोपदेशपरम्परया अविच्छेदेनाद्य यावदेष उपदेशविशेषोऽनुवर्त्स्यति ? इतिचेन्न, एवमनुवृत्त्यभ्युपगमे व्याख्यातृश्रोतृणामज्ञानशंसयविपर्ययादिदोषैर्बुद्धिमांद्यविस्मरणादिभिश्च प्रतिक्षणं हीयमानतया यथावदर्थावगमाभावेन एतावता कालेन सर्वथा अस्य विच्छेद एव स्यात्, अत एव भवदभ्युपेतोऽपौरुषेयत्वस्यापि उपदेशपरम्परामात्रानुवर्त्तिनो वेदस्य प्रागुक्ताज्ञानादिदोषेभ्यः शाखानामुच्छेदः श्रूयते, अपि च भवतु चोपदेशपरम्परया अतीन्द्रियार्थप्रतिपादकस्यास्य अविच्छेदाभ्युपगमः, तथाप्यसौ न संगच्छते, वेदस्येव अस्यापि अविच्छेदहेतोरपौरुषेयताया भवतापि अनभ्युपगमात्, उपदेशपरम्पराया एव वा तद्धेतुत्वाभ्युपगमे, तथा परम्परायानुवर्त्तमानानां कुमारसंभवादीनामपि तथात्वप्रसङ्गात्, तस्मादस्य पौरुषेयत्वमङ्गीकर्त्तव्यं, तथा सति चानित्यतया विच्छेदसंभवे यदि अतीन्द्रियार्थसाक्षात्कारी कश्चित्तदुपदेष्टा नाभ्युपेयेत, तदा तस्य पुनरिदानीमपि अनुवृत्तिः कथं भवेत्, तस्मादनुपदेशपूर्वकोऽपि असौ स्वीकर्त्तव्यः, तथा च नानुपदेशपूर्वकत्वविशषणासिद्धिः, नचोपदेशविशेषणस्य अपौरुषेयत्वस्य प्रागेव निषेधात्, नापि अनैकान्तिकस्तथाविधोपदेशविशेषस्य हेतोरसाक्षात्कारिज्ञानपूर्वकत्वे विपक्षेऽसंभवात्, नापि विरुद्धः साध्यविपर्ययेण असाक्षात्कारिज्ञानपूर्वकत्वेन हेतोरव्याप्तेः, ननु भवतु अस्माद्धेतोर्नष्टादिविषयस्य उपदेशविशेषस्य साक्षात्काररिज्ञानप्रभवत्वसिद्धिः प्रमाणान्तरसंवादेन तस्य तदुपपत्तेः, स्वर्गापूर्वदेवतादिविषयस्य तु तस्य कथं तत्सिद्धिः, नित्यातीन्द्रियत्वेन अस्मदादीनां तत्र प्रमाणान्तरसंवादाभावादिति चेन्न, अनुमानतस्तत्सिद्धेः, तथाहि स्वर्गाद्यदृष्टार्थगोचर उपदेशविशेषः, साक्षात्कारिज्ञानपूर्वकः, दृष्टार्थेन नष्टादिविषयोपदेशेन सह एककर्तृकत्वाद्, य एवं स एवं यथा तथाविधाऽऽप्तजनकाद्युपदेशविशेषः, तथा चायं तस्मात्तथा, अविसंवाद्यतीन्द्रियार्थप्रतिपादकत्वाद्वा नष्टादिविषयोपदेशविशेषवत्, नच अविसंवादित्वमसिद्धम्, ऐहिकफलनिरपेक्षत्वेन पारलौकिकफललिप्सया प्रेक्षावत्प्रवृत्तेरन्यथानुपपन्नत्वेन स्वर्गासिद्ध्या तत्सिद्धेः, हेत्वाभासोद्धारश्चात्रापि प्राग्वद् कर्त्तव्यः, तदेवमनुमानादिप्रमाणतः साक्षात्कृतसूक्ष्मदेशकालादिव्यवहितसकलपदार्थस्य

भगवतः सर्वज्ञस्य सिद्धया तद्वचःप्रामाण्योपपत्तेः युक्तमुक्तं सूत्रकृता 'इत्तुच्चिय अत्थि' इत्यादि, तदुपपादकं वचनमितिगाथार्थः ॥९०॥ तदेवम् आस्रवतत्त्वं व्याख्याय अधुना तन्निरोधरूपं संवरतत्त्वं व्यवहारनिश्चयनयाभ्यां विवरीतुमुपक्रमते–

**पावट्ठाणेहिंतो विरई ववहारसंवरो होइ । निच्छयणएण सेलेसिगाइ जमणंतरो मुक्खो ॥९१॥**

**व्याख्या**-पापं कल्मषं, तिष्ठति वसति कार्यतया अमीषु इतिपापस्थानानि, प्राणातिपातादीनि आश्रवद्वाराणि तेभ्यो विरतिर्निवृत्तिर्मनोवाक्कायैर्यावज्जीवं तदकरणीयतादिपरिणाम इति यावत्, 'व्यवहारो,' बहिस्तत्त्वनिरूपणाभिप्रायः स्थूलदर्शिजनन्याय इति यावत्,स्थूलदर्शिनो हि समित्यादिमन्तं मुनिमुपलभ्य संवृतोऽयमिति व्यवहरन्ति, तेन संवरणं संवरः पापस्थाननिरोधस्तत्संज्ञकं तत्त्वम्, **'आश्रवनिरोधः संवर'** इतिवचनात्, यद्वा संव्रियन्ते निरुध्यन्ते पापस्थानानि अनेन इति संवरः समित्यादिः, सोऽपि हि प्राणातिपातादिसंवृतिहेतुत्वात् संवृतोऽयं मुनिरिति बाह्यलोकव्यवहारादिहेतुत्वात्, नैश्चयिकसम्वरनिमित्तत्वाच्चोपचारेण संवरतत्त्वं व्यपदिश्यते, अत एव संवरहेतूनां समितिगुप्तिधर्मानुप्रेक्षापरीषहचारित्राणां यथाक्रमं पञ्च त्रिदश द्वादश द्वाविंशति पञ्चभेदत्वादस्य सप्तपञ्चाशद्विधत्वमभिधीयते, यदुक्तं **''समिई गुत्ती धम्मो अणुपेहपरीसहा चरित्तं च ॥ सत्तावन्नं भेया पणतिय भेयाइ संवरणे''** भवति संपद्यते, 'निश्चयनयेन' तात्त्विकेन अव्यवधानान्मुक्तिकारि. अन्तस्तत्त्वनिरूपणाभिप्रायेण **सूक्ष्मदर्शिजनन्यायेन** इति यावत्, 'शैलेशिकायां' शैलेशिनाम्न्याम् अवस्थायां वर्तमानस्य अयोगिकेवलिनः संवरो भवति इत्यनुषज्यते. कथं पुनरियमवस्था भवति? इति चेदुच्यते–सयोगिकेवली किल केवलोत्पादानन्तरं जघन्येनान्तर्मुहूर्तम् उत्कर्षेण देशोनां पूर्वकोटीं भवोपग्राहिकर्मवशाद् विहृत्य अन्तर्मुहूर्तावशेषायुष्कः प्रथमबादरकाययोगेन बादरमनोवाग्योगौ निरुणद्धि, ततः सूक्ष्मकाययोगेन बादरकाययोगं निरुणद्धि, सत्येव तस्मिन् सूक्ष्मकाययोगस्य निरोद्धुमशक्यत्वात्, ततश्च सर्वबादरयोगनिरोधानन्तरं सूक्ष्मक्रियमनिवृर्त्ति तृतीयं शुक्लध्यानं ध्यायन् सूक्ष्मकाययोगेन सूक्ष्ममनोवाग्योगौ निरुणद्धि, ततस्तमपि सूक्ष्मकाययोगमनन्तवीर्येण शरीरादिमात्रसहकारिणा स्वात्मनैव निरुणद्धि,ततस्तन्निरोधानन्तरं समुच्छिन्नक्रियमप्रतिपाति तुरीयं शुक्लध्यानं ध्यायन् स्थूलसूक्ष्मत्रिविधयोगनिरोधात् अयोगिकेवलित्वमासादयन् ह्रस्वपञ्चाक्षरोच्चारणकालमात्रां शैलेश्यवस्थां प्रतिपद्यते, तत्र शीलस्य

लेश्यायोगपंकविरहितस्य परमप्रकर्षप्राप्तस्य यथाख्यातचारित्रस्य य ईशः स्वामी अयोगिकेवली तस्य त्रिभागेन स्वदेहावगाहनायामुदरादिरन्ध्रपूरणात् संकोचितस्वात्मप्रदेशस्य शीलेशस्य इयं शैलेशी यद्वा शैलेशो मेरुस्तस्येव निरुद्धसकलयोगस्य भगवतोऽप्रतिपातितया निष्प्रकम्पावस्था सा शैलेशी, तस्यां नैश्चयिकः संवरो भवति, सकलयोगप्रध्वंसाद् बन्धहेतुत्वेन तस्यैव नैरन्तर्येण मुक्तिसाधकतमत्वात्, अत एव आह–यस्माच्छैलेश्यवस्थाभाविनो निश्चयसंवरादनन्तरोऽव्यवहितो मोक्षोऽपवर्गो वक्ष्यमाणलक्षणो जायते समुच्छिन्नक्रियाध्यानसहकृतस्य हि निश्चयसंवरस्य चरमक्षणानन्तरं मुक्तिश्रुतेः, यदाह **'ध्यानस्य समुच्छिन्नक्रियस्य चरमक्षणे गते सिद्धि'** रिति, अत एव तस्य मुक्तिं प्रति साधकतमत्वं, कर्तृकर्मादीतरकारकचक्रसमवधानेऽपि एतदनन्तरमेव मुक्तिफलसिद्धेरनन्तरफलकरणमिति तल्लक्षणस्य अत्रैव उपपादादितिगाथार्थः ॥ ९ १ ॥ सांप्रतं परम्परया संवरफलरूपं निर्जरातत्त्वं व्याख्यातुमाह–

**तवसा उ निज्जरा इह हंदि पसिद्धा उ सव्ववाईणं ॥ इहरा तवो विहाणं किरियावाईण कह जुत्तं ॥ ९ २ ॥**

**व्याख्या**-तप्यन्ते रसादयो धातवोऽशुभानि च कर्मानि अनेनेति तपः, यदुक्तं **'रसासृग्मांसमेदोस्थिमज्जशुक्राण्यनेन तप्यन्ते कर्माणि वाऽशुभानीत्यतस्तपोनाम नैरुक्तम्'** तच्चानशनादि, तेन तपसा, 'तुः' पुनरर्थ, स च भिन्नक्रमः, तेन पापस्थानविरत्या संवरो भवति, निर्जरा पुनस्तपसा, अथवा तुरवधारणे तेन तपसैव निर्जरा, अथवा तपसो निर्जराफलं दृष्टमित्याप्तवचनात्, तत्र निर्जरणं प्रागुपात्तस्य कर्मराशेरेकदेशेन क्षपणं निर्जरा,सत्यपि हेत्वन्तरेषु महाव्रतादिषु तप एव प्रधानं निर्जराऽङ्गमिति ख्यापनार्थमवधारणम्, अत एव निकाचितकर्मणामपि अनेन क्षपणादुपचारेण तप एव निर्जरा इत्युच्यते, तथा चार्ष **''जम्हा निकाइयाण वि कम्माण तवेण होइ निज्जरणं ॥ तम्हा उवयाराओ तवो इहं निज्जरा भणिया'**तथा, **'पुव्विं दुच्चिन्नाणं दुप्पडिकंताणं वे इत्ता मुक्खो नत्थि अवेइत्ता तवसा वा झोसइत्तात्ति''** इहेति तत्त्वविचारे लोके वा, 'हंदि' इत्युपदर्शनं, 'प्रसिद्धा तु' तुरवधारणे तेन प्रतीतैव प्रमाणोपपन्नैव इतियावत्, 'सर्ववादिनां'प्रायः सकलतीर्थ्यानां, तथा च विश्वामित्रस्त्रिशंकुं याजयामास वसिष्ठश्चाधमयोनिजामक्षमालामुपर्येम, तपःप्रभाव एव स तादृशस्तेषां यत एवं विधाः पाप्मानो

विलीयन्ते इत्यादयस्तपसः पापविलयनिमित्तत्वप्रतिपादिका न्यायटीकाकृतां वाचस्पतिप्रभृतीनां व्याहृतयस्तथाऽन्येषामपि **'कैवर्त्तीगर्भसंभूतो व्यासो नाम महामुनिः । तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥१॥** इत्यादयः, 'इतरथा' अन्यथा, तपसो निर्जराहेतुत्वासिद्धावित्यर्थः, तपोविधानं कृच्छ्रचान्द्रायणादि तपस्याचरणां, क्रियां, तपोब्रह्मचर्यादिकर्म मुक्तिहेतुतया वदन्ति, क्रियावादिन आस्तिकास्तेषां 'कथं' केन प्रकारेण युक्तमुपपन्नं स्यात्, तस्य क्लेशमात्रफलत्वप्रसङ्गात् न कथंचिदित्यर्थः, एवमनभ्युपगमेहि तेषां हिंसादिनिबन्धनपापविशुद्धये प्रायश्चित्तविधेस्तत्प्रतिपादकग्रन्थानां च वैयर्थ्यापत्तेः, तपांसि यातनाश्चित्राः, संयमो भोगवञ्चनेत्यादि सोत्प्रासवचोभिर्नास्तिकानामेव तदकरणाभ्युपगमश्रवणात्, अत्र केचित् वादिनो मधुरस्निग्धभोजनाभिलाषुकतया तपः कर्त्तुमसहिष्णवः, तस्य निर्जराहेतुत्वं प्रति विप्रतिपद्यन्ते, तपःसिद्धौ हि तस्य निर्जराहेतुत्वं सिध्येत, तदेव तु अद्यापि न सिध्यति, तस्यौदयिकभावस्थभावकायसंतापरूपत्वेन अशुभकर्मफलतया नारकादिकायसंतापवद् वस्तुतस्तपस्याऽसंभवात्, अथ नारकादीनां पारवश्येन तत्कायसंतापस्य न तथात्वं ? मुमुक्षूणां तु स्वचेतसः समाधिना अस्य प्रतिपत्तेस्तथात्वमितिचेन्न, चेतःसमाधिमत्साम्राज्यसुखस्य तथाविधस्यैव च ज्वलनप्रवेशप्रयागतटप्रपातादेस्तथात्वापातात्, अथ राज्यादौ विषयव्यासङ्गहिंसादिना ज्वलनप्रवेशादौ च लोकशास्त्रविप्रतिषिद्धस्ववधप्रवृत्त्याभिनवकर्मबन्धात् कथं तस्य तथात्वं, तर्हि प्रकृतेऽपि आर्त्तध्यानाद्युत्पादेन कर्मबन्धस्य समानत्वात् तपस्त्वं दुर्लभं, किञ्च राज्यदौर्गत्याधिव्याधिनैरुज्यादि-नानाफलानुभावकतया विचित्रशक्तीनां कर्मणामेकरूपात् तपसः क्षयानुपपत्तेः, कायसंतापस्य च तपस्त्वाङ्गीकारे भोजनाच्छादनादिवैकल्याद् बाहुल्येन तद्वतां भिक्षाचरादीनामेव तपस्विता भवेत्, न योगसमाहितचेतसां परमर्षीणां तादृक्कायक्लेशाभावात्, अथ न कायसंतापमात्रं तपः, किन्तु किंचित् तदभावेऽपि क्षयोपशमिककुशलात्मपरिणामरूपं तदिष्यते, तथापि तस्मादपि एकस्वरूपात् न भोगशक्तिकस्य कर्मणो विगमः कुतस्त्यः सकलकर्मशक्तिसंकरक्षयाभ्युपगमे वा तस्मात् कथंचिदनायासेन एकरोमोन्मूलनादिना स्तोककर्मक्षयसंभवे निखिलकर्मक्षयप्रसङ्गात्, अन्यथा कर्मशक्तिसंकरायोगात्,तस्मात् तपसा निर्जरा इति प्रवादो ग्राम्यजनधंधीकरणमात्रफल एवेति, अत्रोच्यते—यत्तावदुक्तं कायसंतापमात्रत्वात् नारकादिदुःखवद्

नास्य तपस्त्वमिति, तदयुक्तं, तपःस्वरूपानवबोधात्, नहि कायसंतापमात्रं तप इति भगवत्सिद्धान्तः, किं नाम तत्त्वज्ञानप्रशमसंवेगसारं तीर्थङ्करादिसात्त्विकसत्त्वानुष्ठितं वैमनस्यवर्जितं वास्तवपरमानन्दमयं जर्जरितदुर्जरकर्मजालं देहारोग्यकारणं निर्मूलितप्रत्यूहं वशीकृतेन्द्रियग्रामं परमपदप्रापकं जीवशुभपरिणामरूपं तपः समामनन्ति परममुनयः, एवं रूपस्य चास्य कथं कायसंतापमात्रतयाऽशुभकर्मफलत्वं संगच्छते, तत्क्षयोपशमेनैवात्र पुण्यात्मनां प्रवृत्तिसंभवात्, न चैवं विधेऽत्र प्रवर्तमानानां कायसंतापलवसंभवेऽपि मनःसंतापस्तदभावाच्च मनाक्कायसंतापः क्रीडाव्यग्रकुमाराणामिव सन्नपि असत्कल्प एव, यदपि आर्त्तध्यानादिना कर्मबन्धकारणत्वेन अस्य साम्राज्यज्वलनप्रवेशादिसमानतोपवर्णनं तदपि न सम्यक्, अनभ्युपगमात्, मनःसमाध्या–दिहेतोरिन्द्रियवशीकारमात्रकारिण एव चास्य भगवताभ्यनुज्ञानात् यदाह **''सो हु तवो न कायव्वो जेण मणो मंगुलं न चिंतेइ । जेण न इन्दियहाणी जेण य योगा न सीयंति ॥१॥''** तथा, **कायो न केवलमयं परितापनीयो मृष्टै रसैर्बहुविधैर्नच लालनीयः । चित्तेन्द्रियाणि न चरन्ति यथोत्पथेषु, वश्यानि येन च तदाचरितं जिनानाम् ॥१॥** न चैवं तपस्यतामार्त्तध्यानाद्याविर्भावः, न च स्तोकेनापि कायसंतापेन मनःखेदप्रादुर्भावादस्य आर्त्तध्यानविधायित्वमितिवाच्यं, निरन्तरानन्तसंसारदुःखसंतापकदर्थितस्य तत एव तस्मादुद्विजमानस्य तीर्थकरमहावैद्योपदेशात् तदपायोपायं तपस्यादिकं महौषधमिव अधिगमस्य तत्र प्रयतमानस्य दुष्कर्मामयं प्रध्वंसेन, निष्प्रतिमप्रशमारोग्यसुखरससंवेदनात् महाव्याधितस्येव सुतपस्विनस्तदनुपपत्तेः, अभिमतार्थसिद्धौ निर्भोजनादिजन्यशरीरबाधाया अपि प्रमोदहेतुत्वेन रत्नवणिगादीनां श्रवणात्, यदुक्तम् **–''दृष्टा चेष्टार्थसंसिद्धौ कायपीडा ह्यदुःखदा । रत्नादिवणिगादीनां तद्वदत्रापि भाव्यताम् ॥१॥** श्रूयन्ते च लोकेऽपीश्वरावर्जनेनाभीष्टसिद्धौ पार्वत्यास्तपःप्रभवक्लेशस्य देहपाटवहेतुता, तथा चाह स्वकाव्ये **कालिदासः**, **''अद्यप्रभृत्यवनताङ्गि** तवास्मि दासः क्रीतस्तपोभिरितिवादिनि चन्द्रमौलौ । अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेशःफलेन हि पुनर्नवतां विधत्ते ॥१॥ इति, भवतु वा कथंचित्कायसंतापः शुभध्यानयुजस्तपस्विनस्तथापि तदवधीरणया कर्मनिर्जरा महालाभमनोरथेन उत्सहिष्णुस्तपसि तस्य विजिगीषोरिव शत्रुनिशितशस्त्रघातावगणनया विजयपताकाभिलाषेण समरशिरसि प्रवृत्तेरविरोधात्,

यदपि चित्राशक्तिभाजां कर्मणां कथमेकरूपात् कायसंतापमात्राद् इत्यादिलपितं, तदपि न युक्तम् उक्तन्यायेन तपसः कायसंतापमात्रत्वानङ्गीकारात्, यच्चोक्तं भिक्षाचरादीनामेव तपस्विता स्यादित्यादि, तदपि न, विकल्पानुपपत्तेः, तथाहि--का इयं तपस्विता ? किं निर्दैन्यतया लाभपूजाद्यनपेक्षत्वेन मृष्टान्नपानादिलाभे सति अपि निरीहतया तत्त्यागित्वम्, अहो भोजनाद्यर्थितया प्रतिगृहं भिक्षाभ्रमणेऽपि तदलाभाद् दैन्यवृत्तित्वे सति कायकृशता, उत वराकशब्दाभिधेयता ? न प्रथमः, एवंविध तपस्वितायाः मुमुक्षुषु परममुनिष्वेव भावात्, भिक्षाचरादिषु असंभवेन तत्प्रसंजनस्य तत्रानुपपत्तेः द्वितीयतृतीयपक्षयोश्च सिद्धसाधनात्, एवंरूपायास्तस्या भिक्षाचरादिषु अस्माभिरपि अभ्युपगमात्, योगिनां च केषांचित् ताद्दक्कायसंतापायोगेन अतपस्वितापादनमपि असंगतं, ध्यानापरनाम्नो योगस्यापि तपस्त्वाभ्युपगमेन तद्वतामविवादेन तपस्वित्वसिद्धेः, यदपि अथ न कायसंतापमात्रं तपः किन्तु कुशलात्मपरिणामरूपं तथापि कथमेकरूपात् तस्मात् चित्रकर्मक्षय इत्यादि तदपि असमीचीनं, कुशलात्मपरिणामस्य तत्त्वत एकरूपस्यापि तत्तन्निमित्तभेदेन तारतम्येन भेदसिद्धया नानाशक्तिभाजामपि कर्मणां प्रध्वंसहेतुत्वोपपत्तेः, अनशनप्रायश्चित्तादिभेदेन च तन्निमित्तभेदस्य आगमात् सिद्धेः, यदाह—**अनशनमूनोदरता वृत्तेः** संक्षेपणं रसत्यागः । कायक्लेशः संलीनतेति बाह्यतपः प्रोक्तम् ॥१॥ प्रायश्चित्तध्यानवैयावृत्यविनयावर्थोत्सर्गः स्वाध्याय इति तपः षट्प्रकारमाभ्यन्तरं भवति, एतेनाथ सकलकर्मशक्तिसंकरक्षयकारितप इत्याशंक्य यदेकरोमोन्मूलनादिना सकलकर्मक्षयप्रसंजनं तदपि निरस्तं, तत्तन्निमित्तकारणयुजस्तारतम्यवतश्च कुशलात्माध्यवसायरूपात् तपसस्तत्तत्कर्मशक्त्यपगमाभ्युपगमात्, भवतु चैकरूपादपि कालक्षेत्रादिसहकारिमतस्तस्मादखिलकर्मप्रध्वंसः, परिणामतारतम्यभेदेन तपसोऽप्रमेयमहिमतया भगवता प्रतिपादनात्, तत् कस्य हेतोरेकस्मादपि मणिमन्त्रौषधादेस्तत्तत्सहकारियोगात् दारिद्र्यामयाद्रयापगमतस्तत्तदभ्युदयादिनानाअर्थक्रियादर्शनेन तस्मादपि तदविरोधात्, एतेन ध्यानविधूननीया रागादयो दोषाः, किम् उपवासादिकायसंतापेन, न खलु अनायासेन साध्यसिद्धिसंभवे क्लेशेन तत् सिसाधयिषन्ति प्रेक्षावन्तः, नच कायाधिकरणात् संतापादात्माधिकरणानां रागादीनां क्षयो युज्यते, तथात्वे वा चैत्रकृतात् तपसो मैत्रस्यापि तत्क्षयप्रसंगात् ध्यानात्तु समानाधिकरणतया तत्तत् क्षयः संगच्छते इत्यादि यदुक्तं सौगतैस्तदपि

प्रतिक्षिप्तं, ध्यानस्यापि तपोभेदेन प्राक् प्रतिपादनात्, नहि उपवासादिकमेव तप इति जैनसिद्धान्तः, यद्वाऽस्तु तपसो ध्यानस्य पार्थक्यं तथापि किं ध्यानेनैव रागादीनां विधूननमिष्टम्, आहो ध्यानेनापि यद्याद्यः पक्षः, तदा भवतामपि ब्रह्मचर्यचरणस्याऽपार्थक्यप्रसङ्गः, ध्यानेनैव तत्सिद्धेः, अथ निधुवनविधे रागवृद्धिहेतुतया ध्यानव्याघातकत्वेन ब्रह्मचर्यस्य तु तदाङ्गत्वेन तदाचरणस्य सार्थकत्वमितिचेत्? तर्हि प्रत्यहं स्निग्धमधुरदुग्धाद्यभ्यवहारस्यापि चरमधातूपचयनिमित्तत्वेन रागोत्तेजकतया ध्यानविध्यापकत्वेन, तदनभ्यवहारस्य तु ब्रह्मचर्यवत्तदङ्गत्वेन तस्यापि आचरणाविरोधात्, अन्यथा ध्यानासिद्धया रागादिविध्वंसायोगात्, तस्माद् रागादिप्रहाणामिच्छता ब्रह्मचर्यवद् विकृत्यादिपरित्यागरूपं तपोपि अवश्याभ्युपेयम्, अथ द्वितीयः, तदा अपिशब्देन ध्यानाङ्गतया अन्यस्य ब्रह्मचर्यस्य ग्रहणं चेत् ? तर्हि कायानुतापरूपस्य तपसोऽपि तदिष्यतां तस्यापि ब्रह्मचर्यवद् तदङ्गत्वाविशेषात्, तदन्तरेण स्निग्धाशिनां तत्त्वतो ब्रह्मचर्यस्यापि असंभवात्, उभयग्रहणं चेत्तदानुज्ञया वर्त्तामहे, यदपि कायसंतापात्मकस्य तपसो वैयधिकरण्येन रागादिक्षयासामर्थ्याभिधानं तदपि तस्य शुभात्मपरिणामत्वाभ्युपगमेन कायादात्मनः कथंचिदभेदेन च रागादिभिः सामानाधिकरण्यात् प्रतिविहितम्, अस्तु वा तस्य संतापात्मकत्वं, तथापि संतापस्य दुःखात्मकत्वेन तस्य च आत्माधिकरणत्वेन तैः सामानाधिकरण्यात्, केवलं कायाधिकरणत्वे तु तस्याचैतन्येन तदनुभवाभावप्रसङ्गात् मृतकायस्यापि वा शीतातपादिभिस्तदनुभवापत्तेः, एवं च तपसो रागादिक्षयहेतुत्वसिद्धौ **''मृद्वीशय्या प्रातरुत्थाय पेया भक्तं मध्ये पानकं चापराह्णे । द्राक्षाखण्डं शर्करा चार्धरात्रे मोक्षश्चान्ते शाक्यसिंहेन दृष्टः''**, तथा **''मणुण्णं भोयणं भुञ्जा मणुण्णं सयणासणं । मणुण्णंसि आगारंसि मणुण्णं झायए मुणी''** इत्यादि यदुक्तं तदुक्तन्यायेन मृदुशय्यादेः मनोज्ञभोजनादेश्च यथाक्रमं मुक्तिध्यानाङ्गत्वानुपपत्ते रसनादिलोलुपत्वमेव भवतां व्यनक्ति, अपि च कायसंतापरूपत्वेन यद्युपवासादेरविधेयताऽभ्युपगम्यते, तदा प्रणीतरसादिभुजां मन्मथोन्मादस्य प्रायोऽवश्यं भावितया ब्रह्मचर्यस्यापि तपसोऽधिकतरकायसंतापरूपत्वेन अविधेयतापत्तेः, इति तत्त्यागेनापि सुखीभव, नच स्निग्धाहारस्य ध्यानाविरोधित्वेन अत्यागो निधुवनस्य तु तद्विरोधित्वेन त्याग एव युक्त इति वाच्यं ? स्निग्धाहारस्यापि ध्यानविरोधित्वेन ब्रह्मचारिणामुत्सर्गेण आगमे निषेधात्, तदुक्तं **''विभूसा इत्थिसंसग्गो पणीयं**

**रसभोयणं । नरस्साऽत्तगवेसिस्स विसं तालउडं जहाः''**॥१॥ अत एव भिक्षूणां प्रतिगृहं भिक्षाटनेन सिद्धान्ते भोजनविधेरभ्यनुज्ञा, तत्र हि प्रणीताशनालाभेन लाभेऽपि वा कथंचिद् दोषशङ्कया तदग्रहेणनामांसलस्य साधोः काययात्रामात्रेण तदसंतापब्रह्मचर्ययोरुभयोरपि निर्वाहोपपत्तेः, तस्मात् मोक्षमाणेन तपोऽपि अनुष्ठेयं यदाह **''ता जह न देहपीडा न यावि वियमंससोणियत्तं पि । जह धम्मज्झाणबुड्ढी तहा इमं होइ कायव्वं''** नन्वेवं तपसाऽलब्धवृत्तीनां कर्मणां क्षयाभ्युपगमे तेषां निष्फलता प्रसङ्गो, न चेदमुपपन्नम् अनुपभुक्तानां तेषां क्षयानुपपत्तेः, **'नाभुक्तं क्षीयते कल्पकोटिशतैरपि'**, इतिस्मृतेः, उपपत्तौ वा तद्वदेवोपभुज्यमानानामपि क्षयापातादिति चेन्न, कारणस्य नियमेन कार्यजनकत्वानभ्युपगमात्, तथा च सहकारिवैकल्यशक्तिप्रतिबन्धादिना कर्मणां कदाचिद् वृत्त्यलाभेऽपि क्षयोपपत्तेः, नियमेन कारणस्य कार्यजनकत्वाभ्युपगमे वा कुशूलनिहितादपि बीजादङ्कुरोत्पादप्रसङ्गात्, मन्त्रप्रतिबद्धशक्तेरपि धूमध्वजाद् दाहापातात्, न चैवमस्ति, तत्कस्य हेतोः सहकार्यसमवधानप्रतिबन्धकमन्त्रसन्निधानाभ्यां यथाक्रमं तयोः स्वकार्याकरणोपपादात्, एवं कर्मणामपि केषांचिद् द्रव्यादिसहकारिकारणकलापविरहात्, केषांचित्तु प्रबलतरकर्मान्तरेण शक्तिप्रतिबन्धाद् वृत्त्यलाभः, यदाह **''उदयक्खयक्खओवसमोवसमा जं च कम्मुणो भणिया । दव्वाइ पंचयं पइ जुत्तमुवक्कमणमओवि''** तदिह यदि तपसा शक्तिप्रतिबन्धाद् अलब्धवृत्तीनामपि कर्मणां क्षयः स्यात्, तदा को विरोधः, यदपि 'नाभुक्त' मित्यादिस्मृतिबलाद् भोगेनैव कर्मक्षयोपपादनं तदपि **'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'** इत्यादिनापवादकेन स्मृत्यन्तरेण बाधादनुपपन्नं, भोगेन हि कर्म्मणः क्षय इत्युत्सर्गः, स च तपसस्तत्त्वज्ञानाद्वा क्वचित्कथंचित् तत्क्षयाभ्युपगमेनाऽपाद्यते, तद् व्यवस्थितमेव तपसा निर्जरेति । सा च विवादाध्यासितः पुरुषो निर्जीर्णघातिचतुष्कः, केवलज्ञानवत्त्वात्, उभयवादिसिद्धताद्दक्पुरुषवद् इत्यन्वयव्यतिरेकिणः, अन्वयासिद्धौ वा यो न जीर्णघातिचतुष्को नासौ केवलज्ञानवान् यथास्मदादिरिति, केवलव्यतिरेकिणो वाऽनुमानात्प्रागुक्ताच्चागमाद् अस्मदादिभिरवसीयते, सर्वज्ञस्तु स्वानुभवप्रत्यक्षेणेति गाथार्थः ॥९२॥ उक्ता निर्जरा साच बद्धस्यैव कर्मणः संभवति, तदभावे तदनुपपत्तेरिति संप्रति सहेतुकं च सोपपत्तिकं बन्धत्वं निरूपयन्नाह—

**मिच्छत्ताइनिमित्तो बंधो इहरा कहं तु संसारो । नय लोगे वि अवद्धो मुच्चइ पयडं जओ हंदि ॥९३॥**

**व्याख्या**-मिथ्यात्वादिनिमित्तो बन्धो भवतीति सम्बन्धः, तत्र कर्मपुद्गलजीवप्रदेशानां क्षीरनीरवत् परस्परानुप्रवेशलक्षणः सम्बन्धो बन्धः, न च कर्म एव नास्ति कुतस्तस्य जीवेन सह सम्बन्ध इति वाच्यं ? सकलज्ञेयज्ञातृस्वभावस्यापि आत्मनो भूतावेशितपुरुषस्येव स्वगोचरज्ञानप्रतिबन्धदर्शनेन तत्प्रतिबन्धकस्य भूतस्येव ज्ञानावरणादिकर्मणः प्रागेव प्रसाधनात्, तेन च कर्मणा कुण्डमिव बदराणां सकलकर्मणामधिकरणभूतं बीजमिव चाङ्कुराणां तेषां प्ररोहसमर्थं सर्वेषामौदारिकादिशरीराणां कारणं सन्तत्याऽनादिरूपम् आमोक्षं जीवाविनाभूतं कार्मणशरीरमारभ्यते, कथमेवंरूपस्यास्य सिद्धिरितिचेद् ? आगमादिति ब्रूमः, यदाह–''**कम्मविगारो कम्माणमट्ठविहविचित्तकम्मनिप्फन्नं । सव्वेसिं सरीराणं कारणभूयं मुणेयव्वं**'' नन्वेवं कर्मपुद्गलारभ्यतया अस्य मूर्त्तत्वेन औदारिकशरीरवद् इन्द्रियकत्वप्रसङ्ग इतिचेन्न, अत्यन्तसूक्ष्मपरिणामपरिणतावयवनिष्पाद्यतया वैक्रियादिशरीरस्येव अस्य पिशितचक्षुषामतीन्द्रियत्वोपपत्तेः, किमित्येवमस्य कल्पना इतिचेन्न, तदन्तरेण आत्मनो बन्धासिद्धेः औदारिकादिशरीरसम्बन्धा–सिद्धेश्च, न खलु घटाकाशयोरिव मूर्त्तामूर्त्तयोः कर्मात्मनोरौदारिकादिशरीरात्मनोर्वा परस्परानुप्रवेशलक्षणः सुखदुःखानुभवहेतुर्वा बन्धविशेषः संभवति, कार्मणशरीरानान्तरीयकस्य तु आत्मनस्तद्द्वारेण कर्मादिभिः सह सर्वमेतदुपपद्यते, तथा च कार्मणशरीरानुषक्तः कर्मवर्गणानाम् औदरिकादिवर्गणानां च ग्रहणेन योगवान् कषायस्नेहानुलिप्तः कर्मरजोभिरौदारिकादिशरीरैश्च आत्मा कथंचिदभेदेन सम्बध्यते, इत्यभ्युपेयम्, अत एव तदवच्छिन्नस्य आत्मनः सुखदुःखानुभवः, स्ववीर्येण औदारिकादिपुद्गलानामात्मना चेतनतया परिणमितत्वाद् यथोक्तम्–'**जीवज्झवसायाओ जीवत्ता पुग्गला परिणमंती**'त्ति, एवमनभ्युपगमे च शरीरस्य जीवादत्यन्तभेदात् तदवच्छेदेन तस्य सुखदुःखसंवेदनं न स्यात्, ननु भवतु कार्मणशरीरद्वारेण कर्मादीनामात्मना सम्बन्धः, तस्य तु तेन कथमसौ, सम्बन्धकान्तराभावात्, भावे वाऽनवस्थापातादिति चेन्न ? अनादिकालादात्मना सह कथंचित्तस्य तादात्म्येन तत्सम्बन्धस्य अपर्यनुयोज्यत्वात् अनादितादात्म्येन, तर्हि मुक्तावपि आत्मनस्तदविरहप्रसङ्ग इति चेन्न, तादृक्सामग्रीबलात् क्षीरस्य नीरेणेव कदाचित् तस्यापि तेन विरहोपपत्तेः तथापि अनादितया तस्य नित्यत्वप्रसङ्ग इति चेन्न, तथात्वेऽपि भवदभिमतप्रागभाववत्तस्य ॥२१०॥ अनित्यत्वसिद्धेः, अभावस्य अनादेरेषा गतिर्नतु भावस्य इति चेन्न, अनादित्वेऽपि भावरूपाया अपि मिथ्यावासनाया

अनित्यत्वाभ्युपगमात्, अन्यथा मुक्तावपि तत्प्रसङ्गात्, प्रवाहवाहितया तस्या अनादित्वं नतु कूटस्थतया, तेन तथात्वेऽपि अनित्यत्वं भविष्यति इति चेत्, तर्हि कार्मणशरीरेऽपि तत्समानं, एतच्च जीवस्य भवान्तरप्रापणे साधकतमम् इतरथा औदारिकादिशरीरस्य तद्भवे एव त्यागे न शरीरान्तरस्य चाभावेन तदनभ्युपगमे गत्यनुपपत्त्या भवान्तरप्राप्तिर्न स्यात्, नचाशरीर एव भवान्तरं प्राप्स्यति इति वाच्यं, सदेहस्यैव तस्येह गमनदर्शनेन अन्यत्रापि तथानुमानात्, अचेतनस्य कथं तस्य तत्प्रापणेसामर्थ्यमितिचेन्न, अचेतनस्यापि चेतनाध्यासितस्य पोतादेरिव तत्प्रयुक्त्या स्वयं प्रयोजकस्य देशान्तरप्रापणे सामर्थ्योपलम्भात्, स्वकल्पनाव्यवस्थापितमेतदिति चेन्न, आत्मनः सर्वगतत्वाभ्युपगमेन गत्यभावाङ्गीकारेऽपि मनसो भवान्तरशरीरप्रापणसमर्थस्य आतिवाहिकसंज्ञया शरीरान्तरस्य वैशेषिकादिभिरपि अभ्युपगमात्, **प्रज्ञाकरगुप्तोऽपि** आह–अन्तराभवदेहोपि सूक्ष्मत्वान्नोपलक्ष्यते । निष्क्रामन् वापि प्रविशन् नाभावोऽनीक्षणादपि ॥१॥ तदेवं कार्मणशरीरानादिसंबद्धस्य संसार्यात्मन औदारिकादिशरीरसम्बद्धाद् बन्धसिद्धिः, स च मिथ्यात्वादिनिमित्तः, तत्रानाभोगनिमित्तं विपरीतज्ञानं मिथ्यात्वमेतच्च अमनस्कानां, तदन्येषां तु रागादिकलुषितेषु अदेवादिषु देवबुद्धिरपि, तदुक्तम् ''**अदेवे देवताबुद्धिरगुरौ गुरुभावना । अतत्त्वे तत्त्वबुद्धिश्च मिथ्यात्वमिदमुच्यते ॥१॥** तदादिर्येषां ते तथा, आदिशब्दाद् अविरतिकषाययोगाणां ग्रहः, तत्र मनःसहचरितचक्षुरादीन्द्रियाणामनियमनं जीवनिकायानां षण्णां च हिंसा अविरतिः, अनन्तानुबन्धादिभेदात् क्रोधादयः षोडश हास्यादयश्च नव कषायाः, हास्यादीनां नो कषायत्वेऽपि कषायसाहचर्यात् कषायत्वं, सत्यमृषादिभेदेन प्रत्येकं मनोवचश्चतुर्द्धाद् औदारिकादितन्मिश्रकार्मणभेदेन कायस्तु सप्तधेति योगाः, ते यथाक्रमं पञ्च द्वादश पञ्चविंशति पञ्चदश भेदभाजो, निमित्तानि निमित्तकारणानि यस्य स तथा, एभिः कारणैः संसार्यात्मनां ज्ञानावरणादिकर्मबन्धसंभवात्, एवं च निमित्तभेदेन नैमित्तिकस्य बन्धस्यापि भेदादुपचारेण सप्तपञ्चाशद् विधत्वं, यदाह '**बन्धस्य मिच्छअविरइकसायजोगत्ति हेअवो चउरोत्ति**' एवं बन्धस्य सहेतुकत्वं समर्थ्य तस्यैव सोपपत्तिकत्वं दर्शयितुं विपक्षे अनिष्टप्रसंगमाह 'इतरथा' अन्यथा बन्धानभ्युपगमे कार्मणशरीराभावे तत्कार्याणामौदारिकादिशरीराणामभावेनात्मनो बन्धाभावात्, 'कथं' केन प्रकारेण, तुरक्षमायां, तेन न क्षम्यते एतत् यत्संसरणं कर्मसंबद्धस्य जीवस्य गतेर्गत्यन्तरेषु संसरणं

संसारः, बन्धाभावे संसारो न स्यात् इत्यर्थः । कारणस्य बन्धस्याभावे कार्यस्य संसारस्यानुत्पत्तेः, तथा च सर्वेषां मुक्तिप्रसङ्गेन संसारिजीवविरहितं जगदापद्येत, ननु आपद्यतामयत्नेन हि मुक्तिसिद्धौ अलं बन्धायासस्सहनेन कोहि सुखेन इष्टसिद्धौ तदर्थं कष्टमभ्युपेयाद् इत्याशंकायां विपक्षेऽनिष्टप्रसङ्गान्तरमापादयन् लौकिकनिदर्शनेन बद्धस्यैव मोक्ष इति समर्थयन्नाह 'न च' नैव लोकेऽपि अतिशयितविवेकरहितजनेऽपि आस्तां लोकोत्तरे, तत्रहि बद्धस्यैव आत्मनस्तद्वियोगेन मोक्षप्रतिपादनात् इत्यपिशब्दार्थः, अबद्धो निगडादिभिरसंयमित एवमुच्यते–बन्धनात् मुक्तोऽयमिति व्यपदेशभाग् भवति, किन्तु कुतोऽपि अपराधात् पार्थिवादिभिः कारादिषु बद्ध एव दण्डादिना विशोधितापराधः पुरुषः पश्चाद् मुच्यते. कारादिभ्यो बहिष्क्रियते, ततश्च लोकेन मुक्तोऽयं बन्धनादिति व्यपदिश्यते, अत्र इत्यध्याहारस्तेन इति 'प्रकटं' स्फुटं लौकिकानामपि प्रतीतोऽयमर्थः, यतो यस्माद् हेतोः 'हन्दीति' पूर्ववत्, ततश्च यदा लोकेऽपि बद्धस्यैव मोक्षसंभवस्तदात्मनो बन्धाभावेऽपि अयत्नसिद्धा मुक्तिरिति का कथा, तस्माद् बद्धस्यैव आत्मनस्तपोध्यानादिना तद् वियोजने मोक्षो नान्यथा इत्यभ्युपेयं सर्ववादिनामप्यत्र संप्रतिपत्तेः, तस्मात् सूक्तं बन्धाभावे संसारमोक्षौ न स्यातामिति, ननु लोके यथा बद्धस्यैव मोक्षस्तथा मुक्तस्यैव बन्ध इत्यपि दृश्यते, प्रकृते तु आत्मन बद्धस्यैव मोक्ष इत्येव विकल्पोऽभिमतो नतु विकल्पान्तरमपि, अयोगिकेवलिनं विहाय प्रतिक्षणं संसार्यात्मनां सिद्धान्ते बन्धस्यैवाभिधानात्, यदाह **''सव्वावत्थासु जओ पायं बंधो भवत्थजीवाणं''** तस्मादसमो लोकदृष्टान्त इति चेन्न, प्राग् बद्धानां कर्मणामुदयप्राप्त्या क्षपणात्तन्मुक्तत्वेन प्राच्यतद्बन्धस्य चाविवक्षयाऽभिनवानां च तेषामभीक्ष्णं बन्धेन बद्धस्यैव मोक्ष इति विकल्पवन्मुक्तस्य बन्ध इति विकल्पान्तरस्यापि उपपत्तेः, अथवा लोकेऽपि मुक्तस्य बन्ध इत्यत्र स्वातन्त्र्यमात्रापेक्षयौपचारिकं मुक्तत्वं, बद्धस्य मोक्ष इत्यत्रैव तु मोक्षशब्दस्य मुख्यार्थत्वं बन्धनान्मुक्तस्य स्वातत्र्यं मोक्ष इति वस्तुतो मोक्षशब्दार्थस्य प्रसिद्धेः, तथा चात्मन इव लोकेऽपि तत्त्वतो बद्धस्यैव मोक्ष इत्येक एव विकल्पो नतु मुक्तस्य बन्ध विकल्पान्तरमपि,-स एवात्र दृष्टान्तत्वेन उपन्यस्तः, एवं च दृष्टान्तदार्ष्टान्तिकयोर्न वैषम्यम् इति गाथार्थः ॥९३॥ तदेवं बद्धस्यैव मोक्ष इत्यनेन नित्यस्यापि बद्धस्य मोक्षाभावं बन्धमोक्षयोश्च सामानाधिकरण्यमभिव्यंज्य ये केचिदस्ति जगति बन्धाभावेऽपि अनादिमुक्तं ईश्वर इत्याचक्षते, ये च बन्धाभ्युपगमेऽपि

नित्यमात्मानमपह्नुवानाः क्षणिकज्ञानमात्रस्यैव मुक्तिरिति प्रतिजानते, तन्मतद्वयं संप्रति तेषां मुक्त्यभावापादनेन अपाकर्त्तुमाह—

**तदणाइसिद्धजोगो असंगओ नय अन्नबंधम्मि । अन्नो मुच्चइ जुत्तं खणभंगो ता कहं भवउ ॥९४॥**

**व्याख्या**-यस्माद् बद्धस्यैव मोक्षो नाबद्धस्य 'तत्' तस्माद्धेतोरनादेः प्राथम्यशून्यात्कालात् स्वरसत एव रागादिक्लेश—बन्धाभावेन सिद्धो मुक्तोऽनादिसिद्धो, नतु इतरमुक्तवत् कालदेशादिप्रतिनियमेन प्रतिपक्षभावनाद्यभ्यासात् मिथ्याज्ञानादिक्लेशबन्ध—प्रहाणेन सिद्ध इत्यर्थः, यथाह—पतञ्जलिः, क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय संप्रदायप्रद्योतकः सर्गसंहारादिना जगतामनुग्राहकः पुरुषविशेष ईश्वर इति, अत्र क्लेशकर्माद्यपरामर्शेन तस्य अनादिसिद्धत्वं व्यञ्जितं, स्मृतिरप्याह—**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः ॥१॥** उत्तमत्वं चात्र असंसारित्वं सर्वज्ञत्वादिकं च, परमत्वं सर्वोपास्यत, लोकत्रयं सर्वोपलक्षणम्, आवेशो ज्ञानचिकीर्षाप्रयत्नशालिनः संयोगः, भरणं धारणम्, अव्ययत्वमनागन्तुकज्ञानादि विशेषणगुणशालित्वम्, ऐश्वर्यं संकल्पाप्रतिघात इति, अत्रापि असंसारित्वामनागन्तुकज्ञाना—दिगुणशालित्वाभ्यामनादिसिद्धमुक्तं, तदेवं व्यवस्थितस्य अनादिसिद्धस्य ईश्वरस्य, योगो घटना सिद्धिरिति यावत्, असंगतोऽनुपपन्नो बन्धाभावे मुक्तेः कथमपि न सिद्धिरिति प्रसाधनात्, ननु अनादिमुक्तस्य ईश्वरस्यासिद्धिरित्यसिद्धं, तत्साधकप्रमाणसद्भावात्, ननु तत्साधकं प्रमाणं किं प्रत्यक्षमनुमानं वा ? न तावत् प्रत्यक्षम् अस्मदादिभिस्तस्य प्रत्यक्षेण ग्रहीतुमशक्यत्वात्, ननु अनुमान भविष्यति, तथाहिअनादिप्रसिद्धकर्तृषुकादन्यत् सकर्तृकं, कार्यत्वात्, घटवत्, न च कार्यत्वं हेतुरसिद्धः, इदानीमुपजायमानेषुअङ्कुरादिषु कार्यत्वस्य प्रत्यक्षेणैव सर्वप्रतीतेः, चिरंतनेषु भूभूधरादिषु अस्मदादीनां तदसिद्धिरिति चेन्न, अनुमानतस्तत्रापि तत्सिद्धेः, तथाहिभूभूधरादि कार्यं सावयवत्वात्, घटवत्, स्वावयवसमवेतत्वस्य च सावयवत्वस्य घटस्येव भूभूधरादेरपि प्रत्यक्षेण दर्शनात् नासिद्धिः, नापि विरुद्धः, साध्यविपर्ययव्याप्तस्य हेतोर्विरुद्धत्वेन प्रतिपादनात्, यथा शब्दो नित्यः कृतकत्वादिति, न चेह साध्यसकर्तृकत्वविपर्ययेण अकर्तृकत्वेन हेतोर्व्याप्तिरस्ति, दृष्टान्तीकृतस्य घटादेः कार्यजातस्य सर्वस्यापि कर्तृपूर्वकत्वोपलब्धेः, ननु एवं कार्यत्वसामान्याद् भूभूधरादेरपि कर्तृमात्रपूर्वकत्वं सिद्ध्यति, नतु भवदभिमतसर्वज्ञकर्तृपूर्वकत्वं,

तत्र च सिद्धसाधनं, कर्मभिः सर्वजीवानां तत्सिद्धेः, सिद्धसाधनमिति वचनादिति चेन्न, कर्मणामचैतन्येन क्षित्यादिकर्तृत्वासिद्धेः चेतनस्यैव कर्तृत्वेनाभ्युपगमात्, ननु तथापि कार्यत्वसामान्यस्य कर्तृविशेषेण व्याप्तेरभावात् कथमस्मात् तत्सिद्धिः, साध्याव्याप्तस्यापि च हेतोस्तत्साधकत्वे सर्वं सर्वस्मात् सिध्येत् न कश्चिद्धेत्वाभासः स्यात्, तथा च कर्तृविशेषेण साध्येन साधनस्य कार्यत्वसामान्यस्य प्रतिबन्धाभावात् तद्विपर्ययेणैव च साध्यसामान्येन तद्भावात्, कथमयं न विशेषविरुद्धो हेतुरिति चेन्न, नह्यत्र विशेषः साध्यो येन तद्विपर्ययव्याप्त्या हेतोस्तद्विरुद्धता शंक्येत, किं नाम सामान्यं? कथं तर्हि विशेषसिद्धिरितिचेत्, व्याप्तिबलादुपज्ञायमानायाः साध्यसामान्यप्रतीतेरत्र अन्यथानुपपत्त्या पक्षधर्मताबलेन वा तत्स्वीकारात्, अन्यथा प्रसिद्धानुमानेपि पर्वतगतबह्निसिद्ध्यभ्युपगमे तेन च हेतोरव्याप्त्या तद्विपर्ययेणैव च व्याप्त्या धूमवत्त्वहेतोर्विशेषविरुद्धत्वं केन वार्यते, तथा च सर्वानुमानोच्छेदप्रसङ्गः, तस्माद् यथा तत्र धूमसामान्याद् वह्निसामान्यप्रतीतेरन्यथाऽ पर्यवसानेन पक्षधर्मताबलाद् तद्विशेषसिद्धिस्तथा इहापि भविष्यति को दोषः, नाप्यनैकान्तिकः विपक्षे वृत्त्यभावात्, ननु अकर्तृकेऽङ्कुरादावपि कार्यत्वस्य दर्शनात्, कथं विपक्षावृत्तित्वमिति चेन्न, तस्यापि पक्षनिक्षेपात्, तेन च व्यभिचारानुद्भावनात्, उद्भावने वा सर्वस्यैव हेतोर्व्यभिचारित्वप्रसङ्गेन अनुमानमात्रस्यापि उच्छेदापत्तेः, प्रसिद्धानुमानेऽपि पर्वते वह्निमत्त्वासिद्धौ तेनैव धूमवत्त्वहेतोर्व्यभिचारस्य उद्भावयितुं शक्यत्वात्, नापि अप्रयोजकः, हेतोः परप्रयुक्तव्याप्त्युपजीवित्वेन तत्संभवात्, अत्र तु कार्यत्वस्य निरुपाधितयैव साध्यसम्बन्धेन तदभावत्, ननु अत्रापि अस्ति कार्यत्वस्य सकर्तृत्वसम्बन्धिशरीरिकर्तृकत्वमुपाधिः, तथाहि नहि घटः कार्यत्वात् सकर्तृकः किन्तु शरीरिकर्तृकत्वात्, तथा च क्षित्यादेः सकर्तृकत्वव्यापकस्य तस्याभावात् कार्यत्वेऽपि सकर्तृकत्वं न भविष्यति, व्यापकाभावे व्याप्यव्यावृत्तेः, एवं चाप्रयोजकोऽयं हेतुरिति चेन्न, ज्ञानचिकीर्षाप्रयत्नशालिन एव कर्तृत्वे न अङ्गीकारात्, शरीरावच्छेदेन तु ज्ञानोत्पादात् तस्य तत्रैव चरितार्थत्वेन कर्तृत्वानुपयोगात्, एवं च अशरीरिणोऽपि ज्ञानादिमतः क्षित्यादिकर्तृरभ्युपगमेन शरीरकर्तृत्वस्योपाधेरभावात्, न तत्प्रयुक्तव्याप्त्युपजीविकत्वादप्रयोजकः, ननु मा भूत् एष उपाधिः, किं तर्हि ? अक्रियादर्शिनोऽपि कृतबुध्युत्पादकत्वमसौ भविष्यति, तदुक्तम्—''यदृष्टेक्रियादर्शिनोऽपि कृतबुद्धिरुत्पद्यते, इति,'' न च भूभूधरादिदर्शनात् तवापि कृतबुद्धिर्जायते जीर्णकूपारामादिदर्शनात्

तु अक्रियादर्शिनोपि बालादेरपि च शरीरकर्तृकमेतद् इति बुद्धिरुपजायते, तस्मात्तत्प्रयुक्तैव कार्यत्वसकर्तृकत्वयोर्व्याप्तिर्न स्वाभाविकी अप्रयोजक इति चेन्न, भवतु कार्यत्वविशेषात् शरीरादिमत्त्वकतृविशेषप्रतिपत्तिः, तथापि न तावता कार्यत्वसामान्यकर्तृसामान्ययोर्व्याप्तिः कथंचिदपि निवारयितुं शक्या, नहि भोजनविशेषस्य क्षुदुपशमविशेषव्याप्तौ भोजनसामान्यस्य क्षुदुयशममात्रव्याप्तिर्निराकर्तृमुचिता, यथोक्तं विशेषस्य विशेषं प्रति प्रयोजकत्वात् सामान्यव्याप्तेरप्रतिक्षेपार्हत्वादिति, तस्मान्नैतस्मादपि उपाधेरप्रयोजकः । नापि कालात्ययापदिष्टः, प्रत्यक्षादिप्रमाणबाधित विषयो हि हेतुस्तथा स्यात्, यथा अनुष्णो वह्निः कृतकत्वादिति, अत्रहि कृतकत्वेनाग्नेरनुष्णत्वे साध्ये प्रत्यक्षेण तदौष्ण्यग्रहणात् भवति हेतोर्बाधः, एवं परमाणुसावयवत्वसाधकस्य मूर्त्तत्वादेरनुमानादिबाधोऽपि हेतोर्बोद्धव्यः, नचेह कार्यत्वेन क्षित्यादेः सकर्तृकत्वसाधने प्रत्यक्षेणाऽकर्तृकत्वग्रहणात् तेन हेतोर्बाधः, प्रत्यक्षेणात्र कर्तृर्ग्रहणायोग्यत्वात्, ननु शरीरज्ञानचिकीर्षाप्रयत्नशालीकर्त्ता लोके प्रसिद्धः, न च क्षित्यादिषु एवंविधः कर्त्तोपलभ्यते तस्मात् प्रत्यक्षेण तदनुपलम्भेन अकर्तृकत्वनिश्चयाद् भवति कालात्ययादिष्टो हेतुरिति चेन्न, ज्ञानेच्छाप्रयत्नवान् एव कर्तृशब्देनाङ्गीकारात्, तस्यैव कर्तृत्वेन सर्वत्रप्रसिद्धेः, अथ कथं न शरीरस्य तत्र प्रवेशः, तस्याऽचैतन्यरूपत्वादिति चेत् ? एवं तर्हि इच्छाप्रयत्नयोरपि तस्य समानत्वात् तद्वानपि न कर्त्ता स्यात्, तथा च ज्ञानवान् कर्ता इति प्राप्तं, न च तन्मात्रवतः कर्तृत्वमुपपद्यते करोतीति कर्त्ता इति व्युत्पत्त्या अर्थक्रियोपहितस्वरूपस्यैव कर्तृशब्देनाभिधानात्, अन्यथा मृत्पिण्डदण्डादिघटसामग्रीज्ञानमात्रवतोऽपि कुम्भकारस्य घटनिष्पादनं विनाऽपि कर्तृत्वप्रसङ्गात्, ज्ञानमात्रवतश्च कर्तृत्वाभ्युपगमे सर्वस्य सर्वकर्तृत्वापातात्, दर्शनश्रवणादिनां सर्वेषां सर्वपदार्थेषु प्रायो ज्ञानमात्रसंभवात्, अथ शरीरस्य ज्ञानोत्पादनोपयोगित्वात् न कर्तृत्वानुप्रवेशः, तर्हि ज्ञानेच्छयोरपि तत्प्रवेशो न भवेत्, यथाक्रममिच्छाप्रयत्नयोस्तयोरुपयोगात्, तथा च केवलप्रयत्नवान् कर्त्तेति स्यात्, न चाव्यवधानेन प्रयत्नात् कर्तृशब्दार्थसम्भवात् तद्वानेव कर्त्ता भवतु, इति वाच्यं ? चैतन्यं विना तस्यापि अनुपपत्तेः, तस्मात् शरीरज्ञानादिमानेव कर्त्ता, तस्य चात्रानुपलम्भात् प्रत्यक्षबाध इति, तदयुक्तं ज्ञानादेरिच्छाद्युत्पादोपयोगेपि इच्छाप्रयत्नयोर्विषयोपदर्शनार्थं पुनरुपयोगात् स्वयं विषयग्रहणासामर्थ्यं न ज्ञानोपदर्शित एव विषये तयोः प्रवृत्तेः, तस्मात्तदर्थं ज्ञानमवश्यमेषणीयं, न चेच्छाप्रयत्नावपि विना कर्तृत्वं ज्ञानमात्रवतः प्रागेव

तन्निषेधात्, ततश्च ज्ञानेच्छाप्रयत्नवानेव कर्त्ता शरीरस्य तु ज्ञानादिमात्रोपयोगान्नावश्यं तत्र प्रवेशः, तथा चाशरीरिणो ज्ञानादिमतः क्षित्यादिकर्तृरस्मदादिभिर्ग्रहीतुमशक्यत्वान्नात्र प्रत्यक्षबाधः । नाप्यनुमानबाधः, उपजीव्यानुमानाभावात्, नंहि यथा परमाणुः सावयवो मूर्त्तत्वादित्यादौ परमाणुरूपधर्मिग्राहकेण उपजीव्यानुमानेन तन्निरवयवत्वग्राहिणा सावयवत्वबाधाद् हेतोर्धर्मिग्राहकप्रमाणबाधः, तथात्रापि उपजीव्यानुमानं किंचिदस्ति येन हेतोस्तेन बाधः स्यात् । आगमस्तु अत्र 'विश्वतश्चक्षुरित्यादिरनुकूल एव । नापि सत्प्रतिपक्षः, प्रतिबलानुमानाभावात्, ननु विवादाध्यासितमकर्तृकं शरीराजन्यत्वाद् अशक्यक्रियत्वाद्वा आकाशवद् इत्यस्ति प्रतिपक्षानुमानमिति चेन्न, आकाशस्य अजन्यत्वमात्रेणैव अकर्तृत्वसीद्धौ शरीराजन्यत्वस्य हेतोरसमर्थविशेषणत्वात्, तथा अशक्यक्रियत्वस्यापि अप्रयोजकत्वात्, तत्रापि अजन्यत्वेनैव आकाशस्य अकर्तृकत्वसिद्धेः, ननु क्षित्यादि अकर्तृकं तद्व्यापकरहितत्वाद् गगनवत्, इत्यस्तु प्रतिबलानुमानमिति चेन्न, अथ किं कर्तृव्यापकं यद्विरहात् क्षित्यादेरकर्तृकत्वं सिसाधयिषितं ? शरीरमिति चेत्, किं तस्य व्यापकत्वं, कर्त्तरि व्याप्येऽयोगव्यवच्छेदेन तस्य भावः, कर्तृतयाहि दृष्टान्तीकृते कुम्भकारादौ शरीरस्यायोगः कदाचिदपि नास्तीत्यर्थः, एतच्छरीरस्य कर्तृव्यापकत्वमिति चेन्न, कर्तृः शरीरसम्बन्धे कार्यबुद्धिमत्त्वस्य उपाधेर्भावात्, शरीरस्य तद्व्यापकत्वमसिद्धेः यो हि कार्यबुद्धिमान् कर्ता सशरीरी यथा कुलालादिः, प्रकृते तु पक्षधर्मताबलात् नित्यबुद्धिमानेव कर्त्ता साधयितुमिष्टः, स च शरीरं विनापि नित्यज्ञानेच्छाप्रयत्नबलात् क्षित्यादिकं करिष्यति को विरोधः, अथ कर्तुः शरीरमपेक्ष्यैव अर्थक्रियाकरणम् इत्येतत्कर्तृव्यापकत्वं शरीरस्य विवक्षितं तदपि न, कर्तुर्बाह्यार्थक्रियासु शरीरापेक्षायामपि स्वशरीरचलनाद्यर्थक्रियां प्रति शरीरान्तरापेक्षानभ्युपगमात् अभ्युपगमे वा अनवस्थापातात्, एवं च यथा लौकिकः कर्त्ता शरीरान्तरानपेक्ष एव स्वशरीरपरिस्पन्दाद्यर्थक्रियां करोति तथा पुरुषविशेषः कश्चित् सर्वातिशायिनित्यज्ञानादिमान् अशरीर्यपि सर्वकर्त्ता भविष्यति को दोषः, न च न सन्ति नित्यज्ञानादयोऽपि अनित्यानामेव तेषां सर्वत्र दर्शनादिति वाच्यम्, अदृष्टैकार्थसमवायिनामेव तेषामनित्यत्वाभ्युपगमात्, अदृष्टैकार्थसमवायोऽपि, तेषामस्त्येव अन्यथा मुक्तानामपि तत्प्रसङ्गादिति चेन्न, दोषवत्सु एव तेषामदृष्टैकार्थसमवायाङ्गीकारात्, निर्दोषे तु पुरुषविशेषे तेऽपि भविष्यन्ति अदृष्टैकार्थसमवायोऽपि न भविष्यति इति, ननु

निर्दोषः पुरुषविशेषः किमादिमुक्तोऽनादिमुक्तो वा भवतोऽभिमतः, न प्रथमः, मुक्तानामपि नित्यज्ञानादिप्रसङ्गात् तथा च तेषामपि क्षित्यादिकर्तृत्वापत्तेः, अनेकतत्कर्तृत्वप्रसङ्गाच्च, न द्वितीयः, तदसिद्धेः नित्यज्ञानादिमतस्तादृक्पुरुषविशेषस्य केनचित् क्वचिदपि अनुपलम्भात् इति चेन्न, अनौपाधिकसामान्यव्याप्तिसहकृतपक्षधर्मताबलात् तत्सिद्धेः, तथा च न प्रतिपक्षानुमानावकाशः, एवं च सकलहेत्वाभासशङ्काविरहात् कार्यत्वहेतोरनादिमुक्तक्षित्यादिकर्तृसिद्धिरिति, अत्रोच्यतेयत्तावदुक्तमनादिप्रसिद्धकर्तृकादन्यत् सकर्तृकमित्यादि, तत्र किमनादेः कालात् प्रकर्षेण क्लेशक्षयक्रममुक्तेतरपुरुषवैलक्षण्याद् अतिशयेन सिद्धो मुक्तो, यद्वाऽनादिरनादिमुक्तः प्रसिद्धश्च पुराणादिषु प्रतीतः स कर्त्ता यस्य क्षित्यादेस्तत्तथा, तस्मादन्यद् घटपटादिपदार्थजातं सकर्तृकमिति साध्यार्थ आयुष्मतो विविक्षितः, आहो अनादेः कालात् यत् प्रसिद्धकर्तृकं लोकप्रतीतकर्तृकं घटादि तस्मादन्यदिति, उत अनादि च तत् प्रसिद्धकर्तृकं च तस्मादन्यदिति ? न तावदाद्यः, सिद्धसाधनात् घटादीनां कुलालादिकर्तृकत्वस्य अस्माकमपि सिद्धत्वात्, अप्रसिद्धविशेषणश्च पक्षः, अनादिप्रसिद्धपुरुषकर्तृकत्वस्य क्षित्यादेरद्यापि अप्रसिद्धेः, न द्वितीयः, तदाहि परमाण्वात्माकाशादीनामपि सकर्तृकत्वसिद्धिप्रसङ्गात्, न च तदिष्टं तेषां नित्यत्वेन त्वयापि अकर्तृकताभ्युपगमात्, तथा च भागासिद्धो हेतुः, क्षित्यादिभागे सिद्धावपि परमाण्वादिभागे कार्यत्वस्यासिद्धेः, न तृतीयः, प्रसिद्धकर्तृकस्य घटादेरनादित्वानुपपत्तेः, उपपत्तौ वाऽऽकाशादेरिव सकर्तृकत्वव्याघातात् उभयोः परस्परविरोधात्, तथात्रापि अन्यशब्देन परमाण्वादीनामपि पक्षत्वाक्षेपेण सकर्तृकत्वसिद्ध्यापाताच्च, ननु न भवद्विकल्पितः प्रतिज्ञार्थो ममाभिमतः, किन्तु समाहारद्वन्द्वसमासाश्रयणाद् अनादि च परमाण्वादि प्रसिद्धकर्तृकं च घटादि तस्मादुभयस्मादपि अन्यद् भूभूधरादिसकर्तृकतया साध्यं विवक्षितं कार्यत्वेन हेतुना इति चेत्, तदयुक्तं, विकल्पानुपपत्तेः, तथाहि किमिदं कार्यत्वं किं प्रागसतः स्वकारणवृत्तित्वं कर्तृरूपकारकजन्यत्वं वा, तद्व्यतिरिक्तकारकजन्यत्वं वा, कृतिव्याप्यत्वं वा, कारणमात्राधीनत्वं वा, प्रागभावोपलक्षितस्वरूपत्वं वा, न प्रथमः. वृत्तिर्हि संयोगो वा स्यात् समवायो वा स्यात्, नाद्यः, अवयवावयविलक्षणयोः कार्यकारणयोः भवता संयोगानभ्युपगमात्, न द्वितीयः, तस्यानुपपत्तेः, तथाहि किमवयवेषु असतोऽवयविनः समवायः सतो वा, नाद्यः, अन्यतरसम्बन्धिनोऽसत्त्वेन तदनुपपत्तेः, उपपत्तौ वा शशविषाणस्यापि पटाद्यवयवेषु समवायप्रसङ्गात्,

अथ तस्यात्यन्तासत्त्वेन न तेषु समवायः, पटादेस्तु उत्पत्त्यनन्तरं संभवेन तेषु समवाय उत्पत्स्यते इति चेन्न, उपपद्यतां नामासौ किन्तु यावन्न पटाद्युत्पत्तिस्तावन्न तस्य सत्त्वं तदभावात्तु कथं तस्य तेषु समवायः, उत्पादेऽपि च सत्त्वसमवायात् प्राग् न तस्य सत्त्वं, न च समवायद्वयं भवता इष्यते, येन एकस्मात् सत्त्वमपरस्माच्च अवयवेषु तस्यावस्थानं स्यात्, न च उपजायमान एवासौ सत्त्वादिना संभत्स्यत इति वाच्यम्, उपजायमानस्यापि अनुपजातत्वेन संबन्धायोग्यत्वात्, न द्वितीयः, सत्तासमवायात् प्राग् घटादेः सत्त्वस्यैव अनुपपत्तेः समवायान्तराच्चेन्न, तस्याऽनभ्युपगमात्, अथ समवायात् प्रागपि तस्य सत्त्वमभ्युपगम्यते ? तर्हि किं समवायकल्पनया तमन्तरेणापि तस्य सत्त्वसिद्धेः, तद्वदवयविनोऽपि अवयवेषु स्वत एव अवस्थानप्रसक्तेश्च, न च सत्तासमवायात् पूर्वमवयवी न सन्नापि असन् सत्तासंबन्धात्तु सन्निति व्यपदिश्यते इति वाच्यं, सहि सत्तासंबंधात् प्राग् कांचिदर्थक्रियां करोति न वा ? करोति चेत्; कथं न सन्, न चेत् कथं नासन्, अपि च सत्त्वाऽसत्त्वयोः परस्परविरुद्धत्वेन एकतरनिषेधस्य अन्यतरविधिनान्तरीयकत्वेन उभयनिषेधानुपपत्तेः, भवतु वा सत्तासमवायात् पदार्थानां सत्त्वं, समवायस्य पुनः कस्मात् सत्त्वं, समवायान्तरात् चेत् न, तदनभ्युपगमात्, अथ स्वरूपेणैव तस्य सत्त्वमिति चेत्, नन्वेवं पदार्थानामपि तेनैव सत्त्वमस्तु किं समवायेन, ननु यदि समवायस्य स्वरूपेणैव सत्त्वमेतावता सर्वपदार्थानामपि तथैव तदास्तामिति कथमेतदुच्यते, एवंहि क्वचित्पदार्थे कस्यचित् धर्मस्य दर्शनात् तद्दृष्टान्तेन सर्वेषामपि तदापादने जगद्वैचित्र्यविलोपः स्यात्, नहि शर्करायाः स्वत एव माधुर्ये शाल्योदनादीनामपि तत्संयोगं विनापि स्वत एव तदस्तु इति युज्यते, इति चेन्न, यदि हि जगति समवायस्य एकस्यैव स्वतः सत्त्वाभ्युपगमः स्यात्, तदा स्वीक्रियेतापि सत्तासमवायात् तदन्यपदार्थानां सत्त्वं, न चैतदस्ति, यावता समवायवत् सामान्यस्य अन्त्यविशेषाणां च भवता स्वत एव तदंगीकारात्, न च दृष्टान्तेऽपि तर्हि माधुर्यस्य शर्करायामिव क्षीरादिष्वपि भावात् तत्सम्बन्धं विनापि शाल्योदनादिषु तत्प्रसङ्ग इति वाच्यं, शर्कराक्षीरादिमाधुर्यस्य माधुर्यमात्रेण साम्येऽपि अनुभवैकसंवेद्यावान्तरसामान्यभेदेन भिन्नजातीयत्वात्, तथा च पठ्यते—इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्, तथा च तन्माधुर्यस्य भिन्नजातीयत्वेनैव शाल्योदनादीनां तत्संयोगेन माधुर्यविशेषो न स्वत इत्यपि केनचित् वाचाटेन वक्तुं शक्यत्वात्,

इह तु समवायस्य स्वतः सत्त्वं द्रव्यादिपदार्थानां च सत्तासमवायात् सत्त्वमिति विभागः कर्तुं न शक्यते, सदिति प्रत्ययहेतोः सत्त्वस्य सर्वत्रापि अविशेषात्, न च सामान्यादिषु सत्तासम्बन्धात् सत्त्वस्वीकारेऽनवस्थापात इति तत्र स्वत एव तत्स्वीकारो, द्रव्यादिषु तु सत्तासम्बन्धादिति वाच्यं, द्रव्यादीनां सत्तासम्बन्धात् सत्त्वाभ्युपगमे परस्पराश्रयप्रसङ्गात्, द्रव्यादीनां सत्त्वे तत्र सत्तासम्बन्धस्तत्सम्बन्धाच्च तेषां सत्त्वमिति, असति धर्मिणि धर्मसम्बन्धानुपपत्तेः, अथ सत्ताया नित्यत्वेन सर्वगतत्वेन च तत्सम्बद्धा एव द्रव्यादयो जायन्ते, अतो न परस्पराश्रयप्रसङ्ग इति चेन्न, तत्सम्बद्धा इति किं तादात्म्यका, उत तत्समवेता इति विवक्षितं, यद्याद्यस्तदाऽलं समवायेन तं विनापि सत्तातादात्म्येनैव द्रव्यादीनां सत्त्वसिद्धेः, तादात्म्ये च समवायायोगात्, अथ द्वितीयस्तदा जायमानानां तेषामद्याप्यसत्त्वेन धर्म्यभावात् तत्समवायानुपपत्तेः, तस्मात् सामान्यदिवद् द्रव्यादीनामपि स्वत एव सत्त्वमभ्युपेयं किं सत्तासमवायात् तेषां तत्कल्पनया, अपि चावयवावयविनोः किमसमवायिनोः समवायः समवायिनोर्वा ? नाद्यः, पटावयवघटावयविनोरपि समवायप्रसङ्गात्, न द्वितीयः, समवायकल्पना वैयर्थ्यात्, तद्विनापि तयोः प्रागेव समवायित्वसिद्धेः, अथ प्रत्यक्षप्रमाणवेद्यः समवायो न तत्र एवं विप्रतिपत्तिः कर्तुमुचिता, तत्रापि वा तत्करणे सर्वत्रानाश्वासप्रसङ्गादिति चेन्न, प्रत्यक्षेण किं सम्बन्धबुद्ध्या वेद्यतेऽसौ, समवायबुद्ध्या, इह बुद्ध्या वा, न प्रथमः, संयुक्तयोरपि घटपटयोः समवेतौ इमौ इति प्रतीतिप्रसङ्गात्, सम्बन्धमात्रबुद्धेस्तत्रापि अविशेषात्, न द्वितीयः, एते तन्तवोऽयं पटोऽयं च तन्तुपटयोः समवाय इति बुद्धेः प्रायेण कस्यचिदनुदयात्, न तृतीयः, इह तन्तुषु पटः इह शाखायां वृक्ष इत्यादीह बुद्ध्याव, इह पटे तंतव इह वृक्षे शाखा इत्याद्याकाराया अपि इहबुद्ध्या आधाराधेयभाववैपरीत्येन समवायसिद्धिप्रसङ्गात्, न चैवमाकारा बुद्धिर्नास्तीति वक्तव्यम्, आगोपालाङ्गनं प्राय एवमाकाराया एव बुद्धेरुत्पाददर्शनात्, भवतु एवमाकारापि बुद्धिर्यथा तथा नः समवायसिद्ध्या प्रयोजनमिति चेत्, न, एवमभ्युपगमे तन्त्वादीनां पटाद्यारम्यत्वप्रसङ्गात्, अवयवावयविनोः समवायविचारेऽधिकरणबुद्धिगोचरस्यारम्भकत्वेन भवताऽभ्युपगमात्, मिथ्या इयमेवमाकारा बुद्धिरिति चेत्, कुतः पुनरस्या मिथ्यात्वमवसितम्, आधाराधेयभावव्यवस्थितानां तन्तुपटादीनां विपर्ययप्रदर्शकत्वादिति चेत्, 
किं पुनराधारत्वं तन्त्वादीनां, पटाद्यारम्भकत्वमिति चेत्, न, नह्यारम्भकत्वमधिकरणलक्षणं पतनप्रतिबन्धकत्वस्यैव तल्लक्षणत्वेन

प्रतिपादनात्, यदाह **उदयनाचार्यो**–धृतिहेतुरधिकरणमिति, धृतिश्च पतनप्रतिबन्धः, अन्यथा बदरादेरनाम्भकत्वेन कुण्डादेस्तदधिकरणत्वं न स्यात्, तस्मात् पतनप्रतिबन्धादेव कुण्डं बदरस्याधिकरणमुच्यते, तथेहापि यदि तन्त्वादयः पटादीनां पतनं प्रतिबध्नीयुस्तदा भवेत् तेषामधिकरणत्वं, न चैवमस्ति, तत्कस्य हेतोरेवंरूपस्य आधाराधेयभावस्य कुण्डबदरादीनामिव अत्यन्तभेद एव व्यवस्थापनात्, तन्तुपटादीनां तदभावात्, तस्मात् त्वदभ्युपगमेन आरम्भकत्वेऽपि न तत्त्वतस्तन्त्वादीनामाधारत्वं, तदभावाच्च नाधाराधेयभावविपर्ययप्रदर्शने पटे तन्तव इत्यादिबुद्धेर्मिथ्यात्वं, तथात्वे च लोकप्रतीतिविरोधेन तन्तुषु पट इत्यादिबुद्धेरपि भवदभिमताया मिथ्यात्वप्रसङ्गात्, तस्मान्न तन्तुषु पट इत्यादीहबुद्ध्या वेद्यते समवायः, तथात्वे वा पटे तन्तव इत्यादिबुद्ध्यापि वेद्येत; बुद्ध्या किं च इह तन्तुषु पट इतिबुद्धेराधाराधेयरूपत्वेन न ततः समवायसिद्धिर्युक्ता, अन्याकारयापि बुद्ध्या अन्यस्य सिद्धिकल्पने घटबुद्धिरपि पटसिद्धिकल्पनापत्तेः, अपि च इहबुद्ध्या समवायस्य वेद्यत्वाभ्युपगमे संयोगस्यापि समवायतापत्तिः, इहबुद्धिवेद्यतायास्तत्रापि अविशेषात्, किं च यथाऽवयवावयविनोर्भवता समवाय इष्यते, तथा गुणगुण्यादेरपि तथा च तस्य प्रत्यक्षवेद्यत्वेऽयं पटोऽयं च शुक्लो गुणोऽयं चानयोः समवाय इति भेदेनैव प्रतिपत्तिर्भवेत्, नतु शुक्लः पट इत्यादिरूपेण, तादात्म्येनापि प्रत्यक्षेण, तथैव तस्य त्वन्मते निश्चयात्, भवतु वा समवायस्तथापि असौ स्वरूपसत्त्वात् स्वत एव यथा समवायिनोः संबध्यते, तथा सामान्यमन्त्यविशेषाश्च, स्वरूपसत्त्वविशेषात् स्वाश्रयेषु स्वत एव संभत्स्यन्ते, किं तेषां स्वाश्रयवृत्तौ समवायकल्पनेन, तथा च पञ्चानां द्रव्यादिपदार्थानां वृत्तिः समवाय इत्ययुक्तमुक्तं वैशेषिकैः, प्रागसत इति च विशेषणे कारणसमवायात्, प्रागविद्यमानस्य इत्यर्थो विवक्षितस्तथा च कारणसमवाये सति सत्त्वं कार्यत्वमिति तात्पर्यार्थः स्यात्, न च कारणसमवायादन्यत् सत्त्वं, कारणसमवायस्यैव त्वया सत्त्वेनाभ्युपगमात्, एवं च कारणसमवायः कारणसमवायमेव आश्रयत इत्यात्माश्रयप्रसङ्गात्, प्रागसत इति विशेषणस्यापि अनुपपत्तिः, तस्मान्न प्रागसतः स्वकारणवृत्तित्वकार्यत्वं संगच्छत इत्यसिद्धो हेतुः, नापि द्वितीयः, हेतोः साध्यविशिष्टत्वप्रसङ्गात् कर्तृरूपकारकजन्यत्वस्य साध्यात् सकर्तृकत्वाविशेषात्,न तृतीयः किं कर्तृव्यतिरिक्तैरेव कारकैर्जन्यत्वमितिहेत्वर्थोऽभिमत उत कर्तृव्यतिरिक्तैरपीति, नाद्यः, हेत्वर्थेन प्रतिज्ञार्थस्य बाधात्, प्रतिज्ञाविरोधनिग्रहस्थानापत्तेः,

सिद्धसाधनं च भवदभिमतकर्तृव्यतिरिक्तैरेव तैर्भूभूधरादेर्जन्यत्वस्य अस्माभिरपि स्वीकारात्, साधनविकलश्च दृष्टान्तः, कर्तृकुलालादिप्रयुक्तैरेव कारणकर्मादिकारकैर्घटादिनिष्पत्तिदर्शनात्, न च कर्तृव्यतिरिक्तैरेव कारकैर्जन्यत्वं कार्यत्व त्वमिष्यते भवता, कर्तृप्रयुक्तानामेव इतरकारकाणां प्रवृत्त्यभ्युपगमात् तथा चापसिद्धान्तोऽपि, न द्वितीयः, क्षित्यादिकर्तृसिद्धिं विना कर्तृव्यतिरिक्तैरपि इति वक्तुमनुचितत्वात्, अपिशब्देन कर्तुरपि आक्षेपात् तथा च तत्कर्तृसिद्धौ कर्तृव्यतिरिक्तैरपि इत्यादिहेत्वर्थसिद्धिस्तत्सिद्धौ च तत्कर्तृसिद्धिरित्यन्योन्याश्रयापत्तेः, न चतुर्थः, अस्मदादिप्रयत्नस्य क्षित्यादिकरणासामर्थ्येन तद्व्याप्यत्वस्य तावत्तत्रासिद्धेः, भवदभिमतस्य च कर्तृरद्याप्यसिद्धत्वेन तत्प्रयत्नं व्याप्यत्वस्यापि असिद्धेः, तथा चात्रापि असिद्धो हेतुः, न पञ्चमः, सुषुप्तावस्थायां श्वासप्रश्वासादिसन्तानस्य जागरेऽपि अशितपीतरसादेर्नाड्यादिसंचारस्य कारणाधीनत्वेऽपि भवदभिप्रायेण सकर्तृकत्वानुपपत्तेः, ज्ञानेच्छादिशालिनो ह्यात्मनः कर्तृत्वाङ्गीकारात् तदानीं चास्मदाद्यात्मनां तदभावात्, नं च तदानीमस्मदादिकर्तृकत्वासंभवात् तस्यापि पक्षनिक्षेप इति वाच्यं, जागरेऽपि श्वासादेरुपादानादिज्ञानाद्यभावेन अस्मदाद्यकर्तृकत्वापत्त्या पक्षनिक्षेपप्रसङ्गात्, प्रसज्जतामितिचेत्, न, श्वासादेरासंसारमात्माविनाभावितया उपादानज्ञानानाद्यभावेऽपि उभयोरपि अवस्थयोरस्मदादिकर्तृकत्वानुमाने वस्तुतस्तदनिक्षेपात्, अन्यथा आत्मनान्तरीयकाणां ज्ञानेच्छादीनामपि अस्मदाद्यकर्तृकत्वापातात्, अत एव भवतामपि प्राणादिमत्त्वात् जीवच्छरीरस्य सात्मकत्वानुमानं, किंतु भवन्नीत्या सुषुप्तादेः श्वासादिना अनैकान्तिकः प्रकृतो हेतुः, न षष्ठः, कारणव्यापारात् प्राग् सर्वथाऽसतः कार्यस्य स्वरूपलाभायोगात्, योगे वा वाजिविषाणादेरपि तल्लाभप्रसङ्गात्, कारणव्यापार एव तत्र नास्तीति चेन्न, सर्वथाऽसत्त्वाविशेषे वाजिविषाणादाविव घटादावपि कारणव्यापारासंभवात्, इदमस्य कारणमिदं चास्य कार्यमित्यादिव्यवहारस्य कारणव्यापारात् प्रागपि कार्यस्य कारणेषु कथंचित्सत्त्वेनैव उपपत्तेः, तस्मादत्यन्तासत्त्वेन वाजिविषाणादौ कारणकार्यभावमनिच्छता घटादौ च तमिच्छता कार्यस्य कारणैः सह संबन्धः प्रागपि कथंचिदभ्युपेयः, अन्यथा असम्बन्धाविशेषात् सर्वं सर्वस्मात् जायेत, किं च शक्तिमतः कारणात् कार्यस्य निष्पत्तिः, साच तस्य शक्तिर्न सर्वकार्यविषया ॥२२१॥
तथात्वेहि एकस्मादपि तन्त्वादिकारणात् पटघटादिकार्योत्पादप्रसङ्गात्, न चैवमस्ति, कारणशक्तिप्रतिनियमेन

कार्योत्पादप्रतिनियमदर्शनात् शक्तिप्रतिनियमस्य च कारणे कार्यस्य कथंचित् सत्त्वं विनानुपपत्तेः, उपादानकारणस्य च तादृग्सामग्रीमध्यासीनस्य कार्यत्वेन परिणामदर्शनादपि कारणे कार्यस्य सत्त्वमवसीयते, इतरथा उपादानकारणे सर्वथाऽसतः कार्यस्योत्पादे तुरिवेमादिभ्य इव तन्तुभ्योऽपि पटस्य पृथग् देशत्वापत्तेः, तस्मात् कारणे कार्यं शक्तिप्रतिनियतविषयतया सत्, अभिव्यक्तिरूपेण वाऽसद् इत्यभ्युपगन्तव्यम्, अन्यथा तस्य स्वरूपलाभासंभवात्, तथा च प्रागभावोपलक्षितस्वरूपत्वलक्षणस्यापि कार्यत्वस्यासिद्धेरसिद्धो हेतुः, योऽपि भूभूधारादेः कार्यत्वसिद्धये सावयवत्वहेतुरुपन्यस्तस्तत्रापि सावयवत्वं किं कारणमात्रजन्यत्वं, द्रव्यस्य द्रव्यान्तरवृत्तित्वं वा, भागवत्त्वं वा ? न प्रथमः, साध्यसाधनयोरभिन्नार्थतया हेतोः साध्यविशिष्टत्वापातात्, न द्वितीयः, वृत्तिर्हि संयोगो वा स्यात् समवायो वा स्यात्, नाद्यः, तदाहि पटस्य तुरिवेमादिभिर्निमित्तकारणैः संयोगिभिः सावयवत्वं स्यात्, न तन्तुभिस्तेषां समवायिकारणत्वेन तैः सह संयोगानङ्गीकारात्, न द्वितीयः, समवायनिराकरणेन तस्य निरासात्, न तृतीयः, आत्मनोऽपि कार्यत्वप्रसङ्गात्, न च आत्मनो भागा न सन्तीति वाच्यं ? शरीरावच्छिन्नस्य ह्यात्मनः सुखदुःखयोर्वृत्तिलाभ इष्यते, यदि च तस्य भागा न भवेयुस्तदा शिरसि मे वेदना पादे मे सुखमित्यादिविभागेन सुखदुःखप्रतीत्युदयो न स्यात्, आत्मनो निर्विभागत्वेन शिरःपादादिशरीरभागाच्छेदेन सुखदुःखोत्पादानुपपत्तेः, केवलं सर्वस्मिन्नेव शरीरे सुखस्यैव दुःखस्यैव वा संवेदनमुदयात्, न चैवमस्ति तस्मात् प्रागुक्तप्रतीत्यन्यथानुपपत्त्या अस्ति आत्मनो भागवत्त्वं, तथा च तस्यापि कार्यत्वप्रसङ्गः, एवं च न सावयवत्वेन क्षित्यादेः कार्यत्वसिद्धिः, यद्यपि कर्मभिः सिद्धसादनापादने तेषामचेतनत्वेन कर्तृत्वायोगात् तदपाकरणं तदपि न युक्तं, सशरीरतत्फलभोक्तृचेतनाधिष्ठितानामचेतनानामपि कर्मणामचिन्त्यमहिम्ना तत्तदुपादाननिमित्तकारणादिसमवधानेन क्षित्यादेः कार्यस्य संभवात्, तथा च तेषां तत्कर्तृत्वसिद्ध्या सिद्धसाध्यतापादनस्योपपत्तिः, असंबद्धानां तेषां कथं तदुपादानादिसमवधानहेतुत्वम् इति चेन्न, असंबद्धस्यापि तादृगंजनतिलकादेः कामिन्याद्याकर्षणहेतुत्वदर्शनात् भवतापि च देवदत्तगुणाकृष्टाः पश्वादयो देवदत्तमुपसर्पन्ति इत्याद्यनुमानेन शरीरावच्छिन्नात्मसमवेतस्य अदृष्टाख्यस्य देवदत्तगुणस्य पश्वादिभिरसंबद्धस्यापि तदाकर्षणं प्रति कर्तृत्वप्रसाधनात्, न च आत्मनः सर्वगतत्वेन शरीरावच्छेदेनापि अदृष्टसमवायात्

तत्सम्बन्धेन पश्वाद्याकर्षणं भविष्यतीति वाच्यम्, आत्मविशेषगुणानां शरीरावच्छेदेनैव वृत्तिलाभोपलम्भात्, अन्यथा बहिरपि सुखदुःखानुभवप्रसङ्गात् इत्युक्तत्वात्, तस्माद् भवताऽपि असम्बद्धस्यैव अदृष्टस्य पश्वाद्याकर्षकत्वमिति, न चायं नियमो यत् कर्त्रा चेतनेनैव भवितव्यम् अग्निर्दहतीत्यादौ अचेतनस्यापि अग्नेः कर्तृव्यवहारदर्शनाद्, औपचारिकमस्य कर्तृत्वमिति चेन्न, अग्निर्माणवक इत्यादौ हि तापकत्वादिना अग्निसाधर्म्येण अनग्नावपि माणवकेऽग्निशब्दप्रयोग औपचारिक इति युक्तम्, अग्नौ मुख्यतापकत्वादिसंभवे माणवकादौ उपचारप्रवृत्तेः, अग्निर्दहति इत्यादौ तु अग्निं विना कस्य मुख्यदाहकर्तृत्वम् उपलब्धं यत् साधर्म्येणाग्नौ तदुपचर्येत, अग्नावेव स्वातन्त्र्येण तत्कर्तृत्वोपलब्धेः, ननु तत्रापि अग्निना दहति चैत्र इति चैत्रस्यैव कर्तृत्वमग्नेस्तु करणत्वमनायासेनैव तु दाहसिद्ध्याऽग्नेः कर्तृत्वविवक्षेति चेत्, यत्र तर्हि पुरुषव्यापारनिरपेक्षतयैव तरुशाखाघर्षणादुत्थितोऽग्निर्वनं दहति तत्र का गतिः, तस्मात्स्वतन्त्रः कर्ता इति कर्तृत्वलक्षणस्योपपत्तेरचेतनस्यापि अग्नेः सिध्यति कर्तृत्वं, न च स्वातन्त्र्यमसिद्धं, कारकान्तराप्रयोज्यत्वलक्षणस्य तस्य इहापि सिद्धेः, तदनभ्युपगमे च स्वभावहानौ तस्यापि अभावप्रसङ्गात्, एवमन्यत्रापि अचेतनस्य यथासंभवं कर्तृत्वमूह्यं, स्वव्यापारे चाचेतनानामपि कर्तृत्वस्य वैयाकरणैरपि स्वव्यापारे हि कर्तृत्वं सर्वत्रैवाऽस्ति कारक इत्यादिनाऽभ्युपगमात्, यद्वा कर्मणां प्राधान्यताख्यापनार्थं कर्मभिरित्युक्तं, वस्तुतस्तु कर्मसहकृतानां सर्वजीवानामेव क्षित्यादिकर्तृत्वसिद्ध्याऽस्माभिरपि चेतनस्यैव तत्कर्तृत्वमङ्गीकारात् सिद्धसाधनमस्तु, एवमपि न भवदभिमतक्षित्यादिकर्तृसिद्धिः, यदपि विशेषविरुद्धोद्भावनेन कर्तृत्वविशेषासिद्ध्यापादने पक्षधर्मताबलात् तत्साधनं तदपि न संगतं, युक्ताहि प्रसिद्धानुमाने सामान्यव्याप्त्याऽग्निसामान्यप्रतीतौ पक्षधर्मताबलात् पर्वतगताग्निप्रतीतिः, इह तु उक्तन्यायेन कार्यत्वस्य हेतोरनैकान्तिकत्वादिना सामान्यव्याप्तिभङ्गेन बुद्धिमत्कर्तृमात्रस्यापि असिद्ध्या तद्विशेषसिद्धेर्दूरापास्तत्वेन कथं पक्षधर्मताबलादपि सिद्धिः स्यात्, तथा च विशेषविरुद्धत्वं दुर्वारं । यदपि विपक्षावृत्तित्वेन कार्यत्वस्य हेतोरनैकान्तिकत्वव्युदसनं तदपि न सम्यक्, सुषुप्तावस्थादौ भवदभिप्रायेण श्वासप्रश्वासादेरकर्तृकत्वाद् विपक्षेऽपि हेतोर्गतत्वेनानैकान्तिकत्वप्रतिपादनात्, यदपि शरीरिकर्तृकत्वोपाधिसम्बंधात् अप्रयोजकत्वापादने ज्ञानादित्रयशालिन एव कर्तृत्वस्वीकारेण तन्निरसनं तदपि अयुक्तं, शरीरसंबन्धं विना कर्तृत्वानुपलब्धेः,

कुम्भकारादिषु तथा दर्शनात्, तथा च क्षित्यादिकर्त्तर्यपि तत्तथाभ्युपेयम्, अथ शरीरं विनापि कर्तृकत्वं तस्य कल्पते तर्हि कर्त्तारमन्तरेणापि क्षित्यादेः कार्यत्वं परिकल्प्यतां, शरीराविनाभाविनोऽपि कर्तृत्वस्य तद्विनापि कल्पने कर्त्रविनाकृतस्यापि कार्यत्वस्य तं विना कल्पयितुं सुशक्यत्वात्, अंकुरादिषु तथैव दर्शनात्, शरीरस्य अन्यत्र चरितार्थत्वेन कर्तृभागानुपयोगं तु प्रकृतहेतोः कालात्ययापदिष्टत्वसमर्थने निराकरिष्यामः, एतेनाक्रियादर्शिन इत्याद्युपाध्यन्तरेण अप्रयोजकत्वोद्भावने सामान्यव्याप्तेरप्रतिक्षेपार्हत्त्वेन तदपाकरणमपि निरस्तं, कर्मभिः सिद्धसाध्यतापादनेन सामान्यव्याप्तेः प्रतिक्षेपात्, वादिनो हि सकर्तृकत्वं बुद्धिमत्पूर्वकत्वं विवक्षितं प्रतिवादिनस्तु कर्मणामचेतनानामपि कर्तृत्वस्वीकारेणाबुद्धिमत्पूर्वकर्तृकत्वमपि तदभिमतं, तथा च यत्कार्यं तद् बुद्धिमत्पूर्वकर्तृकत्वमिति सामान्यव्याप्तेरङ्कुरादिभिरदृष्टाख्यकर्तृनिष्पन्नैर्व्यभिचारेण प्रतिक्षेपात् कथमप्रयोजकत्वनिरासः, यदपि ननु शरीरज्ञानचिकीर्षाप्रयत्नशाली कर्त्ता इत्यादिपूर्वपक्षेण परेण प्रत्यक्षबाधात् कालात्ययापदिष्टत्वापादने भवता च तदयुक्तमित्यादिना नात्र प्रत्यक्षबाध इत्यन्तेन तदपासनं, तदपि असमीचीनम् अत्रहि ज्ञानेच्छाप्रयत्नादीनामधिकोपयोगादिनाऽवश्यं कर्तृभागनिवेशनं शरीरस्य तु ज्ञानाद्युत्पादमात्रचरितार्थत्वेन न तथा तदित्युक्तं, तदत्र उच्यतेऽस्मदादीनां हि ज्ञानेच्छाप्रयत्नयोर्विषयनिरूपणेन भवति अधिकोपयोगः, न चैतावता शरीरस्य ज्ञानाद्युत्पादनामात्रोपयोगेन तस्माज्ज्ञानस्याधिक्यात् कर्तृभागनिवेशो न शरीरस्येति सांप्रतं, तस्य ज्ञानाद्युपयोगेऽपि अर्थक्रियां प्रति तेभ्योऽधिकोपयोगात्, अन्यथा करचरणादिविकल्पोऽपि कुम्भकारो घटक्रियाविषयज्ञानेच्छाप्रयत्नवत्त्वाविशेषात् तद्वानिव घटं कुर्वीत, नचैवं तस्मात् ज्ञानादिभ्योऽपि शरीरस्योपकारकत्वेन कर्तृभागे निवेशोऽभ्युपेतव्यः, ननु भवत्वेवमस्मदादीनां क्षित्यादिकर्तुस्तु ज्ञानादीनां नित्यत्वाभ्युपगमेन शरीरं विनापि तद्वतः कर्तृत्वोपपत्तेः किं तत्र तस्य कर्तृत्वभागनिवेशेन ज्ञानादित्रयशालिन एव तस्य कर्तृत्वात्, न च नित्यप्रयत्नादेव सकलकार्यसिद्धेः किं तत्र ज्ञानेन इति वाच्यं, विषयनिरूपणार्थं ज्ञानस्योपयोगात् ज्ञाननिरूपितविषयं विना प्रयत्नस्याप्रवृत्तेरितिचेत्, न, क्षित्यादिकर्तुर्नित्यज्ञानादिमतः शरीरानभ्युपगमे क्रमयौगपद्याभ्यां कर्तृत्वानुपपत्तेस्तथाहिनासौक्रमेण कार्यं करोति, कर्तृगतकार्यगतनित्यसमर्थकारणसामग्रीसंभवेन युगपत्करणप्रसङ्गात्, नच भोक्त्रु गतधर्माधर्मयोः सहकारिणोः

कादाचित्कत्वेन तद्वैकल्याद् इतरसामग्रीसाकल्येऽपि युगपन्न करिष्यतीति वाच्यं, ताभ्यां हि तस्य कश्चिदतिशय आधीयते नवा ? नचेत् कथं तयोः सहकारित्वम् अतिशयानाधायित्वाद् आधीयते चेत्तर्हि ताभ्यां तस्यातिशयाधानात् प्राच्यस्वभावव्यावृत्तेरे–कान्तनित्यत्वव्याघातः, भवतु वा नित्यत्वं तथापि तदाहितातिशयः किमित्यसौ युगपदेव न करोति, शश्वदसंनिधानात् तयोरितिचेत्, ननु तावपि तत्कार्यौ नवा, आद्यश्चेत् तदा विक्षेपाभावेन तत्सन्निधानात्तदैव कार्यकरणप्रसङ्गात्, द्वितीयश्चेत्तर्हि ताभ्यामेव कार्यत्वहेतोर्व्यभिचारात् न ततः क्षित्यादिकर्तृसिद्धिः, तस्मान्न क्रमेण करणं । नापि यौगपद्येन एकदैव सकलकार्यकरणे क्षणान्तरे कर्त्तव्याभावात्, अकर्तृकत्वप्रसङ्गात् तथा च तज्ज्ञानादीनां वैफल्यापत्तिः, अपि च नित्यत्वाभ्युपगमे इच्छाप्रयत्नविषयनिरूपणार्थं ज्ञानस्योपयोगोऽपि नोपपद्यते अस्मदादिज्ञानादीनां ह्यनित्यत्वेन क्रमभावित्वेन च ज्ञानविषयीकृते जलादौ इच्छा, तद्विषयीकृते च तस्मिन् प्रयत्नस्ततः शरीरपरिस्पन्दादिक्रमेण तदवाप्तिरिति यथोत्तरं कार्यकारणभावात् उपयोगः संगच्छते, क्षित्यादिकर्तृज्ञानादीनां तु नित्यतया युगपद् भावित्वेन कार्यकारणभावाभावात् न तदर्थं तेषामुपयोगसंभवः, तथा च तेषामनित्यत्वमभ्युपेतव्यम्, अनित्यपदार्थानां च भवन्मते कारणत्रयं विना नोत्पादः, तथाहि अस्मदादिज्ञानादीनामात्मा समवायिकारणम्, आत्ममनःसंयोगोऽसमवायिकारणं, शरीरादिकं च निमित्तकारणं न च क्षित्यादिकर्तृर्ज्ञानादीनां समवायिकारणमात्रसंभवेऽपि इतरयोः संभवोऽनभ्युपगमात्, तथा च तेषामनित्यत्वाभ्युपगमे कारणत्रयसामग्र्यभावेन उत्पादाभावादभाव एव तत्र पर्यवस्येत्, तस्मात् तस्य ज्ञानादित्रयमिच्छता शरीरमपि अवश्यमेषणीयं, सकललोकातिशायित्वात् ज्ञानादयस्तस्य कारणत्रयं विनापि भविष्यन्तीतिचेत्, न, किं क्षित्यादेरपि कार्यस्य तेन तथैव करणप्रसङ्गात् लोकोत्तरतायास्तस्य सर्वत्राव्याहतत्वात् तस्मादस्मदादिवत् शरीरादिचतुष्टयशालिन एव तस्यापि कर्तृत्वमङ्गीकर्त्तव्यं, तथाच तादृशस्तस्य ग्रहणयोग्यस्यापि अग्रहणेन क्षित्यादेरकर्तृकत्वावसायाद् भवति प्रत्यक्षबाधितविषयोऽयं हेतुः, तथाच प्रत्यक्षबाधितत्वादय नानुमानबाधावकाश इति नेह तद्व्यवस्थापनं, यदपि आगमस्य अनुकूलत्वान्न तेन बाध इत्युक्तं तदपि न, आगमप्रामाण्ये हि ततः क्षित्यादिकर्तृसिद्धिस्तत्सिद्धौ च तत्कर्तृत्वेन आगमस्य प्रामाण्यमिति परस्पराश्रयप्रसङ्गाद्, आगमेन तद् बाधानुपपत्तेः, यदपि परेण प्रतिपक्षानुमानोपन्यासे शरीराजन्यत्वस्य ॥२२५॥

असमर्थविशेषणत्वेन दोषाभिधानं तदपि असंगतं, शरीरस्य कर्तृभागनिवेशासमर्थनेन तज्जन्यस्यैव सकर्तृकत्वसिद्धौ आकाशस्यापि तदजन्यत्वेनैव अकर्तृकत्वसिद्ध्या असमर्थविशेषणत्वासिद्धेः, अशक्यक्रियत्वस्यापि अप्रयोजकत्वाभिधानमनुचितं यदशक्यक्रियं तदजन्यमिति आकाशादौ व्याप्तिसंभवे साधनव्यापकत्वेन तथा यदजन्यं तदकर्तृकमित्यपि तत्रैव व्याप्तिभावेऽपि यदकर्तृकं तदजन्यमिति व्याप्तेरंकुरादिना व्यभिचारादभावेन साध्यव्यापकत्वादजन्यत्वस्योपाधित्वासिद्धेः, साधनाव्याप्यकत्वे सति साध्यसमव्याप्तिकस्य उपाधित्वेन प्रतिपादनात् तादृशत्वस्य चोक्तन्यायेनेहाऽसंभवात्, यदपि क्षित्याद्यकर्तुकमित्यादि प्रतिबलानुमानान्तरेण क्षित्यादेः परेणाकर्तृत्वसाधने कार्यबुद्धिमत्त्वोपाध्युद्भावनेन तत्प्रतिक्षेपः, सोऽपि अयुक्तः, भवदभिप्रायेण क्षित्यादिकर्तुः कर्तृत्वेऽपि अकार्यबुद्धिमत्त्वाभ्युपगमेन, यः कर्त्ता स कार्यबुद्धिमानिति व्याप्तेरयोगेन प्रकृतोपाधेः साधनाऽव्यापकत्वसंभवेऽपि, तथा यः कार्यबुद्धिमान् स शरीरी इति व्याप्तिभावेऽपि यः शरीरी स कार्यबुद्धिमानिति व्याप्त्यभावेन साध्यसमव्याप्तिकत्वस्य मदभिप्रायेणाऽसिद्धेः, जीवन्मुक्तस्य शरीरिणोऽपि केवलज्ञानाविर्भावेन मयाऽकार्यबुद्धिमत्त्वाभ्युपगमात् एवं चास्योपाधित्वासिद्ध्या शरीरस्य कर्तृव्यापकत्वसिद्धौ क्षित्यादिकर्तुर्व्यावर्तमानं शरीरं स्वव्याप्यं कर्तृत्वमपि ततो व्यावर्तयति, तथा च क्षित्यादेः कथं नाकर्तृकत्वसिद्धिः, यदपि कर्त्तृव्यापकत्वस्य व्याख्यान्तरनिरशंक्य कर्त्तुः शरीरान्तरमापेक्षस्यापि स्वशरीरतदवयवचलनाद्यर्थक्रियादर्शनेन क्षित्यादिकर्तुरपि तदनपेक्षस्यैव कर्तृत्वसमर्थनं, तदपि न सुन्दरं, शरीरान्तरनिरपेक्षत्वेऽपि कर्तृः कुम्भकारादेः शरीरसम्बद्धस्यैव स्वदेहतदवयवक्रियायाः कुम्भाद्यर्थक्रियायाश्च करणोपलम्भात्, न च शरीरसम्बन्धं विनापि मन्त्रादिस्मरणेन विषापहारादिक्रियादर्शनात् तां प्रति तस्याप्रयोजकत्वमिति वाच्यं, देहासम्बद्धस्यात्मनो विशिष्टप्रयत्नं विना स्मरणस्यैवासिद्धेः, एवं च क्षित्यादिकर्तृरपि शरीरसम्बद्धस्यैव कार्यकर्तृत्वं कल्पनीयं दृष्टेनैव अर्थोपपत्तौ अदृष्टकल्पनाया अनवकाशात्, यदपि न संति नित्यज्ञानादय इत्यादिना पूर्वपक्षिते दोषवत्स्वेव तेषामदृष्टैकार्थसमवायस्वीकारो निर्दोषत्वाश्रयविशेषे तं विनापि ते भविष्यन्तीत्यनेन तेषां नित्यत्वसमर्थनं, तदपि न साधीयस्तत्साधकस्य कार्यत्वहेतोरुक्तन्यायेनाऽसिद्धत्वादिना ॥२२६॥ तत्स्वरूपस्यैव अद्याप्यसिद्ध्या निर्दोषतायास्तत्र निरूपयितुमशक्यत्वात् धर्मिण एवासिद्धेः, भवतु वा कथंचित्कल्पनया तत्सिद्धिस्तथापि

तस्य निर्दोषता किमनादिमुक्तत्वात्, उत कुतोऽपि हेतोर्दोषोन्मूलनात्, नाद्यः, निर्दोषत्वसिद्धौ अनादिमुक्तत्वसिद्धिस्तत्सिद्धौ च निर्दोषत्वसिद्धिरिति परस्पराश्रयप्रसङ्गात्, न द्वितीयः, दोषोन्मूलनात् प्राग् सदोषत्वेन अस्मदादिवत् तस्य नित्यसर्वविषयज्ञानाद्यनुपपत्तेः, उपपत्तौ वा अस्मदादीनामपि तत्प्रसङ्गात्, दोषोन्मूलनानन्तरं तज्ज्ञानादीनां सर्वविषयत्वादिकं, भविष्यतीति चेत् भवतु तथापि दोषोन्मूलनजन्यत्वेन तेषां नित्यत्वासिद्धेः, अन्यथा भवदभिमतजीवन्मुक्तज्ञानादीनामपि तदापादात्, तथा च तैरेव शरीरिभिश्च सकलभूभूधरादिकार्यनिष्पत्तेः किमलौकिकैकतत्कर्तृकल्पनया तस्मान्निर्दोषत्वाऽसंभवात्, न तस्य नित्यज्ञानादियोगस्तदयोगाच्च न सर्वकर्तृता, एवं च शरीरस्य कर्तृव्यापकत्वसिद्धेरगृह्यमाणविशेषदशायां सत्प्रतिपक्षः प्रकृतो हेतुः, उक्तन्यायेन विशेषग्रहणे तु न्यूनबलतयाऽनेनैव बाधितत्वाद् भवदनुमानं नोदेतुमर्हतीति, एतेन पक्षधर्मताबलादपि तादृक्पुरुषसाधनं निरस्तं, तत्सहकारिण्याः सामान्यव्याप्तेः प्रतिक्षेपेण तस्या अपि प्रतिक्षेपात्, एवं च कार्यत्वहेतोर्न क्षित्यादिकर्तृसिद्धिः, ननु कर्मभिः क्षित्यादेः सकर्तृकत्वं कथमुपपद्यते ? यो हि यस्य कर्ता स तदुपादानाद्यभिज्ञो दृष्टो यथा घटादेः कुलालादिः, न च कर्मणां तदुपादानाद्यभिज्ञत्वं संगच्छते तेषामचैतन्यादितिचेत् ? ननु किं सर्वथा तदुपादानाद्यभिज्ञत्वं विवक्षितं किंचिद्वा, न प्रथमः, कुलालादेरपि घटाद्युपादानादीनां तद्गतावान्तरविशेषाणां वा सर्वेषामपरिज्ञानात्, अन्ततस्तन्निमित्तकारणस्य अदृष्टादेरपि अपरिच्छेदात्, तथा च कुलालादेरपि सर्वथा तदनभिज्ञतया कर्तृत्वं न स्यात्, न द्वितीयः, तदाहि मा भूत् कर्मणां स्वयमचैतन्येन तदुपादानाद्यभिज्ञत्वं जीवसहकृतानां तु तेषामपि कथंचित्तदभिज्ञानां सामान्यतस्तस्तदस्ति एव, जीवसंबन्धेनैव च तेषां वृत्तिलाभात्, तथा च तेषामपि क्षित्यादिकर्तृत्वं किंचित् तदुपादानाद्यभिज्ञतया उपपद्यत एव, न च सर्व एव कर्ता कार्यं तदुपानाद्यभिज्ञ एव करोतीति नियमोऽस्ति सुषुप्तमूर्च्छितादीनां स्वदेहावयवचेष्टायास्तदुपादानाद्यभिज्ञतामन्तरेणापि दर्शनात्, अपि च क्षित्यादिकर्तृर्ज्ञानमेकमनेकं वा, एकं चेत्तदसौ जानाति नवा, जानाति चेत्, किं ज्ञानान्तरेण तेनैव वा, यदि ज्ञानान्तरेण, कथमेकं तस्यैव द्वितीयत्वात्, तेनैव चेन्न, अपसिद्धान्तात्,
जैनैरिव भवद्भिर्ज्ञानस्य स्वसंवेदनत्वानभ्युपगमात्, एवं च स्वज्ञानापरिच्छेदेऽपि सकलजगत्परिच्छेदेन तस्य सर्वज्ञताविष्करणमिति ॥२२७॥
महती श्रद्धा, अनेकं चेत् तदपि नित्यमनित्यं वा ? नित्यमनेकं चेत्, तदपि प्रत्येकं सर्वविषयमसर्वविषयं वा, न तावदाद्यः,

युगपदनेकस्य नित्यज्ञानस्य स्वप्रकाश्यप्रकाशनानभ्युपगमात् एकदैकस्यैव तत्स्वीकारात् एकेनैव सर्वार्थपरिच्छेदेऽन्येषां वैयर्थ्याच्च, न द्वितीयः, प्रतिनियतार्थगोचरस्य नित्यस्यापि अनेकस्य तस्य भवताऽनङ्गीकारात्, अनेकमनित्यं चेन्न, अनभ्युपगमात्, अभ्युपगमे वा देहसम्बन्धप्रसङ्गात्, इतरथा अस्मदादेरिव तस्यापि अनित्यानेकज्ञानानुपपत्तेः, उपपत्तौ वा मुक्तानामपि तदापातात्, अनित्यतया च कदाचिद् युगपद् विनाशे तस्याज्ञताप्राप्तेः, क्रमोत्पादविनाशाङ्गीकारे च तज्ज्ञानानामस्मदिज्ञानसमानतया तस्या सर्वज्ञताप्रसङ्गात्, एवमपि जीवन्मुक्तस्येव तस्य सर्वज्ञता भविष्यति इतिचेत्, तर्हि तस्यैव देहनाशे लौकिकज्ञानाभावापातात्, न च तस्य देह एव नास्तीति वाच्यम्, अनित्यज्ञानादिमतोऽस्मदादेरिव, देहसम्बन्धस्य अवश्यंभावितया प्रतिपादनात्, एवं नित्याविच्छाप्रयत्नावपि तस्य प्रत्येकं किमेकैकोऽनेको वा एकैको चेत्तावपि किं सर्गेच्छाप्रयत्नौ वा, संहारेच्छाप्रयत्नौ वा, युगपदेव उभयविषयौ द्वावपि वा, नाद्यस्तदाहि तद्बलात् शश्वज्जगतः सर्ग एव स्यान्न जातु संहारः, तद्धेत्वभावात्, न द्वितीयस्तदापि सर्वदा संहार एव स्यान्न चास्य संभवः सर्गाभावे तदनुपपत्तेः, न तृतीयः, तत्रापि युगपदुभययोः सर्गसंहारयोर्विरोधेन तद्विषययोरिच्छाप्रयत्नयोरेकदैवासंभवात् एवमभ्युपगमे वा भावानामेकस्मिन्नेव च क्षणे उत्पादविनाशौ प्रसज्येतां, तथा च भवदिष्टयोः सर्गप्रलययोरभावापत्तिः, भूरिकालव्यवधानेन भवता तयोरिष्टत्वात्, ईश्वरस्य नित्येच्छाप्रयत्नवत्तया शश्वज्जगत्सर्गप्रलयकारित्वेन च तयोः क्षणमपि व्यवधानासंभवात्, अन्यथा तदिच्छाप्रयत्नयोर्नित्यत्वाभ्युपगमवैफल्यात्, तस्मात्सौगतैरिव भवद्भिरपि वर्त्तमानानामेव सर्वभावानां सर्गप्रलयावेषणीयौ केवलं सौगतानामेकक्षणव्यवधानेन निर्हेतुकयोस्तयोरङ्गीकारो, भवता तु युगपदेव ईश्वरकर्तृकौ तौ प्रसज्येते, न च सृष्टानां सर्गः प्रलीनानां प्रलयश्चान्याय्यौ निष्पादितक्रिये कर्मणि कारकस्य कारन्यायातिपातात् इतिवाच्यं, हेतुबलायातस्यार्थस्य निराकर्त्तृमशक्यत्वात्, इतरथा ईश्वरस्य सर्वदा सर्वकर्तृकत्वाऽभ्युपगमविरोधात्, तदेवमिच्छाप्रयत्नयोर्नित्यत्वाङ्गीकारे पुराणादिप्रसिद्धपुराणसर्गप्रलयविधिविलोपेन अपूर्वौ सर्गप्रलयौ प्रसाधयद्भिरीश्वरस्य लोकोत्तरः कश्चिन्महिमातिशयः ख्यापितो भवति, न चैवमेवास्तु इति वाच्यम्, अत्यन्तासंभवित्वेन अस्यार्थस्याऽप्रमाणिकतया शशविषाणादेरिव सहृदयानामभ्युपगमानर्हत्वा, अथ एकरूपावेव तस्येच्छाप्रयत्नौ केवलं सर्जनीयोपसंहरणीयपदार्थोपाधिभेदात् स्फटिकमणिवत्

तत्तज्जपाकुसुमाद्युपाधिवशात् नानेव प्रतिभासेते इतिचेत्, ननु किं पदार्थानां सर्जनीयत्वं संहरणीयत्वं च, नैसर्गिकमौपाधिकं वा, न तावन्नैसर्गिकं सर्जनीयसंहरणीयपदार्थानामभिन्नत्वात्, भेदेहि तेषां तदुपाधिभेदात्तदिच्छाप्रयत्नयोर्नानात्वप्रतिभासः, नचैवं सर्जनीयानामेव संहरणीयत्वात् तस्मात् सर्गेच्छातत्प्रयत्ननिर्वर्त्त्यत्वं, सर्जनीयत्वं संहारेच्छातत्प्रयत्ननिर्वर्त्त्यत्वं तु संहरणीयत्वमिति स्वाभाविकेश्वरेच्छाप्रयत्नद्वयजन्यत्वोपाधिकृतमेव भावानां तथात्वं न नैसर्गिकमिति विपरीतापत्तिः, तथा च तदिच्छाप्रयत्नयोर्नित्यत्वाद् युगपदेव पदार्थानां सर्गप्रलयौ स्याताम्, अथ प्राणिनां देशकालादिप्रतिनियमेन फलवहौ धर्माधर्मौ अपेक्ष्य ईश्वरस्य सर्गादिकरणं, तथा च तयोः क्रम उपपद्यते इतिचेन्न, धर्माधर्मयोरपि कार्यतया प्रलयसंभवेन तदानीमसत्त्वापातात् एवमस्वीकारे वा तस्य सर्वसंहारित्वासिद्धेः, तथा च न्यायटीकाकृतो वाचस्पतेर्विश्वव्यापी विश्वशक्तिः पिनाकी, इत्यादिश्लोके विश्वसंहारकारीति तद्विशेषणं, विश्वशब्देन कार्यस्तोम इत्युदयनकृतं च तद्व्याख्यानमसमीक्षिताभिधानं भवेत्, युज्यते च तस्य कारुणिकतया तयोः प्रलयः पुण्यापुण्यक्षयान्मोक्ष इति वचनाद् अनायासेनैव तेन प्राणिनां मोक्षप्रापणात्, न च सर्गारम्भेऽनयोरपि तद्भावात् कथं मोक्ष इति वाच्यं, तदानीमपेक्षाकारणधर्माद्यन्तराभावेन तत्सर्गस्यैवानुपपत्तेः, तद्भावे चानवस्थापापात्, एवं च तदानीं धर्माधर्मलक्षणापेक्षाकारणाभावात् प्रकृतसर्गस्य अभावप्रसङ्गः, मा भूत् वा तयोः प्रलयः, तथापि लब्धवृत्तिकयोरेव हि तयोः सहकारित्वमास्थीयते, तथा च सर्गे सति तयोर्वृत्तिलाभः, अन्यथा प्रलयेऽपि तत्प्रसङ्गात्, तस्मिंश्च सति सर्गः प्राणिनां धर्माधर्मावनधिष्ठाय ईश्वरेणापि सर्गानारम्भात्, इति परस्पराश्रयप्रसङ्गात् नापेक्षाकारणत्वं तयोः संगच्छते, न चाष्टगुणेश्वरवादिमतेन अलब्धवृत्तिष्वपि प्राणिनामदृष्टेषु स्वधर्माधर्माभ्यामेवासौ तदानीं सर्गं विधास्यतीति वाच्यम्, अन्यधर्माधर्माभ्यामन्येषां सर्गस्यादृष्टफलसुखादेश्च अनुपपत्तेः, उपपत्तौ वा ईश्वरदृष्टेनैव प्राणिनां सर्वदा तत्फलसिद्धेस्तेषु तत्कल्पनावैयर्थ्यप्रसक्तेः, एवं च तदिच्छाप्रयत्नयोरेकत्वनित्यत्वाङ्गीकारे तयोरेवानेकत्वप्रसङ्गः, सर्गप्रलयोश्चानुपपत्तिरिति, अथानेकौ तौ तस्येति चेन्न, अनभ्युपगमात् युगपत् सर्गप्रलयप्रसङ्गाच्च, किं च सर्गादौ तस्य प्रवृत्तिर्न युक्ता कृतकृत्यत्वाद्, क्रीडार्था इति चेन्न, तादृशां क्रीडाया अभावात्, दृश्यते एव तादृशामपि ईश्वराणाम् एहि गच्छ पत उत्तिष्ठ वद मौनं समाचरेत्यारूपेण क्रीडा इतिचेन्न, तेषांहि लक्ष्मीगर्भोद्धुरतया

क्वचिदपि रत्यलाभेन अकृतार्थतया तादृग्विनोदप्रवृत्तेः, तथा चागमः, **'परपरिवायविसाला अणेगकंदप्पविसयभोगेहिं, संसारत्था जीवा अरइविणोयं करिंति एवमिति**, एवं च लौकिकेश्वरवद् यदि तस्यापि अन्यथा आत्मनो रतिमलभमानस्य प्रलये प्रवृत्तिस्तदा **'एकस्य क्षणिका तृप्तिरन्यः प्राणैर्वियुज्यते'** इति न्यायेन साधीयसी तस्य निर्दोषता कृतार्थता च समाहिता स्यात्, अथ कारुण्यादसौ सर्गादौ प्रवर्तते इतिचेत्तर्हि प्राणिगणं न संहरेत्, सुखिनमेव च सृजेन्न दुःखिनमन्यथा तदनुपपत्तेः, क्षेत्रज्ञगतधर्माधर्मसहकारितया तं तथा सृजतीतिचेन्न, धर्माधर्मयोरपि तदनधिष्ठितयोः स्वफलोत्पादनेऽसामर्थ्यस्वीकारात् तदुक्तम्– **अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् श्वभ्रं वाश्वभ्रमेव वा ॥१॥** अन्यथा तस्यैश्वर्यव्याघातात्, तथा च दयालुतया तस्य अधर्माधिष्ठानं न संगतिमियर्त्ति, अथ धर्माधर्मलक्षणकर्मणां बलीयस्तया तत्पारवश्येन तदनुरूपं फलं ददानोऽसौ नोपालम्भमर्हतीतिचेत्, तर्हि तान्येव जीवसहकृतानि प्रागुक्तन्यायेन जगन्निर्मितावभ्युपगम्यतां किमनेन कर्मसुतस्याप्रभविष्णुतया तेषामेवेश्वरत्वात् तदुक्तम्–**कर्मणां पारतन्त्र्येण यदि वास्य प्रवर्त्तनं । कर्मणामीशता प्राप्ता ततः कृतमनेन किम् ॥१॥** एतेनार्थित्वानर्थित्वाभ्यां कारकत्वं व्याप्तं तत्रार्थित्वेऽनैश्वर्यप्रसङ्गोऽनर्थित्वे चाचैतन्यप्रसङ्गः, एवमात्मत्वानात्मत्वाभ्यां तत्रात्मत्वेऽनित्यज्ञानत्वादिप्रसङ्गोऽनात्मत्वे चाचैतन्यप्रसङ्गः सिद्धसाधनं च, एवं चेतनस्य प्रवृत्तिः कारुणिकत्वाकारुणिकत्वाभ्यां व्याप्ता, तत्र कारुणिकत्वे दुःखानुत्पादकत्वप्रसङ्गोऽ कारुणिकत्वे चावीतरागत्वप्रसङ्ग इत्यादयस्तर्का ईश्वरमधिकृत्याश्रयासिद्धाः, क्षित्यादिकमधिकृत्य च विपर्ययाऽपर्यवसिता इत्यादि यदुक्तमुदयनेन तदपि निरस्तं, यदि हीश्वरो यद्यर्थित्वे सति कर्त्ता स्यात्तदाऽनीश्वरः स्याद्, इत्यादि क्रमेण अमी तर्का उद्भाव्येरन्, तदा ईश्वरासिद्ध्या भवेयुराश्रयासिद्धाः, नचैवमास्थीयते क्षित्यादिकमधिकृत्य एषामुद्भावनस्वीकारात्, ननु तत्रापि विपर्ययापर्यवसानं दूषणमुक्तं, तथाहि यद्यर्थिनां कर्त्रा सकर्तृकं क्षित्यादिकं स्यात्, तदा अनीश्वरकर्तृकं स्यादित्याद्यापादनेनानिष्टप्रसङ्गरूपाणाममीषां न चानीश्वरकर्तृकमित्यादिविपर्ययः, स च क्षित्यादेरीश्वरकर्तृकत्वाभ्युपगमेनैव पर्यवस्येत्, नचैतदभ्युपेयते भवता, तथा च विपर्ययाऽपर्यवसानेन तर्काभासत्वाद् एभिः कथमीश्वरनिराकरणमितिचेत् ? उच्यते–सर्वेषामपि एषां यथायथं विपर्ययपर्यवसायित्वेन आभासत्वानुपपत्तेः तथाहि

व्याप्तिमवलम्ब्य अनिष्टप्रसङ्गरूपस्तर्क इति तर्कलक्षणम्, अत्रच यदर्थिकर्तृकं तदनीश्वरपूर्वकं यथा घट इति व्याप्तिपुरस्कारेण यद्यर्थिकर्तृकं स्यादनीश्वरकर्तृकं स्यादित्यनिष्टप्रसंजनेन प्रथमस्तर्कः प्रवर्त्तते, अस्य च न चानीश्वरकर्तृकमित्येवं लक्षणे विपर्यये पर्यवसानं तदा न स्याद्, यदीश्वरानीश्वरयोर्भावाभावयोरिव परस्पराभावात्मत्वं स्यात्, तदाहि न चानीश्वरकर्तृकमित्यनीश्वर– कर्तृकत्वनिषेधस्य ईश्वरकर्तृकत्वविधिनान्तरीयकत्वेन तत्र तात्पर्यं स्यात्, तथा चेश्वरासिद्ध्या विपपर्याऽपर्यवसायित्वेनास्य आभासता भवेत्, न चैवमस्ति किं तर्हि उक्तन्यायेन शशविषाणादिवद् आभासप्रतिपन्नभवदभ्युपेतेश्वरनिषेधमात्रेण अनीश्व– रशब्दोऽस्मदादौ वर्त्तते, एवं च नचानीश्वरकर्तृकमित्यस्य, न चास्मदादिकर्तृकमित्यर्थः स्यात्, तथा च न चास्मदादिपूर्वकं तस्मान्नार्थिकर्तृकम् इत्युपसंहारे कथमस्य तर्कस्य विपर्ययपर्यवसायित्वं न भवेत्, मीमांसकाभिप्रायेणाऽचैतन्यादर्थित्वशून्यैः कर्मभिरेव क्षित्यादेः सकर्तृकत्वसिद्धेः, एवं यद्यनर्थिकर्तृकं स्याद् अचेतनपूर्वकं स्याद् इत्येवं रूपस्य द्वितीयस्यापि, न चाचेतनपूर्वकं तस्मान्नानर्थिपूर्वमिति विपर्ययोपसंहारे कर्मापेक्षैस्तत्फलभोक्तृभिरर्थिभिर्जीवैः सकर्तृकत्वस्वीकारे विपर्ययपर्यवसानमस्मन्मतेऽपि समीचीनमेव, तथा यदि आत्मकर्तृकं स्यादनित्यज्ञानादिमत्पूर्वं स्यादित्येवंविधस्य तृतीयस्यापि न चानित्यज्ञानादिमत्पूर्वं तस्मान्नात्मपूर्वमिति विपर्ययं निगमने पूर्ववत्मीमांसकनीत्वा अनात्मभिर्ज्ञानविकलैः कर्मभिः क्षित्यादिसिद्धौ विपर्ययपर्यवसायित्वं स्फुटमेव, तथा यदि अनात्मकर्तृकं स्यादचेतनपूर्वकं स्यादित्येवं लक्षणस्य चतुर्थस्यापि, न चाचेतनपूर्वं तस्मान्नानात्मपूर्वम् इत्युपसंहारे प्राग्वत् कर्मसहचरैर्जीवैः सहकर्तृकत्वांगीकारेऽस्मन्नीत्यापि विपर्ययपवसायित्वं संगच्छत एव, एवं क्षित्यादिसर्गरूपा प्रवृत्तिर्यदि कारुणिकप्रयुक्ता स्याद्, दुःखमयी न स्यात्, इत्येवं स्वरूपस्य पञ्चमस्यापि दुःखमयी चेयमुपलभ्यते तस्मान्न कारुणिकप्रयुक्ता इत्युपसंहारे भोक्तृभिरेव आत्मभिः कर्मद्वारा सर्गसिद्धेर्विपर्ययपर्यवसायित्वं युज्यते एव, तथा यदीयं प्रवृत्तिरकारुणिकप्रयुक्ता स्यादवीतरागपूर्वा स्यात्, इत्येवं रूपस्य षष्ठस्यापि, नचेयमवीतरागपूर्वा तस्मान्न अकारुणिकप्रयुक्तेति निगमने कारुणिकत्वाकारुणिकत्वयोर्वीतरागत्वसरागत्वयोश्च चेतनधर्मत्वात् कर्मणां चाचैतन्येन तदभावात् तादृक्कर्मभिरेव क्षित्यादिनिर्माणसिद्धेर्विपर्ययपर्यवसायित्वमुपपद्यत एव, व्याप्तिश्चैतेषु सर्वेष्वपि प्रथमतर्कवत् स्वयमूहनीया तां विना तर्काप्रवृत्तेः,

तदेवमेभिस्तर्कैर्विपर्ययपर्यवसित्वेन क्षित्यादेः पराभिमतकर्तृपूर्वकत्वनिरासाद् विपर्ययापर्यवसायितया अमी तर्काभासा इति यदुक्तं परेण तदनालोचिताभिधानम्, अपिच प्रतितर्काणामेवमाभासतापादने जगतः प्रधानादिकर्तृकत्वसिद्ध्यर्थं सांख्यादिभिरुपन्यस्ते प्रमाणे यदा नैयायिकादयस्तन्निरासाय कर्तृव्यापकार्थित्वानर्थित्वादिद्वारेण एतानेव तर्कानुपन्यस्येयुस्तदा तेऽपि प्रतिब्रूयुः, प्रधानादिकमधिकृत्याऽऽश्रयासिद्धत्वेन जगदधिकृत्य तु विपर्ययपर्ययवसितत्वेन आभासत्वादमी निरवकाशा इति, तथा च प्रधानादिसिद्धेस्तन्मूलतदभ्युपेतसकलसत्कार्यादिवादसिद्धिश्च स्यातां, आस्तामितिचेन्न, एवंहि जल्पकथायां सांख्येन सत्कार्यवादसाधनाय साधनोपन्यस्ते घटकारणत्वेन इष्टानां च दण्डचक्रादीनां व्यञ्जकत्वे व्यवस्थापितेऽस्तु तर्हि सत्कार्यमिति नैयायिकेनोक्ते समानतान्त्रिकतया सांख्यस्य तं प्रति अपसिद्धान्तानुद्भावनप्रसङ्गात्, तथा च निवृत्ता तयोः जल्पकथा, तस्मात्प्रतितर्काणामित्थमाभासतापादनं न संगतमाभाति, किंच यदि ईश्वरो व्यापकतया सर्वविषयज्ञानादिमत्त्वेन क्षित्यादिवत् कुविन्दादिसाधारणमपि पटादिकार्यं निर्मिमीते, तदा किमर्थं तत्र पटादिकारणानां वेमादीनां कुविन्दाद्यपेक्षा, स्वाधिष्ठिनार्थमिति चेत्, न नित्यव्यापकप्रयत्नवता ईश्वरेणैव क्षित्यादिनिर्माणे परमाण्वादिवत्तदधिष्ठानात् अधिष्ठितानामपि अधिष्ठात्रन्तरापेक्षायामन–वस्थापातात्, पटादिनिर्माणं विना कुविन्दादिदेस्तज्जन्यभोगासिद्धेः, तदर्थं तत्र तदपेक्षा कारकाणामितिचेत् 'भवतु' अत्र कथंचिद्भोगार्थं तेषां तदपेक्षा, क्षित्यादिनिर्माणे तु तत्कारकाणां किमर्थमीश्वरापेक्षा, न तावत्तद्भोगसिद्ध्यर्थम् अनादिमुक्तत्वेन तस्य तदनभ्युपगमात्, ईश्वराधिष्ठानं विनाऽचैतन्येन स्वतोऽप्रवृत्तेस्तदर्थं तेषां तदपेक्षा इतिचेत्, न, शरीरं तदवयवांश्च विना प्रयत्नवतोऽपि कारकाधिष्ठानायोगात्, अन्यथा छिन्नकरचरणाद्यवयवस्यापि कुविन्दस्य प्रयत्नवत्तया तन्त्वादिकारकाधिष्ठानेन पटनिर्मितिप्रसङ्गात्, प्रयत्नस्य देहसम्बन्धेऽनित्यत्वमुपाधिर्नित्यस्तु असौ तं विनापि भविष्यतीति चेन्न,यः शरीरी सोऽनित्यप्रयत्नवान् इति साध्यव्यापकत्वेऽपि उभयसंप्रतिपन्नस्य नित्यप्रयत्नस्य क्वचिदपि असिद्ध्या ईश्वरस्य चाद्यापि साध्यतया तन्नित्यप्रयत्नेनापि व्यभिचारानुद्भावनाच्च साधनस्यापि व्यापकत्वेनास्य उपाधित्वासिद्धेः, तस्माद्यथा क्षित्यादिनिर्माणे तस्य न तत्कारकाधिष्ठानं तथा पटादिनिर्माणेऽपि तन्न संगच्छते, आस्तां वा कथंचिदीश्वरेण तदधिष्ठानं तथापि असौ किं कुविन्दात् प्राक् तन्त्वादीन्

अधितिष्ठति, सह पश्चाद् वा ? नाद्यः, कुविन्दव्यापारात् प्रागपि पटोत्पादप्रसङ्गात्, तथा च सुखमास्तां कुविन्दः, तत्साध्यस्य ईश्वरेणैव साधनात् । न द्वितीयः, अन्यतरस्य अपार्थक्यापातात्, अथ ईश्वरस्य नित्यप्रयत्नवत्तया कुविन्दस्य च भोगासिद्धये सहैव तदधिष्ठानान्नोभयोरपि अपार्थक्यम्, एकतरेण कार्यनिष्पत्तौ अन्यतरस्य वैयर्थ्यमित्यपि न नियमः, परिमाणोत्पादे संख्यापरिमाणप्रचयानामेकैकशः सामर्थ्येऽपि संभूयापि प्रचितावयवमहत्तूलपिण्डत्रयारब्धे महत्तरे तूलपिण्डे तेषां तद्दर्शनात्, तथेहापि भविष्यतीतिचेत् ? भवतु कुविन्दस्य भोगार्थं तदर्थं तदधिष्ठानम्, ईश्वरस्य तु नित्यप्रयत्नवत्तया प्रागपि तदधिष्ठानप्रसङ्गेन सहभावायोगात्, अथ कुविन्दभोगसिद्ध्यर्थं सहैवाऽसौ अधितिष्ठति तत्साहाय्यं विना तस्य भोगायोगादिति चेन्न, प्रयत्ननित्यतावैफल्यापातात्, तत्सत्त्वेऽपि प्रागेव तदधिष्ठानाभावात्, यदपि परिमाणकारणोदाहरणेन संभूय तदधिष्ठानव्यवस्थापनं तदपि न सुन्दरं, संभूयकारित्वेऽपि संख्यादीनां प्रत्येकं तदारब्धात्परिमाणात् संभूय तदारब्धस्य तत्र वैजात्योपलपम्भात्, पटनिर्माणे तु मनागपि तदनुपलम्भात्, को भवतोऽन्य ईश्वरसुविन्दयोः संभूय कारित्वं श्रद्दधीत, यदि चैकेकशः संख्यादिभिः परिमाणवत् ताभ्यां निष्पादितः पटः क्वचिदुपलभ्येत तदा संभूय निष्पादिते तस्मिन्नपि परिमाण इव वैजात्यमपि दृश्येत, न चैवं, कुविन्दनिर्मितस्य दर्शनेऽपि केवलेश्वरनिर्मितस्य तस्यादर्शनात्, न च जैनैः संख्यादीनां परिमाणं प्रति कारणत्वमिष्यते, इत्यसमो दृष्टान्तः तस्मान्न सहाधिष्ठानसंभवः । न तृतीयः, प्रथमभाविना कुविन्दाधिष्ठानेनैव पटनिर्माणात् चरमभाविन ईश्वराधिष्ठानस्य वैयर्थ्यात्, संपादितस्य अशक्यसंपादनत्वात्, तस्मात् सकलकारकप्रयोजकतया कर्तृत्वेन कुविन्दमेव कारकाणि अपेक्षन्ते न ईश्वरं तस्य तत्र अनुपयोगात्, ननु मा भूत् पटादिकार्यं प्रति तेषामीश्वरापेक्षा, तथापि शरीरमन्तरेणापि यथा कथंचित् क्षित्यादिनिर्माणे तत्कारकाणां तदपेक्षा, अन्यथाऽचैतन्येन तेषां स्वयमप्रवृत्त्या तन्निर्माणानुपपत्तेरितिचेत् ? अस्तु तावदेवमभ्युपगमे तस्य सर्वकर्तृत्वव्याघात् इत्येकं दूषणम्, अन्यच्च भोक्तृकर्मभिरेव कारकाणां प्रवर्त्तनेन तन्निर्माणोपपत्त्या तदर्थमपि तदपेक्षा वैयर्थ्यात्, असम्बद्धैरचेतनैस्तैस्तेषां प्रवर्त्तनेऽतिप्रसङ्ग इति चेत् न, द्वये हि जगति भावा भवन्ति, केचिदसंबद्धा अप्यचेतना अप्यन्येषां प्रवर्त्तयितारः, यथाऽयस्कान्तादयो लोहानां यथा च तिलकाञ्जनादयो देशादिविप्रकृष्टानामपि अङ्गनादीनां,

केचित्तु संबद्धा एव चेतना एव तथा, यथा कुविन्दादयस्तन्तुवेमादीनां तदिह कर्मभिरपि असम्बद्धाऽचेतनैरेव क्षित्याद्यारम्भकाः, परमाण्वादयो यदि प्रवर्त्तन्ते तदा को विरोधः, अयस्कान्तादिष्वपि सर्वैरेव तथोपलम्भात्, अस्मदादीनामगोचरो हि भावानां प्रभावातिशयः, तस्मात् क्षित्यादिनिर्माणे कर्माणि तत्सहकृतां जीवा वा तत्कारकाणां प्रयोजकाः, पटादिनिर्मितौ तु तेषां कुविन्दादयोऽन्वयव्यतिरेकानुविधानसिद्धत्वात्, न च कमणामतीन्द्रियत्वेन तदन्वयव्यतिरेकानुविधानासिद्धत्वात् क्षित्यादिनिर्माणे तेषामप्रयोजकत्वमितिवाच्यं, क्षित्यादिजगद्वैचित्र्यस्यान्यथानुपपत्त्या तत्रापि तत्सिद्धेरवश्यं भावादिति नोभयत्रापि कार्यत्वाद् हेतोस्तदतिरिक्तकर्तृविशेषसिद्धिः, एतावतैव च साध्यसिद्धौ अधिककल्पनायां प्रमाणाभावात्, ननु कार्यत्वादसौ मा सेत्सीत्, तथापि न सर्वथा तदभावः सिध्यति अतीन्द्रियत्वेन तस्य ग्रहणायोगस्यापि संभावनास्पदत्वादिति चेन्न, अनुमानात् तत्सिद्धेः, क्षित्याद्यङ्कुरपर्यन्तं न पराभिमतबुद्धिमत्पूर्वकं तदन्वयव्यतिरेकाननुविधायित्वात्, यदेवं तदेव यथा न पटः कुलालपूर्वकः, तदन्वयव्यतिरेकाननुविधायि च विवादाध्यासितं तस्मान्न तत्पूर्वकमिति, अत्र मृद्दण्डादिसामग्रयेऽपि कुम्भकाराभावे कुम्भ इव यदि क्षितिजलादिकारणसमवधानेऽपि कदाचिदङ्कुरादिकार्यं न जायेत, तदाऽतिरिक्तबुद्धिमत्पूर्वकत्वं तस्यानुमीयेत, न चैवमस्ति तत्समवधानेऽवश्यं कार्यदर्शनात् तदभावे चादर्शनाद्, अन्वयव्यतिरेकानुविधानमेव च भावानां कार्यकारणभावबीजं यथा च प्रत्यग्रोत्पन्नेषु अङ्कुरादिषु तदन्वयव्यतिरेकाननुविधानमनुभवसिद्धं, तथा चिरोत्पन्नेषु भूभूधरादिष्वपि तथैव तन्मन्तव्यं तत्समानयोगक्षेमत्वादिति, एतेन परमाण्वादयश्चेतनयोजिताः प्रवर्त्तन्तेऽचेतनत्वात्, वास्यादिवत्, अचेतनप्रवृत्तेश्चेतन–कार्यत्वनिश्चयादस्मदादेश्चेतनस्य परमाण्वादिप्रवृत्तिं प्रति अप्रयोजकत्वाद् योऽत्र प्रयोक्ता स ईश्वर इत्यपि तत्साधनं प्रत्युक्तम्, अत्रहि किमिदम्, आयोजनं परमाण्वादीनां किं कुविन्देन तन्त्वादेरिव हस्तादिना तेन तेषां ग्रहणम्, आहो पिशाचादिना मनुजशरीरस्येव सर्वात्मनाऽऽस्कन्दनं, नाद्यः, शरीराभावेन तस्य हस्ताद्यभावात् तद्ग्रहणाऽसंभवात्, संभवे वा तस्य शरीरत्वप्रसङ्गात्, शरीरस्य चाव्यापकतया महतः क्षित्यादिकार्यराशेरेकदैव तेन निर्वर्त्तयितुमशक्यत्वात्, व्यापकत्वेन वा सकलस्यापि आकाशस्य तेन व्याप्त्या क्षित्यादिकार्याऽनवकाशापत्तेः, न द्वितीयः, सहि देहाभावात् प्रयत्नेन तानास्कन्देत्, स च प्रयत्नस्तत्र किं

साकल्येन वर्त्तते एकदेशेन वा, नाद्यः, देशाप्रतिनियमेन सर्वत्र क्षित्यादिकार्यप्रसङ्गात्, न द्वितीयः, तद्विरहिणि देशे कार्यानुत्पादापत्तेः, अपसिद्धान्तापाताच्च, प्रवर्त्तन्त इति च प्रवृत्तिः क्रियामात्रं वा, हिताहितपर्याप्तिपरिहारफला वा चेष्टा, कार्योन्मुख्यं वा, न प्रथमः, पवनोद्धूतानां वियति पताकादीनां चेतनाधिष्ठानमन्तरेणापि प्रवृत्तिमात्रदर्शनेन हेतोरनेकान्तिकत्वात्, न द्वितीयः, तेषामचैतन्येन तादृश्याश्चेष्टाया असंभवात्, संभवेऽपि स्वं प्रति परं वा, नाद्यः, हिताहितपरिज्ञानवैकल्येन तेषां तदभावात्, भावे वा तेषामपि चैतन्यप्रसङ्गेन तदर्थं स्वत एव प्रवृत्त्या चेतनाधिष्ठानानुपयोगात्, न द्वितीयः, देशादिव्यवधानात् मणिमन्त्रौषधादिमता चेतनेन अनधिष्ठितानामपि वरभोज्यादीनां तादृक्प्रवृत्त्युपलम्भात्, न तृतीयः, वास्यादीनामपि पवनादिनुन्नानां चेतनाधिष्ठानं विनापि जातु दार्वादिच्छिदाहेतुप्रवृत्तिदर्शनात्, न तादृक् सा यादृक् चेतनाधिष्ठितानां तेषामिति चेन्न, चेतनाधिष्ठितस्यापि घुणस्य अबुद्धिपूर्वं दारुषु भक्षणद्वाराऽक्षररचणाक्षरप्रतिमाक्षरोल्लेखवत्या इव कदाचित् तादृश्या अपि तस्याः संभवात्, तथा च साध्यविकलो दृष्टान्तः, अपि च सुषुप्तमूर्च्छितााद्यवस्थासु पुंसामहिदंशचन्दनलेपादिना तज्जन्यापकारोपकारदर्शनेन धर्माधर्मयोरचेतनयोरपि प्रवृत्तिरुपलभ्यते, न च तयोश्चेतनाधिष्ठानं भवदभ्युपगमेन तदानीमात्मनो ज्ञानाद्यभावेन तदसंभवात्, यदपि क्षित्यादिब्रह्माण्डपर्यन्तं साक्षात् परम्परयाऽवधारकप्रयत्नाधिष्ठितं गुरुत्वे सत्यपि अपतनात् वियति विहङ्गशरीरवत् संयुक्तद्रव्यवच्चेति धृतेरीश्वरसाधनं तदपि न संगतं, प्रासादादीनां स्थूणाद्युपरिस्थितानां पटादीनां वा धारकपुरुषप्रयत्नं विनापि केवलेन धारकाधिष्ठानेन गुरुत्वे सत्यपि अपातस्य दर्शनात् तद्धारकाणां स्तम्भादीनामचैतन्येन प्रयत्नाभावात् तथा च अनैकान्तिको हेतुः, किं च धारकस्येश्वरस्य प्रयत्नो नित्यश्चेत् तदा तदधिष्ठाननान्नभसि क्षिप्तानां बाणादीनां पातो न स्यात्, ईश्वरप्रयत्नस्य व्यापकत्वेन तत्रापि भावात्, अथ केवलेश्वरनिर्मितानां पदार्थानां तत्प्रयत्नादपातो बाणादीनां तु उभयनिर्मितत्वेन क्षेपकप्रयत्नजन्यवेगविनाशाद् भवत्येव पात इति चेत्, एवं तर्हि भवदाशयेन केवलेश्वरनिर्मितानां भूधरभूरुहादीनां नित्यतत्प्रयत्नाधिष्ठानात् प्रबलपवनादिविधूननेनापि आप्रलयं पातो न भवेत्, न चैवमस्ति, अनित्यश्चेत् तर्हि ज्योतिर्विमानादीनामपि तद्विनाशेन महाप्रलयादर्वागपि पातप्रसङ्गः, अपसिद्धान्तश्च, त्वया तन्नित्यता स्वीकारात्, तस्मात्साक्षाच्छरीरस्यैव तद्द्वारातत्संयुक्तानां घटादीनामपि प्रयत्नेन धारणं नतु

क्षित्यादीनां, तेषां हि अदृष्टादिकारणकलापादेव तत्स्वाभाव्याद्धारणोपपत्तेः, किं तदर्थमीश्वरप्रयत्नकल्पनया, अत्र च प्रयोगे परम्परेति नाभिधातव्यम् ईश्वरप्रयत्नेन सर्वस्यापि साक्षादधिष्ठानाभ्युपगमेन तदभिधानेऽपसिद्धान्तापत्तेः, एवं क्षित्यादिप्रयत्नवद् विनाश्यं विनाश्यत्वात् पाट्यमानपटवदित्यनेन संहारद्वारा यदीश्वरसाधनं, तदपि न साधीयः संहारस्य प्रागेव प्रतिषेधात्, तत्स्वीकारेऽपि वा प्रयत्नस्य शरीरनान्तरीयकत्वेन तस्य चाव्यापकत्वेन तदविनाभाविनः प्रयत्नस्यापि तथात्वेन युगपद् विश्वसंहारानुपपत्तेः, यदपि यदेतत्पटादिनिर्माणनैपुण्यं कुविन्दादीनां वाग्व्यवहारश्च व्यक्तवाचां, लिपितत्क्रमव्यवहारश्च बालानां, स सर्वः स्वतन्त्रपुरुषविश्रान्तो व्यवहारत्वात्, निपुणतरशिल्पिनिर्मितापूर्वघटनानैपुण्यवत्, चैत्रमैत्रादिपदव्यवहारवत्, पत्राक्षरवत्, पाणिनीयवर्णक्रमनिर्देशवच्च, इत्यनेन तत्साधनं, तदपि न शोभनं, महाविदेहादिक्षेत्रापेक्षयाऽस्यानादित्वात्, तथात्वे च स्वतन्त्रपुरुषविश्रान्तेरनुपयोगेनासाध्यत्वात् अनादित्वेनैव निखिलप्रागुक्तविश्वव्यवहारस्य सिद्धेः, भारताद्यपेक्षया च सिद्धसाधनं, तत्रहि सुषमदुषमादौ तत्कालवर्त्तिनां पुंसां कुविन्दाद्यभावेऽपि कल्पपादपेभ्य एव अंशुकादिप्राप्त्या तन्निर्माणानुपयोगे कालान्तरेण च कल्पद्रुमविगमेन तल्लिप्सायां प्राक्तनजन्मसंचिताचिन्त्यपुण्यसंभारार्जिततीर्थकरनामकर्मोदयात् गर्भाधानादारभ्या–कृत्रिमज्ञानत्रययुजा जातिस्मरेण भगवता नाभितनयेन पटघटलिप्यादिनिर्मितिव्यवहारस्य प्रदर्शनेन तत्र स्वातन्त्रभाजि तद्विश्रान्तेरभ्युपगमात्, किं च अस्मत्पक्ष एवास्य व्यवहारस्य स्वतन्त्रपुरुषविश्रान्तिरुपपद्यते व्यवहारयितुर्मनोवाक्कायभाक्त्वेन च विशिष्टज्ञानवत्त्वेन परेषां तज्ज्ञापनसंभवात्, भवतां तु ईश्वरस्य तद्विरहितत्वस्वीकारेण तदयोगात्, ननु ईश्वरोऽपि शरीराद्यन्वयव्यतिरेकानुविधायिनिं वेदनिर्माणादिकार्ये तद् गृह्णाति इति चेत्, ननु तच्छरीरवर्त्तिनो ज्ञानेच्छाप्रयत्नाः किं नित्या अनित्या वा, नाद्यः, देहावच्छिन्नानामस्मदादिज्ञानवदनित्यत्वप्रसङ्गात्, अस्मदादिदेहावच्छिन्नास्ते तथा नतु ईश्वरदेहावच्छिन्ना इति चेन्न, कृतकत्वेन अस्मदादीश्वरदेहयोरविशेषात्, भवन्तु वा नित्यास्तथापि किमशरीरेश्वरसंबन्धिन एव ते, तदन्ये वा, न प्रथमः, शरीरान्वयव्यतिरेकानुविधायिनः कार्यस्य तेभ्योऽनुदयप्रसङ्गात्, शरीरावच्छेदात्तस्यापि कार्यस्य तेभ्य उदय इति चेन्न, शरीरान्वयव्यतिरेकानुविधायितदननुविधायिनोः कार्ययोयुगपदुत्पादाभ्युपगमे परस्परविरुद्धकार्यद्वयजनकत्वलक्षणविरुद्धधर्मसंसर्गेण

तेषां भेदप्रसङ्गात्, व्यापकत्वादुभयरूपमपि कार्यं तेभ्य उत्पत्स्यते इति चेन्न, प्रयत्नस्य शरीरनान्तरीयकत्वेन तस्य चाव्यापकत्वेन तदनुपपत्तेः, प्रयत्नं विना च कार्यानुत्पादात्, न द्वितीयः, अनभ्युपगमात्, नापि अनित्याः, तथात्वे देहानवच्छिन्नावच्छिन्नतया नित्यानित्यभेदेन ईश्वरज्ञानादीनां प्रत्येकं द्वैतापत्तेः, न चैवं तज्ज्ञानादीनां नित्यैकैकतयैव स्वीकारात्, मनोयोगप्रसङ्गाच्चाऽनित्यानां तेषां मनस्सम्बन्धनान्तरीयकत्वात्, अपि च यदीश्वरः कार्यवशाद् अन्तराऽन्तरा शरीरं गृह्णाति, तर्हि तत्कर्तृभागे निविशिते न वा, न प्रथमः, तदाहि ज्ञानचिकीर्षाप्रयत्नशाली एवहि कर्त्ता शरीरं तु न कर्त्तृभागे निविशिते, अन्यत्रोपक्षीणत्वाद् इत्यभिधानं प्रलापमात्रमेव स्यात्, तथा च परेण शरीराजन्यत्वेन क्षित्यादेरकर्त्तृकत्वसाधनेऽजन्यत्वेनैव आकाशस्य तत्सिद्धद्यभ्युपगमेन तं प्रति भवतो हेतोरसमर्थविशेषणत्वोद्भावनमसंगतं भवेत्, शरीरस्य ज्ञानादिवत् कर्त्तृभागे निवेशेन समर्थत्वाद् तदजन्यत्वेनैव आकाशस्यापि अकर्त्तृकत्वसिद्धिः, तथा च निरनुयोज्यानुयोगो भवतः प्रसज्येत, न द्वितीयः, एवंहि देहान्वयव्यतिरेकानुविधा–यिकार्यसिद्धये तद्ग्रहणमीश्वरस्य न स्यात्, तस्य कर्त्तृत्वभागानिवेशेन कार्यविशेषस्य तदनुविधानानुपपत्तेः ननु यदि ईश्वरस्य स्वनिर्मेये कार्यसामान्ये तदनुविधानं भवेत्, तदा भवेद् देहस्य कर्त्तृभागनिवेशो, यदा तु कार्यविशेष एव तस्य तदनुविधानं तदा कथं तस्य तन्निवेशः स्यादिति चेत्, यद्येवं श्वासप्रश्वासजागराद्यज्ञानादिषु कार्येषु अस्मदाद्यात्मनां भवदभ्युपगमेन सुषुप्ताद्यवस्थायां ज्ञानचिकीर्षाप्रयत्नाभावेन कर्त्तृत्वाभावात् तेषामपि कर्त्तृभागनिवेशो न स्यात्, तथा च नीव्या अपि नाशेन सुष्ठु कर्त्तृलक्षणं समर्थितं स्यात्, तस्मादविशेषण चतुष्टयस्यैव कर्त्तृभागनिवेशोऽभ्युपेयो न वैकस्यापि न्यायस्य समानत्वात्। यदपि आगमसंप्रदायोऽयं कारणगुणपूर्वकः प्रमाणत्वात् प्रत्यक्षादिवद्, इतीश्वरसिद्धये साधनमुपन्यस्तं तदपि अयुक्तं द्वादशाङ्गीमधिकृत्य सिद्धसाधनात्, अस्य हि कारणं भगवान् श्रीमहावीरस्तस्य च गुणाः सर्वज्ञत्ववीतरागत्ववाग्विशुद्ध्यादयस्तत्पूर्वकस्य प्रमाणत्वेन त्रिकोटीदोषवर्जितोपदर्शितार्थाऽव्यभिचारित्वलक्षणेनास्माकं सिद्धत्वात्, भवतस्तु एवमङ्गीकारेऽपसिद्धान्तापातात्, त्रयीमधिकृत्यद्धद्ये त्वसिद्धेः, तदप्रामाण्यस्य प्राक् प्रसाधनात्, तथा च कारणगुणपूर्वकत्वं तस्या न सिद्धद्येत्, त्रय्या हि कारणमाद्यवक्तृतयेश्वरो वक्तव्यः, स च प्रागेवोपपत्तिभिर्निरस्तः, आस्तां वासौ तथापि तस्य रागादिमत्त्वेन गुणवत्त्वासिद्धेः, रागादिमत्त्वं तस्यासिद्धमिति

चेन्न, सुखदुःखमयसर्गविधिना तस्य तत्सिद्धेः, वीतरागाणां प्राणिषु प्रवृत्तिद्वैतासंभवात्, अन्यथा तत्त्वविरोधात्, अथ जनकाध्यापकचिकित्सकादीनां पुत्रविनेयातुरादिषु शिक्षादिद्वारादुःखोत्पादनेऽपि कारुणिकात्वमेव, तथा च तस्यापि अधर्मसहकार्यपेक्षया जन्तुषु तदुत्पादनेऽपि तन्न विरोत्स्यते, अन्यथा जनकादीनामपि तद्विरुध्येत इति चेन्न, जनकादीनां परमकल्याणसंपिपादयिषयैव पुत्रादिषु तथा प्रवृत्तेः, कालान्तरे तथैवोपलम्भात् मनाक् शिक्षादिकं विना तदयोगाद्, किं च न जनकादीनां सर्वथा वीतरागत्वं येन पुत्रादिषु तदुत्पादनेन तेषां वीतरागत्वविरोधः शंक्येत, प्रकृते तु केवलसुखमयसर्गनिर्मितिसमर्थस्यापि ईश्वरस्य हठेनेवाऽधर्ममपेक्ष्य प्राणिषु दुःखसर्गप्रवृत्तिरवीतरागत्वमेव व्यनक्ति, इतरथा महाप्रलये प्राणिन इव धर्माधर्मावपि संसारचारकसंचारणदुर्ललितौ तेषां संहरेत् तस्मान्नीरागस्यार्हत इव शरीरिणां हिताहितप्राप्तिपरिहारफलोपदेशमात्र एव प्रवृत्तिः समीचीनाऽलं सुखदुःखमयसृष्ट्या, ईश्वरमन्तरेणापि देशकालादिसहकारिसमवधानेन जन्तूनां परिपक्त्रिमस्वादृष्टफलोपभोगसर्गाद्युपपत्तेः, अत एव न तस्य सर्वज्ञत्वमपि रागादिक्षयसमुत्थत्वेन तस्य तदभावेऽभावात्, तथा च प्रवक्तुरवीतरागतयाऽसर्वज्ञतया च न तद्गुणपूर्वकत्वं त्रय्याः सिद्धिमधिरोहति, अपि च तद्गुणपूर्वकत्वसिद्ध्या प्रमाणत्वसिद्धिस्तया च तद्गुणपूर्वकत्वसिद्धिरित्यन्योन्याश्रयादपि न तत्सिद्धिः, महाजनपरिग्रहात् प्रमाणत्वसिद्धौ नेतरेतराश्रयत्वमितिचेत्, अथ कोऽयं महाजनः किमपरीक्षकप्रभूतलोकः, उत परीक्षादिगुणवत्तया महान् गरीयान् जनो महाजनः, नाद्यः, तस्यापरीक्षकत्वादेव गतानुगतिकतया लोलुपतया वा तदुक्तदेहाद्यनुकूलस्नानश्राद्धभोजनादिक्रियासु प्रवृत्त्या तत्परिग्रहेण तत्प्रामाण्यासिद्धेः, इतरथा सुगताद्यागमानामपि तदापत्तेः, न द्वितीयः, उक्तयुक्त्या पूर्वापरविरोधित्वेन अप्रामाणिकार्थोपदेशकतया तस्य तत्परिग्रहासंभवात्, एवं च न तत् प्रमाणत्वं, न च भवत्पक्षेऽपि एतद् दोषानुषङ्ग इति वाच्यम्, प्रमाणोपपन्नार्थप्रतिपादकतया परीक्षकाणां परिग्रहेण प्रागेव तत्प्रमाणत्वसिद्धेः, एतेन सर्वज्ञप्रणीता वेदा वेदत्वात्, यत् पुनर्न सर्वज्ञप्रणीतं नासौ वेदा यथाऽस्मदादिवाक्यम्, इत्यनेनापि ईश्वरसिद्धिः प्रत्युक्ता, तथाहि–किमिदं वेदत्वं ? किमाप्तोपदेशत्वम्, आहो अतीन्द्रियार्थप्रतिपादकवाक्यम्, उत अविसंवाद्यर्थागोचरवाक्यत्वं, नाद्यः, हेतोः साध्याविशिष्टत्वप्रसङ्गात्, नहि सर्वज्ञप्रणीतत्वादन्यदाप्तोपदेशत्वं नाम, न द्वितीयः, बुद्धादिसिद्धान्तानामपि तथात्वापातात् तेष्वपि स्वर्गापूर्वदेवतादीनामतीन्द्रियार्थानां

प्रतिपादनात्, तथा च विरुद्धो हेतुः, अथ अतीन्द्रियार्थप्रतिपादकप्रमाणवाक्यत्वं हेतुर्नच तेषां प्रमाणवाक्यत्वं, तथा च न तैर्विरुद्धताहेतोरितिचेन्न, एवं हि पश्चाद् हेतुं विशिंषतो भवतो हेत्वन्तरनिग्रहस्थानापातात्, न च प्रामाण्यवाक्यत्वमपि वेदानां सिद्धम्, उक्तन्यायेन तन्निरासात्, तथा च विशेषणासिद्धिरपि, न तृतीयः, अविसंवादित्वं हि अर्थक्रियाकारित्वं यदाह— **'अर्थक्रियास्थितिश्चाविसंवाद इति'** वेदवाक्यानां च परस्परविरुद्धार्थाभिधायकत्वेन अविसंवाद्यर्थगोचरत्वासिद्धेः, अथानुपलभ्यमानमूलान्तरत्वे सति महाजनपरिगृहीतवाक्यत्वं वेदत्वं, न ह्यत्र प्रत्यक्षादिकं मूलं तदर्थानामतीन्द्रियत्वात् तस्मात्तत्सर्वज्ञप्रणीतत्वसिद्धिरितिचेन्न, अनन्तरोक्तनीत्या महाजनपरिग्रहासिद्ध्या तदसिद्धेः, यदपि वेदवाक्यानि पौरुषेयाणि वाक्यत्वाद् अस्मदादिवाक्यवदित्यनेन तत्साधनं, तदपि न सुन्दरम्, अत्र तावदपौरुषेयवादी प्रत्यवतिष्ठते, वाक्यत्वमप्रयोजकं नहि अस्मदादिवावाक्यं वाक्यत्वात् पौरुषेयं किन्तु ताल्वादिसंयोगान्वयव्यतिरेकानुविधानात्, वेदवाक्यानि तु तदनुविधानाभावात् वाक्यत्वेऽपि अपौरुषेयाणि भविष्यन्तीति ताल्वादिसंयोगानुविधानमुपाधिः, न च ताल्वादिसंयोगस्य साधनव्यापकत्वान्नोपाधित्वमिति सांप्रतम्, आजन्मसर्वाश्रुतचरस्वप्नोपलब्धनव्यकाव्यादेरकाण्डोत्थगगनभारत्यादेर्वा वाक्यत्वेऽपि तदनुविधानाभावाद् तथा च तस्य साधनव्यापकत्वानुपपत्तिरितिचेत्, तदयुक्तं, स्वप्नोपलब्धकाव्यादेर्हि किं कस्यचित् कदाचित् क्वचित्तदननुविधानं सर्वेषां सर्वदा सर्वत्र वा, नाद्यः, तदाहि नरकालदेशान्तरेषु तस्यापि तदनुविधानसंभवेन अस्य साधनाव्यापकत्वायोगात्, न द्वितीयः, अत्र सर्वेषां सर्वदा सर्वत्र तदनुविधानं नास्तीति अर्वाग्दृशा निर्णेतुमशक्यत्वात् कदाचित्तत्रापि तदनुविधानस्य संभावनाविषयत्वात्, नहि अनादौ संसारे कस्यापि अत्र तदनुविधानं न जातमिति संभवति, तस्मादस्य साधनव्यापकत्वेनोपाधिविषयत्वायोगात्, वाक्यत्वं प्रयोजकमेव, ननु मा भूदप्रयोजकत्वं, तथाप्यस्य न विवक्षितसाध्यसाधकत्वं, तथाहि वाक्यत्वात् पुरुषमात्रकर्तृकत्वं वेदानां सिध्येत् न सर्वज्ञकर्तृकत्वम्, अथातीन्द्रियतया वेदार्थानां दुर्ज्ञातत्वेनासर्वज्ञस्य तन्निर्माणासामर्थ्यात् पक्षधर्मताबलेन तेषां सर्वज्ञकर्तृकत्वसिद्धिरितिचेन्न, परस्परव्याहतार्थाभिधायकत्वाद् स्वर्गादिफलहिंसाद्युपदेशकतया च मूढविप्रलम्भकपुरुषकर्तृकत्वसाधनेन तेषां तदसिद्धिः प्रागेव प्रतिपादनात्, तस्माद् वाक्यादपि न ईश्वराख्यसर्वज्ञसिद्धिः, तदेवमन्येऽपि ईश्वरसाधकहेतवः सूक्ष्मधियाऽनेनैव

न्यायेनोपस्थाप्य अपाकरणीयाः, एतेन क्लेशकर्मविपाकाशयैरपरामृष्ट इत्यादिना, उत्तमः पुरुषस्त्वन्य, इत्यादिना च, यत्पतञ्जलिस्मृतिकाराभ्यामीश्वरस्वरूपं निरूपितं तदपि अपास्तं मन्तव्यं, धर्मिण ईश्वरस्यापवदनेन धर्मरूपाणां तद्विशेषणानामपि अपोदितत्वात् तदेवमनादिसिद्धपुरुषस्य असिद्धेर्बन्धाभावेऽपि अनादिसिद्धः पुरुषः कश्चिदस्तीति यत् केषांचिन्मतं प्रागुपन्यस्तं तन्निरस्तं, सांप्रतं बंधाभ्युपगमेपि क्षणिकज्ञानमात्रस्यैव मुक्तिरिति यत्केषांचिन्मतं प्रागुपक्रान्तं तन्निरसितुमाह 'नेय अन्न, इत्यादिना' 'नैव' न कथंचिदन्यस्य अपरस्य ज्ञानक्षणस्य, 'बन्धे' कर्मसम्बन्धविशेषलक्षणे सति, अन्योऽपरो ज्ञानक्षणः, 'मुच्यते' सकलकर्मबन्धनादात्यन्तिकतया वियुज्यते, मुच्यत इत्युपलक्षणं तेन संसरतीत्यपि द्रष्टव्यं युक्तशब्दात् प्रागितिरध्याहर्त्तव्यः, इति एवं, 'युक्तं' प्रमाणोपपन्नं, लोकेऽपि कुतोऽपि अपराधाद् यस्यैव कारादिषु बन्धस्तस्यैव दण्डादिना मोक्ष इत्येकाधिकरणत्वेनैव तयोर्दर्शनात् अन्यथाऽतिप्रसङ्गात्, अयमर्थः, आत्मनो बन्धमोक्षौ स्त इति तावत् प्रायो वादिनामविवादसिद्धम्, आत्मा च सौगतैः क्षणिकज्ञानसंतानमात्र एवेष्यते, न च तादृशस्य बन्धमोक्षौ संभवतः, वर्तमानज्ञानक्षणो हि कर्मबन्धन् किं स्वोत्पादात् प्राग् बन्धीयात्, सह वा, पश्चाद्वा, न प्रथमः, असतो बन्धायोगात्, न द्वितीयः, सहभवतोः सव्येतरगोविषाणयोरिव तदसंभवात्, न तृतीयः, उत्पादक्षणानन्तरं निरन्वयध्वंसितया तस्य बन्धहेतुद्वितीयादिक्षणावस्थानाभावेन तदनुपपत्तेः, अपिच कषायादिसहकृत–मनोवाक्कायव्यापारनिबन्धनो हि बन्धो गीयते, न च कषायास्तस्य क्षणविनश्वरतया कमपि संस्कारमाधातुमीशते येन कालान्तरे तत्फलमसौ उपभुंजीत, न चैकस्मिन् ज्ञानक्षणे कषाया उत्पत्तुमप्यर्हन्ति, प्रतिक्षणं तस्य स्वोत्पादविनाशाकुलीकृततया कषायोत्पादकानां परप्रयुक्ततादृग्वचनप्रहारादीनां संवेदनाभावाद् अनेन ममापकृतमिति प्रतिसंधानाभावेन तदुत्पत्त्ययोगात्, तथा च अकुशलकर्मबन्धाभावान्न प्रेत्यतत्फलं कश्चिदनुभवेत्, तथा एकस्मिन् क्षणेऽतिशयाधानस्य अशक्यत्वेन स्वर्गाद्येषिणस्तदर्थं ब्रह्मचर्यादिना न क्लिश्येरन्, ननु मोपपाद्येकैकशः क्षणानां बन्धस्तन्निमित्तकषायाद्युत्पादो वा, तत्संतानस्य त्वेकस्य सन्ततमनुवर्त्तमानस्यासौ उत्पत्स्यत इति चेन्न, तस्यापि सन्तानिभ्योऽनतिरेकेन तद्वदेव प्रतिसन्धानाद्ययोगात् तदनुपपत्तेः, 
अतिरेके वा नामान्तरतः स्थिरैकात्माभ्युपगमप्रसङ्गेन क्षणभङ्गभङ्गापत्तेः, प्रागेव तस्य निरासाच्च, नचैकस्मिन् क्षणे शिरसि मे

वेदना पादे मे सुखमित्याद्यव्याप्यवृत्तित्वानुभवः सुखदुःखयोः संगच्छते क्षणस्य निर्भागत्वेन तदसंभवात्, नच अपरापर–क्षणयोस्तत्संवेदनमितिवाच्यं, यस्यैव मे सुखं तस्यैव मे दुःखमित्येककर्तृकतया तत्प्रतिसंवेदनात् क्षणसादृश्यादुत्पद्यमानमिदं भ्रान्तमितिचेत् न, तद्ग्रहणमसंभवेनास्य भ्रान्तत्वासिद्धेः, को हि क्षणः क्षणध्वंसितयाऽहमनेन सदृश इति स्वं गृह्णीयात्, भ्रान्तत्वेनास्य तत्प्रभवोत्तरक्रियाणां विसंवादेन ऐहिकामुष्मिककर्मस्वङ्गिनामप्रवृत्तिप्रसङ्गात्, एवं चानुगतमेकमधिकरणं विना ज्ञानक्षणमात्राभ्युपगमे बन्धो न युज्यते, तदयोगाच्च न मोक्षः, अबद्धस्य निरपराधपुरुषस्येव तदभावात्, तथा च तदर्थक्रियाया निर्विषयत्वापत्तेः, सविषयत्वे वा तत्साध्यस्य कर्माभावलक्षणस्य मोक्षस्य बन्धाभावेनैवायत्नसिद्धत्वात् किं तदर्थं प्रयासेन, एतेन बन्धाभावे मोक्षवत्संसारोऽपि नोपपद्यत इत्यपि प्रतिपादितम्, आत्मनो मंनुष्यादिपर्यायत्यागेन देवतादि पर्य्यायप्राप्तिर्हि संसारः, न चोत्पादानन्तरं विनश्यतो ज्ञानक्षणस्यासौ उपपद्यते, एकस्य कस्यचिदनुगमाभावेन पूर्वपर्य्यायव्यावृत्त्या तस्यैव पर्य्यायान्तरापत्तेरसंभवात्, तदेवं क्षणिकज्ञानपक्षेऽपि बन्धादीनामसंभव एव, कथंचित्तदभ्युपगमेऽपि एकस्य सर्वावस्था–न्वयिनोऽनभ्युपगमेन अन्यस्यान्यस्य क्षणस्य ते भवेयुः, न चैतदुक्तन्यायेन संगच्छते तस्मात् क्षणभङ्गपक्षोऽपि अनुपपन्न इत्याह–'क्षणभङ्गः' क्षणविनश्वरज्ञानपक्षः, 'ता' इति यस्मादत्रापि बन्धादयः परैरभ्युपगता अपि नोपपद्यन्ते, तस्मात् 'कथं' केन प्रकारेण, 'भवतु' अस्तु, न कथंचिदित्यर्थः, अत्र च क्षणभङ्गपक्षे बन्धादयो न युज्यन्ते इति वक्तव्ये, यत् क्षणभङ्गस्यैवाभावप्रतिपादनं तत्तस्यात्यन्ताप्रामाण्येन तत्पूर्वकस्य समस्तस्यापि सिद्धान्तस्याप्रामाण्यज्ञापनार्थम्, इह च क्षणिकज्ञानमात्रस्वीकारे बन्धादीनामपि अनुपपत्तिरित्युपलक्षणम्, एकान्तनित्यात्मपक्षेऽपि ते नोपपद्यंते एव, तथाहि जीवकर्मप्रदेशानां वह्न्ययस्पिण्डवदत्यन्तं संश्लेषोहि बन्धः, स च कषायादिनिबन्धनः, ते च आत्मनः किं कंचिदतिशयमादधति न वा, आदधाना अपि किं प्राच्यस्वभावापगमेन तद्विपर्ययेण वा, नाद्यः, एकान्तनित्यत्वव्याघातात्, अन्यथा तदपगमाभावात्, न द्वितीयः क्षमादिप्रधानस्वभावावगमे कषायादिभिरतिशयस्य स्वात्मरूपपरिणमनलक्षणस्याधातुमशक्यत्वात्, तथात्वे वा भूयोऽपि नित्यैकान्तव्याघातः, अथातिशयं नादधति, तर्हि कथं तैरात्मान्तरगतैरिव विवक्षितात्मनो बन्धः, तदभावाच्च न मोक्षः, प्रागुक्तन्यायात्, किं चैकान्त–

नित्यत्वाङ्गीकारेऽनाद्यविद्यानवदातस्वभावस्यात्मनः परमयोगाद्यभ्यासेनापि अनाधेयातिशयतया तत्त्वज्ञानानुत्पादाच्छश्वदनिर्मोक्षप्रसङ्गः, बन्धाभावे संसारोऽपि न घटामञ्चति, एकस्यात्मनोऽपूर्वैर्निकायविशेषैः शरीरादिभिरभिसम्बन्धो हि संसारः, तैश्च किं तस्य कश्चिदुपकारः क्रियते न वा, तेनापि किं तेषामसौ क्रियते न वा, परस्परोपकारमन्तरेण तस्यैव इत्यादिसंबन्धव्यवहारायोगात्, तत्र यदि तैरात्मनः स्वावच्छेदेन ज्ञानेच्छाप्रयत्नादृष्टाद्युत्पादलक्षण उपकारः क्रियते, तदा तस्य पूर्वज्ञानाद्यवस्थात्यागेन नित्यैकान्तहानिः, अथ न क्रियते, तदाऽदृष्टादिबन्धाभावात् अपरापरदेहादिसम्बन्धलक्षणः संसारो न संगच्छेत, अथ तेषु अचेतनेष्वपि स्वात्मतया परिणमितत्वेन सुखदुःखाद्यनुभवादात्मनाऽपि तेषामसौ क्रियते इति पक्षः, तर्हि अत्रापि आत्मनः केवलस्वस्वरूपहान्या देहाद्यात्मसाक्षात् करणेन कथं नित्यैकान्तता, अथ तेन तेषामसौ न क्रियते, तर्हि संयोगिमात्रं तस्य देहादयो भवेयुः, तथा चाचैतन्याविशेषात् तदवच्छेदेनेव घटाद्यवच्छेदेनापि सर्वगतत्वाभ्युपगमेन आत्मनि ज्ञानसुखादयः सर्वत्रोत्पद्येरन्, को हि संयोगिमात्रतया अचेतनतया च देहादीनां घटादिनां च विशेषः, अथ तददृष्टनिष्पाद्यत्वात् देहादीनां तदवच्छेदेन भवन्ति ज्ञानादयो, न घटाद्यवच्छेदेन, तेषां तन्निष्पाद्यत्वाभावादितिचेत्, अथ कथं तस्यैकान्तनित्यस्याद्दष्टेनापि सम्बन्धः, तन्निबन्धनैः कषायादिभिरात्मनः संस्काराधानासंभवात् संभवे वा विकारित्वेन नित्यैकान्तहानेः, किंच प्राणातिपातप्रवृत्तावपि नास्ति तज्जन्यं पातकं, तदभावात् तदुत्पाद्यो नरकपातोऽपि नास्तीति निश्चित्य निश्शंकं प्राणप्रहारादिषु प्राणिनः प्रवर्त्तेरन्, नित्यत्वेनात्मनोऽपायासंभवात्, तथा च मुमुक्षूणामपि तद्विरतिरपार्थिका स्यात्, तथाऽनादिप्ररूढमिथ्याज्ञानकवलितस्य जीवस्य अपरिणामितया नास्ति कथंचित् तद्विगम इति निश्चयेन न कश्चित् तदुच्छेदाय योगाङ्गेषु यतेत, एवं चाविकारितया गमनवचनाद्यर्थक्रियाभावप्रसङ्गेन चैतन्यरूपस्यापि तस्य सत्त्वमात्रमपि कः श्रद्दधीत, तथा चैकान्तनित्यानित्यपक्षयोः संसारादयो न युज्यन्ते, इति तथा चार्षम्–''**निच्चस्स सभावंतरमपावमाणस्स कहं णु संसारो । जम्माणन्तरनट्ठस्स चेव एगंतओ अमूलो**'' अमूल इति, एकान्तो निर्हेतुक इत्यर्थः तस्मान्नित्यानित्योभयात्मत्व एव बन्धादीनामुपपत्तिः, तत्रहि द्रव्यरूपतया नित्ये पर्य्यायरूपतया तु अनित्ये पर्य्यायाणां बन्धादीनामुत्पादव्ययसंभवात्, यदाह–
''**जह कंचणस्स कंचणभावेण अवट्ठियस्स कडगाई । उप्पजन्ति विणस्संति चेव भावा अणेगविहा ।।१।।** एवं च

**जीवदव्वस्स दव्वपज्जवविसेसमइयस्स । निच्चत्तमनिच्चत्तं च होइ नाओ वलब्भंता ॥२॥**'' एवं च बन्धादिकमभ्युपयताऽयमेव पक्षोऽभ्युपेयो नान्यथा तत्सिद्धिरिति गाथार्थः ॥९४॥

तदियता क्षणभङ्गादिनिराकरणेन बन्धमोक्षयोः सामानाधिकरण्यं समर्थितं, सांख्याः पुनर्नित्यैकान्तवादिनोऽपि प्रकृतिर्बध्यते, पुरुषो मुच्यत इति प्रतिजानानास्तयोर्वैयधिकरण्यमाहुः, तथाहि–तेषां मतमेतत् अकारणमकार्यश्च कूटस्थनित्यचैतन्यरूपः पुरुषः, आदिकारणचेतना नित्या परिणामिनी च प्रकृतिः, ततो महदादिसर्ग इत्यादि, एतदेव किंचिद् विव्रियते–तत्र कार्यकारणयोस्तादात्म्येन आत्मनः कार्यत्वकारणत्वयोरभ्युपगमे परिणामित्वेनाऽनित्यत्वापत्त्या निर्मोक्षप्रसङ्गात्, अकारणमकार्यश्च पुरुषः, ननु सर्वथा बुद्ध्याद्यकारणत्वे कथमात्मनः सत्त्वाधिगमः, नहि कार्यादिदर्शनलिङ्गं विनाऽतीन्द्रियपदार्थसिद्धौ प्रायोऽन्यत्प्रमाणमस्ति, अत उक्तं कूटस्थचैतन्यरूप इति, अचेतनाया बुद्धेश्चेतनोपरागमन्तरेण चैतन्याभिमानान्यथाऽनुपपत्त्या नित्यचेतनोऽसौ निरूप्यत इत्यर्थः, अथ पुरुषस्याकारणत्वे कथमेष जगत्सर्ग इत्यत्रोक्तम् आदिकारणं प्रकृतिरित्यादि, प्रकृतेः कारणत्वाभ्युपगमे सिद्धः सर्ग इति भावः, यद्येवं प्रकृतेः कारणत्वेन पुरुषस्य सकलविषयप्रकाशस्वभावत्वेन च सिद्धो जगत्सर्गः किं महदादिकल्पनया इति चेत्, न, आत्मनो विषयप्रकाशस्वभावत्वस्वीकारे मोक्षाभावापत्तेः, सर्वोपाधिविरहलक्षणस्य कैवल्यस्यैव मोक्षपदाभिधेयत्वात्, विषयप्रकाशस्य चोपाधित्वात् कथं सोपाधेरस्य मुक्तिः स्यात्, एवं तर्हि घटादिपदार्थप्रकाशस्वभावतया परिणता प्रकृतिरेव विषयावच्छिन्नरूपा भवतु इति चेन्न, प्रकृतेः सदातनत्वेन विषयप्रकाशस्वभावत्वस्य अविच्छिन्नप्रवाहतया प्रवृत्तेस्तत्संबद्धस्यात्मनो भूयोऽपि अनिर्मोक्षप्रसङ्गात्, प्रकृतिप्रवृत्त्यनुपरमेणैव तस्य सोपाधित्वात्, अथ माभूत् उभयोरपि अनयोर्विषयप्रकाशस्वरूपत्वं घटादिरेव साक्षात् चैतन्यसंबन्धिस्वभावो भविष्यति इति चेन्न, घटादेः साक्षात्तथात्वे यावत्सत्त्वं प्रतिभासप्रसङ्गात्, न चैवं व्यवहितविप्रकृष्टादिहेतुभिः सतोऽपि तस्य प्रतिभासाभावात्, यद्येवं तर्हि घटादिरेव इन्द्रियमात्रप्रणालिकया चैतन्यसम्बन्धोऽस्तु, तथा च इन्द्रियासन्निकृष्टस्य तस्य सतोऽपि अप्रतिभासो घटयिष्यते कृतं मनोऽहंकारादिकल्पनेन इति चेन्न, युगपत्तत्तद्रूपादिविषयेन्द्रियसन्निकर्षाद् युगपत् चाक्षुषादिबुद्धिपञ्चकप्रसङ्गात्, तथा च व्यासङ्गक्षणे ज्ञानक्रमदर्शनेनान्यत्रापि

ज्ञान क्रमानुमानमिति व्याहन्येत, एकदैव क्वचित्सकलविषयसन्निकर्षे निखिलेन्द्रियवृत्तिप्रसङ्गेन व्यासङ्गानुपपत्तेः, तर्हि क्रमेण मनसेन्द्रियाणामधिष्ठानात् क्रमवृत्तौ व्यासङ्गोपपत्तेर्मनोऽभ्युपेयतां, किमहंकारादिकल्पनया इति चेन्न, यदि हि इन्द्रियमनोभ्यामेवार्थ–सन्निकर्षाज्ज्ञानोत्पाद् इष्यते, तदा यदा स्वप्नदशायां शार्दूलाभिमानी कश्चित् शार्दूलोऽहममुमर्थं जानामि इत्यभिमन्यते, तदा मनुष्योऽहमिममर्थं जानामीति मनुष्यत्वेनापि अर्थावच्छेदः स्यात्, अस्तिहि तत्र संनिकृष्टं वास्तवं मनुष्यत्वं, नच तत्रेन्द्रियमनसोर्व्यापाराभावात् न नरत्वेनार्थावच्छेद इति सांप्रतं, तथात्वे स्वप्नज्ञानस्यापि अनुत्पत्तिप्रसङ्गात्, सुषुप्तावपि वा तदुत्पादापत्तेः, नच तत्र नरत्वप्रतिसन्धानमभ्रान्तं, शार्दूलाभिमानश्च भ्रान्तः भ्रान्ताभ्रान्ताभ्यां च ज्ञानाभ्यां युगपदर्थोपधानं विरुध्यते इति वाच्यं, स्वप्ने नरत्वप्रतिसन्धानस्यापि भ्रान्तत्वात्, ननु तथापि परस्परविरुद्धजातित्वेन एकदैकस्मिन्नेव आत्मनि शार्दूलत्वनरत्वाभ्यामर्थोपधानं न संगच्छते इति चेत्, एवं तर्हि स्वापजागरयोः प्रतिनियतार्थगोचराभिमानव्यापार इन्द्रियमनोभ्यामतिरिक्तोऽहंकारोऽभ्युपेयः, यद्येवमस्तु अहंकारो बुद्धिरस्तु किमर्थं कल्प्यते इति चेन्न, सुषुप्तावस्थायामिन्द्रियादीनां करणेनानुभवद्वारासंबध्यमानो घटादिरर्थः पुरुषमुपरञ्जयतीति पुरुषो घटादिकमर्थमनुभवति, नतु बुद्धिरित्यादिव्यवहारप्रवर्त्तनद्वारेणासौ निर्व्यापारपुरुषस्वरूपं तिरोधत्ते इत्यर्थः । नन्वेवं पुरुषस्याकर्तृत्वोपगमे पुरुषः कुरुते कर्म स्वकृतस्य च कर्मणः फलमुपभुक्तं इत्यादेर्लोकव्यवहाकस्याऽनुपपत्तिप्रसङ्ग इति चेन्न, बुद्ध्यात्मनोर्भेदोग्रहात्तदुपपत्तेः, बुद्धिसन्निधौ अकर्त्तर्यभोक्तरि च पुरुषे वर्तमाने बुद्धेर्भ्रान्तस्य ततकर्तृभोक्तृप्रत्ययस्योत्पादात्, ननु तथापि बुद्धेरचेतनत्वे कथमियं चेतना इति प्रत्यय इति चेन्न, चेतनसन्निधेरचेतनाया अपि तस्या भेदाग्रहण स्वात्मनि चेतनाभिमानात्, यदाह–‘‘**पुरुषोऽविकृतात्मैव स्वनिर्भासचेतनं । मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा ॥१॥ विविक्तेदृक् परिणतौ बुद्धौ भोगोऽस्य प्रकल्प्यते । प्रतिबिम्बोदयः स्वच्छे यथा चन्द्रमसोऽम्भसि ॥२॥**’’ यथा उपाधिर्जपाकुसुमादिः स्वसान्निध्यात् स्फटिकमरक्तरूपमपि रक्ताभासं करोति, तथा पुरुषोऽविकृतरूप एवाचेतनं महत्तत्त्वं स्वप्रतिबिम्बात् स्वनिर्भासं चेतनमिप करोति, तेन स्फटिकेऽरक्तेऽपि रक्तत्वाभिधान इव अन्तः करणेऽचेतनेऽपि चेतनाभिमान इत्याद्यश्लोकार्थः, विविक्ता विभागेन ईदृक् तत्तदिनिन्द्रियसन्निकर्षात् तत्तद्विषयाकारा परिणतिर्यस्याः सा तथोक्ता,

तेन 'मुच्यते च' कर्मसम्बन्धाद् वियुज्यते च, 'जीवः' पुरुषः, तथा च बिध्यते प्रकृतिर्मुच्यते च जीव इति यदुच्यते कापिलैस्तदपि 'नैवः' नास्त्येव इत्यर्थः, एवकारेणाऽस्य पक्षस्य अत्यन्ताप्रामाणिकत्वं सूचयति,तदेवाह, अतिप्रसङ्गात्, अबद्धस्य मुक्त्यभ्युपगमे लोकव्याहारव्यवहारप्रतीतीनां विरोधात् अतिशयेनानिष्टापत्तेरित्यर्थः, एतदुक्तं भवति, यत्तावदुक्तं बुद्धिरचेतना कर्त्री भोक्त्री चेत्यादि तन्न, ज्ञानेच्छादीनां कर्तृनियामकत्वेन कर्त्तृर्ज्ञानाद्याधारत्वसिद्धिवत् चैतन्यस्यापि तन्नियामकत्वेन कर्त्तृश्चैतन्याधारस्यापि सिद्धेः, कथं चैतन्यस्य कर्तृनियामकत्वमितिचेत्, कृतिसामाधिकरण्येनाऽनुभूयमानानां ज्ञानादीनां कर्त्तृनियामकत्ववच्चैतन्यस्यापि तत्सामानाधिकरण्येनानुभूयमानतया तन्नियामकत्वोपपत्तेः, य एवाहं चेतयामि, स एव करोमि इत्यनुभवात्, चैतन्यपूर्वकत्वात् प्रयत्नापरनामायाः कृतेः, भ्रान्तोऽयं प्रत्यक्षानुभव इति चेन्न, बाधकं विनास्य भ्रान्तत्वमसिद्धेः, न ह्यन्धकारादिकारणादुपजातस्य रज्जौ सर्पप्रत्ययस्य नायं सर्पः किन्तु रज्जुरेषा इत्युत्तरकालिकं बाधिकं प्रमाणमन्तरेण भ्रान्तत्वं निश्चेतुं शक्यते, तथापि वा भ्रान्तत्वे सर्वत्र भ्रान्तत्वापत्त्या भ्रान्ताभ्रान्तविभागानुपपत्तेः, अथ कर्त्ता अचेतनः परिणामित्वात् यः परिणामी सोऽचेतनो यथा घट इति बाधिकानुमानात् कर्त्तुरचैतन्यसिद्धेः, भ्रान्तः सामानाधिकरण्यानुभव इति चेन्न, महत्तत्वस्य कर्तृत्वेऽपि अस्य बाधकस्य तुल्यत्वात्, तथाहि बुद्धितत्त्वमकर्तृ परिणामित्वात् घटवदिति, अथ न परिणामित्वात् घटोऽकर्त्ता, किन्तु चेतनोपरागविरहात्, बुद्धेस्तु तत्सद्भावात् कर्तृत्वं सेत्स्यति, तथा च सोपाधिकत्वादप्रयोजकोऽयं हेतुरिति चेन्न, एवं हि चेतन एव वास्तवा ज्ञानादयः स्वीकर्त्तव्याः स्युः, तदाधारत्वलक्षणं च कर्तृत्वं तत्रैवाभ्युपेयं भवेत्, कथमिति चेद् उच्यते—यदिहि स्वभावेनैव बुद्धेर्ज्ञानाद्युत्पादने सामर्थ्यमस्ति, तदा किं चेतनोपरागापेक्षया, अथ सत्यामपि स्वरूपशक्तौ सहकारिशक्तिं विना न कार्योत्पाद इति चेन्न, उपरागस्य सहकारित्वेनापेक्षा भवतामिव सत्यपि आत्मन उपादानत्वेन बुद्ध्याद्यादिजननसामर्थ्ये इन्द्रियार्थसन्निकर्षादिसहकार्यपेक्षा इति चेत् सत्यं, तत्रहि इन्द्रियार्थसन्निकर्षादेर्वास्तवत्वेन तदपेक्षादात्मनो युक्ता बुद्ध्याद्युत्पत्तिः, इह तु चेतनोपरागस्यावास्तवत्वात् तदपेक्षा बुद्धितत्त्वात् कथं ज्ञानादयः प्रादुर्भवेयुः, नहि बीजस्याङ्कुरे कर्त्तव्ये मरीचिकाजलं सहकारिभवितुमर्हति तस्मात् स्वीकुरु वा पुरुषेण सह बुद्धेर्वास्तवं तादात्म्यसम्बन्धं, परिहर वा बुद्धौ तात्त्विकज्ञानाद्युत्पादग्रहं, किं च कोऽयं चेतनोपरागः, किं

॥२४५॥

सांख्यसप्तत्यामभिहितं—**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् । गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः ॥१॥**
यथाऽचेतनं महत्तत्वं चेतनसम्बन्धाच्चेतनमिव प्रतिभाति, तथा पुरुष उदासीनोऽकर्त्ताऽभोक्तापि कर्तृभोक्तृबुद्धिसन्निधेस्तत्तद्रूपः
प्रतिभासत इत्यर्थः, ननु चेतनस्याकर्तृत्वेऽभोक्तृत्वे च यमनियमादिकर्मतज्जन्याऽपूर्वयोरनाश्रयत्वेनाफलत्वात् संसाराभावप्रसङ्ग
इति चेन्न, बुद्धेरेव तत्कर्तृत्वेनाश्रयत्वात् तयोः साफल्योपपत्तेः, बुद्धेरेव चादृष्टपरिपाकात् संसारः, पुरुषस्तु पुष्करपलाशवत् न
कर्मतत्फलेन लिप्यते, पुरुषः संसरतीति व्यवहारस्य तु बुद्धिसन्निधेस्तत्रोपाधिकत्वात्, आलोचनं च व्यापार इन्द्रियाणां,
मनसस्तु विकल्पः, अभिमानोऽहंकारस्य, कृत्यध्यवसायो बुद्धेः, एवं चासाधारणव्यापारभेदेन महदादिसर्गस्योपपत्तिः, प्रकृतेश्च
बुद्धिनिर्माणे चरितार्थतया न ततो जगत्सर्गः, महदादिसर्गस्य चायं क्रमः—**प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः**
**। तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि ॥१॥** इति, ननु कृत्यध्यवसायो बुद्धेर्व्यापार इत्युक्तं, बुद्धेरचेतनत्वेन कृतिविषयस्य
घटादेरप्रतिभासात् घटं करोमि इत्याद्यध्यवसायानुपपत्तेः, नहि कुलालवेद्यां घटनिर्माणे सामग्रीमजानन् कुविन्दो घटमहं
करोमि इत्यध्यवस्यति इति चेन्न, बुद्धेरंशत्रययोगेन तदुपपत्तेः, तथाहि पुरुषोपरागो विषयोपरागो व्यापारावेशश्चेति अंशाः,
भवति हि मया इदं कर्त्तव्यमित्यध्यवसायः, तत्र मयेति पुरुषोपरागो दर्प्पणमुखयोरिव बुद्धिपुरुषयोर्भेदाग्रहेण एकत्वाभिमानादवास्तवः,
इदमिति विषयोपरागो, नीलाद्यर्थेन्द्रियसंनिकर्षाद् बुद्धेर्नीलाद्याकारपरिणामोत्पादो, निश्वासाभिहतस्य दर्प्पणस्येव मलिनिमा
तात्विकः, पुरुषोपरागविषयोपरागाभ्यां जडाया अपि बुद्धेः कृतिविषयस्य घटादेः प्रतिभासनात्तदुभयायत्तो घटादिगोचरः
करोमीत्यध्यवसायो व्यापारावेशः, एवं चाचेतनाया अपि बुद्धेः कर्त्तव्यपदार्थविषयव्यापारोपपत्तेर्घटादिनिष्पत्तिः, तत्रैवंविधव्यापाररूपाया
बुद्धेरर्थेन्द्रियसन्निकर्षात् अयं घट इत्यादिरूपोऽर्थाकारः परिणामो ज्ञानं तस्या एव बुद्धेर्ज्ञानेन सह चः पुरुषोपरागस्यावास्तवस्य
सम्बन्धश्चेतनोऽहममुं घटमुपलभ इत्याद्याकारो दर्प्पणप्रतिफलितस्य मुखस्येव तन्मलिम्नाऽसौ, उपलब्धिरिति परस्परभेदोपलम्भान्न
बुद्ध्यादिशब्दानां पर्य्यायत्वम्, एवं च ज्ञानवदिच्छाद्वेषप्रयत्नसुखदुःखधर्माधर्मरूपा अपि सप्त भावा बुद्धेरेव धर्माः ॥२४६॥
तत्सामानाधिकरण्येन प्रतीयमानत्वात् यो यत्सामानाधिकरण्येन प्रतीयते स तस्य धर्मो यथा शुक्लः पट इत्यादौ पटसामानाधिकरण्येन

प्रतीयमानः शुक्लोः धर्मः पटस्यः, प्रतीयते चाहं जानामि इच्छामि प्रयते सुखी दुःखी इत्यादिरूपेण बुद्धिसामानाधिकरण्येन ज्ञानादयस्तस्मात् तेऽपि तथेति, ननु कथं बुद्धेरष्टावेव धर्मा ज्ञानादीनां संस्कारेण नवानामेव तीर्थिकैरात्मधर्मत्वेन विशेषगुणाख्यया प्रतिपादनात् इति चेन्न, ज्ञानस्यैव अनभिव्यक्ततयाऽनुवर्त्तमानस्य स्मृतिकारणतयाभ्युपेतत्वेन संस्कारस्य सांख्यैरनभ्युपगमात्, यद्येवं ज्ञानादिशालितया बुद्धिरेव नित्यचैतन्यरूपाऽस्तु, किं पुरुषेण इति चेन्न, परिणामित्वेन तस्या अनित्यतया तद्रूपतानुपपत्तेरिति, एषु च प्रकृतिरविकृतरूपा बुद्ध्यादयस्तु सप्त प्रकृतिविकृत्युभयरूपा, बुद्धिर्हि अहंकारस्य प्रकृतिः प्रकृतेस्तु विकृतिरेवमुत्तरेष्वपि योज्यम्, इन्द्रियादीनि तु षोडशविकृतया एव, यथाक्रममहंकारतन्मात्रकार्यत्वात्, पुरुषस्तु न कस्यापि प्रकृतिर्नापि विकृतिः, तदुक्तम्–**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥१॥**
एते च बुद्ध्यादयः प्रकृतेर्जायमानत्वात् न ततोऽत्यन्तं भिद्यन्ते त्रैगुण्यादिना एतेषामपि प्रकृत्यात्मकत्वात्, शुक्लैस्तन्त्वादिभिरारब्धस्य पटादेः शुक्लत्वादिदर्शनेन कार्यस्य कारणात्मकत्वप्रतीतेः, सन्ति चामीषामपि सुखदुःखमोहात्मकसत्त्वरजस्तमोलक्षणास्त्रयो गुणाः कार्येषु तथोपलम्भात्, तथाहिराजतनयः कुलशीलयौवनविक्रमौदार्यन्यायशाली प्रजां सुखयति, स एव च विद्विषो दुःखयति, स एव च धिङ्मां यदेतावन्तं कालमसौ न प्राप्त इति कुपार्थिवकदर्थितान्तमेव स्वामितयाऽभिलाषुकां प्रजां मोहयति, तत्कस्य हेतोः, तस्य तत्तत्सुखादिरूपसत्त्वादिकारणप्रभवत्वेन प्रजादिकं प्रति सुखाद्युत्पादकत्वात्, अनेन च सर्वे पदार्थास्त्रिगुणात्मकतया व्याख्याताः, यथा चैतद् एषां प्रकृत्या साधर्म्यं तथा हेतुमत्त्वादिकं वैधर्म्यमपि अस्ति, प्रकृत्यादिनाहि हेतुमन्तो बुद्‍ध्यादयो नतु प्रकृतिः, केनापि हेतुमती अत एवैषां वस्तुतस्तादात्म्येऽपि कार्यकारणभावेन कथंचिद् भेदोऽपि न विरुध्यते, कथं पुनः कारणात्मकत्वं कार्यस्येति चेत्, कारणव्यापारात् प्रागपि कार्यस्य कारणे सत्त्वात्, कथमेतदिति चेत् उच्यते–'असदकरणात्' असच्चेत् कारणे कार्यं न जात्वपि कार्यस्य सत्त्वं स्यात्. नहि मृत्पिण्डात् कुविन्दशतेनापि पटः कर्त्तुं शक्यते, शक्यते तु तन्तुभ्य एकेनापि तेन, तत्कस्य हेतोः मृत्पिण्डे पटस्याभावात्, तन्तुषु च भावात्, तस्मात्कारणव्यापारादनन्तरमिव प्रागपि तत्र कार्यमस्त्येव, एवं तर्हि कारणानां वैयर्थ्यप्रसङ्गः, तद्व्यापारं विनापि कार्यस्य सत्त्वादिति चेन्न, पीडनेन तिलेषु सत

एव तैलस्येव तेन कार्यस्याभिव्यक्तिकरणात् तस्मात् सदेव कारणे कार्यम्, उपादानग्रहणादयोऽपरेऽपि हेतवः सत्कार्यसाधनाय परैरुपदर्शितास्ते चेह विस्तरभिया नोपन्यस्ता इति स्वयमभ्यूह्याः, ननु यदि कारणात्मकं कार्यं तर्हि कारणानि व्याप्रियमाणानि स्वात्मानमेव कुर्वन्ति, तथा च स्वात्मनि वृत्तिविरोधः, कृतस्य करणे वैयर्थ्यं च प्राप्नुत इति चेन्न, एकात्मेऽपि तयोस्तत्तद्–विशेषाविर्भावतिरोभावाभ्यामविरोधाद्, अवैयर्थ्याच्च, यथैकस्मिन्नेव कूर्मदेहे तदंगानि निर्गमादाविर्भवन्ति, प्रवेशात्तिरोभवन्ति, न च तानि तस्मात् भिन्नानि, एवमेकस्मिन्नेव मृत्सुवर्णादौ घटकुण्डलादयो विशेषास्तत्तत्सामग्र्या प्रादुर्भवन्त उत्पद्यन्त इत्यभ्युच्यंते, कुतश्चित्कारणात् तिरोभवन्तश्च विनश्यन्तीत्यभिधीयन्ते, नतु असतां तेषामुत्पादः, सतां वा विनाशः, यदाह–'**नासतो विद्यते भावो नाभावो विद्यते सतः**,' एवं च न मृदादेस्ते विशेषा भिन्नाः, ननु मूर्त्तत्वप्रमाणोपपन्नत्वादिना व्यक्तेभ्य एव परिमाणुभ्यो द्व्यणुकादिक्रमेण पृथिव्यादिलक्षणकार्योत्पादोपपत्तौ किमव्यक्तप्रकृत्याख्यकारणकल्पनया इति चेन्न, समन्वयादिहेतुभ्यस्तदुपपत्तेः, तथाहि विवादाध्यासिताः सुखदुःखमोहरूपा अव्यक्तहेतुकास्तद्रूपसमन्वितत्वात्, ये यद्रूपसमन्वितास्ते तद्रूपाऽव्यक्तहेतुका यथा मृत्सुवर्णरूपसमन्विता घटकटकादयो मृत्सुवर्णाव्यक्तहेतुकास्तथा च बुद्ध्यादयो भेदाः सुखदुःखमोहसमन्विता उपलभ्यन्ते तस्मात् तेऽपि तद्रूपाव्यक्तहेतुकाः, यच्च तदव्यक्तकारणं सा प्रकृतिः, तद्रूपसमन्वितत्वं चेह बुद्ध्यादीनां सुखाद्यात्मकत्वं विवक्षितं, न च तत्तेषामसिद्धं यथाक्रमं प्रसादोद्वेगरौद्रत्वादीनां तत्कार्याणां तत्रोपलम्भात्, मृदादीनां चाव्यक्तत्वं कार्यस्य घटादेरनाविर्भावावस्थाः, तदव्यतिरेकात् कारणस्येति, अन्यान्यपि परिमाणादीनि अव्यक्तसाधनानि सर्वगतत्वादि तद्धर्मसाधनानि च सांख्यैर्दर्शितानि तानि च तच्छास्त्रात् स्वयमूहनीयानि, तदुक्तं–भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्चेत्यादि, तत्र भिन्नानां सारूप्यं समन्वयः, तदेवमस्ति–प्रकृतिस्तत्कार्यं बुद्धिश्च सा च तदभिन्ना कर्त्री पुरुषार्थं प्रवृत्तेः, अत एव तद्व्यतिरिक्तस्य पुरुषस्यापि सिद्धिः, तथाहि प्रकृतिबुद्ध्यादयः परार्थाः संहतत्वात् शयनासनाद्यङ्गवत्, संहतत्वं च बुद्ध्यादीनां सुखदुःखाद्यात्मकत्वं, परार्थत्वं शयनादीनां च शरीराद्यर्थत्वं, बुद्ध्यादीनां च तदर्थत्वासंभवात्, पर आत्मा तदर्थत्वमिह साध्यत्वेनाभिमतं, तस्माद् व्यवस्थितमेतत् प्रकृतत्यभिन्ना बुद्धिः, कर्तृत्वात् भोक्तृत्वाच्च बध्यते तद्विवेकदर्शनाच्च पुरुषो मुच्यते इति पूर्वपक्षः, तमेनं निरस्यंस्तथा ये च

ज्ञानिनो धर्मतीर्थस्य कर्त्तारः परमं पदं गत्वाऽऽगच्छन्ति भूयोऽपि भवं तीर्थनिकारत, इत्यभिदधाना मुक्तस्यापि तीर्थपराभवेन पुनरावृत्तिं मन्यन्ते, तन्मतं च बन्धाभावे पुनरावृत्तेरभावप्रसङ्गेन संप्रति निराकुर्वन्नाह—

**वज्झइ पयडी नेव य मुच्चइ य जीवो अइप्पसंगाओ । निस्सेसकम्ममुक्के पुणरागमणं कुओ होइ ॥९५॥**

**व्याख्या**—'बध्यते' कषायादिनिर्वर्त्तितेन कर्मणा संश्लिष्यते 'प्रकृतिः' प्रधानं, नैव चेति च भिन्नक्रमौ तौ च योक्ष्येते, तेन 'मुच्यते च' कर्मसम्बन्धाद् वियुज्यते च, 'जीवः' पुरुषः, तथा च बध्यते प्रकृतिर्मुच्यते च जीव इति यदुच्यते कापिलैस्तदपि 'नैवः' नास्त्येव इत्यर्थः, एवकारेणाऽस्य पक्षस्य अत्यन्ताप्रामाणिकत्वं सूचयति,तदेवाह, अतिप्रसङ्गात्, अबद्धस्य मुक्त्यभ्युपगमे लोकव्याहारव्यवहारप्रतीतीनां विरोधात् अतिशयेनानिष्टापत्तेरित्यर्थः, एतदुक्तं भवति, यत्तावदुक्तं बुद्धिरचेतना कर्त्री भोक्त्री चेत्यादि तन्न, ज्ञानेच्छादीनां कर्तृनियामकत्वेन कर्तृर्ज्ञानाद्याधारत्वसिद्धिवत् चैतन्यस्यापि तन्नियामकत्वेन कर्तृश्चैतन्याधारस्यापि सिद्धेः, कथं चैतन्यस्य कर्तृनियामकत्वमितिचेत्, कृतिसामाधिकरण्येनाऽनुभूयमानानां ज्ञानादीनां कर्तृनियामकत्ववच्चैतन्यस्यापि तत्सामानाधिकरण्येनानुभूयमानतया तन्नियामकत्वोपपत्तेः, य एवाहं चेतयामि, स एव करोमि इत्यनुभवात्, चैतन्यपूर्वकत्वात् प्रयत्नापरनामायाः कृतेः, भ्रान्तोऽयं प्रत्यक्षानुभव इति चेन्न, बाधकं विनास्य भ्रान्तत्वमसिद्धेः, न ह्यन्धकारादिकारणादुपजातस्य रज्जौ सर्पप्रत्ययस्य नायं सर्पः किन्तु रज्जुरेषा इत्युत्तरकालिकं बाधिकं प्रमाणमन्तरेण भ्रान्तत्वं निश्चेतुं शक्यते, तथापि वा भ्रान्तत्वे सर्वत्र भ्रान्तत्वापत्त्या भ्रान्ताभ्रान्तविभागानुपपत्तेः, अथ कर्त्ता अचेतनः परिणामित्वात् यः परिणामी सोऽचेतनो यथा घट इति बाधिकानुमानात् कर्त्तुरचैतन्यसिद्धेः, भ्रान्तः सामानाधिकरण्यानुभव इति चेन्न, महत्तत्वस्य कर्तृत्वेऽपि अस्य बाधकस्य तुल्यत्वात्, तथाहि बुद्धितत्त्वमकर्तृ परिणामित्वात् घटवदिति, अथ न परिणामित्वात् घटोऽकर्त्ता, किन्तु चेतनोपरागविरहात्, बुद्धेस्तु तत्सद्भावात् कर्तृत्वं सेत्स्यति, तथा च सोपाधिकत्वादप्रयोजकोऽयं हेतुरिति चेन्न, एवं हि चेतन एव वास्तवा ज्ञानादयः स्वीकर्त्तव्याः स्युः, तदाधारत्वलक्षणं च कर्तृत्वं तत्रैवाभ्युपेयं भवेत्, कथमिति चेद् उच्यतेयदिहि स्वभावेनैव बुद्धेर्ज्ञानाद्युत्पादने सामर्थ्यमस्ति, तदा किं चेतनोपरागापेक्षया, अथ सत्यामपि स्वरूपशक्तौ सहकारिशक्तिं विना न कार्योत्पाद इति चेन्न,

उपरागस्य सहकारित्वेनापेक्षा भवतामिव सत्यपि आत्मन उपादानत्वेन बुद्ध्यादिजननसामर्थ्ये इन्द्रियार्थसन्निकर्षादिसहकार्यपेक्षा इति चेत् सत्यं, तत्रहि इन्द्रियार्थसन्निकर्षादेर्वास्तवत्वेन तदपेक्षादात्मनो युक्ता बुद्ध्याद्युत्पत्तिः, इह तु चेतनोपरागस्यावास्तवत्वात् तदपेक्षा बुद्धितत्त्वात् कथं ज्ञानादयः प्रादुर्भवेयुः, नहि बीजस्याङ्कुरे कर्त्तव्ये मरीचिकाजलं सहकारिभवितुमर्हति तस्मात् स्वीकुरु वा पुरुषेण सह बुद्धेर्वास्तवं तादात्म्यसम्बन्धं, परिहर वा बुद्धौ तात्त्विकज्ञानाद्युत्पादग्रहं, किं च कोऽयं चेतनोपरागः, किं बुद्धेश्चेतनरूपः परिणाम उत तत्प्रतिबिम्बनं, नाद्यः, सहि किं मौलचेतनव्यावृत्त्या आहो तदव्यावृत्त्या ? न प्रथमः, तदाहि तदर्थमेतावान् प्रयासस्तस्य परस्य संकलतत्त्वमस्तकस्य पुरुषस्याभावे परार्थत्वानुपपत्त्या प्रवृत्त्यभावेन गुणवतोऽपि बुद्धितत्त्वस्य शरीरस्येवापार्थक्यप्रसङ्गात्, कौटस्थ्यव्याघातात् बुद्धेश्चैतन्यरूपतया प्रवृत्त्यभावेनाहंकारादिसर्गाभावप्रसङ्गाच्च,नापरः, चेतनद्वैतापत्तेः, आपद्यतां को दोष इति चेन्न, बुद्धेश्चेतनतयाऽप्रवृत्तौ मौलचेतनस्य तत्सम्भेदजनितमललेपाभिमानाभावे निरुपाधितया नैय्यायिकदर्शने ईश्वरस्येव अनादिसिद्धत्वप्रसङ्गात्, अपूर्वचेतनस्य च परिणामितयाऽनित्यत्वेनावश्यं तया विनाशात् तदर्थं बुद्ध्यन्तरकल्पनस्यापि अनुपयोगात्, एवं च पूर्वापूर्वचेतनानामाजवंजवीभावाभावात् यथा क्रममनादिमुक्तत्वापार्थक्ययोरापत्त्या भव स्वस्थः, न द्वितीयः, प्रतिबिम्बस्यावास्तवतया बुद्धेर्मयेति अंशस्यापि तथात्वेन स्वप्नानुसंहितादिव तस्माद् वास्तवार्थक्रियाऽनुपपत्तेः, नहि मुखोपरक्तात् दर्प्पणात् वास्तव्या मुखार्थक्रियायाः संभवः; अपि च न चेतनोपरागवत्त्वस्य कर्तृत्वेन सह प्रतिबन्धोऽस्ति, येन बुद्धेः परिणामित्वेऽपि तस्मात्कर्तृकत्वं सिध्येत्, प्रतिबन्धग्रहणविषयस्य दृष्टान्तस्याभावात्, ननु मा भूत् चेतनोपरागविरह उपाधिः ज्ञानाद्यनाधारत्वमसौ भविष्यति, न खलु घटः पर्रिणामित्वादकर्त्ता किं नाम ज्ञानाद्यनाधारत्वात् बुद्धिस्तु तदाधारत्वात् कर्त्री भविष्यति को दोष इति चेन्न, साध्यस्यैव उपाधित्वेनोद्भावयितुमसङ्गतत्वात्, सर्ववादिभिः प्रायो ज्ञानाद्याधारस्य कर्तृपदवाच्यतया इष्टत्वेन तदनाधारस्याकर्तृशब्दाभिधेयत्वेनोपगमात्, स्यादेतदेवं यदि कर्तृज्ञानाद्याधारशब्दयोः पर्यायता स्यात्, न चैवं कर्तृपदेन हि कृतियोगी प्रयत्नवानुच्यते, ज्ञानाद्याधारशब्देन च प्रयत्नव्यतिरिक्ताशेषधर्माधारस्तथा च तद्विपर्य्ययस्यापि तच्छब्दाभ्यां तथैवाभिधेयत्वेनार्थभेदात् ज्ञानाद्यनाधारत्वस्योपाधित्वं दुर्निवारम्, एवं च तदाधारत्वात् परिणामित्वेऽपि महत्तत्त्वस्य कर्त्तृत्वं

दुर्निषेधमितिचेत्, न, परस्पराश्रयप्रसङ्गात् ज्ञानाद्याधारत्वप्रतीतौ हि कर्तृत्वप्रतीतिः, तत्प्रतीतौ च ज्ञानाद्याधारत्वप्रतीतिरिति, न च ज्ञानाधारत्वकृतियोगित्वयोर्व्याप्यव्यापकभावो मुमूर्षादिभिर्व्यभिचारात् तेषां ज्ञानाद्याधारत्वेऽपि कृतियोगासंभवात् तस्मात् नित्यचैतन्यसमुद्रस्यैव नित्यस्पन्दास्तत्तदिन्द्रियार्थसंनिकर्षादुपजायमानास्तत्तदर्थग्राहकत्वेन परिणता आत्मगुणा एव ते ज्ञानभेदाश्चाक्षुषस्पार्शनादिव्यपदेशभाज इमे विजृम्भन्ते, नतु बुद्धिधर्मा इति, अस्तु तर्हि अचेतनकार्यत्वं कर्तुर्महत्तत्त्वस्य चैतन्यबाधकम् अचेतनाया हि प्रकृतेराद्यं कार्यं बुद्धिरतोऽचेतना, कार्यकारणयोस्तादात्म्येन च कारणस्याचैतन्येन कार्यस्यापि अचैतन्यमितिचेन्न, अस्याः कार्यत्वेऽनित्यत्वेन विनाशात् प्रेत्यभावाद्यनुपपत्त्या तदसिद्धेः, कथमिति चेदुच्यतेप्राच्यजन्मपरित्यागेन उत्तरजन्मलाभो हि प्रेत्यभावः स च पूर्वादृष्टोपग्रहाद् भवति, विनष्टायां च बुद्धौ तद्गतादृष्टस्यापि अवस्थानासंभवात् नहि धर्मिणि असति तदाश्रयाणां धर्माणामवस्थानं संभावयितुमपि शक्यम्, अथ प्राच्यबुद्धिविनाशानन्तरक्षण एव उत्तरबुद्ध्युत्पत्तेस्तद्गतादृष्टोपग्रहात् प्रेत्यभावो भविष्यति इति चेन्न, उत्तरबुद्धिवदेव प्रायेणानन्तरसमय एव उत्तरजन्मनोऽपि लाभादुभयोरपि समसमयभावित्वेनाविशेषात् कथं तद्गतादृष्टोपग्रहात् प्रेत्यभावः सिध्येत्, सिध्यतु वा कथंचिदसौ तथापि तत्कालोत्पन्नाया बुद्धेर्यमनियमादिकर्मकाण्डं विना धर्माधर्मयोर्निर्माणासामर्थ्ये तद्धेतुकौ तौ कथं तदानीं स्वकार्ये सुखादौ व्याप्रियेयाताम्, अपि च कार्यत्वेन बुद्धेः प्राच्यभवान्त्यक्षणसमसमयमेव प्रध्वंसे तदनन्तरजन्मनि तदहर्जातस्य बालकस्य स्तन्यादौ प्रवृत्तिर्न भवेत्, तत्कालमेव बुद्धेर्ज्ञानादिधर्माष्टकानुत्पादात् रागद्वेषावन्तरेण प्रवृत्तिहेतुप्रयत्नानुत्पत्तेः, ममेदं हितसाधनं तज्जातीयत्वात् प्रागनुभूतवत्, तथा चेदमित्यादिरूपेष्टानुसंधानं विना च रागाद्यनाविर्भावात्, इह जन्मनि अननुभूतस्य प्रागुक्तप्रतिबन्धस्यास्मृतौ चेष्टानुसंधानानुपपत्तेः, जन्मान्तरानुभूतस्य च प्रतिबन्धस्येह जन्मभाविना बुद्ध्यन्तरेणास्मरणात्, नान्यदृष्टं स्मरत्यन्य इति वचनात्, स्मरणे चातिप्रसङ्गात्, नच पुरुषान्तरबुद्धेर्ज्ञानादिभिस्तस्य प्रवृत्तिः, अन्यधर्माणामन्यत्राप्रतिसंक्रमेण तदनुपपत्तेः, नच मा भूत् ज्ञानाद्यभावात् बालकस्य प्रवृत्तिरिति वाच्यं, सर्वावस्थासु प्राणिनां ज्ञानादिशून्यत्वाभावेन प्रवृत्त्यभावायोगात्, अथ पूर्वबुद्धिविध्वंसे तदुत्तरानुत्पत्तिदशायामपि प्रकृतिव्यापारात् बालः प्रवर्त्स्यति इति चेन्न, तस्याः साधारण्येन ज्ञानादिशून्यत्वेन च नियामकत्वासंभवात्, ननु बुद्धिविलयेऽपि

तद्वासनानुवृत्तेः सर्वमेतदुपपत्स्यत इतिचेत्, किं बुद्धिरेव वासना तद्धर्मो वा, सोऽपि तद्व्यतिरिक्तोऽव्यतिरिक्तो वा, आद्ये यदि बुद्धेर्विलयः कथमनुवृत्तिः, सा चेत् कथं विलयः बुद्धिवासनयोः पर्यायत्वेन युगपदनुवृत्तिनिवृत्त्योर्विरोधात्, द्वितीयोऽपि धर्मिव्यतिरिक्तस्य धर्मस्याऽस्वीकारात् स्वीकारे वाऽपसिद्धान्तादसङ्गतः, न तृतीयः, धर्मिनिवृत्तौ तदव्यतिरिक्तस्य धर्मस्यापि निवृत्त्याऽनुवृत्तेरभावात्, एवं च सवासनपूर्वबुद्धिविनाशे बीजाभावादुत्तरबुद्ध्यानुत्पादे कः संसरेत्, तथा च कर्तृचाचेतनकार्यं च बुद्धितत्त्वमित्यभ्युपगमे बहुव्याहन्येत इत्यसिद्धोऽचेतनकार्यत्वहेतुः, अथ एतद्दोषभिया नित्या बुद्धिरिष्यते, तर्हि तस्या नित्यत्वेन आसंसारं प्रवृत्तिस्वभावतया पुरुषस्यानिर्मोक्षप्रसङ्गः, तद्व्युपहितस्वरूपतया तस्य स्वस्वभावाप्राप्तेः, प्रवृत्तिस्वभावत्वेऽपि वासनानुवृत्तिलक्षणाधिकारनिवृत्त्या बुद्धेरप्रवृतेः पुरुषो मोक्ष्येत् इतिचेत्, कथं पुनरचेतनया तया आत्मनो निरधिकारत्वमवसीयते, स्वधर्मेण ज्ञानेन इतिचेत्, न तस्येन्द्रियद्वाराजायमानत्वेनातीन्द्रियमेतमर्थमवसातुमसामर्थ्यात्, सामर्थ्ये वाऽस्मदादीनामपि अतीन्द्रियार्थसाक्षात्कारप्रसङ्गात् ऐन्द्रियकज्ञानस्य सत्त्वात्, तस्मात् स्वस्य निरधिकारत्वं निश्चेतुं नित्यचैतन्यं तस्या अभ्युपेतव्यम्, एवं चेत्तर्हि संसारावस्थायां नित्यचैतन्यसत्ताविनाभाविज्ञानेच्छादिगुणाधिकरणं बुद्धेरन्यो नित्यात्मैवाऽङ्गीकर्तव्यः, किमन्तर्गडुना महत्तत्त्वेन निरुपपत्तिकेन, किंच कार्यस्य कारणात्मकत्वाभ्युपगमे यावद् धर्मजातं कार्ये उपलभ्यते, प्रायः कारणेऽपि तावन्मात्रेण तेन भवितव्यं, नान्यथा तयोस्तत्त्वस्तादात्म्यं स्यात्, एवं च बुद्धाविव प्रकृतावपि ज्ञानेच्छादयोऽभ्युपेयन्ताम्, एवमस्तु इतिचेत्, तर्हि बुद्धिरेवास्तु किं प्रकृत्या तयैव सर्वसाध्यसिद्धेः, बुद्धिकारणत्वेन सापि इष्यतामितिचेत्, तर्हि कल्पनालाघवाद् बुद्धेरेव नित्यत्वमभ्युपेहि, एवं च प्रेत्यभावादेरपि अव्याघातेनोपपत्तेः किं प्रकृतिकल्पनयाइत्येइत्येवमपि असिद्धो हेतुः, प्रकृतेरसत्त्वेन तस्यास्तत्कार्यत्वासिद्धेः, अस्तु तर्हि गुणत्रयालङ्कृतत्वं बाधकं, तथाहिकर्त्ताऽचेतनो गुणत्रयालङ्कृतत्वात् प्रकृतिवदितिचेन्न, विकल्पासहत्वात्, तथाहि किमिदं गुणत्रयं ? किं सत्त्वरजस्तमांसि, उत ज्ञानेच्छाप्रयत्नाः, आहो ज्ञानदर्शनचारित्राणि, नाद्यः, अकर्तृत्वेऽप्यस्य तुल्यत्वात् तथाहि महत्तत्त्वमकर्तृ सत्त्वादिगुणवत्त्वात् प्रकृतिवत्, नच साध्यविकलो दृष्टान्तः, ज्ञानाद्यनाधारत्वेन तस्या अकर्तृत्वसिद्धेः, न द्वितीयः, असाधारणानैकान्तिकत्वात्, तथाहि ज्ञानेच्छादित्रयाधारत्वादिति हेत्वर्थः स्यात्, तस्य च

सपक्षात् घटादेरिव विपक्षाच्चेतनादपि व्यावृत्तेः, चेतनस्य भवता ज्ञानाद्यनाश्रयत्वेनोपगमात्, न तृतीयः, स्वरूपासिद्धेः, नहि भवतो ज्ञानदर्शनादिगुणत्रयं पक्षे सिद्धं, सिद्धौ वा सपक्षादिव त्वन्मते विपक्षादपिव्यावृत्त्या हेतोरसाधारणत्वात्, अस्मन्मते तु साध्यविपर्य्ययव्याप्तत्वेन विरुद्धत्वात्, तदेवं कर्त्तुश्चैतन्यबाधकानां निरासेन कृतिचैतन्योः सामानाधिकरण्यानुभवस्याभ्रान्तत्वात् चेतन एव कर्त्ता इति व्यवस्थितं, स एव च भोक्ता यमादि कर्त्तुरात्मन एव तत्फलसुखादिभोक्तृत्वेन स्वसंविदिततया लौकिकप्रामाणिकप्रसिद्धेः, यदाह–'**प्रमाता स्वान्यनिर्भासी कर्त्ता भोक्ता विवृत्तिमान् । स्वसंवेदनसंसिद्धो जीवः क्षित्याद्यनात्मकः ॥१॥** ननु चेतनस्य वास्तवभोगस्वीकारे सुखिदुःख्यादिभावेन पूर्वरूपनिवृत्तौ रूपान्तरापत्त्या परिणामित्वेनानित्यत्वप्रसङ्ग इतिचेन्न, सर्वपदार्थानामपि द्रव्यरूपतया नित्यत्वेन पर्य्यायरूपतया तु अनित्यत्वेन तथैव प्रमाणसिद्धतया जैनैरभ्युपगमात्, नहि द्रव्यं पर्य्यायवर्जितं पर्य्याया वा द्रव्यवर्जिताः क्वचित्सन्ति येनैकान्तनित्यतां क्षणिकतां च पदार्थानां प्रतिपद्येमहि, तदुक्तम्–"**द्रव्यं पर्य्यायवियुतमित्यादि**" पर्य्यायाश्च द्रव्यास्तिकनयेन नित्यस्यापि आत्मनो देवत्वनारकत्वादयः सुखदुःखादयश्च परिणामाः, ततः पर्य्यायास्तिकनयेन परिणामित्वेऽपि तस्य नैकान्तानित्यत्वम्, एवं च कारणासत्त्वे कार्याभावस्य सुलभत्वेन बुद्धेरसिद्धौ तन्मूलोऽहंकारादिसर्गोऽपि प्राप्तोपसर्गो नावस्थातुमर्हति, बुद्धिज्ञानोपलब्धिशब्दानां च सर्वपार्षदं चैतन्यपर्य्यायत्वमित्थमेव संगच्छत इतिस्थितं, यदुप्युक्तं प्रकृतेः कार्यभेदाबुद्ध्यादय इति, तत्र किमेते प्रकृतेर्व्यतिरिक्ता अव्यतिरिक्ता वा, नाद्यः, कार्यस्य कारणात्मकत्वाभ्युपगमेन तदनुपपत्तेः, न द्वितीयः, कार्यकारणभावस्य भेदाधिष्ठानत्वात्, प्रकृतिः कारणं बुद्धिः कार्यमित्यादिव्यवहारस्य भेद एवोपपत्तेः, सर्वथाऽभेदेहि तयोर्बुद्धिकारणं प्रकृतिः कार्यमिति वैपरीत्यमपि आपद्येत अविशेषात्, अथ पूर्वपदार्थात् सहकारिसाहित्येन अपूर्वपदार्थान्तरोत्पादः कार्यकारणभावो नास्माकमभिमतो येनैवं विरोधो नोद्येत, किं तर्हि प्रधानस्य बुद्ध्यादिरूपेण परिणामः, स चाभेदेऽपि संगच्छते, एकस्यैव वस्तुनो रूपान्तरेण प्रादुर्भावादितिचेत्, अथ कोऽयं परिणामः, किं धर्मिण एव धर्मान्तररूपेण प्रादुर्भावः, धातुवादिप्रसिद्धेनौपधीपारदादियोगेन ताम्रादेः सुवर्णादिरूपतयेव, अथावस्थितस्यैव धर्मिणः प्राच्यधर्मव्यावृत्तौ कृकलासस्य पूर्ववर्णव्यावृत्तौ वर्णान्तरस्येव धर्मान्तरस्य प्रादुर्भावः, न प्रथमः, तदाहि प्रधानस्य

बुद्धिरूपेण परिणाम इत्यर्थः स्यात्, ततश्च किं तस्यैकदेशेनासौ भवेत्, कार्त्स्न्येन वा, नाद्यः, तस्य निरवयवत्वाङ्गीकारेण तदभावात्, भावे वा तस्मादेवैकदेशात् बुद्धिप्रादुर्भावेनाऽवयवान्तराणापरिणामितया वैयर्थ्यापातात्, अपसिद्धान्तप्रसङ्गाच्च नापरः, बुद्धिरूपतया सर्वथा भावेन प्रधानस्याभावापत्तेः, न द्वितीयः, प्रधानस्य प्राच्याधर्माभावेन तद्व्यावृत्त्या बुद्ध्याख्यस्य धर्मान्तरस्य प्रादुर्भावानुपपत्तेः, सत्त्वादिप्राच्यधर्मनिवृत्तौ तु बुद्धिरूपधर्मान्तरोत्पादाभ्युपगमे बुद्धेस्तद्विरहापत्तेः, प्रकृतेरपि सत्त्वादिविरहेऽसत्त्वापाताच्च, नच सत्त्वादीनां धर्मत्वं गुणत्वेनैव तेषां भवताऽभ्युपगमात्, न च बुद्धेरपि धर्मत्वं सिद्धं, ज्ञानाद्यधिकरणतया तस्या धर्मित्वस्वीकारात्, न च प्रकृतिविकारतया तस्या धर्मत्वमिति वाच्यं, क्षीरविकारत्वेन दध्नोऽपि तद्धर्मत्वप्रसङ्गात्, इष्यत एवेदमितिचेन्न, गन्धरसवीर्यादिभेदेन क्षीरवत्तस्यापि पृथग् धर्मितया सर्ववादिसिद्धेः, तस्मात् परिणामरूपोऽपि कार्यकारणभावो न संगतिमश्नुते, यदपि सुखदुःखमोहात्मकतया प्रकृति साधर्म्येण कथंचिद्भेदापादनं तदपि न संगतं, सर्वथा तादात्म्ये वैधर्म्यानुपपत्त्या भेदविरोधात्, बुद्ध्यादीनां तदात्मकत्वं तदपि न, तद्धि किमेषां सर्वत्र सर्वत्र सर्वान् प्रति, आहो कदाचित् क्वचित्कांश्चिदेव प्रति नाद्यः, तदादि देशकालनरावस्थाप्रतिनियमेन तेषां सुखाद्युत्पादकत्वं न स्यात्, दृश्यते च तदेव स्रक्चन्दनादिकमेकस्यैव पुंसो देशादिविभागेन जनयत् सुखादिकं, त एव च शब्दादयस्तदैव कस्यचित् सुखहेतवः कस्यचित् दुःखहेतव उपलभ्यन्ते सोऽयं विभागो न भवेत्, न द्वितीयः, सुखाद्यात्मकत्वविलोपप्रसङ्गात्, नहि नीलं नीलात्मतयाऽनीलव्यावृत्तं कंचित् प्रति नीलं कंचित् प्रति अन्यथेति, यदपि हेतुमत्त्वादिना वैधर्म्येण कथंचिद्भेदापादनं तदपि न संगतं, सर्वथा तादात्म्ये वैधर्म्यानुपपत्त्या भेदविरोधात्, एवमपि अविरोधे सत्त्वादिगुणभेदेन प्रकृतेरपि भेदापातात्, यदपि, असदकरणादित्यादिना कार्यस्य कारणे सत्त्वात् तयोरैकात्म्यसमर्थनं, तदप्ययुक्तं सत्करणेऽपि अस्य दोषस्य समानत्वात्, यदि हि कारणव्यापारात्प्रागपि सदेव कार्यं तदा तत्कारणत्वमेव जह्यात्, कार्यान्नियमेन प्राक्कालासम्बन्धि हि कारणं, यदनन्तरं च नियमेन यद् भवति तत्तस्य कार्यं, नच सह भवतोरेव तयोस्तल्लक्षणोपपत्तिः, तथात्वे वा सह भावुकं सर्वं सर्वस्य कार्यं कारणं वा स्यात्, तथा चाव्यवस्थया निरीहं जगज्जायेत, यदपि कारणैः कार्यस्याभिव्यक्तिकरणेन तेषां साफल्याविर्भावनं तदपि न चारु, अभिव्यक्तिर्हि

कार्यस्योत्कर्षाधानं वा स्यात्, प्रतीतिर्वा, आवरणापनयनं वा, नाद्यः, सत एव कार्यस्य तदसंभवात्, यथाहि पटावस्थायां तन्तुभिर्न तस्योत्कर्षाधानं, तदास्कन्दितस्यैव तस्य पटव्यपदेशभावात् तथा कारणेऽपि सर्वात्मना तत्सत्त्वाभ्युपगमे तन्न स्यादविशेषात्, न द्वितीयः, तस्या इन्द्रियार्थसन्निकर्षजन्यत्वात्, पटावस्थामप्राप्तस्य च तस्येन्द्रियसन्निकर्षाभावात्, भावे वा पटावस्थायामिव विशकलिततन्त्ववस्थायामपि तत्सन्निकर्षात् पटप्रतीतिप्रसङ्गात्, तस्मात् तन्तुभ्योऽतिरिक्तं पटावस्थाऽवाप्तौ हेत्वन्तरं वाच्यं तेषां पटप्रतीतावेव सामर्थ्यात्, न तृतीयः, आवरणं हि पटस्य तन्तव एव भवेत्, अन्यद्वा किंचिद्, नाद्यः, एकस्यैवावरणत्वतदपनायकत्वानुपपत्तेः, नहि पटलं नेत्रस्यावरणं च तदपनायकं चेति संगच्छते, नच तन्तूनामावरणत्वमपि संभवति, रण्डाकरण्डावस्थितानां तेषामितस्ततः करादिभिर्विकरणेऽपि तदन्तरा पटानुपलब्धेः, नापरः, तदभावात्, नहि तैलस्य तिलानिव तण्डुलानां तुषानिव वा पटस्य किंचिदावरणमुपलभेमहि येन तन्तुभिस्तदपसारणे तैलादिवत् पटपृथगुपलभ्येत, एतेन तैलदृष्टान्तोऽपि निरस्तः, तिलतुषादीनां ह्यावारकत्वं पार्थक्यं च सर्वानुभवसिद्धं तेन तदपसारणे युक्ता तैलादीनामभिव्यक्तिः, नतु इह तन्त्वादीनामावारकत्वं कस्यापि सिद्धं येन तदपगमे पटाभिव्यक्तिः स्यात्, तदपसरणे हि पट एव न प्रादुर्भवेत्, तथा च कस्तन्तुभिरभिव्यज्येत, किंच कारणानामभिव्यञ्जकत्वमङ्गीकारे यथा प्रदीपः कदाचित्तदर्थमव्यापार्यमाणोऽपि स्वप्रभापटलान्तःपातिनो घटादीनभिव्यनक्ति, तथा तन्तुतुरिकुविन्दादयोऽव्याप्रियमाणा अपि समवधानमात्रेण पटमभिव्यंज्युः, नचैवमस्ति तस्मादभिव्यञ्जकस्य प्रदीपादेः सत्प्रकाशन इव कारणस्य तन्त्वादेरसत्करणे व्यापारः स्वीकार्यः, यदपि कार्यकारणयोरैकात्म्यस्वीकारे परेण स्वात्मनि वृत्तिविरोधापादने कूर्मदृष्टान्तेन तत्तद्विशेषाविर्भावतिरोभावाभ्यामविरोधप्रतिपादनं, तदप्ययुक्तम्, आविर्भावोहि विशेषस्य पटादेः कारणव्यापारात् प्राक् सन्नसन् वा, न प्रथमः, कारणानां वैफल्यापातात्, न द्वितीयः, असदुत्पादाभ्युपगमेनापसिद्धान्तप्रसङ्गात्, सतश्चाविर्भावस्याविर्भावान्तरकल्पनाया मनवस्थानात्, ननु असदुत्पाद पक्षेऽपि अयं समानो दोषः, तथाहि असत उत्पादः किं सन्नसन् वा, संश्चेत् कारणवैयर्थ्यापातः, अथासन् तर्हि तस्यापि उत्पादान्तरं वक्तव्यं, तथा चानवस्था, किं चास्मिन् पक्षे ।।२५५।। व्योमारविन्दादेरपि उत्पादापत्तिः, इतिचेन्न, अभिप्रायानवबोधात्, द्वेधाहि असदभिधीयते, निःस्वभावं सस्वभावं च, तत्र निःस्वभावस्य

शशविषाणादेर्नोत्पादो विनाशो वा, तथात्वे निःस्वभावत्वव्याघातात्, सस्वभावं च कारणव्यापारात् प्राग् घटादिकं, तद्धि मृदादिद्रव्यारूपतया सर्वदा सदेव कम्बुग्रीवादिमत्त्वपर्य्यायरूपतया तु असत्, तस्य चासतः पर्य्यायस्य कारणव्यापारानन्तरमुत्पादः, नचैवमत्रापि सदसद्विकल्पाभ्यामसदुत्पादाद्यनुपपत्तितिरिवाच्यं, नहि नैयायिकैरिवास्माभिः सर्वथा प्रागसतः कार्यस्य प्रादुर्भाव उत्पाद इष्यते, येनैतद्विकल्पावकाशो भवेत्, किं तर्हि कारणस्यैव मृत्पिण्डादेस्ताद्दृशसामग्रीमध्यासीनस्य घटादिरूपपर्य्यायतया परिणामः, कारणान्येव हि तत्तत्सामग्रीसाद्गुण्यात् कार्यीभवन्ति, इति भगवत्सिद्धान्तात्, नच कारणस्य कार्यीभावे स्वात्मनि क्रियाविरोधेन कार्यकारणभावानुपपत्तिस्तस्य भेदाधिष्ठानत्वादितिवक्तव्यं, द्रव्यपर्य्याययोः कारणकार्यस्वरूपयोः सर्वथाऽभेदानङ्गीकारात्, तथात्वे द्रव्यमित्येव पर्य्याय इत्येव वा प्रतीतिः स्यात्, एवमस्तु इतिचेन्न, उभयव्यवहारस्य सर्वानुभवसिद्धेः, अनन्यथासिद्धकारणान्वयव्यतिरेकानुविधायित्वस्य कार्याग्नियतप्राक्कालभावित्वस्य च यथाक्रमं कार्यकारणभावलक्षणस्य मृतपिण्डघटादिषु द्रव्यपर्य्यायरूपेषूपपत्तेश्च, यथैकस्मादेव मृत्पिण्डात् सुवर्णगोलकाद्वा तत्तत्सहकारिसाहित्येन घटशरावोदञ्चनादयो मुकुटकटकादयो वा नानाविधा विशेषाः प्रादुर्भवन्ति तिरोभिवन्ति च, न तथा कूर्मदेहात् सामग्रीभेदेनापि चरणग्रीवादीन्यङ्गानि प्रादुर्भावतिरोभावाभ्यामन्यथा भावं भजन्ति उपलभ्यन्ते, किन्तु तान्येव तानि तथैव प्रत्यभिज्ञानात्, यथा च घटमुकुटादिषु मृद्धेमविकारेषु आविर्भावतिरोभावाभ्यामुत्पादविनाशव्यवहारः सर्वप्रतीतिगोचरो, न तथा कूर्माङ्गेषु तथा भावेऽपि कस्यचित्तद्व्यवहारप्रवृत्तिः, तथात्वे वा जन्ममरणावस्थयोरिव तस्याङ्गविकारसंकोचावस्थयोरपि तद्व्यवहारप्रसङ्गः, तस्मादसमः कूर्मदृष्टान्तोऽपि, यदपि समन्वयादिहेतुभिरव्यक्तसाधनं तदपि न शोभनम्, उक्तन्यायेन बुद्ध्यादीनामसत्त्वसाधनेन, समन्वितत्वादिति हेतोराश्रयासिद्धेः, आस्तां वा कथंचित् तत्सिद्धिः, तथाप्यनैकान्तिकत्वं सुखदुःखमोहसमन्वितत्वेऽपि पुरुषस्याव्यक्तहेतुकत्वाभावेन हेतोर्विपक्षवृत्तित्वात्, सुखादिसमन्वयस्तस्यासिद्ध इतिचेन्न, प्रत्यक्षेणैव तत्सिद्धेः, तथाहि जीवन्मुक्तावस्थायामेष दर्शनमात्रेण भव्यानां सुखमभव्यानां दुःखं धिगस्मान् यद्योगकीलितसकलेन्द्रियवृत्तयोऽपि तपस्विनोऽपि वयं नाद्यापि ईदृशीं वीतरागदशां ॥२५६॥
लभेमहीति केषांचिन्मोहं जनयतीति, अथ तत्र पुरुषकैवल्यावस्थादौ द्रष्टृणामेव संकल्पव्यापारात् मनसः सुखाद्युत्पादो न

पुरुपादितिचेत्तर्हि तादृक्शब्दरूपाद्युपलम्भेऽपि श्रोतृप्रभृतीनां मनःसंकल्पादेव सुखाद्युत्पत्तिर्नतु शब्दादीनां तदनन्वयादित्यपि स्यात्, अपि च शब्दादीनां तदन्वितत्वाभ्युपगमे सर्वेषां सर्वदा युगपदेव सुखादित्रयोत्पादप्रसङ्गः, नतु कस्यचित्क्रमेणवेति, नहि मेचकमणिः कंचिदपि प्रत्येकादिवर्णतया प्रतिभासमुत्पादयति, सर्वानपि प्रति तस्य पञ्चवर्णतयैव प्रतिभासोत्पादनात्, एवमपि शब्दादीनां त्रैगुण्यात्मकत्वोपगमे तद्विपयज्ञानस्यापि विपर्य्ययतापत्तेः, त्रिगुणस्य सतः पदार्थस्य सुखाद्येकैकरूपेण ग्रहणात्, तस्मात् शब्दादिवन्न त्रयात्मकत्वं बुद्ध्यादीनामपि, तथा च स्वरूपासिद्धोऽपि अयं हेतुः, एवमपि तत्स्वीकारे तु पुरुषेऽपि तदस्तीत्यनैकान्तिक एव, साध्यविकलश्च दृष्टान्तः, घटकटकादीनां मृद्धेमादिरूपसमन्वितत्वेऽपि कार्यात्कथंचित्कारणस्य भेदेन मृदादिरूपव्यक्तहेतुत्वात् तस्मान्न समन्वितत्वाद् हेतोः प्रधानाख्याव्यक्तसिद्धिः, तदसिद्धौ तन्मूलानां बुद्ध्यादीनामपि असिद्धिः, यदपि पुरुषसिद्धये संहतत्वानुमानोपदर्शनं तदपि न समीचीनं, तथाहि किमिदं संहतत्वं किं सुखादित्रयान्वितत्वं, सावयवत्वं वा, समुदायो वा, अभिन्नवृत्तित्वं वा, न प्रथमः, साध्यदृष्टान्तयोः साधनस्यार्थभेदात्, दृष्टान्ते हि शयनादीनां समुदायसंहतत्वं साध्ये तु सुखाद्यन्वितत्वं तद्विवक्षितं, न चार्थभेदे सत्यपि शब्दसाम्यमात्रेण हेतोः साधनसिद्धिसम्भ–वोऽतिप्रसङ्गात्, यदाह–
**'अर्थभेदे प्रतीतेऽपि शब्दसाम्यादभेदिनः, । न युक्तानुमितिः पाण्डुद्रव्यादिव हुताशने ॥१॥** अथ दृष्टान्तेऽपि साध्यतुल्यमेव तदभिमतम् अस्मन्मते सर्वभावानां सुखादिसमन्वयाङ्गीकारादितिचेत्, तर्हि बुद्ध्यादीनामिव शयनाद्यङ्गानामपि असंहतप–रार्थत्वापातात्, सुखाद्यन्विताद् बुद्ध्यादेरसंहत एव परे सुखाद्युत्पत्त्यभ्युपगमात्, अस्तु एवमितिचेन्न, बुद्ध्यादीनामपि वस्तुतोऽसंहतपरार्थत्वासिद्धेः, भवत्सिद्धान्ते पुरुषं विना कस्यचिदपि पदार्थस्यासंहतत्वानभ्युपगमात् तस्य चाद्याप्यसिद्धेः, अस्मादनुमानात् सिद्धावपि शयनादिदृष्टान्तेन परस्य संहतस्यैव सिद्धिप्राप्तेः, अथ तादृशस्य परस्य सिद्धिस्वीकारे तेनापि संहतरूपतया संहतान्तरेणार्थेन भाव्यम्, एवं तदुत्तरेणापि इत्यनवस्था स्यात्, तस्मात् तद्भयात् संहतत्वस्य परार्थत्वमात्रेण सह सामान्यव्याप्तिबलाच्चासंहतो परोऽङ्गीकर्त्तव्यः, स चात्मा इति तत्सिद्धिरितिचेन्न, एवमपि तस्य प्रागुक्तनीत्या ॥२५७॥
सुखाद्यात्मकताप्रसंजनेनासंहतत्वासिद्धेः, तथा च संहतत्वादसंहतात्मसिद्धौ इष्यमाणायां संहतात्मसिद्धिः प्रसञ्जन्ती यत्नेनोप्ता

माषाः स्फुटमेते कोद्रवा जाता इति न्यायमनुसरति, तस्मान्न संहतत्वं सुखाद्यन्वितत्वं, न द्वितीयः, अवयवव्यतिरिक्तस्यावय–विनोऽनुपगमात् भूतेन्द्रियादिषु कथंचिदवयवित्वोपगमेऽपि प्रधानादिषु तदनुपगमेन हेतो–र्भागासिद्धेः, न तृतीयः, स हि एकदेशतया वा, एककालतया वा, एककार्यतया वा, एककारणतया वा, नाद्यः, प्रधानस्य सर्वगतत्वेन बुद्ध्यादीनां च तद्विपर्ययेण तदभावात्, नहि यावति देशे बुद्ध्यादयस्तावत्येव प्रधानमपि, प्रधानपुरुषयोर्वा भवदभ्युपगमेन सर्वगतत्वेन तद्भावेऽपि परार्थत्वासिद्धेः, नहि ताभ्यां संभूय कस्यचित् परस्यार्थः संपाद्यते, न द्वितीयः, सा हि तेषां शाश्वतिकी वा स्यात्, कादाचित्की वा, न प्रथमः, तेषां हि परस्परं कार्यकारणस्वभावतया पूर्वापरकालभावित्वेन तदसंभवात्, नापरः, शयनाद्यङ्गानां तथाभावेऽपि मुमूर्षुपुरुषशरीरा–द्यर्थताया अभावात्, तथा च साध्यविकलो दृष्टान्तः, सर्गान्त्यक्षणे वा बुद्ध्यादीनामेककालतायामपि पुरुषार्थत्वायोगात् अनैकान्तिकत्वं, प्राग्वत् च प्रधानपुरुषयोर्नित्यत्वेन तत्संभवेऽपि पारार्थ्याभावात्, न तृतीयः, प्रधानस्य हि कार्यं बुद्धिस्ततस्याश्चाहंकार इत्यादिक्रमेण सर्वेषामपि एषां पृथक् पृथक् कार्यकारितया तदसंभवात्, पुरुषार्थलक्षणैककार्यकरणेनैषां तत्संभव इति चेन्न, इतरेतराश्रयप्रसङ्गात्, संभूयकारितया अमीषां समुदायत्वेन आत्मलक्षणपरसिद्धिः, तत्सिद्धौ च तदर्थलक्षणैककार्यकारितया एषां समुदायत्वमिति, एतेन चतुर्थोपि प्रत्युक्तः, बुद्ध्याहंकारादीनां पृथक् पृथक् कारणजन्यत्वेन तदयोगात् प्रधानस्य च नित्यत्वेन कारणवत्त्वमात्रस्यापि असिद्धेः, अपि चैककारणतया समुदायत्वेन षोडशकगणस्य एकस्मादहंकारादुत्पादेनैकार्थक्रियाकारित्वापातात्, नचैवमस्ति, तन्मात्रेभ्यः पृथिव्यादिभूतानामिन्द्रियेभ्यश्च यथासंभवं रूपाद्यालोचनविकल्पानां वचनादीनां च भवन्नीत्योत्पादश्रवणात्, पुरुषाणां च सर्वगतत्वनित्यत्वाभ्यामेकदेशकालतया समुदायत्वेऽपि उदासीनतयाऽनुपकारकत्वेन परार्थत्वासंभवात्, संभवे वा तदुपकार्यतया परस्य षड्विंशतितमतत्त्वस्य स्वीकारापत्तेः, नापि अभिन्नवृत्तित्वं संहतत्वं कृत्यध्यवसायाभिमानादिप्रातिस्विकव्यापारभेदेन महदादीनां तदसिद्धेः, पारार्थ्यमपि चात्र चेतनार्थत्वं विवक्षितं, ततश्चं महदादयस्तस्य किं किञ्चिदुपकारं कुर्वन्ति नवा, नचेत्, कथं तेषां पारार्थ्यं, नहि लोकेऽपि यो यं नोपकुरुते तस्य तादर्थ्यं नाम, कुर्वन्ति चेत्, पूर्वस्वभावापगमेन तदनपगमेन वा, ॥२५८॥
नाद्यः, तदाहि चेतनस्य परिणामापातात्, पूर्वस्वभावहाने न स्वभावान्तरापत्तेरेव परिणामत्वेनाङ्गीकारात्, तथा च कौटस्थ्यहान्या

स्वभावत्यागेन चेतनस्यापि असत्त्वापत्त्या कथं संहतत्वानुमानात्तत्सिद्धिः स्यात्, न द्वितीयः, उपकारासिद्धेः, नहि प्राच्यावस्थातोऽतिशयान्तरापादनं विना भावस्योपकारो नाम, ननु यथा पङ्गुर्गमनशक्तिवैकल्यादन्धस्कन्धमधिरोढुमपेक्षते, अन्धोऽपि दृग्वैधुर्यादध्वदर्शयितारं पङ्गुम्, एवं च तयोरुपकार्योपकारकभावेन परस्परापेक्षयाऽभिमतसिद्धिस्तथा पुरुषस्तदर्थं प्रवर्त्तमानामचेतनानामपि स्वसन्निधानाच्चेतनावतीमिव प्रकृतिं कैवल्यार्थमपेक्षते, प्रकृतिरपि भोग्यत्वान्यथानुपपत्त्या भोक्तारं पुरुषं यदाहपुरुषस्यार्थदर्शनार्थं कैवल्यार्थं तथा प्रधानस्य पंग्वन्धवदुभयोरपि संयोगः, इति अस्यार्थः 'प्रधानस्येति, कर्मणि षष्ठी तेन प्रधानस्य सर्वप्रकारस्य यद् दर्शनं पुरुषेण तदर्थं तदनेन भोग्यता प्रधानस्य दर्शिता, ततश्च भोग्यं प्रधानं भोक्तारमन्तरेण न भवतीति युक्ताऽस्य भोक्त्रपेक्षा अथ पुरुषस्यापेक्षां दर्शयतिपुरुषस्य कैवल्यार्थं' तथा भोग्येनहि प्रधानेन संभिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मनि अभिमन्यमानः कैवल्यं प्रार्थयते, तच्च सत्त्वपुरुषान्यथाख्यातिनिबन्धनं, नच सत्त्वपुरुषान्यथाख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षत इति, तथा च पंग्वन्धवत् तयोरपि अन्योन्यापेक्षया संयोगादभीष्टसिद्धिर्भविष्यतीति चेत्, न, युक्ताहि पंग्वन्धयोः परस्परापेक्षया वृत्तिः, उभयोरपि तयोश्चेतनत्वात्, अन्धस्य दर्शनाभावेऽपि पङ्गुवचनाकर्णनात् तदभिप्रायावबोधेन सम्यग्गमनादिप्रवृत्तिसंभवात्, इह तु प्रकृतेरचैतन्येन पुरुषाभिप्रायानवसायात् तदानुगुण्येन प्रवृत्तेरनुपपत्तेः, चेतनसन्निधानाद् दर्पण इव तत्प्रतिबिम्बसंक्रान्त्या तत्रापि चैतन्यप्रतिभास इतिचेन्न, तत्प्रतिबिम्बमात्रात्तदाशयाविसंवादेन प्रकृतिप्रवृत्तेरयोगात्, अपरथा आत्मानुषक्तश्मश्रुकचसमारचनादिप्रवृत्तिमच्छरीरप्रतिबिम्बनाद् दर्पणस्यापि प्रवृत्त्यादिप्रसङ्गात्, अचैतन्येनेतरप्रतिबिम्बनेन च प्रधानात् दर्पणस्याविशेषात् प्रधानप्रतिफलनाच्चेतनस्यापि वाऽचेतनापत्तेः, परस्परापेक्षसंयोग–विशेषादुभयोरपि प्रतिबिम्ब्य प्रतिबिम्बविषयभावोपपत्तेः, यदि च प्रतिबिम्बपरिग्रहे भवतामादरस्तदावश्यं चेतने प्रधानस्य प्रतिबिम्बनमभ्युपेयं, नतु प्रधाने चेतनस्य तत्त्वतः स्वच्छास्वच्छस्वभावतया यथाक्रमं तयोस्तद्योग्यत्वायोग्यत्वभावात् स्फटिकान्धोपलादिषु तथा दर्शनात्, तथा च प्रयोगः–प्रकृतिः पुरुषसन्निहितापि न कर्त्री अचेतनत्वात्, शिलावदिति, तस्मान्नास्याः पुरुषार्थं प्रवृत्तिरुपपन्ना, एवमपि वा तदभ्युपगमे नित्यत्वेन प्रवृत्तिस्वभावत्वेन चास्याः शश्वत्प्रवृत्त्य न कश्चिन्मुच्येत, ननु

पुरुषार्थनिमित्ताऽस्याः प्रवृत्तिः, सत्त्वपुरुषान्यथाख्यातिश्च पुरुषार्थस्तथा च क्षीरवत् वत्सपोषार्थमचेतनापि तदर्थमेषा प्रवर्त्स्यति तत्सिद्धौ च निवर्त्स्यति, को हि प्रेक्षावान् प्रेप्सितार्थनिवृत्तावपि तदर्थप्रयतमान एवासीत् एवं च प्रधानस्य प्रवृत्तिश्च पुरुषस्य मोक्षश्चेति सर्वमुपपत्स्यते यदाह–**वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥१॥** इतिचेन्न, किं पुरुषव्यापारादन्यथाख्यातिः, सत्त्वव्यापाराद्वाः, नाद्यः, तस्य शश्वन्निर्व्यापारत्वेनोपगमात्, न द्वितीयः, धर्मादिसहकृतस्य तस्य प्रवृत्तौ प्रवर्त्तकधर्मात् संसारनिबन्धनाभ्युदयसिद्ध्याऽन्यथाख्यातेरयोगात्, अथ योगाभ्यासजात् निवर्त्तकधर्मादेषा भविष्यतीतिचेत्, किमसौ पुरुषस्य भवति प्रधानस्य वा, उभयोर्वा, नाद्यः, विवेकख्यातौ सत्यामपि प्रधानस्य प्रागिव प्रवृत्तिप्रसङ्गात्, पुरुषस्य प्रधानाद् विवेकज्ञानेऽपि प्रधानस्य तस्मात्तदभावात्, न द्वितीयः, तस्याः पुरुषं प्रति अकिंचित्करत्वेन तदर्थत्वाभावापत्तेः, न तृतीयः, उभयोरपि कैवल्यप्रसङ्गात्, तथा च विवक्षितपुरुषार्थमिव अन्यार्थमपि प्रधानं न प्रवर्त्तेत, कैवल्यस्याऽन्यथानुपपत्तेः, यदपि क्षिरोदाहरणेन प्रधानप्रवृत्तेः समर्थनं तदपि न सुन्दरं, नहि क्षीरं धारयन्त्या न तदर्थमपि तत्प्रवृत्तिः, तस्मात् तत्र गौरेव प्रवर्त्तते न क्षीरं प्रवर्त्तत इति व्यपदेशः, इह तु प्रधानमचेतनत्वात् पुरुषाशयानवगमात् कथं तन्मुक्तये प्रवर्त्तेत, प्रवृत्तौ वा प्रकृतपुरुषत्यागेनाऽन्यमुक्तयेऽपि कदाचित्प्रयतेत अचेतनप्रवृत्तेरन्धप्रवृत्तिसमानयोगक्षेमत्वात्, चेतनोपरागकृतस्य तु तत्र चैतन्यप्रतिभासस्य प्रागेव निषेधात्, किं च पुरुषमोक्षार्थमस्य प्रवृत्तिरित्येतदपि न संगच्छते, पुरुषस्य मुक्तेरेव अघटमानात्, मुचेर्बन्धनवियोजनार्थत्वात् पुरुषस्य च कूटस्थतयाऽपरिणामित्वात् तादृशे च तस्मिन् सवासनक्लेशलक्षणस्य बन्धनस्य तद्वियोजनलक्षणस्य च मोक्षस्यासंभवात्, बन्धाभावे चा जवंजवीभावापरनाम्नः संसारस्यापि अनुपपत्तेः, अथ प्रधानस्यैव संसारबन्धमोक्षास्तत्सन्निधानादेव च भृत्यगतानां जयपराजयादीनां स्वामिनीव तद्गतानां तेषां पुरुषे उपचारः, तत्कस्य हेतोः स्वामिसंबन्धेन भृत्यानां जयादितज्जन्यलाभवत् पुरुषसंबन्धेन प्रधानस्य संसारापवर्गलाभात्, तदुक्तम्–''**तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित् । संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥१॥**'' कश्चिदितिपुरुष इत्यर्थः, नानाश्रयेति, अनेकपुरुषाश्रितेति, एवं च संसारापवर्गादीनां प्रधानगतानां पुरुषे

विवेकाग्रहादौपचारिको व्यवहार इतिचेन्न, प्रकृतिः किमेकदेशेन मुच्यते सामस्त्येन वा, न प्रथमः, निरवयवत्वेन तस्यास्तदनङ्गीकारात्, अङ्गीकारे वा मुक्तदेशे परिणामाभावेन कस्यचित्पुरुषस्य कृते महदादीनुत्पादयेत्, नचैवमस्ति सामस्त्येन सर्वदा सर्वात्मार्थं च महदाद्युत्पादनाङ्गीकारात्, नचैतदपि उपपद्यते, इयता कालेन मनुष्यलोकावच्छेदेन सर्वदेशेष्वपि देहावच्छिन्नानामनन्तात्मनां कैवल्यावाप्त्या तस्या मुक्तिसंभवेनोपराया इव भुवः संसारिपुरुषार्थं महदादिप्ररोहप्रसवसामर्थ्यात्, तथा च प्रकृतेरप्रवृत्त्या संसारिणां मनुष्यादीनामपवृत्तेषु देशेषु भोगः कैवल्यं च न स्यात्, अनपवृत्तदेशेषु तस्याः प्रवृत्तिसंभवेन आत्मनां भोगादिकं भविष्यतीतिचेत्, एवमपि भवतु नारकामरादीनां न तु मनुष्यादीनां, तेषां मनुष्यलोकं विनाऽन्यत्रानुत्पादात्, मनुष्यांश्च विहायाऽपरेषां मुक्तेरनभ्युपगमात्, अभ्युपगमवादेन च एतदुक्तं, वस्तुतस्तु अनपवृत्तदेशेषु कस्यापि भोगोऽपि न युज्यते, एकदेशेन प्रकृतिपरिणामास्वीकारात्, न द्वितीयः, सर्वसंसारिणां भोगाद्यनुत्पादप्रसंगात्, तदुत्पादस्य प्रकृतिनिबन्धनत्वात् तस्याश्च मुक्तत्वेनाप्रवृत्त्या तदुत्पादनासंभवात्, अपि चैवमभ्युपगमे महांल्लाभः, मनुजव्यतिरिक्तानामपि सकलसंसारिणां यमनियमादियोगाङ्गाभ्यासप्रयासमन्तरेणापि कैवल्यसिद्धेः, पुरुषाणां स्वतो निर्लेपत्वेन प्रधानबुद्ध्यादिसम्बन्धनिर्मितस्यैव रागद्वेषकषायादिपङ्कलेपस्याङ्गीकारात्, अत एव स्वरूपेण निर्दुःखा अपि आत्मानः प्रधानसंभेदात् तद्गततामाध्यात्मिकाधि–भौतिकाधिदैविकलक्षणं दुःखत्रयं स्वसम्बन्धितयाऽभिमन्यमानास्तद् विहन्तुं प्रधानदर्शनं प्रार्थयन्त इति भवतामभ्युपगमः, प्रकृतेर्मुक्तत्वेन तु तदनुषङ्गाभावात् अयत्नसिद्धं दुःखत्रयापगमलक्षणं तेषां कैवल्यं, न च कश्चित् सहृदयः सुखैनैवाभिमत–मासादयन्नात्मानं तत्सिद्धये क्लेशयितुमभिलषति, तस्मान्न कथंचित् प्रकृतेर्मुक्तिसंभवः, तदभावान्न बन्धोऽपि परस्परापेक्षत्वात् बन्धमोक्षयोः, यथाहि बन्धाभावो मोक्ष इत्यत्र स्वप्रतियोगिनं बन्धमवलम्ब्य मोक्षशब्दप्रवृत्तिस्तथा स्वप्रतियोगिनमेव मोक्षमपेक्ष्य बन्धशब्दोऽपि प्रवर्त्तते, एवं च नित्यत्वतत्प्रतिषेधरूपाऽनित्यत्वयोरिवास्या अप्यनयोरेकतरापायेऽन्यतरस्यापि अपायप्रसङ्गः, अपि च मिथ्याज्ञाननिबन्धनोहि बन्धोऽभ्युपेयते, तच्च किं प्रकृतेरेकदेशे वर्त्तते सर्वात्मनि वा, नाद्यः, तदाहि मिथ्याज्ञानविरहिणि तद्देशे बन्धाभावात् पुरुषस्यापि तदुपरागहेतुकानां महदादिक्रमेणापरापरजन्मनामभावापत्तेः, न द्वितीयः, एकस्यापि पुरुषस्य

सर्वस्मिन्नपि प्रकृतिदेशे युगपदेवानन्तानामपि शरीरादीनामुत्पादापातात्, कारणसामग्रीतः कार्यस्यावश्यंभावात्, तत्तद् धर्माधर्मादिसहकारिविरहात् न युगपत्तदुत्पाद इतिचेन्न, धर्मादीनामपि प्रकृतिकार्यतदव्यतिरिक्तबुद्धिधर्मत्वेन शश्वत्सन्निधानात्, तथा च बुद्धिलक्षणपुरस्सरं तद्धर्मानभिदधता व्याहृतमीश्वरकृष्णेन '**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् । सात्त्विकमेतद्रूपं तामसमस्माताद्विपर्य्यस्तं ।** तस्मादेकदेशकार्त्स्न्याभ्यां बन्धहेतोर्मिथ्याज्ञानस्यासंभवान्न प्रकृतेर्बन्धः, तदभावान्न तस्याः संसारोऽपि बन्धस्यैव संसारबीजतया सर्ववादिभिरिष्टत्वात्, एवं च प्रकृतेर्बन्धादीनामयोगात्-तत्कृतानां तेषामात्मनि उपचार इति वाङ्मात्रं, मुख्याभावे उपचारस्यापि असिद्धेः, नहि ककुदादिमतो मुख्यस्यार्थस्य क्वचिदपि अभावे भारवहनजाड्यमान्द्यादिना तत्साधर्म्येण गौर्वाहीक इत्यादौ वाहिके लक्षणया गोशब्दप्रवृत्तिः संगच्छते, तस्मादात्मन एव यथासंभवं मिथ्याज्ञानादितत्त्वसाक्षात्कारादिनिबन्धना बन्धादयोऽभ्युपेतव्याः, किमन्तर्गडुभूतप्रकृतिस्वीकारग्रहेण, यदपि भृत्यगतजय-पराजयोदाहरणेनोपचारसमर्थनं तदपि न चारु, तत्रहि स्वामिनोऽपि वास्तवौ जयपराजयौ संभवत एव, तस्यापि कदाचित् स्वयं युध्यमानस्य तदुपलम्भात् तेन भृत्यगतावपि तौ कदाचित्स्वामिनि उपचर्येते, इह तु पुरुषस्य निष्क्रियत्वेन सर्वथा बन्धाद्यभावात् प्रधानस्य तु तदभ्युपगमेऽपि उक्तन्यायेन तदसंभवात् कथं तद्गतानां तेषां तत्रोपचारः क्रियमाणः शोभेत उपचारलक्षणस्य सर्वथैव अत्रानुपपत्तेः, न च नायकादिव भृत्यस्यैव 'उपकुर्वतोऽपि प्रधानस्य पुरुषात्कश्चिल्लाभः, अनर्थितयैव तस्य पुरुषार्थं प्रवृत्तिस्वीकारात् तस्मादसममुदाहरणं, न चानादिना मिथ्याज्ञानसंतानेनापरापरमिथ्याज्ञानजननात् नास्त्येव तत्त्वज्ञानप्रादुर्भावावसरो येनात्मनोऽपि मिथ्याज्ञानाद्युच्छेदक्रमेण मोक्षः स्यादिति वाच्यम्, अचिन्त्येन वीर्यमहिम्ना दीर्घकालादरनैरन्तर्याभ्यासप्रकर्षप्राप्तयोगाविर्भूतात् तत्त्वज्ञानान्मिथ्याज्ञानप्रध्वंसेन तस्य चारित्राद्यवाप्तिक्रमेण मोक्षसिद्धेः, आदिमता तत्त्वज्ञानेन कथं चिरप्ररूढस्य तस्य प्रध्वंस इतिचेन्न, योगानुग्रहात्तस्य दृढतया प्रत्यग्रतया चातिबलीयस्त्वेनोत्पत्तेः, दृश्यते च लोके बहोः कालादनेकरङ्गाङ्गनलब्धविजयस्यापि कस्यचिन्महामल्लस्य केनचिन्नवयौवनोन्मदिष्णुतया इति विक्रान्तेन पराजयः, तथापि तीव्रातपेन लवाङ्कुर इव कुतश्चित्संस्कारात् पुनःप्ररूढेन मिथ्याज्ञानेन तत्त्वज्ञानं बाधिष्यत इतिचेन्न, धियां तत्त्वार्थपक्षपातितया प्राप्तसामर्थ्येनादिमताऽपि तत्त्वज्ञानेनानादिमस्यापि

मिथ्याज्ञानस्य समूलकाषं कषितत्वेन पुनः प्ररोहाभावात्, तथाच कथं तेन तस्य बाधो भवेत्, यदाह–निरुपप्लवभूतार्थस्वभावस्य विपर्य्ययैः, न बाधयत्नवत्वेऽपि बुद्धेस्तत्पक्षपाततः, एतेन प्रकृतिपुरुषविवेकदर्शनादुपरतायां प्रकृतौ पुरुषस्य स्वरूपेणावस्थानं मोक्ष इति, सांख्यानां मोक्षलक्षणमपास्तं, तथाहि कोऽयं प्रकृतेरुपरमो विनाशो वा,? निर्व्यापारत्वं वा, नाद्यः, तस्या नित्यत्वाङ्गीकारात्, न द्वितीयः, प्रवृत्तिशीलाया निर्व्यापारत्वासंभवात्, विवेकदर्शनात् कृतार्थत्वेन तत्संभव इत चेन्न, किं प्रकृतेः पुरुषाद् विवेकदर्शनं, पुरुषस्य वा प्रकृतेः, परस्परं द्वयोरपि वा, न प्रथमः, प्रकृतेरचैतन्येन तदयोगात्, दर्शनस्य चेतनधर्मत्वात्, चेतनोपरागात् तद्योग इति चेन्न, तदानीं तस्यापि निवृत्तेः, अनिवृत्तौ वा प्रागिव विवेकदर्शनस्यासिद्धेः, न द्वितीयः, पुरुषस्य हि विवेकदर्शनं चित्स्वरूपत्वात् वा स्यात् तत्त्वसाक्षात्कारात् वा, नाद्यः, संसारावस्थायामपि तद्रूपत्वात्यागेन तत्प्रसङ्गात्, न द्वितीयः, तस्य बुद्धिधर्मत्वात्, अन्यधर्मेण चान्यस्य विवेकदर्शने सर्वात्मनामपि तदापत्तेः, प्रकृत्या विवक्षितपुरुषसम्बन्धितया बुद्धेरुत्पादनेन तद्धर्मस्यास्य तत्र संक्रान्तिः, तथा चान्यधर्मत्वेऽपि तस्यैव विवेकदर्शनं नान्यस्य इत्यतो नातिप्रसङ्ग इतिचेन्न, सहि संक्रामंततो व्यतिरिक्तोऽव्यतिरिक्तो वा स्यात्, नाद्यः, अनाहितातिशयतया प्रागवस्थातो, विशेषेण तस्माद् विवेकदर्शनानुपपत्तेः अन्यथाऽतिप्रसङ्गात्, नापरः, पुरुषात् तस्यानपगमापात् नहि यद्यतोऽव्यतिरिक्तं तत् ततस्तत्स्वरूपवत् कदाचिदपैति, तथात्वे वा प्रधानादपि सत्त्वादिगुणानामपायापत्तेः, मा भूत् पुरुषात् तस्यापगमः, का नो हानिरितिचेन्न, तस्य स्वरूपत्वाभावेन स्वरूपेणावस्थानं मोक्ष इतिलक्षणक्षतिप्रसङ्गात्, अस्तु तर्हि आहार्यत्वात् स्वसाध्यस्य विवेकदर्शनस्य साधितत्वात्तस्यापगम इतिचेत्, एवं तर्हि सत्यपि पुरुषेऽपगमात् तद्व्यतिरिक्तोऽसौ भवेत्, तत्र च दोषस्य प्रागेवोक्तत्वात्, अपि च विवेकदर्शनानन्तरं पुरुषात् तस्य विगमाभ्युपगमे जीवन्मुक्तेरभावापत्तिः, भूतभवद्भाविसकलपदार्थसाक्षात्कारिज्ञानवत्तया हि तत्त्वं व्याचक्षाणो नीरोगः पुरुषो जीवन्मुक्तोऽभिधीयते, तत्त्वसाक्षात्कारापाये चोपदिशन्नपि असौ अनवधेयवचनः स्यात्, तथाच शास्त्रप्रणयनतत्पूर्वकक्रियाविधिलोपेन बहु विशीर्येत, न तृतीयः, तत्त्वज्ञानस्य बुद्धिधर्मत्वात् तद्गताच्चैकस्मात् तदुभयोरेपि तद्दर्शनानुपपत्तेः, नहि सदृक्सम्बन्धिनो लोचनाददृशोऽपि चाक्षुषं ज्ञानं जायत इति वक्तुं युक्तं, बुद्धिसम्बन्धात् तच्छायापत्त्या पुरुषेऽपि तदस्तीति चेन्न, छायायास्ततो भिन्नत्वे पूर्वदोषानतिवृत्तेः,

अभिन्नत्वे वा परिणामितया तस्य स्वरूपहानापत्तेः, एवं च बिवेकदर्शनानुपपत्त्या सांख्यपक्षे मोक्षो न संगच्छत इति स्थितं, तैश्च बन्धमोक्षयोरपि वैयधिकरण्यमास्थितं तच्च तयोः सामानाधिकरण्यव्यवस्थापनेन इह निराकृतं, तथाच बन्धप्रतियोगितया तन्मोक्षोऽपि अत्रैव निराकरणमर्हतीति बन्धतत्त्वनिरूपणावसरेऽप्यसौ निराकृत इति नानुक्तोपालम्भः शंकनीयः, तदेवमतिप्रसङ्गापादनेन प्रकृत्याद्यभावप्रसाधनेन च सांख्याभिमतौ प्रकृतिपुरुषयोर्यथाक्रमं बन्धमोक्षौ निरस्य पूर्वकान्तसौगतविशेषपक्षेऽपि मोक्षादिकमेतद्गाथोत्तरार्द्धेन सार्द्धया चोत्तरसेगाथया निरस्यन् नाह 'निस्सेरत्यादि' षष्ठीसप्तम्योर्थं प्रत्यभेदात् सप्तम्यन्ताभिधा–नेऽपि इह सुखप्रतिपत्तये निःशेषकर्ममुक्तस्येति व्याख्येयं, तेन तत्त्वज्ञानात्सकलवासनाक्लेशजालबन्धनाद् वियुक्तस्य सिद्धिसौधमध्यासीनस्य इत्यर्थः, चित्तसन्तानस्येत्यर्थात् पुनरागमनं मुक्तिपदात् च्युत्वा गर्भाधानादिक्रमेण भूयोऽपि शरीरेन्द्रियादि–सम्बन्धलक्षणमनुष्यजन्मप्राप्तिः कुतः कस्माद्धेतोर्भवति जायते, हेत्वभावे फलाभावस्य सुलभत्वान्न कुतश्चिदपि इत्यर्थः, इति गाथार्थः ॥९५॥ कुतः पुनस्ते मुक्तस्यापि पुनरागमनमातिष्ठन्ते, कुतश्च तदप्रमाणकमित्येतत्सोपपत्तिकं प्रतिपादयितुमाह–

**ता नियपक्खनिरागारदंसणा एइ झत्ति मुत्तो वि ॥ एयमसंगयमणिमित्तिमित्थ संसाररूवं जं ॥९६॥**

**व्याख्या**–यस्मात् मुक्तस्य पुनरागमनं दुरुपपादं 'ता' इति तस्मात् एतदसंगतमिति संबन्धः, निजपक्षस्य स्वकीयसंघस्य, अथवा प्रामाणिकतयाऽभ्युपेतस्य क्षणभङ्गनैरात्मादिलक्षणस्य स्वसंमतस्य 'निराकारो' राजादिभिः पराभवः परतीर्थिकैर्जल्पादिकथायामुपपत्तिभिर्निरसनं वा अप्रामाण्यापादनमिति यावत्, तस्य दर्शनं निरुपप्लवज्ञानेन साक्षात्कारस्तस्मात् कारणात्, 'एति' मुक्तिपदादवतीर्य शरीरादिपरिग्रहक्रमेण संसारमधिवसति, 'झटिति' तत् क्षणात् दर्शनानन्तरमेवेत्यर्थः, मनस्विनां स्वपक्षतिरस्कारस्य दुःसहत्वात्, तथा च तत्स्वरूपसूचकं कस्यचित् करिरूपस्य वचः, 'ब्रूत' नूतनकूष्माण्डफलानां के भवन्त्यमी ॥ अङ्गुलीतर्ज्जनाद्येन न जीवन्ति मनस्विनः ॥१॥ इति, 'मुक्तोऽपि' क्षपितनिखिलकर्मजालोऽपि आस्तां संसारी सहि रागादिकलुषितत्वेन स्वपक्षपराभवमसहिष्णुर्दूरादपि एत्य अपरैः सह विजिगीषया युद्धविवादादिकं तावदारभते एवेत्यपिशब्दार्थः, इति यदुच्यते कैश्चिद् 'एतद्' इदं 'असंगतं' निष्प्रमाणतयाऽसमीचीनं, ननु मा भूत् तदनुयायिनीयां प्रजानामनाश्वास

इति मुक्तोऽपि यदि स्वपक्षरक्षणाय इहावर्त्तेत तदा को दोषः, किं न श्रूयन्ते लोकप्रवादेन मुक्तस्यापि कृष्णस्य तत्तत्प्रयोजनविशेषाद् दशावतारा इत्यत आह 'अनिमित्तिमित्यादि गाथान्तवर्त्त्यपि यदिति पदमिह सम्बध्यते तेन यद् यस्माद् हेतोरनिमित्तं निष्कारणकम्, अत्रेत्यत्रापि प्रागिव सप्तमी षष्ठ्यर्थे मन्तव्या तेनास्य मुक्ततया स्वीकृतस्य सुगतविशेषस्य संसाररूपं भूयोऽपि देहाद्यभिसम्बन्धलक्षणं भवस्वरूपं प्रसज्यत इति क्रियाऽध्याहारः, कर्मसम्बन्धोहि संसारनिमित्तं विपर्यासवासनाजलावसिक्तायां हि आत्मभूमौ कर्मबीजं जन्माङ्कुरं प्रसुवति, तदुक्तम्–''**अज्ञानपांशुपिहितं पुरातनं कर्मबीजमविनाशि । तृष्णाजलाभिषिक्तं मुञ्चति जन्माङ्कुरं जन्तोः ॥१॥**'' न चासौ तस्येष्यते, तथा च तस्य पुनरावृत्तिनिमित्तं कर्म किं तदीयमन्यदीयं वा, नाद्यः, तस्य मुक्ततया कुशलाकुशलप्रवृत्त्यभावेन तदसिद्धेः, न द्वितीयः, अन्यदीयकर्मणोऽन्येन सम्बन्धाभावात्, सर्वगतात्मवादिमतेन कथंचित्तत्सम्बन्धेऽपि तेनान्यस्य संसारसंचाराभ्युपगमे मुक्तानामपि तदापत्तेः, न च नैय्यायिकैरिव परकीयधर्माधर्माधिष्ठानेन ईश्वरस्य सर्गविधिरिव भवद्भिरपि मुक्तस्यापि बुद्धस्येह जन्मावृत्तिस्तथोपयते, आस्तां वा पुनरावृत्तिस्तथापि तस्य कदाचित्कथंचित् गर्भाधानादिदुःखसंभेदात् तत्त्वज्ञानविलयेन भाव्यं, तथा च जातेनापि तेन पुनस्तदर्थं यतितव्यं, यतमानस्यापि कर्मसंबन्धाहिततृष्णातरलितान्तःकरणतया तत्त्वज्ञानोत्पत्तेः संदेहाधिरोहात्, न चासाक्षात् कृततत्त्वार्थस्तीर्थिकान् निराकर्त्तुं क्षमेत, तस्मात् स्वपक्षव्यवस्थापनाय मुक्तस्यापि पुनरागमनमिति दुराशयं, कृष्णस्य चात्यन्तमुक्तावस्थस्यैव शक्तेरचिन्त्यतया सर्वगतस्वात्मावच्छेदेन मत्स्यादिशरीरस्वीकारेण संसारावतार इति पौराणिकानामभ्युपगमः, नचैवं भवतां तस्मादसमो दृष्टान्तः, एतेन ज्ञानिनो धर्मेत्यादिश्लोकार्थोऽपि परास्तः स्वतीर्थनिकारदर्शनेन परविजिगीषूणामस्मदादीनामिव रागादिमत्तया परमपदगतेरेवासंभवात्, कुतस्त्यं पुनरागमनमिति गाथार्थः ॥९६॥ ननु अस्तु निर्मिमित्त एव संसारः को विरोधोऽन्यथाऽनादिमुक्तत्वेनाभ्युपेतस्यापि ईश्वरस्य नैयायिकैः कार्यविशेषेण शरीरादिपरिग्रहाभ्युपगमो विरुध्येत, इत्यत आह–

**निययावही न हुज्जा संसारो अहेतुओ सया होउ ॥ मुक्खो कम्माभावो सासयजीवस्स भावो उ ॥९७॥**

**व्याख्या**-'नियतावधिः' इयच्चिरतया परिच्छिन्नसीमः न भवेत्, 'न स्यात्' 'संसारः' प्रेत्यभावापरनामा, अहेतुकः

कर्मसम्बन्धलक्षणकारणविकलः, यदिहि निर्हेतुकोऽपि संसारस्तस्येष्यते, तदा यावत् स्वपक्षरक्षणकालमेव तेनेह स्थेयमथ मोक्ष्यते इति कुस्त्योऽयं नियमः, अहेतुकानामात्माकाशादीनां सत्त्वावधेः, केनापि अनुपलंभात्, अथाहेतुकोऽपि अस्य संसारः सावधिरेवोपगम्यते तत्राह 'सदा' यावत्कालं 'भवतु' जायताम् अहेतुकत्वाविशेषेऽपि तेनावधिमता भाव्यं, न तु आकाशादिवत् शश्वदिति विनिगमनायां प्रमाणाभावात्, किं च तदानीं तस्य संसाहेतुकत्वस्वीकारे प्रागपि तथा प्रसङ्गोऽविशेषात्, कृष्णस्य देहाभ्युपगमवच्च ईश्वरस्यापि देहपरिग्रहाभ्युपगमो नैयायिकानामिति तत्प्रतिवन्दिरपि न युज्यते, एवं चास्मिन्नपि पक्षे बन्धाभावेन मुक्तस्य पुनरावृत्तिर्दुघटेति व्यवस्थितं, तदेवं सप्रपञ्चं बन्धत्वमभिधाय संप्रति क्रमप्राप्तं मोक्षतत्त्वस्वरूपं गाथोत्तरार्धेनोपन्यस्यन्नाह– 'मोक्खो' इत्यादि मोक्ष इति लक्ष्यपदं, तुः पुनरर्थो गाथान्तवर्त्ती इह योज्यः, तेन मोक्षस्तु मोक्षः पुनः क इत्यत आह– 'कर्माभावः' कर्मणां ज्ञानावरणादीनां बन्धनसमाम्नातानां सर्वेषामपि अभावोऽपगमः जीवस्य तेभ्य ऐकान्तिकात्यन्तिको वियोग इति यावत्, **'बन्धविप्रयोगो मोक्ष इति परममुनिवचनात्,'** 'शाश्वतस्य' द्रव्यात्मकतया नित्यस्य जीवस्यात्मनः स्वभावः निजरूपं, नित्यचैतन्यानन्दता हि जीवस्य स्वभावः स च तस्य प्रदीपस्य इव प्रकाशस्वभावस्यापवरकादिव्यवधानात् प्रकाश इव कर्मावरणात् सन्नपि नाविर्भवति, तदपगमात्तु प्रादुरस्तीति जीवस्वभावाविभावकत्वादुपचारेण मोक्षोऽपि तथोच्यते, अथवा कर्मधारयसमासाश्रयणात् शाश्वत एष जीवस्वभावस्तदवाप्त्यनन्तरं जीवस्य कदाचिदपि नित्यचैतन्यानन्दरूपताया अप्रच्युते, स च सम्वरनिर्जरयोः फलमत एव तदनन्तरं प्रतियोगिनिरूपणाधीननिरूपणतया प्रतियोगिनं बन्धमन्तरा कृत्वा अस्योपन्यासः कृत इति मुमुक्षुणा चासौ नियमेन ज्ञातव्यो भवति, नित्यानन्दरूपतया चतुर्वर्गमूर्द्धाभिषिक्तत्वात् इतरथा तदुपायतयाऽध्यवसितयोः दुःशंक्ययोरपि सम्वरनिर्जरयोर्मुमुक्षुप्रवृत्तेरानर्थक्यापत्तेः, नहि अविज्ञातचिन्तामणिस्वरूपो भूयसा मूल्येन तमुपादातुं प्रेक्षावान् प्रयतते, न चासौ अस्मदादिभिः प्रत्यक्षेणावसातुं शक्यते, अस्मदादिज्ञानस्यैन्द्रियकत्वात् तस्य चातीन्द्रियत्वात्, अतोऽनुमानादसौ ज्ञातव्यः, तथाहि रागादिकर्मसंचयः कदाचित्कस्यचिदत्यन्तं विलीयते प्रतिपक्षभा– वनाप्रकर्षतारतम्येन जायमानापकर्षतारतम्यत्वात् यो यस्य प्रकर्षतारतम्येन जायमानापकर्षतारतम्यः स तस्य प्रकर्षकाष्ठायामत्यन्तं

विलीयते यथा प्रावृषेण्यजलधरधारासारप्रकर्षतारतम्येन जायमानापकर्षतारतम्यो, निदाघातपाभितप्ताया भूमेरूष्मा तथा चायं तस्मात् तथा, इत्यनुमानादस्मदादीनां कर्मात्यन्ताभावलक्षणमोक्षसिद्धिः, सर्वज्ञानां तु केवलप्रत्यक्षादिति, सूत्रे च कर्माभावपदेनानादिनिष्कर्मतया परैरिष्टस्यानादिमुक्तस्य निरासः, बद्धानामेव कर्मणामत्यन्ताभावस्य मोक्षपदाभिधेयतया प्रतिपादनात् शाश्वतजीवस्वभावपदेन तु बुद्ध्यादिविशेषगुणात्यन्तोच्छेदविशिष्टमात्मस्वरूपं मोक्षं ये प्रतिपद्यन्ते तन्मतव्युदासः, तथाहि तेषां तद्विषयः प्रमाणोपन्यासः—आत्मनो बुद्ध्यादिगुणाः कदाचिदत्यन्यमुच्छिद्यन्ते संतानरूपत्वेन जायमानत्वात्, प्रदीपवत्, न चायमसिद्धः निरन्तरं परम्परारूपतयाऽमीषां जन्मनः सर्वानुभवसिद्धेः, नापि विरुद्धः साध्यविपर्ययेण व्याप्तेरसिद्धेः नित्यतयाऽत्यन्तानुच्छिद्यमाने गगनादौ विपक्षेऽपि हेतोरवृत्तेश्च नानैकान्तिकः, न चैषां कुत उच्छेद इति वाच्यं ? प्रसंख्यातभुवस्तत्त्वसाक्षात्कारात् मिथ्याज्ञानाद्युच्छेदक्रमेण तत्सिद्धेः, ''**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः**'' इत्यक्षपादमुनिवचनात्, अत्र च प्रवृत्तिशब्देन धर्म्याधर्म्यप्रवृत्तिकार्या धर्माधर्मावुच्येते, बुद्ध्यादीनामपायो नात्रोक्त इतिचेत् न, जन्मपदेन तेषामभिधानात्, आत्मनः शरीरेन्द्रियबुद्धिवेदनाभिसम्बन्धस्यैव जन्मत्वात्, न चैषामुच्छेदे तदभिन्नस्याऽऽत्मनोऽपि उच्छेद इति वक्तव्यं, गुणगुणिनो भेदाभ्युपगमात्, ननु एवं मुक्तावात्मनश्चैतन्यसुखाद्यत्यन्तोच्छेदात्, पाषाणादविशेषेण न तदर्थं प्रयतिष्यन्ते प्रेक्षावन्तस्तस्मान्नित्यचैतन्यानन्दरूपजीवस्वभाव एव मोक्षः, तथा च श्रुतिः ''**विज्ञानमानन्दं ब्रह्म**'' आनन्दब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते, इतिचेन्न, प्रमाणाभावात्, न तावदस्मादादीन्द्रियजन्येन प्रत्यक्षेण भवदभिमतचैतन्यानन्दरूपता जीवस्यावसातुं शक्यते, तस्य मानसस्यापि इन्द्रियकचैतन्यवैषयिकसुखयोरेव अवसायकत्वेन तदगोचरत्वात्, गोचरत्वे वाऽनित्यत्वात् संसारावस्थायामपि सा संवेद्येत, तथाचेन्द्रियजयोरनिन्द्रियजयोश्च तयोर्युगपदुपलम्भप्रसङ्गः, शरीरादिना प्रतिबन्धादनिन्द्रियजयोस्तयोः संसारिणोऽननुभव इतिचेन्न, शरीराद्यवच्छेदेन तदाविर्भावदर्शनात् उपकारकतया तस्य तत्प्रतिबन्धकत्वासिद्धेः, भोक्तुर्भोगायतनं शरीरमिति तल्लक्षणात्, ननु अनुमानान्नित्यसुखसिद्धिर्भविष्यति, तथाहि— मुक्त्यर्थिनां प्रवृत्तिर्हि तत्प्राप्त्यर्था प्रेक्षावत्प्रवृत्तित्वात् स्वर्गार्थिप्रवृत्तिवत्, न च तेषां नित्यसुखं विनाऽन्यद्धितमस्ति यदर्थं

प्रवर्त्तेरन्, एवं च सुखस्य चैतन्याविनाभावित्वात्, नित्यचैतन्यस्यापि सिद्धिरिति चेन्न, अहितपरिहारार्थाया अपि तस्या दर्शनात्, दृश्यन्ते हि भूयांसो दंशादिभयाद् अहिसिंहादीनपि परिहृत्य दूरतः पलायमानाः, तथा च प्रेक्षावत्प्रवृत्तित्वस्य हेतोर्व्याप्यत्वासिद्ध्या नित्यसुखासाधकत्वेनाहितपरिहारार्थैव मुक्त्यर्थिनां प्रवृत्तिर्भविष्यति, ननु मा भूदनुमानाद् विज्ञानमानन्दं ब्रह्मेत्याद्यागमादेव तत्सेत्स्यति, आगम एव च मुक्त्यर्थिनां प्रायोऽतीन्द्रियार्थेषु प्रमाणं तत्सहकारित्वमात्रेणैव इतरयोरुपयोगात्, यदाह—**न मानमागमादन्यन्मुमुक्षूणां हि विद्यते ॥ मोक्षमार्गे ततस्तत्र यतितव्यं मनिषिभिः ॥१॥** तस्मादस्ति नित्यं सुखादीतिचेन्न, दुःखाभावे तत्रानन्दादिशब्दाप्रवृत्तेर्भाक्तत्वात्, दृष्टश्च बहुलं लोके तत्र सुखशब्दप्रयोगः, तथाहि—केचिदिन्धनादिभाराक्रान्तमूर्त्तयोऽमन्दस्यन्दमानस्वेदोदबिन्दवो विपिनादागत्य अन्तरा शिशिरसान्द्रद्रुमच्छायायां भारमवतार्य निविष्टाः सुखेन जीविताः स्मेति ब्रुवाणा उपलभ्यन्ते, न च नित्यसुखरागेण प्रवर्त्तमानस्य योगिनो मुक्तिर्घटते, रागस्य बन्धनसमाख्यंयाऽभिधानात् अन्यथा स्वाराज्यादिकृतेऽपि तपस्यतो मुक्तिप्रसङ्गात्, तपस्यादेर्मुक्तिहेतुतयाऽपि श्रुतेः, किं च नित्यं ज्ञानं सुखं च ज्ञानान्तरेण वेद्येते नवा, न चेत् सतोरपि असत्कल्पना असंवेद्यत्वात्, वेद्येते चेत् न, तत्र वेदकज्ञानान्तरानभ्युपगमात् तथात्वे वाऽनवस्थापातात्, तस्मान्न मोक्षे नित्यचैतन्यसुखरूपता जीवस्येति, अत्रोच्यते—यत् तावदुक्तं सन्तानरूपत्वेन जायमानत्वात् बुद्ध्यादीनामत्यन्तोच्छेद इति तत्र किं पितृपुत्रपौत्रादिक्रमेण पुरुषसंप्रदायो गोत्राद्यपरनामा सन्तानो विवक्षितः, आहो उपादानोपादेयभावेनोत्तरोत्तरकार्यपरंपरोत्पादः, उत सामान्येन सजातीयकार्यकारणप्रवाहः, न प्रथमः, तस्य पुरुषेष्वेव प्रसिद्धेः बुद्ध्यादीनां च गुणत्वाभ्युपगमेन तदभावात्, न द्वितीयः, तेषामात्मोपादेयत्वस्वीकारेण परस्परमुपादानोपादेयभावानङ्गीकारात्, तथा च पक्षद्वयेऽपि विशेषणासिद्धो हेतुः, किंच उत्तरोत्तरकार्योत्पादोऽपि किमविच्छेदेन, विच्छेदेन वा, नाद्यः, सुषुप्तमूर्च्छिताद्यवस्थासु तेषां भवता विच्छेदोपगमात्, नापरः दृष्टान्तीकृतप्रदीपे उपादानोपादेयभावेन उत्तरकार्याणामविच्छेदेनोत्पादात्, तथाच साधनैकदेशासिद्ध्या साधनविकलो दृष्टान्तः, न तृतीयः, बुद्ध्यादिभ्यो विजातीयानामिच्छांदीनामपि उत्पाददर्शनात् नियमेन सजातीयोत्पत्त्यभावात्, स्मृत्यादीनां च भवदभिप्रायेण प्रमाणतया विजातीयानामपि

सम्यग्ज्ञानादिभ्यः संस्कारोद्बोधद्वारेणोत्पत्त्युपलम्भात्,पाकजपरमाणुरूपादीनां चैवंविधसन्तानरूपेण उत्पत्तावपि भवताऽत्य-न्तोच्छेदानभ्युपगमात्, संसारस्य चैवंरूपस्यापि अत्यन्तोच्छेदाभावात् अनैकान्तिकोऽपि, न च प्रलये तस्योच्छेद इतिवाच्यं, तस्य प्रागेव निरासात्, यदिवा नित्यानां बुद्ध्यादीनां मुक्तावत्यन्तोच्छेदः साध्यते तदा सिद्धसाधनम्, अस्माभिरपि तत्र तेषां तत्स्वीकारात्, यद्यपि तत्त्वज्ञानात् मिथ्याज्ञानाद्युच्छेदक्रमेण इत्यादि तदपि न युक्तं, भवतु तत्त्वज्ञानान्मिथ्याज्ञानोच्छेदस्तस्माद् दोषोच्छेदस्तस्माच्च धर्माधर्मयोरनागतयोरनुत्पत्तिः संचितयोस्तु तयोः कथं तस्मादुच्छेदो भोगादेव भवद्भिस्तत्क्षयोपगमात्, तथाच तत्सिद्ध्यै प्रयोगः, अलब्धवृत्तीन्यपि कर्माणि भोगादेव क्षीयन्ते कर्मत्वात् प्रारब्धकर्मवत् इति, **नाभुक्तं क्षीयते कर्मकल्पकोटिशतैरपि**, इत्याद्यागमस्याप्येवमेव श्रवणाच्च, अथ **''क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे''** इत्यागमान्तरात् भोगं विनापि परापरात्मदर्शनादेव कर्मणां क्षयोपपत्तिरितिचेन्न, अस्यापि अनागततदनुत्पाद एव चरितार्थत्वात्, यदि वा अस्यायमर्थः—उत्पन्नतत्त्वज्ञानो जीवन्मुक्तः कदाचिदात्मनो भूयांसं कर्मराशिमवगम्य योगर्द्धिसामर्थ्यात् तत्तन्निकायभोग्य-कर्मफलानुगुण्येन रण्डान्तःकरणभाजस्तांस्तान् कायान् निर्माय तत्तत्फलोपभोगेन असंख्येयजन्मविपाकिनमपि कर्मजालं युगपदेव क्षिणोतीति भवत्सिद्धान्ताभिप्रायेण भोगादेव संचितयोस्तयोः क्षयो न तु ज्ञानमात्रादिति, अस्तु तर्हि एवमितिचेन्न, अपसिद्धान्तात्, अदत्तफलानामपि कर्मणां प्रायश्चित्तेन भवतापि क्षयोपगमात् इतरथा प्रायश्चित्तविधेस्तत्प्रतिपादकग्रन्थानां च वैयर्थ्यापत्तेः, एवं च प्राच्यप्रयोगे कर्मत्वादिति हेतुरनैकान्तिकः, प्रायश्चित्तशोध्यानां तेषां तथात्वेऽपि भोगमन्तरेणापि क्षयोपपत्तेः, अत्र च कर्मक्षयं आत्यन्तिकोऽभिमतो न चासौ भोगात् जायते ध्यानादिजन्यत्वेन तस्योपगमात् ततोऽनुपभोगरूतप-स्यादिहेतुक्तत्क्षयव्याप्तत्वात् कर्मत्वहेतोर्विरुद्धोऽपि, सोपाधिकत्वादप्रयोजकश्चायं, नहि कर्मत्वात् प्रारब्धफलकर्माणि भोगात् क्षयं नीयन्ते, किं तर्हि अकृतप्रायश्चितत्वात्, तथाच विवादाध्यासितानि कर्माणि अपि भविष्यन्तीति विधेयप्रायश्चित्ततया भोगं विनापि क्षेष्यन्ति को विरोधः, उपाधिलक्षणं चात्र स्वयमेव योज्यं, नाभुक्तं क्षीयत इत्याद्यागमोऽपि अकृतप्रायश्चित्तं तदधिकृत्य योजनीयं, न तु अविशेषेण क्षियन्ते चास्येत्याद्यागमस्य तु प्रकर्षप्राप्तविहितानुष्ठानतपोध्यानादिनिर्वर्त्त्यघातिकर्मक्षयादर्हत् ॥२६९॥

स्वात्मलक्षणपरापरात्मदर्शनोत्पत्त्या वस्तुतस्तयोः कार्यकारणभावेऽपि यदि तद्दर्शनस्य नैरन्तर्योत्पादातिशयविवक्षया हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन चरमं रमणीवल्लभलोचनविषयं त्वया भजते ति, न्यायेनातिशयोक्त्या पौर्वापर्यविपर्यः कल्पित इति तात्पर्यं, तदाऽस्मदनुकूलमेव अत्राविप्रतिपत्तेः, यदि तु श्रूयमाण एवार्थो विवक्षितस्तदाऽनुपपन्नः, घातिकर्मक्षयं विना परमात्मादिसाक्षात्कारासिद्धेः, अथ परात्मादिदर्शनानन्तरं भवोपग्राहिकर्मक्षयो मतस्तदा यथाश्रुतमपि संगच्छत एव, अस्माभिरपि एवं स्वीकारात्, यच्चोत्पन्नतत्त्वज्ञान इत्यादिनाऽस्य तात्पर्यान्तरमुपवर्णितं तन्न घटते, कामोत्कलिकारूपरागं विना तत्तत्कायनिर्माणेन योषिदादिभोगानुपपत्तेः, रागादीनां च परस्परनान्तरीयकतया तद्वतो जीवन्मुक्तत्वासिद्धिप्रसङ्गात्, रण्डान्तःकरणसंयोगोऽपि कायेषु वैफल्यात् नोपपद्यते, अदृष्टोपग्रहीतानामेव मनसामात्मसंयोगेन ज्ञानाद्युत्पादनसामर्थ्यात्, जीवन्मुक्तादृष्टोपग्रहात् तेषां तत्तत्कायेषु ज्ञानाद्युत्पादकत्वमितिचेत्, न, कर्मनिर्मुक्तात्मोज्झितत्वेन दग्धबीजकल्पतया तेषां तदुपग्रहासंभवात्, अन्यदीयादृष्टेन चान्यदीयमनसां तदयोगात्, योगर्द्धिमहिम्ना तद्योग इतिचेत्, तर्हि तन्महिम्नैव तत्तत्तिर्यङ्मनुष्यादिकायेषु तदीयमनःसहकृतेषु च तत्तत्फलमुपभुंक्तां किमस्य रण्डान्तःकरणसहकृतापूर्वानेककायनिर्माणप्रयासेन, स्वस्वस्वामिभिरेव तेषामधिष्ठानान्न तु तेषु तस्योपभोग इति चेन्न, स्वस्वाम्यधिष्ठानेऽपि तेषां व्यन्तरादिभिरधिष्ठानोपलम्भात् व्यन्तरशक्तितश्च योगमहिम्नोऽचिन्त्यत्वात्, तस्मादस्याऽऽगमस्य प्रागुक्तमेव तात्पर्यं नतु एतदिति, एवं च आगामिबुभुक्षानुत्पादकस्य स्निग्धमधुरभोजनादेः प्रागुत्पन्नतद्व्यावृतिसामर्थ्यवत् ज्ञानतपस्यादेरनागतकर्मानुत्पादकस्यापि संचिततदुच्छेदेऽपि सामर्थ्यमेष्टव्यं, तस्मात्सम्यग्ज्ञानचारित्रादिरेव आत्यन्तिककर्मक्षयहेतुरिति स्वीकर्तव्यं, तथा चार्षं **''नाणं पयासयं सोहओ तवो संजमो य गुत्तिकरो । तिण्हं पि समाजोगे मोक्खो जिणसासणे भणिओ''** ॥१॥ तत्किमिदानीं कर्मक्षयं प्रतिभोगोऽकिंचित्कर एव, तथा सति **''पुव्विंदुव्विणाणं वेअइत्ता मोक्खो नत्थि अवेअइत्ता''** इत्याद्यागमो व्याहन्येत इतिचेन्न, प्रारब्धफलकतिपयकर्मविगमं प्रति किंचित्करत्वेऽपि तत्काले विषयाभिष्वङ्गार्त्ताध्यवसायादिहेतुकापूर्वभूरिकर्मार्जननिबन्धनतया आत्यन्तिकसकलकर्मक्षयाकारणत्वेन तत्त्वतस्तस्याकिंचित्करत्वात् 'पुव्विंदुव्विणाणमित्याद्यागमस्तु निकाचितानि तपोध्यानाद्यनिर्जीर्णानि च कर्माणि उद्दिश्य समाधेयः,

तन्निर्जीर्णानां तेषां वेदनं विनापि मुक्तिसंभवात्, अत एवास्यागमस्याग्रिमं वाक्य **'तवसा वा झोसइत्ता'** इति, यदपि गुणगुणिनोर्भेदात् न बुद्ध्याद्युच्छेदेऽपि आत्मन उच्छेद इति, तदप्यचारु, ज्ञानात्मनोरत्यन्तं भेदेऽहं जानामीत्यादिसामानाधिकरण्यं न स्यात्, मम ज्ञानमितिभेदेनैव प्रतीतिः स्यात्, समवायात्सामानाधिकरण्यमिति चेन्न, तस्य निषेधात्, तस्मात्तयोर्भेदाऽभेदोऽभ्युपगन्तव्यो येन सामानाधिकरण्यभेदप्रतीत्योरुभयोरपि संगतिः स्यात्, ननु आत्मनो ज्ञानमत्यन्तं भिद्यते सत्यपि तस्मिन् तस्योत्पादविनाशवत्त्वात्, यस्मिन् सत्यपि यदुत्पादविनाशवत् तत् ततोऽत्यन्तं भिद्यते यथा सत्यपि पटे महारजनरागः तथाचेदं तस्मात्तथा, इत्यनुमानात्तयोरत्यन्तं, भेदसिद्धिरितिचेन्न, सत्यपि पयोधौ तत्कल्लोलानामुत्पादविनाशित्वेऽपि ततस्तेषामभेदात्, अथ वाय्वादिकारणसंयोगात् जलावयवसंयोगादिविशेषस्यैव कल्लोलशब्दवाच्यत्वात् तस्य चाऽवयविनः समुद्राद् व्यतिरिक्तत्वात् भेद इति चेन्न, संयुज्यमानपदार्थातिरिक्तस्य संयोगस्याभावात्, नहि परशुसंयुज्यमानाद् वृक्षात् अन्यस्तयोःसंयोगो नाम, ननु तदनङ्गीकारे परशुवियुक्तेऽपि वृक्षे तत्संयुक्तोऽयमिति प्रत्ययः स्यात् इति चेन्न, तत्र तयोर्नैरन्तर्याभावात्, कुतस्तर्हि संयुक्ताविमौ पदार्थौ अनयोर्वा संयोग इत्यादावेकत्र विशेषणत्वेनान्यत्र पदार्थाभ्यामर्थान्तरत्वेन संयोगस्य प्रतिपत्तिरितिचेन्न, तत्र तयोर्नैरन्तर्यावस्थानादेव तत्प्रतिपत्तिर्न संयोगात्, संयोगादेव नैरन्तर्यावस्थानप्रतीतिरितिचेन्न, अथ सोऽपि केनारभ्यते, यदि पदार्थाभ्यां किं संयुक्ताभ्यामसंयुक्ताभ्यां वा, नाद्यः, संयुक्ताभ्यां हि ताभ्यां संयोगोत्पादनं तस्माच्च तयोः संयुक्तत्व–मित्यन्योन्याश्रयप्रसङ्गात्, संयोगात् प्रागेव च तयोः संयुक्तत्वे तत्कल्पनावैयर्थ्यात्, न द्वितीयः, दूरवर्त्तिनोऽपि तयोः संयुक्तप्रत्ययप्रसङ्गात्, कर्मसहकृताभ्यां ताभ्यामिति चेन्न, पराचीनकर्मवद्भ्यामपि ताभ्यां संयोगोत्पादनापत्तेः, उभयोरन्यतरस्य वा संमुखीनकर्मपरम्परोत्पादेनात्यासत्त्या ताभ्यां तदुत्पादनमितिचेन्न, अत्यासत्तेरतिरिक्तस्य संयोगस्यानुपलम्भात्, सा च पदार्थयोर्नैरन्तर्यावस्थानात् नान्या, तच्च कर्मादिकारणजन्यं तयोः स्वरूपमेव, एवं चात्यासन्नतयाऽवस्थिताभ्यां ताभ्यां नान्यः संयोगः, ननु यदि संयोगो नास्ति तर्हि दूरवर्त्तिनः पुंसो बहिरवस्थितेऽपि वृक्षे ग्रामसंयुक्तोऽयं तिष्ठतीति संयोगप्रत्ययो न प्राप्नोति, मिथ्याप्रत्ययस्य क्वचित्सम्यक्तत्प्रत्ययमन्तरेणानुपपत्तेः, नहि क्वचिदनुपलब्धसत्यजलस्य मरीचिकायां जलमेतदिति

विपर्य्यय उदेतीति चेन्न, अन्यत्र संयोगं विनाऽपि पदार्थयोर्नैरन्तर्यप्रत्ययस्य यथार्थोपलम्भेन सान्तरेऽपि वृक्षे दूरत्वादिनिमित्ताद् ग्रामान्तःस्थोऽयमिति तत्प्रत्ययस्य मिथ्यात्वप्रतीतेरुपपत्तेः, तदेवं कल्लोलन्यायेनोत्पादविनाशवत्त्वेऽपि ज्ञानमात्मनो न भेत्स्यते, नचाभेदोऽपि एकान्तेनेष्यते, भिन्नव्याहारव्यवहारादिगोचरत्वेन कथंचित्तयोर्भेदात्, एकान्ताभेदे गुणगुणिभावस्यैवासिद्धेः, अत एव भेदपक्षे पर्य्यायविनाशोत्पादाभ्यां न पर्य्यायवतोऽपि तदापत्तिः, कटकेयूरादिपर्य्यायोत्पादविनाशाभ्यामपि हेम्नस्तदनुपलम्भात्, यदपि नित्यचैतन्यानन्दरूपता मुक्तावात्मनो नास्मादादिप्रत्यक्षावसेया इत्यादि तदपि न युक्तम्, अस्मत्प्रत्यक्षागोचरत्वेऽपि तस्याः सर्वज्ञप्रत्यक्षविषयत्वात् तस्य च प्रागेव प्रसाधितत्वात्, यत्तु संसारावस्थायां सा न संवेद्यते तत्केवलज्ञानावरणकर्मणा प्रतिबन्धात्, शरीरादिना तु न तत्प्रतिबन्धः, प्रत्युत तस्य तत्सहकारित्वं, शरीरवत एव परमयोगिनः शुक्लध्यानप्रकर्षात् सर्वथा ज्ञानावरणक्षयेण स्वसंवेद्यनित्यज्ञानाभिव्यक्तिसिद्धेः, एवं तर्हि शरीरादिसहकारिविरहात् मुक्तौ तदभिव्यक्तिनाशप्रसङ्ग इति चेन्न, सहकारिविनाशेऽपि कार्यस्याविनाशात्, अन्यथा कुलालविनाशे घटस्यापि विनाशापातात्, यद्येवं ज्ञानवत्तदानीं नित्यसुखस्यापि अनुभवप्रसङ्ग इति चेन्न, तत्प्रतिबन्धकस्य ऐन्द्रियकसुखाद्यनुभावकस्य वेदनीयकर्मणस्तस्यामपि अवस्थायामत्यन्तानुच्छेदात्, यदपि प्रेक्षावत्प्रवृत्तित्वस्यान्यथाऽसिद्ध्या मुमुक्षुप्रवृत्तेरहितनिषेधार्थत्वसमर्थनं तदपि असंगतं पुरुषार्थसिद्ध्यर्थत्वात् प्रेक्षावत्प्रवृत्तेः, अहितनिषेधस्य स्वरूपेणाऽपुरुषार्थत्वात् नहि अहितनिषेध इत्येवासौ पुरुषेणेष्यते, किं नाम सत्येवास्मिन् सुखं भवतीत्याशयात्, तर्हि निधुवनादिसुखे सत्येव रिरंसादिदुःखं व्यावर्त्तते इति दुःखव्यावृत्त्यर्थमेव निधुवनादिसुखं काम्यते न स्वरूपेण इत्यपि कथं न स्यात् इति चेन्न, तस्य स्वभावनैव काम्यमानत्वात्, अहिसिंहादिभ्योऽपसृतौ दुःखव्यावृत्तिरपि स्वरूपेणैवेष्यत इत चेन्न, तत्रापि तस्या भाविसुखलिप्सयैवेष्यमाणत्वात्, न च सुखस्यापि दुःखव्यावृत्तिवाञ्छया स्पृहनीयत्वं न स्वभावत इति वाच्यं, दुःखव्यावृत्तिसुखयोरग्निधूमयोरिव व्यापकव्याप्यभावात् तेन सुखस्य दुःखहान्यविना भावितया तद्व्याप्यत्वात् स्वोत्पत्तये युक्ता दुःखहानेरपेक्षा, दुःखहानेस्तु सिंहादिभ्यः पलायनादौ सुखं विनापि भावेन व्यापकतया न तदपेक्षा, एवं च सुखस्य स्वरूपेणैव काम्यत्वं दुःखहानेस्तु सुखप्रापणोपाधिकतया इति सिद्धं, तस्मान्मुमुक्षुप्रवृत्तेरपि सुखलक्षणपुरुषार्थं प्रयोजनतैवोचिता, यदि च

तत्प्रवृत्तिरहितहानार्थैवेष्येत तदा संसारिसत्त्वप्रवृत्तेरपि हिताहितप्राप्तिपरिहारभेदेन द्वैरूप्यं न स्यात्, कथमितिचेत्, साधनपारतन्त्र्यक्षयित्वाभिलाषलक्षणदुःखहेत्वनुषङ्गेण सुखस्यैकविंशतिविधदुःखपक्षनिक्षेपात्, तथा चाहिकण्टकादिलक्षणाहितहानार्थतया सुखस्यापि दुःखपक्षनिक्षेपात् तत्त्वतो दुःखत्वेऽपि काम्यत्वेन दुःखलक्षणाहितप्राप्त्यर्थतया च तत्प्रवृत्तेर्द्वैविध्यं प्रसज्येत, एवं च हितप्राप्त्यर्था संसारिणां प्रवृत्तिर्न स्यादेवेति भव निष्किंचनः, स्वसंवेद्यसुखसर्वस्वहरणात्, अथ मुमुक्षून् प्रति सुखस्य दुःखत्वप्रसाधनं, संसारिणः प्रति तु आह्लादरूपतया तस्य सुखत्वमेवेतिचेन्न, तद्धेतोर्दुःखहेतुत्रयानुषङ्गस्य संसाराभिनन्दिनोऽपि प्रत्यविशेषात्, अथ दुःखहेत्वनुषङ्गेऽपि अनुकूलतया प्रत्यात्मवेद्यस्य सुखस्य प्रत्याख्यातुमशक्यत्वादस्ति तेषां हितप्राप्त्यर्थाऽपि प्रवृत्तिरितिचेन्न, तर्हि मुमुक्षूणामपि सा तथाऽऽस्तां, मुक्तावपि तादृशस्य सुखस्य भावात्, अयं तु विशेषस्तत्र दुःखहेत्वनुषङ्गलेशोऽपि नास्ति, अथ सुखस्य शरीराद्यन्वयव्यतिरेकानुविधायित्वात् मुक्तौ च तदनभ्युपगमात् तदभाव इति न तेषां सा इति चेत्, तत् किं सुखस्यैव देहाद्यन्वयविधायित्वमुत सर्वेषामपि आत्मविशेषगुणानां, सर्वेषामिति चेत्, तर्हि ईश्वरज्ञानादीनामभावप्रसङ्गः, तस्यात्मत्वेऽपि देहाद्यनङ्गीकारात्, नित्यास्ते तस्येति चेत्, न, मुक्तस्यापि ज्ञानं सुखं च नित्यमित्यवधार्यतां, कथमेतदवसितमितिचेत्, अनुमानागमाभ्यामिति ब्रूमः, तत्रानुमानं तावत् आत्मा स्वरूपेण शाश्वतज्ञानसुखवान् तत्स्वभावत्वात्, यो यत्स्वभावः स शश्वत्तद्वान् यथा प्रकाशशैत्यस्वभावः सुधांशुः शश्वत्तद्वान्, तथा चायं, तस्मात्तथेति, तत्स्वभावत्वस्य चासिद्धत्वादिपरिहारः प्रागेव सर्वज्ञसिद्धौ कृत इति नेहोच्यते, आगमस्तु ''**अह सव्वदव्वपरिणामभावविण्णत्तिकारणमणंतं ॥ सासयमप्पडिवाई एकविहं केवलज्ञाणं ॥१॥ केवलनाणुवउत्ता जाणंती सव्वभावगुणभावे ॥ पासंती सव्वओ खलु केवलदिट्ठीहिं णंताहिं ॥२॥ नित्थिण्णसव्वदुक्खा जाइजरामरणबंधणविमुक्का ॥ अव्वाबाहं सुक्खं अणुहुंती सासयं सिद्धा**'' ॥३॥ इत्याद्यागमेन च मुक्तानां नित्यज्ञानसुखप्रतिपादनात्, भवतामपि विज्ञानमानन्दं ब्रह्म, आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इति श्रुत्योरन्यथानुपपत्त्या तत्सिद्धिप्राप्तेः, अत्रहि विज्ञानन्दयोः सामानाधिकरण्याभिधानमात्मापरनाम्नो ब्रह्मणस्तत्स्वभावत्वं सूचयति, तथाचेन्द्रियजन्यत्वात्तद्भिन्नाभिन्नस्वभावयोस्तयोरात्मन इव परिणामिनित्यत्वम्, अभिव्यज्यते इतिपदादपि नित्यत्वमवसीयते,

अभिव्यक्तिर्हि आवरणापनयनं तच्च विद्यमानस्यैव भवति, तथा च संसारावस्थायां सन्नपि आनन्दो नानुभूयते तदावरणस्य कर्मणः सत्वात्, मुक्तौ तु तस्यात्यन्तिकक्षयात् भवत्येव नित्यं तदनुभवः, अथाभिव्यक्तिः संवेदनं तथापि तस्य नित्यत्वं, सतोऽपि तस्य संसृतावावरणसंभवेनाऽसंवेदनात्, मुक्तौ तु तदभावेन वेदनात्, नन्वात्मनो ज्ञानस्वभावत्वात् भवतु कायादिविरहेऽपि ईश्वरज्ञानवन्मुक्तौ तज्ज्ञानं नित्यं, सुखं तु कथं नित्यं देहाद्यभावे तस्य क्वचिदपि अनुपलम्भादिति चेन्न, अस्ति तावत् प्रेक्षावत्प्रवृत्तेरनौपाधिकहितप्राप्त्यर्थप्रसाधनेन मुमुक्षुप्रवृत्तेरपि तदर्थतया मुक्तौ सुखं, नच तत् कायादिहेतुकं, मुक्तौ तदनङ्गीकारात्, ततो ज्ञानवन्नित्यं स्वसंवेद्यं जीवस्वभावरूपं तदभ्युपेयं, भवावस्थायां च तदसंवेदनमावारकसामर्थ्यात् अत एव तस्य मन्दतरतमादिभावेनोपशान्तमोहादिगुणस्थानमध्यासीनस्य समाहितमनसः सर्वत्र सामायिकभावमधिरूढस्य महामुनेर्भवस्थस्यापि प्रकर्षतारतम्येन स्वानुभाव्यः परमानन्दः श्रूयते, न च प्रकाशाह्लादस्वभावयोस्ताद्दशोर्ज्ञानसुखयोः भवावस्थायामपि नावरणसंभव इतितत्रापि तदनुभवेन भाव्यमिति साप्रतं, ताद्दशोरपि सूर्यचन्द्रयोः स्वर्भानुमण्डलेन तिरोधानदर्शनात्, ननु तथापि न कायादिकारणं विना कृतस्य सुखस्योपलम्भ इति मुक्तावपि तदपेक्षा प्राप्तिरितिचेन्न, विकल्पासहत्वात्, किमस्योत्पत्तौ कायापेक्षा प्रसंजते, अभिव्यक्तौ वा, उत ज्ञप्तौ, आहो स्थितौ, न प्रथमः, उत्पत्त्यस्वीकारात् स्वीकारे वा तस्यानित्यत्वेन विनाशे सुखस्यापि विनाशप्रसङ्गात्, तथा च मुमुक्षुप्रवृत्तेर्हितप्राप्त्यर्थता विलीयते, प्रसाधिता चासौ प्राग्, न द्वितीयः, तस्या अपि मुक्तिदशायामेव संभवात् तत्र च तदपेक्षायां पूर्वविकल्पोक्तदोषापत्तेः, न तृतीयः कायं विनापीश्वरज्ञानस्येव प्रकृतसुखस्यापि ज्ञप्त्युत्पतेः, न चतुर्थः, प्रलये संसारिजीवानां भवदुपगमेन कायावच्छेदमन्तरेणापि धर्माधर्मसंस्काराणामिव मुक्तौ सुखस्यापि तत्संभवाविरोधात्, ननु एवं तर्हि भवतु नित्यं सुखं तथापि संसारिसुखेनेव तेन दुःखशबलेन भाव्यं दुःखविविक्तस्य तस्य क्वचिदपि अदर्शनात्, तथा च किं तेन विषसंपृक्तपायसकल्पेन ताद्दशस्य तस्येहापि भावादिति चेन्न, वैषयिकसुखस्यैव दुःखहेत्वनुषङ्गेण तच्छबलत्वात् तस्य तु जीवस्वभावतयाऽऽनौपाधिकत्वात् दुःखहेत्वनुषङ्गभावेन तद्विरहितत्वात् यदपि लौकिकद्दष्टान्तेनाऽऽनन्दं श्रुतेर्भाक्तत्वाभिधानं तदपि न समीचीनं, मुख्यार्थबाधेन गौणार्थकल्पनावकाशात् इहतु मुखस्य नित्यसुखस्य प्रसाधनेन बाधकाभावाद् दुःखाभावे

सुखशब्दोपचारानुपपत्तेः, किं चान्यत्रोपलब्धस्य मुख्यस्यार्थस्य क्वचिदुपचारः क्रियते, अग्नेरिव माणवके, न च मुमुक्षूनधिकृत्य क्वचित्सुखं भवतोपलब्धं सर्वस्य सांसारिकसुखस्य दुःखपक्षनिक्षेपेण तत्प्रवृत्तेरहितहानार्थता लक्षणैकरूप्येणैवाभ्युपगमात्, एवं च दुःखाभावे किमुपचर्येत, न च दुःखाभावः स्वरूपेण पुरुषार्थो येन यथा कथंचित्तत्र सुखशब्दो भज्येत, सुखप्राप्त्युपायतयैव तस्य पुरुषेणाभिलष्यमाणत्वादित्यावेदितत्वात्, अपि च यदि क्वचित् वास्तवं सुखं नाभ्युपेयेत तदा वैषयिकसुखस्य शश्वद्दुःखानुषङ्गात् वस्तुतो दुःखतया तत्र सुखशब्दस्य प्रवृत्तिर्न स्यात्, मुख्याभावे गौणशब्दाप्रवृत्तेः मुख्यं तत्क्व उपलब्धमिति चेत्, न, प्रागुक्तनीत्याऽनुमानागमाभ्यां मुक्तौ तदुपलब्धेः, अनुमानाद्युपलब्धेन तेनोपचारप्रवृत्तेः, अन्यथा मेरुरयं स्थैर्येणेत्यादौ पुरुषे मेरुशब्दो नोपचर्येत मेरोः क्वचिदपि साक्षादनुपलम्भात्, भारवाहानां च स्वेदभाजां भारावतारणेन तरुच्छायायां शीतमृदुपवनस्पर्शात् सुखस्य स्वसंवेदनसिद्धेः, न तद् दृष्टान्तावलम्बनेन दुःखाभावे आनन्दादिशब्दप्रयोगः कर्त्तुमुचितः, तदेवं नित्यसुखसिद्धेर्हितप्राप्तिरेव मुमुक्षूणां मुख्यः पुरुषार्थो नतु अहितहानिरितिसिद्धं, भवतु वा दुःखहानिरपि मुख्यः पुरुषार्थस्तथापि असौ आरोग्यादिजन्मे चानुभूयमाना एव तथा इतरथा मूर्च्छाद्यवस्थास्वपि प्रेक्षावत्प्रवृत्तिप्रसङ्गात्, न च मुक्तौ दुःखहानिरनुभूयते तत्र ज्ञानानुपगमात् तस्मान्न पुरुषार्थः, यदाह **'दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते, नहि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः ॥१॥** प्रेयसीविरहादिजन्यदुःखहानिमभिलषतां विषाग्न्यादौ प्रवृत्तिदर्शनेनाननुभूयमानाया अपि तस्याः पुरुषार्थत्वं दृष्टमिति चेन्न, प्रेक्षावद्दुःखहानेरिह पुरुषार्थतायाः साध्यत्वात् विषादिप्रवर्त्तिष्णूनां च लोकशास्त्रनिषिद्धाचरणेनाप्रेक्षावत्तया दुःखहानेरपि विडम्बनारूपतया तत्त्वतोऽपुरुषार्थत्वात्, शास्त्रलोकाविरुद्धनीत्या स्वरूपेणेष्यमाणस्यैव अर्थस्य वस्तुतः पुरुषार्थत्वात्, अथवा तत्रापि कामादिविपर्यस्तमनसां प्रेत्यप्रियतमादिसंगमाभिसन्धिना विषादिषु हितप्राप्त्यर्थमेव प्रवृत्तेर्न दुःखहानिः पुरुषार्थः, ननु अनुभूयमानतया चेद् दुःखहानेरवश्यं पुरुषार्थत्वमिष्यते, तर्हि मुक्तावपि साऽस्त्येव, केवलं तस्या अनुभवमात्रं विवक्षितं स्वसंवेदनरूपस्तद्विशेषो वा, सोऽपि कदाचित् वा, यावत् सत्त्वं वा, आद्ये, अनुभूयत एव हि जीवन्मुक्तेन ध्यानज्ञानमहिम्ना स्वस्यात्यन्तिकी दुःखहानिरनागता, द्वितीये तु आद्यपक्षे वर्त्तमानाऽपि सा देहपातपूर्वक्षणेऽनुभूयत एव, द्वितीयपक्षे तु,

रोगादिजन्यदुःखहानेरपुरुषार्थप्रसङ्गात् प्रध्वंसरूपतयाऽनित्यत्वेन तस्या यावत्सत्त्वमननुभवात्, अनुभवे वा विषयान्तरसंचारो न स्यात् इतिचेदुच्यते—तत्र यदुक्तं दुःखहानेरनुभवमात्रविवक्षायामनुभूयते एवहि जीवन्मुक्तेनेत्यादि तदयुक्तं तदानीं मुक्तेरभावात्, भावे वा अनुभवमात्रस्यापि अनुपपत्तेः, सकलविशेषगुणात्यन्तोच्छेदरूपाया एव तस्या भवता स्वीकारात्, अनुभवस्य तु बुद्धित्वेन विशेषगुणत्वात्, अथ मुक्त्यासन्नतया जीवन्मुक्तावस्थाऽपि मुक्तिरुच्यते, तथा च न तत्रानुभवमात्रव्याहतिरितिचेन्न, तस्यापुरुषार्थत्वात् सुखवत्स्वसंवेद्याया एव दुःखहानेः पुरुषार्थत्वेनाभ्युपगमात्, इतरथा एकेन जीवन्मुक्तेन स्वकीयानागतात्यन्तिकदुःखहानिवद् योगर्द्धिजन्मनाऽतीन्द्रियज्ञानेनापरेषामपि जीवन्मुक्तानां तदन्येषां च भाव्यनेकजन्मव्यवहितमुक्तीनां संसारिणां भाविदुःखहानिसंचयस्य साक्षात् क्रियमाणत्वेन तत्पुरुषार्थत्वापत्तेः, नचैवमस्ति स्वरूपेणेष्यमाणतामात्रनिबन्धनत्वात् पुरुषार्थताया इत्यङ्गीकारात्, साक्षात्कारमात्रत्वेनापि तस्यास्तत्पुरुषार्थत्वे सकलस्त्रीपुंससंभोगस्यापि तत्प्रसङ्गेन साध्वी परमयोगिनस्तस्य वीतरागता भवेत्, यदपि वर्त्तमानापि इत्यादि तदपि न सम्यक्, देहनाशप्राक्क्षणे तदभावात् देहेन्द्रियबुद्ध्यादिलक्षणजन्मापायानन्तरक्षणे दुःखजन्मप्रवृत्ती त्यादिसूत्रेण दुःखाभावप्रतिपादनात् तदुत्पादक्षणे च ज्ञानाभावेन तत्स्वसंवेदनासिद्धेः, यदपि यावत् सत्त्वं चेत्यादि, तत्रापि मा भूत् पादलग्नकण्टकाद्युद्धरणजन्माया दुःखहानेः सत्त्वावधिः स्वानुभवस्तथापि वर्त्तमानक्षणभाविन्यास्तस्या—स्तावदस्त्यसौ, चिरन्तन्या अपि संस्कारोद् बोधद्वारास्मरणं च, तथाहि दुःसहरिपुव्याधिजन्यदुःखप्रध्वंसस्य स्मरन्तोऽद्यापि भूयांस उपलभ्यन्ते, ईद्दगनुभवस्मरणयोश्च पुरुषार्थत्वं प्रतीतिसिद्धमेव भवदभ्युपेतमुक्तिभुवस्तु दुःखहानेर्न वर्त्तमानक्षणे संवेदनं नापि कदापि स्मृतिः, आत्मनस्तदानां ज्ञानादिविरहात्, एवं चास्याः सर्वथाऽननुभूयमानतया कथमपि पुरुषार्थत्वं न युज्यते, ननु यथा नित्यसुखस्वभावा मुक्तिस्तथा नित्यदुःखस्वभावापि स्यात् वैषयिकसुखस्य दुःखाविनाभावोपलम्भेन मुक्तिभवस्यापि तस्य तथानुमानादितिचेन्न, मुमुक्षुप्रवृत्त्यन्यथानुपपत्त्यैव तस्या दुःखस्वभावत्वानुपपत्तेः, नहि बालिशा अपि दुःखावाप्तये सुखहानये वा प्रयतन्ते किं पुनः प्रेक्षावन्तः, तस्माद्दुःखलेशेनापि अननुषक्ता परमानन्दरूपैव मुक्तिः, यदपि न च नित्यसुखरागेणेत्यादि ॥२७६॥
तत्रापि स्वाराज्यसार्वभौमत्वादिनिबन्धनधर्मस्यैव वैषयिकसुखरागस्यैव प्रवर्त्तकतया बन्धनसमाम्नातत्वात्, निःश्रेयससुखरागस्य

तु परमयोगिविधीयमानधर्मस्येव निवर्त्तकतया कैवल्यहेतुत्वात्, अन्यथा यथा नित्यसुखरागात् प्रवर्त्तमानस्य न सुखमयी मुक्तिस्तथा भवत्पक्षेऽपि संसारदुःखद्वेषात् प्रवर्त्तमानस्य न दुःखहानिमयी सा स्यात् रागवद् द्वेषस्यापि बन्धनत्वात्, अथ नासौ द्वेषः किन्तु दुःखजिहासामात्रमेव तत् सहि परासहिष्णुतालक्षणः प्रह्वलनात्मकश्च भवति, नचात्र तथा तस्मात् न बन्धनं, तर्हि नित्यसुखेऽपि न रागः सुखोपादित्सामात्रत्वात् सहि सविलासचेष्टात्मकः कामिनीरिरंसालक्षणश्च जायते नच प्रकृते तथा तस्मात्सोऽपि न बन्धनमिति, दोषः परिहारश्चात्र समौ स्याताम्, एवमनभ्युपगमे तु परदुःखप्रहाणेच्छालक्षणात् कारुण्याद् देशनादिना परोपकृतये प्रयतमानो जीवन्मुक्तोऽपि परेषु रागात् न निर्वृणुयात्, यद्वा समाधिभाजां महामुनीनां मोक्षे संसारे च निरभिलाषत्वेनैव प्रवृत्त्या मुक्तिसिद्धेः कृतं सुखोपादित्सामात्रेणापि रागेण **''मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तम''**इतिवचनात्, यदपि किं नित्यं ज्ञानं सुखं च वेद्येते नवेत्यादि, तदपि न सुन्दरं, ज्ञानस्य तावत्स्वप्रकाशत्वेन स्ववेदने ज्ञानान्तरानपेक्षणात् तथाच प्रयोगः—ज्ञानं स्वप्रकाशे सजातीयपरानपेक्षं प्रकाशत्वात्, यदेवं तदेवं यथा भास्वत्प्रकाशः तथाचेदं तस्मात्तथेति, नच ज्ञानस्य स्फुटाभत्वं प्रकाशत्वं भास्वत्प्रकाशस्य तु प्रकाशशब्दवाच्यत्वं तत्, तथा च पक्षदृष्टान्तयोः प्रकाशत्वस्यार्थभेदात् शब्दसाम्यमात्रेण न हेतुत्वमिति शङ्कनीयं, स्फुटप्रतिभासत्वरूपस्य तदर्थस्योभयत्रापि समानत्वेनार्थस्याप्यभेदात्, एवं च यथा भास्वत्प्रकाशः प्रकाशान्तरानपेक्ष एव प्रमातृज्ञाने प्रतिभासते तथा ज्ञानमपि ज्ञानान्तरानपेक्षमेव स्वतः प्रकाशते, नच यथा भास्वत्प्रकाशः सजातीयानपेक्षोऽपि स्वसंवेदने प्रमातृज्ञानमपेक्षते तथा ज्ञानमपि स्वसंवेदने ज्ञानान्तरमपेक्षिष्यते इति वाच्यं, प्रकाशविज्ञानयोर्जडत्वाजडत्वाभ्यां ज्ञानापेक्षानपेक्षयोरुपपत्तेः, एकस्यैकदा करणकर्मभावो विरुध्यते इति चेन्न, ईश्वरज्ञानस्य भवतापि तथा भावोपगमात्, अन्यथा ज्ञानान्तराभावेन तस्य ज्ञेयत्वापत्तेः, अथ तस्य नित्यैकरूपत्वेन कथंचित्तथाभावोऽस्तु, नतु अस्मदादिज्ञानस्य तद्विपर्य्ययादितिचेन्न, एवं तर्हि सर्वज्ञज्ञानस्य भवदाशयेनानित्यस्यापि तथा भावोपलम्भेनाविरोधस्य सुवचत्वात्, तथाहि सर्वज्ञज्ञानं सकलभुवनवर्त्तिपदार्थपरिच्छेदक्षणे किं स्वं गृह्णाति नवा ? नचेत् तर्हि सर्वज्ञताहानिः स्वज्ञानस्यैवाग्रहणात्, गृह्णाति चेत्तर्हि बलात्स्वसंवेदनत्वसिद्धिः, तथा च तद्दृष्टान्तेनास्मदादिज्ञानस्यापि

तत्सिद्धिर्दुर्वारा, ये तु ज्ञानान्तरग्राह्यतां ज्ञानस्य संगिरन्ते, तेषां ज्ञानान्तरमपि ज्ञानान्तरेण ग्राह्यं तदपि अन्येनेत्यनवस्थया विषयान्तरसंचाराभावप्रसङ्गः, अथ तद्भिया त्रिचतुर्ज्ञानेभ्यः परस्तात् किमपि ज्ञानं ज्ञानान्तराग्राह्यमेव स्वीक्रियते, तर्हि आद्यमेव ज्ञानं तथेष्यतां किमुत्तरोत्तरज्ञानान्तरानुसरणप्रयासेन तदेवमस्मदादिज्ञानस्यापि स्वसंवेदनत्वं किं पुनर्मुक्तौ नित्यस्य तस्येति व्यवस्थितं, नित्यसुखस्य तु संसारसुखस्येव आत्मानुभाव्यरूपतयैव प्रादुर्भावान्न तदनुभवेऽपि ज्ञानान्तरापेक्षेति, एवं च न ज्ञानादिविशेषगुणोच्छेदो मोक्षः, किं नाम नित्यज्ञानसुखात्मकजीवस्वभाव इति सिद्धमितिगाथार्थः ॥९७॥ तदेवं स्वाभिमतामोक्षस्वरूपप्रतिपादनेन नैयायिकाद्यभ्युपेतं मोक्षमपाकृत्य संप्रति मार्गतत्त्वदर्शननिर्मूलितनिखिलसवासनाक्लेशपटलस्य अत्यन्तज्ञानसन्तानोच्छेदो मोक्ष इति ये प्रतिजानते माध्यमकास्तन्मतमपाकुर्वन्नाह–

**संताणस्स न नासो फलविरहा पुव्वपुव्वविरहोवि ॥ संताणन्तर कज्जे परलोगो भे न पाउण ॥९८॥**

**व्याख्या**-एष हि तेषामाशयः–संसारिणो हि बद्धस्य मोक्षः, रागादयश्च बन्धहेतवः, नचैते एकान्तनित्ये आत्मनि बन्धमाधातुमीशते नित्यस्याविकार्यत्वात् बन्धस्य च आत्मनः कर्मसंश्लेषरूपतयोपघातानुग्रहकारितया च विकारत्वात् तद्धेतुत्वाच्च, तस्माज्ज्ञात्मनो बन्धस्तदभावाच्च न मोक्षः, तथाच तयोरनुपपत्त्या तादृशस्य आत्मनोऽभाव एव श्रेयान् ज्ञानस्य तु कार्यतया विकारार्हत्त्वेन रागादियोगाद् बन्धः, कथंचिद् भावनाबलेन तद्विगमाच्च मोक्ष इत्युपपद्यते, अयमेव च तस्य मोक्षो यद् विनाश इति, एतदयुक्तं ज्ञानस्य क्षणिकत्वेन विनाशस्य च निर्हेतुकत्वेनोत्पादानन्तरं तस्यायत्नसिद्धत्वात्, नच ज्ञानक्षणस्य रागादिभिर्बन्धः आपादयितुं शक्यते एकान्तनित्यस्येव एकान्तानित्यस्यापि अविकार्यतया रागादियोगवियोगासंभवात्, तथा च सति बन्धाभावात् कथं मोक्षः, ननु मा भूत् ज्ञानक्षणस्य मोक्षस्तत्संतानस्य तु भविष्यति सहि ज्ञानानामेवानादिः कार्यकारणप्रवाहस्तस्य चैकत्वात् अक्षणिकत्वाच्च रागादियोगाद् बन्ध उपपत्स्यते, भावनाद्यतिशयाधानाच्च तद्विगमेन भावितप्रवाहात्यन्तानुत्पादलक्षणो मोक्षश्च घटिष्यत इति चेन्न, सन्तानस्य हि यदि सन्तानिभ्यो व्यतिरिक्तस्यैकत्वमक्षणिकत्वं च परमार्थसद् इष्यते, तदा नाभान्तरेणात्मैव अभ्युपेतः स्यात्, तस्य चातिशयाधानेन बन्धमोक्षयोः सूपपादत्वात्, नच नित्यस्याविकार्यतया तदनुपपत्तिरितिवाच्यम्,

एकान्तनित्यता निरासेन परिणामिनित्यस्यैव तस्यास्माभिरङ्गीकारात्, तथा च कथं तयोरनुपपत्त्या आत्माभाव एव श्रेयानित्युल्लाषो भवतः शोभेतः, अथ द्वयमपि सन्तानस्य संवृत्तिसदेव अभ्युपेयते तर्हि सन्तानिनां ज्ञानक्षणानामेव वस्तु सत्त्वं तेषां चानेकत्वक्षणिकत्वाभ्यामेकस्यैव बन्धमोक्षयोरनुपपत्त्याऽन्यस्य बन्धोऽन्यस्य च मोक्ष इति स्यात्, तथाचैकस्यानुगतस्याभावेन को मुक्त्यर्थं प्रवर्त्तेत, अथ सन्तानिभ्योऽव्यतिरिक्त, एव संतानस्तथापि सन्तानिनामनेकत्वादिना प्रागुक्त एव दोषः, न चास्य सन्तानस्यानागतानुत्पादलक्षणो मोक्षः संगच्छते ज्ञानक्षणस्य ज्ञानक्षणान्तरजननस्वभावत्वेन अनागतानुत्पादानुपपत्तेः, एवमनभ्युपगमेऽन्त्यक्षणानुपपत्त्या सन्तानस्यैवाभावप्रसङ्गात्, तथा हि अन्त्यक्षणः किं किंचिदारभते नवा ? न प्रथमः, स हि उपादानतया आरभते सहकारितया वा, उपादानत्वमपि स्वसन्तानवर्त्तिनं ज्ञानक्षणं प्रति सन्तानान्तरवर्त्तिनं प्रति वा, नाद्यः, स्वसंतानवर्त्तिनमालयज्ञानक्षणं प्रति वा, रूपादिप्रवृत्तिज्ञानक्षणं प्रति वा, उपादानत्वे तस्यान्त्यक्षणत्वानुपपत्तेः, भाविनः कार्य कारणप्रवाहस्य तदवस्थत्वात्, नापरः, पुत्रज्ञानस्यापि गर्भाधानान्तरविपद्यमानजनकान्त्यक्षणोपादेयत्वापत्तेः, न चापूर्वालयज्ञानसन्तानान्तरं प्रति तस्योपादानत्वमिति वाच्यम्, अनादिकालभाविनामन्यूनातिरिक्तानामेव आलयसन्तानानां जगति संभवाभ्युपगमेन अपूर्वेषां प्रयत्नशतेनापि उत्पादासिद्धेः, अथासौ अपूर्वालयसन्तानं मोपपादित तथापि सदेव किंचिदालयसन्तानान्तरं प्रवृत्तिज्ञानसन्तानान्तरं वोपादास्यत इतिचेन्न, तदुभयमपि प्रति तस्यैवालयसन्तानान्तरस्य प्रवृत्तिसन्तानान्तरस्य वा तत्प्राच्यक्षणानामेव उपादानत्वोपपत्तौ तदितरोपादानकल्पनायां प्रमाणाभावात् नहि एकस्यैव ज्ञानस्य उपादानद्वयकल्पनं न्याय्यं शिष्यज्ञानं प्रति तत्पूर्वज्ञानवदुपाध्यायज्ञानस्यापि उपादानत्वप्रसङ्गात्, अथैवमपि अन्त्यक्षणः सन्तानान्तरमुपाददीत, एवं तर्हि तस्य सन्तानान्तरजनन एवोपक्षीणतया कस्यामुत्र सुकृतदुष्कृतफलोपभोगः स्यात्, अथ संसारावस्थायामन्त्यक्षण एव सन्तानान्तरं प्रसूते, नतु संसारन्तर्वर्त्तिमरणशरीरान्त्यज्ञानक्षणोऽपि तस्य प्रेत्यभाविनं स्वसन्तानमेव प्रति प्रसवितृत्वोपगमात्, तथा च प्रकृतादन्त्यक्षणात् सन्तानान्तरमारभमाणादपि इष्ट एवास्माकं मुक्तिलाभेन परलोकाभाव इति चेन्न, उभयोरपि अन्त्यक्षणयोर्नियामकाभावेन सन्तानान्तरजनकत्वस्य दुर्वारत्वात् तथाचोभयत्रापि परलोकाभावः समान

एव प्रसज्यते, अथ कर्मवासनासहकृतत्वेन संसारवर्त्तिमुमूर्षुदेह्यन्त्यक्षणात् स्वसन्तानप्रसव एव न सन्तानान्तरोत्पाद इति चेन्न, ज्ञानव्यतिरेकेन कर्मवासनाया अपि अनभ्युपगमात्, तथा च तस्यास्तदात्मकतया सन्तानान्तरानुत्पादेऽनियामकत्वात् व्यतिरेकाभ्युपगमे वा ज्ञानाद्वैतसिद्धान्तव्याघातात्, अपि च विवक्षितोऽन्त्यक्षणः सन्तानान्तरं किं कर्मसंस्कारविरहिततया स्वसजातीयमारभते तद्विजातीयं वा, नाद्यः, निष्कर्मणः क्षणात् तज्जातीयस्यैव सन्तानान्तरस्योत्पादासंभवात्, संभवे वाऽपूर्वनिष्कर्मसन्तानप्रसवप्रसङ्गात्, न चेदमिष्टं, न द्वितीयः, निष्कर्मणोऽन्त्यक्षणात् कर्मसहकृतविजातीयसन्तानान्तरस्योत्पादानुपपत्तेः कारणानुरूपत्वात् कार्यस्य, अन्यथा सर्वस्मात्सर्वोत्पत्तिप्रसङ्गात्, एवं चान्त्यक्षणस्योपादानतया नारम्भसंभवः, नापि सहकारितया किंचिदनुपाददानस्य सहकारित्वानङ्गीकारात्, उपादानत्वसहकारित्वलक्षणोभयरूपविकलस्य चावस्तुत्वापातात्, अथ न किंचिदारभते इति पक्षः, तर्हि तस्यार्थक्रियासामर्थ्यविरहात् असत्त्वप्रसङ्गः, नहि नैयायिकैरिव सत्तासमवायः सत्त्वमित्यभ्युपेयते भवता येनार्थक्रियाऽभावेऽपि सत्तासम्बन्धादन्त्यक्षणस्य सत्त्वं स्यात्, तथा च तदसत्त्वे तत्पूर्वपूर्वतरक्षणानामपि असत्त्वापत्तिः, अर्थक्रियाकारिण एव सत्त्वोपगमात् यदाह–अर्थक्रियासमर्थं यत्तदेव परमार्थसत्, एवं च सकलस्यापि सन्तानस्यासत्त्वेन कस्योच्छेदो मुक्तिः स्यात्, अथ स्वसन्तानवर्त्तिनं ज्ञानक्षणमजनयन्नपि असौ सन्तानान्तरभाविनं सर्वज्ञज्ञानक्षणं जनयिष्यति तमालंब्य तस्योत्पत्तेः, इतरथा सर्वज्ञताहानेः, तथा चैतावतापि अर्थक्रियाकारित्वात्तस्य सत्त्वमुपपत्स्यते इति चेन्न, एवं रूपसन्तानान्तरज्ञानजनकत्वस्याऽन्त्यक्षणवत् तत्प्राच्यक्षणानामपि सम्भवात् तद्वदेव तानपि आलम्ब्य सर्वज्ञज्ञानोत्पादात्, तथा चान्त्यक्षणवत् तेषामपि सन्तानान्तरज्ञानजनकत्वेनैव सत्त्वं स्यात् न स्वोपादेयक्षणजनकत्वेन तथा च सर्वसन्तानोच्छेदापत्तिः, अथ तेषां स्वसन्तानवर्त्तिज्ञानक्षणजनकत्वेनैव सत्त्वमिष्यते तर्हि तद्वदेवान्त्यक्षणस्यापि तेनैव तदस्तु को निवारयिता, रागादिकर्मवासनाविकलतया सर्वज्ञस्य प्राच्यक्षणेभ्योऽन्त्यक्षणस्याऽविशेषात्, एवं च स्वसन्तानवर्त्त्युत्तरक्षणान्तरजनकतयाऽन्त्यक्षणत्वानुपपत्तिप्रसङ्गः, अथ स्वसन्तानसन्तानान्तरलक्षणक्षणद्वयजनकतया केवलसन्तानान्तरक्षणजनकतया चोभयेषामपि अस्ति विशेषः तेन स्वसन्तानक्षणजनकतयाऽन्त्यक्षणत्वं सन्तानान्तरक्षणजनकतया च सत्त्वमस्येति चेत्, तर्हि वर्त्तमानक्षण

इवातीतानागतक्षणयोरपि तस्य सत्त्वप्रसङ्गः, तत्रापि सर्वज्ञानलक्षणार्थक्रियाकारित्वात्, तदानीं तस्यासत्त्वेन तदनभ्युपगमे वा सर्वज्ञस्यासर्वज्ञत्वापत्तेः, अथानागतक्षणानुत्पादलक्षणार्थक्रियाकारितयाऽन्त्यक्षणस्य सत्त्वं भविष्यतीति चेन्न, अनागतानुत्पादस्य प्रागभावत्वेनानादिसिद्धतया करणायोगात्, अपि चान्त्यक्षणः स्वसन्तानवर्त्तिज्ञानं स्वरूपशक्तिविरहाद् वा न जनयति, उत्तरक्षणे शरीरादिसहकारिप्रध्वंसाद् वा, तदतिरिक्तातीन्द्रियशक्तिप्रतिबन्धाद् वा, न प्रथमः, तदाहि असौ वन्ध्यासुतज्ञानतुल्यतया सन्तानान्तरज्ञानमपि न जनयेत्, न द्वितीयः, संसारावस्थान्त्यक्षण इव संसृत्वरस्य मरणावस्थान्त्यक्षणोऽपि आमुष्मिकजन्मभाविज्ञानं नोत्पादयेत्, मरणक्षणानन्तरमेव प्रेत्यभाविशरीरादेः सहकारिणोऽभावात्, तथा च परलोकाऽभावप्रसङ्गः, न तृतीयः, अतीन्द्रिय-शक्तेरनभ्युपगमात् अभ्युपगमेऽपि तस्य सकलक्लेशजालवैकल्येन तच्छक्तेः प्रतिबन्धकाभावात्, तदेवमन्त्यक्षण-स्यारम्भकत्वेनाऽरम्भकत्वे चान्त्यत्वानुपपत्त्या ज्ञानसन्तानोच्छेदो मुक्तिरिति न संगच्छते, किं चात्मनो बन्धविच्छेदलक्षणत्वात् मुक्तेस्तदत्यन्तोच्छेदस्वीकारे निरधिकरणत्वेन मुक्तिशब्दार्थासिद्धेः सकलभुवनजनगोचरपरमकरुणादीक्षितस्य च बोधिसत्त्वस्यात्मोच्छेदाय उपदेशप्रवृत्तेरसमीचीनत्वात् सर्वेषामत्यन्तप्रियस्यात्मनो विनाशाय प्रेक्षावतां तदुपदेशेन प्रवृत्त्यसङ्गतेश्च, तदेतत्सर्वं मनस्यभिसंधाय सूत्रकृदाह'सन्ताणस्सेत्यादि' सन्तानस्यानादेः ज्ञानकार्यकारणप्रवाहस्य 'न नाशः' आत्यन्तिकन्त प्रध्वंसो न भवति, अन्त्यत्वेनाभिमतस्य क्षणस्य क्षणान्तरारम्भकत्वाभ्युपगमे तदनुपपत्तेः, अथारम्भकत्वं नाभ्युपगम्यते तत्राह- 'फलविरहात्,' अन्त्यक्षणस्यार्थक्रियाया अभावात् पूर्वस्य पूर्वस्य प्राच्यस्य प्राच्यस्येति वीप्सया सर्वेषामित्यर्थः, विरहोऽभावोऽपि प्रसज्जत इति शेषः, न केवलमन्त्यक्षणस्य फलविरहात् असत्त्वं किन्तु तत्पूर्वेषामपि इत्यपिशब्दार्थः, तथाहि यथाऽन्त्यक्षणस्योत्तर-ज्ञानाजनकत्वेन फलविरहात् अवस्तुसत्त्वं, तथा तत्कारणत्वेनाभिमतस्य पूर्वक्षणस्यापि अन्त्यक्षणलक्षणफलविरहात् तथात्वम्, एवं तत्पूर्वस्यापि इत्येवमखिलज्ञानसन्तानस्यापि अवस्तुत्त्वापत्तिः, ननु मा भूद् अन्त्यक्षणस्य स्वसन्तानवर्त्तिज्ञानजनकत्वं तथापि सन्तानान्तरज्ञानजनकत्वं भविष्यति तावता अस्तु तस्य सत्त्वमित्यत आह-'संताणंतर' इत्यादि' अत्र च सन्तानान्तर इति लुप्तसप्तमीकं पदं तेन स्वसन्तानं विहायाऽन्त्यक्षणस्य सन्तानान्तरे कार्ये कर्त्तव्ये सन्तानान्तरजनकत्वस्वीकार इति

यावत्, परलोकः' प्रेत्यभावः 'भे' इति भवतां युष्माकं मते 'न प्राप्नोति' न संगच्छते, एतदुक्तं भवति–एकस्यैव ज्ञानसन्तानस्य तत्तददृष्टवशात् तत्तन्नरकादिषु अपूर्वापूर्वशरीरादिलाभो हि परलोकः, तथा च मुमुक्षुसन्तानान्त्यक्षणवत् संसृत्वरमुमूर्षुसन्ताना–न्त्यक्षणस्यापि उक्तन्यायेन नियामकाभावात् सन्तानान्तरजनकत्वेन कृतार्थतया परलोकाभावापत्तिः, तस्यैव सन्तानस्य गत्यन्तरेषु देहादिप्राप्त्यभावादिति, तदेवं नात्यन्तं सन्तानोच्छेदो मोक्ष इति स्थितम्, एतेन निखिलविद्यावासनोच्छेदे विगतविविधविषयाकारोपप्लवविशुद्धज्ञानोत्पादो मोक्ष इति योगाचाराणामपि मोक्षो निरस्तः, हेत्वभावेनाविद्यावासनोच्छेदानुपपत्तेः, विशिष्टभावनाभ्यासो हि तदुच्छेदहेतुरभ्युपेयते स च सन्तानवर्त्तिसकलज्ञानक्षणान्वयिनो नित्यस्यैकस्याश्रयस्यास्वीकारे प्रतिक्षणमपूर्व इव जायमानोऽतिशयाधानायोगात् कथमविद्यावासनामुच्छिन्द्यात्, तथाच तदुच्छेदाभावे तद्वतो विषयाकारोपप्लवात् पूर्वज्ञानाद् विशुद्धज्ञानानुत्पत्तेः, रागादिविरहितं हि चेतो विशुद्धज्ञानमुच्यते, न च रागादिकलुषितात् ज्ञानात् नीरागं तदुदेतुमर्हति, अनादिरागादिमतो ज्ञानसन्तानात् जायमानानामुत्तरेषां क्षणानां ज्ञानरूपताया इव रागादिरूपताया अप्यनुवृत्तेः, समाध्यादिसंस्कारबलाद् रागादिव्यावृत्त्या नीरागताऽपि भविष्यति, भवतामिवानादिरागादिमतोऽपि आत्मनो वीतरागत्वमन्यथा सर्वज्ञत्वानुपपत्त्या बहुविशीर्येतेतिचेत्, रागाद्युच्छेदहेतोः समाधेः क्षणभङ्गुरत्वेन ज्ञानक्षणेष्वधिरोषयितुमशक्यत्वात्, आत्मनि तु स्थिरतया तदधिरोहस्योपपत्तेर्युक्तं वीतरागत्वं, न च गोलोमादेर्दूर्वादिवद् विसदृशादपि कारणात्कार्योत्पाददर्शनेन रागादिमतोऽपि ज्ञानान्नीरागो ज्ञानोत्पादो भविष्यतीति वाच्यम्, एवं हि पृथिव्यादिभूतेभ्योऽपि ज्ञानोत्पत्तिस्वीकारापत्त्या लोकायतमताभ्यनुज्ञातप्रसङ्गात्, अपि च जीवतः सर्वज्ञस्य ज्ञानं विशुद्धमिति सर्वलोकप्रतीतं, तच्च संसारिसत्त्वानां नीलपीताद्याकारतया ज्ञानानि गृह्णाति नवा, यद्याद्यः पक्षस्तदा तदाकारज्ञानग्राहकतया तस्य तदाकारत्वप्रसङ्गः, अन्ततो नीलपीतादिरूपस्वदेहाकारग्रहेऽपि तस्य साकारत्वात्, तथा च विगतविषयाकारोपप्लवतया तस्य विशुद्धत्वमिति प्रलापमात्रम्, अथ द्वितीयः, तर्हि असर्वज्ञत्वप्रसङ्गः, ज्ञानमात्राग्रहणेऽपि तदीयनीलपीताद्याकाराग्रहणात् निराकारताभ्युपगमे चास्यापसिद्धान्तापत्तिः, सर्वज्ञानानां भवद्भिः साकारत्वस्वीकारात्, एवं च यथेह सर्वज्ञज्ञानस्य विगतविषयाकारोपप्लवत्वं नोपपद्यते तथा मुक्तावपीति कथं विशुद्धज्ञानोत्पत्तिर्मोक्षः

स्यात्, न चाविद्यावासनां विना साकारत्वमभ्युपेयते भवता, तथा च मुक्तावपि तदापत्त्या निखिलवासनोच्छेद इत्यसमीक्षिताभिधानं स्यात्, तस्मात् पूर्वापरसकलज्ञानक्षणानुगामुकस्थिरैकात्माऽनङ्गीकारे विशुद्धज्ञानोत्पादो न युज्यते, तथा च य एवाहं रूपमद्राक्षं स एवाऽहं सम्प्रति स्पृशं स्पृशामीत्यादौ पूर्वापरप्रत्यययोः प्रतिसन्धानान्यथाऽनुपपत्त्या सर्वप्रत्यययानामात्मैवैकः प्रतिसन्धाताऽभ्युपेतव्यः, अन्यथा विशुद्धज्ञानहेतोर्भावनाभ्यासस्याऽनुपपत्तेः, न चालयसन्तानगतानां प्रतिक्षणं जायमानानां ज्ञानक्षणानामत्यन्तसादृश्यादे–कत्वाध्यारोपेणैव प्रतिसन्धानोपपत्तेः, तदतिरिक्तस्थिरैकप्रतिसन्धातृगोचर एकत्वप्रत्ययो भ्रान्त इति वाच्यं, मुख्याभावे भ्रान्तेरपि अनुपपत्तेः, न चैकः प्रतिसन्धाता क्वचिन्मुख्यः सिद्धोऽस्ति भवतां, तस्मात् तदभ्युपगम एव विशुद्धज्ञानोत्पादो घटामियर्त्तीति, एवं च नित्यस्यात्मन एव नित्यज्ञानानन्दमयस्वभावाभिव्यञ्जक आत्यन्तिकसकलकर्मविगमो मोक्ष इति व्यवस्थितमिति गाथार्थः ॥९८॥ तदियता प्रावादुकाभिहितमोक्षस्वरूपनिरासेन स्वपक्षलक्षितमुक्तिस्वरूपमुपपादितं, सांप्रतमात्मनः सर्वगतत्वेन 'मुक्ताः' सर्वत्र तिष्ठन्ति व्योमवत् तापवर्ज्जिता, इति वचनान्मुक्तात्मनामपि तथात्वेन सर्वत्रावस्थितिरिति ये प्रतिजानते तन्मतपाकरिष्यन्नात्मनो देहमात्रत्वव्यवस्थापनेन प्रतिनियतमानस्थानलक्षणविशेषणप्राधान्यविवक्षया मुक्तात्मनां स्वरूपनिरूपणायाह–

**वत्थुसहावो एसो देहतिभागूणजीवमाणेण । ईसीपब्भाराए उप्पिं ओगाहिया सिद्धा ॥९९॥**

**व्याख्या**-'वस्तुनो' मुक्तात्मलक्षणस्य 'स्वभावः' सात्म्यम् 'एषः' अयं वक्ष्यमाणः, यथाहि वह्निवाय्वोरूर्ध्वज्वलनतिर्यक्पवने नियोगपर्य्यनुयोगौ नार्हतस्तत्स्वभावत्वात्, तथा प्रकृतोऽप्यर्थ इति भावः, यत्किमित्याह–देहस्य,उत्कर्षतः पञ्चधनुःशतप्रमितस्य जघन्यतो हस्तद्वयप्रमाणस्य तदन्तर्वर्त्तिनो मध्यममानस्य सिद्धशरीरस्य 'त्रिभागेन' तृतीयांशेन, 'ऊनं' हीनं यज्जीवमानम् आत्मपरिमाणं त्रिभागेन देहान्तःपातिजीवप्रदेशशून्यरन्ध्रपूरणात् त्रिभागन्यूनता द्रष्टव्या तेनोपलक्षिताः सिद्धास्तिष्ठंतीति सम्बन्धः, 'ईषत्प्राग्भाराया' इति, ईषदल्पो योजनाष्टकबाहल्यः पञ्चचत्वारिंशल्लक्षविष्कम्भत्वात् 'प्राग्भारः' पुद्गलनिचयो मध्यदेशे यस्यां सा ईषत्प्राग्भाराऽष्टमी पृथिवी, शेषपृथिव्यो हि रत्नप्रभाद्या महाप्राग्भारा अशीत्यादिसहस्राधिकयोजनलक्षबाहुल्यत्वात्, अथवा

ईषत्प्राग्भारा मनागवनतत्वात् तस्या ईषत्प्राग्भाराभिधानाया मुक्तिभूमेः, 'उप्पिंति' उपरिष्टात् अवगाहन्ते स्म अवतिष्ठन्ते स्म, 'अवगाढाः' इतः समयमात्रेण गत्वा तत्रावस्थिता इत्यर्थः, 'सिध्यन्ति' निष्ठितार्था भवन्ति स्म इति सिद्धाः, मुक्तात्मानः, सकलकुशलानुष्ठानफलभावमापन्ना इति भावः, एतदुक्तं भवति सिद्धिशिलाया ऊर्ध्वं योजनमात्रे नभोभागे लोकान्तो वर्त्तते, तमवधीकृत्य च सिद्धिभूम्युपरिवर्त्तियोजनान्त्यक्रोशषड्भागे त्रिभागान्वितत्रयस्त्रिंशदधिकधनुस्त्रिशतीलक्षणे सिद्धानां परमोऽवगाहो धनुः पञ्चशतीमद्देहवतो हि निर्वृण्वतो जीवस्य मुक्तिदशायां देहत्रिभागन्यूनतया भणितधनुःसंख्याप्रमितत्वेन तावन्नभोभागावगाहोपपत्तेः, तथा चार्षम्, "**ईसीपब्भाराए उवरि खलु जोअणस्स जो कोसो । कोसस्स य छब्भाए सिद्धाणोगाहणा भणिया ॥१॥ तिन्नि सया तित्तीसा धणुत्तिभागो य कोस छब्भागो । जं परमोगाहो यंतो ते कोसस्स छब्भागे ॥२॥**" एवं मध्यमजघन्या– वगाहोऽप्यावश्यकानुसारेण बोद्धव्यः, स्यादेतत् भवत्वेवमवगाहः सिद्धानां, तथापि कथं कर्मनिर्मुक्तस्यात्मनस्तत्र गतिरुपपद्यते, उपपत्तौ वा सततं यत्र तत्र गच्छन्नेव वर्त्तेत, नित्यभ्राम्यतश्च तस्यास्मदादिवन्नित्यानन्दमयत्वमपि कथं श्रद्धीयेत इति चेन्न,' पूर्वप्रयोगादिना तत्स्वाभाव्येन तदुपपत्तेः, तथाहि–विवादाध्यासितो जीवो गतिमान् अनुवर्त्तमानपूर्वप्रयोगजन्यसंस्कारत्वात् व्यार्त्तकंकराद्यभिघातघण्टालालावत् कुलालचक्रवच्च, सिध्यत्वतोऽनुमानात् गतिमात्रं तत्त्वूर्ध्वमेव कथमिति चेत् ? तत्स्वभावत्वादिति ब्रूमः, तथाच प्रयोगः–कर्मविनिर्मुक्तो जीव ऊर्ध्वमेव गच्छति तादृग्नैसर्गिकपरिणामत्वात् वह्निवद् धूमवच्चेत्ति, न चायमसिद्धो हेतुः, आगमात्तत्सिद्धेः ऊर्ध्वगौरवधर्माणो जीवा इत्युदितं जिनैरितिवाचकमुख्यवचनात्, तर्हि तद्वदेव वाय्वादिप्रतिघातात् तिरश्चीनादिगतित्वमपि भवेदितिचेन्न, परिमाणुवत् तस्य प्रतिघातासिद्धेः, न च शरीरादिवत् कुड्यादिना परमाणोरपि प्रतिघात इति वाच्यं, नीरन्ध्रमंजूषाद्यन्तर्भूतानामपि मृगमदादीनां बहिर्गन्धाद्युपलब्धेः, गुणानां च निष्कर्मत्वेन निराश्रयाणां निर्गमनाद्यसंभवात्, यदा च अवयविनामपि कर्पूरादीनां सूक्ष्मपरिणामतयैवमप्रतिरोधस्तदा कैव कथा परिमाणोरिति, यद्येवं तत्स्वभावतया सकर्मणोऽपि आत्मन ऊर्ध्वगतिरेव स्यात्, नाधस्तिर्यगादिगतिस्तथा च बद्धनरकादिगति प्रायोग्यकर्मणामपि नरकादिगतिर्न स्यात्, एवं चानायासेन स्वर्गापवर्गादिप्राप्तेः कस्तदर्थं तपोब्रह्मचर्यादिषु प्रयतेत इति चेन्न, मन्त्रादिना दहनस्वभावस्य वह्नेर्दाहप्रतिबन्धवत्

बलवत्कर्मणा ऊर्ध्वगामुकस्यापि जीवस्योर्ध्वगतिप्रतिबन्धात्, तथा चाधोगत्याद्युपपत्तिः, एवं तर्हि लोकान्तादुपरिष्टादपि गतिप्रसङ्ग इति चेन्न, तदुपग्राहकस्य धर्मास्तिकायस्य तत्राभावात् लोक एव तद्भावप्रतिपादनात् तत्सिद्धमेतत् ईषत्प्राग्भाराया उपरि अवगाढा सिद्धा न तु सर्वत्रावस्थिताः, पूर्वप्रयोगादिना तु समयमात्रमेव तेषां गतिः, तावतैव तज्जनितसंस्कारस्य विलयादिति न तेषां सततमितस्ततः परिभ्रमणेन नित्यानन्दसंवेदनव्याघात इति गाथार्थः ॥९९॥ सांप्रतं सामान्यजीवस्वरूपप्रतिपादनपुरस्सरं सिद्धानन्तज्ञानमयत्वोपदर्शनच्छद्मना ज्ञानशून्या एव मुक्तात्मान इति कुतीर्थ्यमतमपाकुर्वन्नाह–

**जदणंतनेयनाणी जीवो कम्मेहिं वेढिओ न तहा ॥ ता कम्मक्खयभावे अणन्तनाणीणो सया सिद्धा ॥१००॥**

**व्याख्या**-यस्माद्धेतोरनन्तज्ञेयेषु सकललोकालोकवर्त्तिषु प्रमेयेषु 'ज्ञानी' वेदिता यथावस्थितनिखिलत्रैकाल्यभाविपदार्थ–सम्यक्परिच्छेदनिपुण इत्यर्थः, 'जीवः' सामान्येन संसार्यात्मापि, इह च जीव इति सामान्यविवक्षयैकवचनोपन्यासेऽपि यदग्रे सिद्धा इति बहुवचनाभिधानं तद्विशेषविवक्षयेति न विरोधः शङ्कनीयः, अथ यद्येवं स्वभावो जीवः कथं तर्हि पदार्थेष्वस्मदादीनां सन्देहाज्ञानविपर्य्ययोत्पादः, कथं चातीतानागताद्यर्थानवसायः, कथं वा व्यवहितविप्रकृष्टार्थानामसाक्षात्कार इत्यत आह– 'कर्मभिः' ज्ञानावरणादिभिश्चतुर्भिर्घातिसंज्ञैर्वेष्टित आच्छादितोऽनादितत्सम्बन्धात् विलुप्तविशिष्टचैतन्य इत्यर्थः, 'न तथेति' युगपदनन्त–भावतत्पर्य्यायावभासनपटिष्टो न भवति, न खलु पदार्थसार्थप्रकटनपटुप्रभापटलवानपि प्रभाकरः स्वर्भानुमण्डल–तिरोहितवपुः पदार्थमात्रमपि भासयितुं प्रभविष्णुः, एवं च कर्मपटलावृतकेवलज्ञानविलोचनानामस्मदादीनां कथं विषयेषु संदेहादयो नाविर्भवेयुः, कथं चातीतादिविप्रकृष्टादिपदार्थेषु सम्यक्प्रतीतिः प्रादुःष्यात्, यस्मादेवं 'ता' इति तस्मात् कारणात्कर्मक्षयभावे निःशेषतया ज्ञानावरणादिकर्ममलापगमसंभवे 'अनन्तज्ञानिनः. अनन्तज्ञेयविषयत्वात् अक्षयत्वाच्च, अनन्तं तच्च तज्ज्ञानं च तद्विद्यते येषां ते तथा अनन्तसंविद इत्यर्थः, 'सदा' शश्वन्न तु कदाचिदेव तदावारककर्मणस्ताद्दक्कारणसामग्र्याऽऽत्यन्तिकक्षयेण शीतलिकाव्याधेरिव पुनः प्ररोहाभावात् 'सिद्धाः' निर्वृत्तात्मानः, यथा च तेषामनन्तज्ञानित्वं तथा सर्वज्ञसिद्धौ प्राक्प्रतिपादितमिति गाथार्थः ॥१००॥ इदानीमास्तिक्यमुपसंहरंस्तद्वतः सम्यग्दृष्टित्वनिर्णयप्रदर्शनपूर्वकं तस्यैव लिङ्गत्वं समर्थयन्नाह–

**इय भावणासमेओ सम्मद्दिट्ठी न इत्थ संदेहो । इत्तुच्चिय लिंगमिणं अव्वहिचारी ससज्झेणं ॥१०१॥**

**व्याख्या**–इत्युक्तनीत्या भावना यथावदर्हदुक्तजीवादिनवतत्त्वगोचरैवाऽऽस्तिक्यबुद्धिः, तया 'समेतः, सम्पन्नः' 'सम्यग्दृष्टिः' प्राप्तसम्यक्त्वगुणस्थानः 'न' नैव अत्र सम्यग्दृष्टित्वेऽस्य 'संदेहः' संशयः, ऊर्ध्वतादिसामान्यधर्मतति धर्मिणि दोलायमान–स्थाणुपुरुषाकारप्रत्ययवत् पुरुषत्वादिसाधारणधर्मयोगिनि प्राणिनि सम्यग्दृष्टिमिथ्यादृष्टित्वलक्षणोभयकाद्युल्लेखी प्रत्ययः स नास्त्येव, सम्यग्दर्शनोपपादकमिथ्यादर्शनव्यावर्त्तकास्तिक्यधर्मोपलम्भेन स्थाण्वादाविव चक्रकोटरादिविशेषधर्मदर्शनेन न्यायनिर्णीतेऽर्थे तद्व्यावृत्तेः, इदमुक्तं भवति संदिग्धेऽर्थे न्यायः प्रवर्त्तते, नाज्ञाते, न निश्चिते, न खलु नालिकेरद्वीपवासी धूमदर्शनादपि अग्निरत्रेति निश्चिनोति, आजन्मानुपलब्धपूर्वतया धूमाग्न्योस्तेन प्रतिबन्धाग्रहणात्, नापि गृहीतप्रतिबन्धा अपि ज्वालाजालजटिलमनलमवलोकयन्तोऽनुमातारस्तन्निश्चयाय लिङ्गं मृगयन्ते दृढतरप्रत्यक्षेणैव च तत्सिद्धेः, किं नाम पर्वतनितम्बादिव्यवहिततया संदिह्यमानस्यैव तस्य परिच्छित्तये, तथा चाह न्यायभाष्यकारः **''नानुपलब्धे न निर्णीते न्यायः प्रवर्त्तते किं तर्हि संदिग्धे''**इति, तथेहापि आस्तिक्यलिङ्गनिश्चिते सम्यग्दृष्टित्वे क्व संदेहावकाशः, यदि चैवमप्यसौ स्यात्, तदा न्यायस्याप्रामाण्यमेव स्यात् साध्यानिश्चायकत्वात्, नहि संशयविपर्य्ययानास्कन्दितसाध्यज्ञानजनकत्वाद् अन्यदस्य प्रामाण्यं नाम, निर्णायकस्यापि संशयकत्वे संशयानुच्छेदश्चापद्येत, न च लिङ्गान्तरादपि साध्यनिश्चयस्तस्यापि लिङ्गत्वाविशेषेण प्राक्तनस्येव संदेहापादकत्वात्, प्रवृत्तावर्थप्राप्त्या निश्चय इतिचेत् तर्हि किमनुमानेन यत्र यत्र संदेहस्तत्र तत्र प्रवृत्त्यादेरेव साध्यनिश्चयसिद्धेः, एवमस्तु इतिचेन्न, विप्रकर्षादिना प्रवृत्त्यगोचरेऽपि अर्थेऽनुमानात् तन्निश्चयदर्शनात्, अन्यथा कृत्तिकोदयदर्शनाद् रोहिण्यासत्त्यनुमानं न स्यात्, तस्मादिहास्तिक्यात् सम्यग्दर्शनानुमितिसिद्धेर्युक्तमुक्तं नात्र संदेह इति, अत एवाह–'एत्तोच्चियत्ति' यत एव आस्तिक्यरूपभावनावत्तया सम्यग्दृष्टित्वनिश्चयोऽत एव, लिङ्गं साधनधर्मरूपमास्तिक्यलक्षणम् 'इदमेतत्' सम्यक्त्वानु–माषकतयोपन्यस्यमानमव्यभिचारि अविनाभावि, दीर्घत्वं प्राकृतत्वात्, स्वसाध्येन निजानुमेयेन सम्यक्त्वलक्षणेन केकायितमिव पर्वतनिकुञ्जविशेषवर्त्तिना मयूरेण, अयमभिसन्धिः, साध्यनान्तरीयकादेव हि हेतोरनौपाधिकसम्बन्धशालितया साध्यसिद्धिः,

इतरथा विपक्षगामितया व्यभिचारिणोऽपि औपाधिकसम्बन्धवत्त्वेनाऽप्रयोजकादपि च तत्सिद्धिप्रसङ्गात्, तथा चानित्यत्वादिसिद्धौ प्रमेयत्वादिकमपि, श्यामत्वादिसिद्धौ च मैत्रतनयत्वादिकमपि सद्धेतुः प्रसज्येत, तस्मात्साध्याविनाभावी एव हेतुस्तत्सिद्धेरङ्गं, तादृशं चेदं विवक्षितं लिङ्गं तस्मादुपपन्नम्, इतः सम्यग्दर्शनानुमानमिति तथाच—प्रयोगः विवादाध्यासितः पुरुषः सम्यग्दर्शनवान् आस्तिक्यवत्त्वात् अभयकुमारवत्, ननु **''तत्तत्थसद्दहाणं सम्मत्तं मन्नइ तमेव सच्चं । नीसंकं जं जिणेहिं पन्नत्तं''** इत्यादिलक्षणाभ्यां सम्यक्त्वास्तिक्ययोस्तत्त्वार्थरुचिरूपत्वेनाविशेषात् साध्याविशिष्टोऽयं हेतुरिति चेन्न, शुभात्मपरिणाम—रूपसम्यक्त्वकार्यतया तत्त्वार्थविषयसत्यत्वबुद्धित्वेनाऽऽस्तिक्यस्य ततो विशेषात् कार्येण कारणानुमानस्य च पूर्ववच्छेषवदित्यादिसूत्रेऽयं देशोऽभूत् वर्षावान् फलकाष्टादिवाहिफेनिलनदीपूरवत्त्वात् प्रागुपलब्धतादृग्देशवद् इत्याद्युदाहरणोपन्यासेन परैरपीष्टत्वात्, विरुद्धादिहेत्वाभासोद्धारश्च स्वयमूहनीय इति । स्वान्तध्वान्तचयं कपाटविवरैर्निर्गत्वरेणौजसा तज्ज्ञा जात्यमणिं यथाऽपवर—कान्तर्द्धासमध्यासितम् । येनोच्चैरनुमिन्वते तनुमतां सम्यक्त्वमन्तस्थमप्यास्तिक्यं श्रुतसूत्रितार्थविषयं तद्दत्तचित्ते जना इति गाथार्थः ॥१०१॥

न[1] रजनिकृतसाफल्यं सदा न नक्षत्रबुधपरिगृहीतम् । अस्तिकुलं चान्द्रमहो न तमो हत्या येन प्रथितम् ॥१॥ तत्र[2] न वियति प्रसितो बुधो नवीनो न सूर्यसहचरितः । अनिशापतितनयः श्रीजिनेश्वरः सूरिरजनिष्ट ॥२॥ यस्मिन् गोष्ठ्यां कलयति कलां हेलया जल्पकेलीं कण्डूलानामपि[3] निरवधिस्वेदधाराप्रवाहम् । शङ्के सारस्वतरससरयं क्षोभतापानुषङ्गादङ्गान्यन्तःप्लवन शुभगं वादिनामुद्वमन्ति ॥३॥ संप्राप्तेनुविधेयतापदमिति[4] चौलुक्यमाणिक्यतां श्रीमद्दुर्लभराजि जल्पकथया वल्गद्विकल्पस्पृशा । प्रत्याख्यायत दैवदैवकुलिकान् दर्प्पान्नमत्कन्धरान् संविग्नव्रतिनां विहारपदवीं श्रुत्या समाधत्त यः ॥४॥ शिष्यौ बभूवतुरमुष्य [5]मनुष्यमौलेर्दिक्कूलमुद्वहयशःप्रवहप्रबद्धै । आद्यस्तयो प्रतिकलं स्वनिवेशसिद्ध्यै विद्याप्रसाद्यवदनो जिनचन्द्रसूरिः ॥५॥

---

१. नरेत्यादि, न नैव रजने रात्रेः कृतं साफल्यं, प्रकाशादिना येन, नैव नक्षत्रबुधाभ्यां तमोहत्या ध्वान्तध्वंसनेन प्रथितं न चेति विरोधः, चान्द्रकुलं तु गच्छसमुदायरूपं नरजनेर्मर्त्यजन्मनः स्वर्गादिहेतुत्वेन कृतसाफल्यं सदाननैः प्रसन्नतया शोभनवक्त्रैः क्षत्रबुधैः, नतानां मोहत्याजने प्रसिद्धम् । २. तत्रहि वियति प्रतिबद्धो नवीनः प्रत्यग्रः सूर्यसहचरितो निशापतितनयश्च बुधो भवति, अयंतु नवीनोऽपूर्वो बुधो विचक्षणः, नैव विरुद्धयति प्रतिबद्धो नवीनो विगतस्वामिकः न च सूरिभिराचार्यैर्विद्वद्भिर्वा सहचरितः, अनिशम् अपतितनयः, अभ्रष्टाचारः । ३. कण्डूलानां वादखर्जुयुक्तानां । ४. वादिनोर्जयपराजयप्राप्तौ सन्मानखलीकारविधानसमर्थो राजादिरनुविधेयः । ५. दिक्कूलमुद्वहं, दिग्व्यापकं, निवेशो निवासः ।

नर्त्तयितुं संवेगं पुनर्नृणां लुप्तनृत्यमिव कलिना । संवेगरङ्गशाला येन विशाला व्यरचि रुचिरा ।।६।। द्वितीयः प्रज्ञातोऽभवदभयदेवो [1]मुनिपतिर्विविक्तादेयायास्त्वरितमपनीयान्तरपटीम् । अकार्षीद् यो गुह्यस्वरसरससंवेदनकृते नवाङ्ग्यास्तन्वङ्ग्यास्तनुविवरणं कामुक इव ।।७।। तदनुसमभूच्छिष्यस्तस्य प्रभुर्जिनवल्लभो जगति कवितागुम्फा[2] यस्य द्रवद्रसमन्थराः । अनितरकविच्छायापत्त्या चमत्कृतिचुञ्चवो न हृदि मधुरा लग्नाः कस्य स्मरस्य यथेषवः ।।८।। तच्छिष्यो जिनदत्तसूरिरभवच्चारित्रिणामग्रणीर्यो मध्ये समयं[3] विधिं च विषयं सत्पारतन्त्र्यं तथा । एतां सिद्धपदत्रयीं त्रिपथगां लब्ध्वा यथा मातृकां व्याशिष्टाऽहितलक्षणः कृतमुखो विश्वं यथा शाब्दिकः ।।९।। लोलादोलाधिरोहात् काननशिखरिणः कन्दरोत्सङ्गरंगक्षोणीमक्ष्णूणशोभावधिमधिशयिताः पूर्णहृन्नेत्रकर्ण्णाः जीवानून्[4] क्षोत्रवृत्तेर्निशमनमनसामन्तरङ्गं न मातः शङ्के गानच्छलेन त्रिदिवयुवतयो यद्गुणानुद्गिरन्ति ।।१०।। संजज्ञे जिनचन्द्रसूरिरमुतः शिष्यव्रजग्रामणीर्बिभ्रल्लोचनकार्मणं बत नृणां सौन्दर्यमर्यस्तनोः[5] । यो गोपाहिततसंस्तवो गुरुवृषाधिपक्षेपमातन्वतो बालोऽपि प्रतिवादिनो निरजयद् दैत्यानिव श्रीधवः ।।११।। जल्पेन[6] श्रवणामृतेन सदने कान्तेन सिक्तां मुदा यस्योच्चैर्घनसारवर्णकचितां नृत्यत्पदां भारतीम् । वीक्ष्य स्तम्भमुत्थमौनमिषतो मुद्रादरिद्राद् भिया विद्राणा इव वादिनां मुखदरादेकान्तदुःस्था गिरः ।।१२।। सम्यग्दर्शनलम्भनप्रतिभुवो भव्याङ्गिनां भूयसां कीर्त्तिस्फूर्त्तिषु सूत्रधारपदवीमासेदिवांसोऽनघाः । सौभाग्योन्नतिसाक्षिणः स्वकविभोर्लोकंपृणाः प्रोज्ज्वला यस्याद्याप्यविलम्बिनो भुवि गुणा[7] भ्राम्यन्ति शिष्या इव ।।१३।। इति जिनपतिसूरिस्तद्विनयो विधेयो[8] व्यधित विवृतिमेतां पञ्चलिङ्ग्याः सुबोधाम् । यदिह किमपि बद्धं बुद्धिमौग्ध्यादशुद्धं तदुपकृतिधुरीणाः शोधयन्तु श्रुतज्ञाः ।।१४।।

## इति श्रीजिनपतिसूरिविरचितं पञ्चलिङ्ग्या विवरणं समाप्तम् ।।

१. विविक्तादेया विवेकदूग्राह्या हकान्तप्रदेशग्राह्या च, अन्तरपटी तदर्थज्ञानलक्षणा शाटिका च, गुह्यं रहस्यार्थरूपम् उपस्था च, नवांग्याः स्थानाद्यङ्गरूपायाः प्रत्यग्रावयवायाश्च, तनुविरणं सूक्ष्मार्था स्वल्पा वा व्याख्या शरीरप्रकाशनं च । २. कवितामुम्फाः काव्यरचनाः । ३.विधिराज्ञा सम्यक्त्वचारित्रादीनां मिथ्यात्वास्रवादिनिवृत्तिरूपो, जिनार्चा प्रत्युपेक्षादि प्रवृत्तिरूपश्च विषयः, पारतंत्र्यं गुर्वादेः पठितमात्रसिद्धमन्त्रपदवत् यद् विध्यादि पदत्रयं स्वार्थ्याभ्यासमात्रेण साध्यसाधकं तत्सिद्धपदं, त्रिपथगां ज्ञानादिमार्गत्रयानुगतां, व्याशिष्ट व्यानशे अहितलक्षणो गुणैः प्रतीतः कृतमुखः कृती । ४. जीवानून् जीवितौषधानि । ५. अर्यः स्वामी गोपा राजानोऽपि गुरुवृषौ धर्माचार्यधर्मौ बृहस्पतिशक्रौ च । ६. जल्पेन कथाविशेषेणालापेन च घनसारवर्णैः प्रभूतप्रधानाक्षरैः कचितां दीपितां कर्पूरकुंकुमादिचितां च, दरः कन्दरः, मुद्रा दरिद्राः, प्रभूता निर्गर्यादा वा । ७. गुणा ज्ञानदायः, ज्ञानादिभिः सुशिष्यैश्च, स्वविभोः कीर्त्त्यादिविस्फारणं क्रियत एव, लोकंपृणाः समस्तजगदानन्दकाः, अविलम्बिनोऽनवच्छिन्ना निरालस्याश्च । ८. विधेयः प्रतिपादितप्रतिपत्तिपरः ।